॥श्रीकाशीजीमेमहल्लाघुघुरानासामाकीगल्लीआदिविश्वेश्वरकेपासश्रीयुतबाबू[illegible]चंदजीकेबा॥
॥डेमेदुर्गाप्रसादकटारेकेगणेशयंत्रालयमेमनोरमाछापागया।लिखासीताराममिश्रकाछापनेवा॥
॥लाजोपासजिसेलेनाहोयसोचांदनीचौकमेकुञ्जगलीकेपश्चिमफाटककेपासदुर्गाप्रसादकटोरे॥
॥केदुकानमेमिलैगा॥ ॥१९४९॥ Vol. I.

॥श्रीगणेशायनमः॥ ध्यायंध्यायंपरंब्रह्मस्मारंस्मारंगुरोर्गिरः सिद्धांतकौमुदीव्याख्यांकुर्मःप्रौढमनोरमाम् १ हयवरट् हकारोपदेशाः अट् अशहश इ।
ण्ग्रहणेषुहकारग्रहणार्थः अर्हेण अट्व्यवायेऽपीतिणत्वम् देवाहसन्ति भोभगोइतिरोर्यत्वं देवोहसति हशि चेत्युत्वम् लिलिहिढ्वे लिलिहिध्वे विभा
षेटइतिवाढः हलइदंसूत्रं वल्रल्झल्शल्षुहकारग्रहणार्थम् रुदिहि·स्वपिहि रुदादिभ्यः सार्वधातुके इति वलादिलक्षण इट् स्निहित्वा स्नेहित्वा
रलोव्युपधादितिवाकित्वम् अदाग्धाम् झलोझलीति सलोपः अलिक्षत शलइगितिक्सः हलन्त्यम् सूत्रेऽन्त्यमिति हलि अन्त्यमितिविग्रहे सप्तमीतियो
गविभागात्सुप्सुपेतिवासमासइतिभावः यद्वा·षष्ठीतत्पुरुषोयम् स्यादेतत् हलित्येकदेशस्येवंतत्रावृत्त्यैकशेषान्यतममस्तु हस्यलइतिचव्याख्यास्य
तेसामीप्यंषष्ठ्यर्थः यद्वा· मास्तुतंत्रादिः अस्तुसमाहारद्वंद्वः हल्चलचेति. लकारस्यसंयोगांत लोपइतिचेन्नैवम् आद्यसमासस्यक्लिष्टत्वात्·ना
हिब्राह्मणकंबलइत्यादौब्राह्मणसमीपवर्तीअन्यदीपः कम्बलःप्रतीपतेनवाचित्रगुशब्दात् चित्रगवीणांसमीपवर्तीवृक्षादिः प्रतीयतेऽतएवअ
नंतरादिषुनसमासोऽनभिधानादितिस्पष्टमाकरे किंबहुना ब्राह्मणस्यकंबलःचित्रागावोऽस्येतिव्यस्तप्रयोगोपितत्रानिष्टः द्वितीयेपिसंयोगान्तलो
पोदुर्लभः यणःप्रतिषेधारंभात्·नत्वन्त्यास्व्यानपक्षेपिझलोझलीतिझलग्रहणमपकृष्य संयोगांतस्यझलोलोपविधानाच्च किंच·पदार्थबोधंविनावा
क्यार्थबोधासंभवेनहल्प्रत्याहारसिद्धेः प्राक्एतत्सूत्रार्थाबोधेप्रसक्ते तद्द्वारार्थोयंयत्नः अस्यांचावस्थायांहल्पदार्थाप्रसिद्धेः द्वंद्वएवदुर्लभःस
हविवक्षायाअसंभवात् तस्माद्यथोक्तमेवन्याय्यम् मध्यगानामिति आद्यंताभ्यामवयवाभ्यामवयवीसमुदायआक्षिप्यते· तस्यचयुगपद्वक्त्रस्येप्र
योगाभावात्तदवयवेष्ववतरन्तीसंज्ञामध्यगेषुविश्राम्यतिनत्वाद्यंतयोः संज्ञास्वरूपांतर्भावेणतयोःपारार्थ्यनिर्णयादितिभावः स्वस्यचेतिस्वंरूप।
मित्यनुवृत्तेः स्वंरूपंचादेरेवगृह्यते नांत्यस्य अन्त्येनेत्यप्रधानतृतीयानिर्देशात् सर्वनाम्नामुत्सर्गतःप्रधानपरामर्शित्वात् आद्योच्चारणमिति यद्यपि
उपदिश्यतेऽनेनेतिकरणव्युत्पत्त्याशास्त्रमुपदेशइतिभाष्यवृत्त्यादिषुव्याख्यातम् तथापितत्प्रौढिवादमात्रम्·करणेघञोदुर्लभत्वात्ल्युटवा।

एम १

ध्यात् नचघः असंज्ञात्वात् प्रायेणसंज्ञायामितिव्याख्या नस्यक्लिष्टत्वात् नन्तुपाधेरूपाधिर्भक्तीत्यादिनाभाष्यकृतावहेलनाच्च अतएव घापवादोहल
श्चेतिघञ् पीहनवाहुलकन्तु अगतिकगतिः अतएवप्रक्रियन्तेशब्दायाभिरितिकरणव्युत्पत्तिरपिपरास्ता नथाश्चवार्तिकम् अजब्भ्यांस्त्रीखलनाः।
स्त्रियाः खलनौविप्रतिषेधेनेति अतोभावेप्रत्ययएवन्याय्यइतिभावः यत्तु धातुसूत्रेत्यादिपठन्ति प्रव्याचक्षतेकरणव्युत्पत्त्यापूर्वोद्दोपानानाउप
देशत्वम् कर्मव्युत्पत्त्यातु आगमादीनां उणादिलिंगानुशासनयोरपिसूत्रत्वात्सिद्धेपृथगुपादानंगोबलीवर्दन्यायेन एवंगणत्वादेवसिद्धे धातोरवीत्या
दि अत्रेदंवक्तव्यम् किमेषामुपदेशसंज्ञाउतयोगमात्रम् नाद्यः संज्ञायाःशास्त्रकारैरनुक्तेः असंज्ञात्वात् घप्रत्ययोनेति भाष्योक्तेश्च अस्मदादिक
ल्पितसंज्ञायाः शास्त्रव्यवस्थापकत्वेऽतिप्रसंगाच्च आमोमित्वमदन्तत्वादित्यादिस्वपरग्रंथविरोधाच्च नद्युत्सृष्टानुबंधस्यआमोनप्रत्ययत्वेपेनमि
त्वनभवेत् किंचैवंप्रत्ययविधौपंचम्याःषष्ठीप्रकल्पकत्वेसनःसनेवआदेशोस्त्वित्याशंक्यउपदेशाभावादित्संज्ञानस्यादिति भाष्यकैयटोक्त्याकुप्ये
त किंचनधातुलोपइतिसूत्रेधातुग्रहणंकिम् लूञ्लविता पूञ्पवितेतिभाष्यम् उपदेशएवानुबंधलोपेकृतेनतोधातुसंज्ञेत्येवंपरः कैयटग्रंथश्चा
विरुध्येत अपिच घसोरेद्धावितिसूत्रेलोपश्चेति द्विशकारकोनिर्देशः द्वितीयःशकारइदिति अलोन्त्यसूत्रस्थभाष्यकैयटादिकमपिविरुध्येत न
द्वितीयःयोगस्यैवपुरस्कारेपरिगणनस्यव्यर्थत्वात् धात्वादिषुकरणव्युत्पत्तिः आगमादिषुनेतिवैषम्यस्यदुरुपपादत्वाच्च उपदेशताप्रयोजकधातुत्वादि
रूपोपाध्यवच्छिन्नसमुदायांत्यंहलिदित्यर्थइतिस्वग्रंथविरोधाच्चपक्षद्वयेपि लिंगानुशासनस्य प्रकृतानुपयोगात् ह्लोपश्चेतिशकारस्यासंग्रहाच्च आदे
चउपदेशे उपदेशेत्वतइत्यादौ आद्योच्चारणस्यैवउपदेशपदार्थतायाःसर्वसंमतत्वाच्चेति दिक् उपदेशेजनुनासिकइत् यद्यप्यत्रोपजीव्यत्वादनुना
सिकसंज्ञाप्रथमंवक्तुमुचिता तथापिनासिकामनुगतइतियोगाश्चपरोनैवगतार्थत्वादनुनासिकसंज्ञासूत्रंमंदप्रयोजनमितिध्वनयितुंनेहोपन्यस्तंउ
पदेशेकिम् अभ्रओंअपः यद्यपीहउञःऊँइत्यत्रैवविधानसामर्थ्यान्नेत्वमितिसुवचम् तथापिअन्तरार्थमवश्यंकर्तव्यमुपदेशग्रहणंस्पष्टप्रतिपत्तयेइहैव

म॰ र॰
२

कृतं अचि मनिनोमकारस्यभाभूत् प्रतिज्ञापतइति प्रतिज्ञा आतश्चोपसर्गइति कर्मण्यङ्· प्रतिज्ञानुनासिक्यमेषामिति विग्रहः एवंच प्रतिज्ञासमधि
गम्येप्रतिज्ञाशब्दस्यलक्षणेति क्लिष्टव्याख्यानंनाश्रयणीयं पाणिन्युपज्ञं व्याकरणमित्यादिष्विवलक्षणांविनैवनिर्वाहात्· यद्यपिसूत्रकारकृतोऽनुना
सिकपाठइदानींपरिभ्रष्टस्तथापिवृत्तिकारादिव्यवहारवलेनयथा कार्यंप्राकस्थितइत्यनुमीयतइतिभावः ननुरलयोरितिन्यूनंटकारस्यापिमध्यगत्वादि
त्यतआह प्रत्याहारेष्विति व्यवह्रियंतइति प्रत्याह्रियन्ते संक्षिप्यन्तेवर्णायत्रेतिवाहुलकादधिकरणेघञ् यद्यपियोगमात्रमकारादिसंज्ञास्वति प्रसक्तंत
थापियोगरूढइ तिभावः प्रत्याहाराश्चैकचत्वारिंशदिति प्राञ्चः चतुर्दशसूत्रीस्थैर्हलभिरिङ्भिः कृताअष्टाध्याय्यांव्यवहिताएकचत्वारिंशदितितस्या
र्थः तेनसुप्तिङादीनांरप्रत्याहारस्यचपोढितीयाइतिवार्त्तिकस्यचयप्रत्याहारस्यचाधिक्येप्यदोषः यत्तुञमंताड्डइति ञमिञमंतेष्वनिडेकइष्यतेइतिच
ञम् वार्त्तिककृता व्यवहृतइत्याहुस्तद्भमसाभिधानंआद्यस्योणादिसूत्रत्वात्· द्वितीयस्यव्याघ्रभूतिकारिकास्यत्वादित्यास्तांतावत् एवंचसंख्यानिय
मोनातीवोपयुज्यतेइत्युपेक्षितः ऊकालोज्झ्रस्वदीर्घप्लुतइतिसमाहारद्वंद्वः सौत्रंपुंस्त्वम् वांकालइवेति फलितार्थकथनमिदम् विग्रहस्तुवःकालोयस्ये
तिवोध्यः ऊशब्देनस्वोच्चारणकालोलक्ष्यते आपइति निपाताआद्युदात्ताइत्याकार उदात्तः यच्छब्दस्तुफिटस्वरेण अर्वाङ्इति अकारोऽनुदात्तःन
स्यादितः अनंत्रमिति· उपेप्रिवोनित्यत्र उपसर्गइव अविवक्षितमित्यर्थः ननुतत्रइयिवांसमतिस्त्रिधइत्यादिप्रयोगदर्शनादविवक्षास्तुइहतुअविवक्षा
यांप्रमाणंकिमितिचेत् लक्ष्यदर्शनंप्रातिशाख्यादिकंचेतिगृहाण तथाहि· येरा इत्यत्रएकारस्तनूनपाच्छचीपतिमित्यत्रपदपाठेऊदीतोवाद्वौदात्तौ इति
सकलवहृच प्रसिद्धम् तनूनपाच्छचीपतिशब्दयोः उभेवनस्पत्यादिषुयुगपदितिपूर्वोत्तरपदयोराद्युदात्तत्वेकृतेऽनुदात्तंपदमेकवर्जमितिशेषनिघा
तः पूर्वपदभूतयोस्तनूशचीशब्दयोरंत्यस्यपाक्षिकस्वरितत्वं प्रातिशाख्ये उक्तम् जात्यवद्रातथावांतोननूशचीतिपूर्वयोरितितथास्वरिताईस्यउदात्तत्वेप्रा
तिशाख्यमपिएकाक्षरसमावेशेपूर्वयोःस्वरितःस्वरःतस्योदात्ततरोदात्ताद्द्वैमात्राईमेववा अनुदात्तःपरःशेषःसउदात्तश्रुतिर्नचेत् उदात्तंवोच्यतेकिंचित्स्वरितंवा

रम
२

स्वरंपरमिति अस्यार्थः पूर्वयोरुदात्तानुदात्तत्वयोरेकत्र समावेशे सति स्वरितो बोध्यः तस्य स्वरितस्य स्वतंत्रोदात्तापेक्षया उदात्ततरार्द्धमात्रा बोध्येति कवोश्वा
इत्यादिह्रस्वाभिप्रायम् अर्द्धमेवेति दीर्घाभिप्रायम् अनेनैव ह्रस्वस्यापि संग्रहात् व्यापकत्वादिदमेवादर्त्तव्यमिति सूत्रेऽपि तुमेवकारः अनुदात्त इत्यादि परिशे
षसिद्धार्थकथनम् सःशेष उदात्तश्रुतिः स्यात् किमविशेषेणनेत्याह न चेदित्यादि· उदात्तस्वरितपरं विहायेत्यर्थः शाकल्योप्याह· अप्राकृतस्तु यः स्वारः स्वरितो
दात्तपूर्वगः उदात्तायार्द्धमस्यार्थ शिष्टं निघ्नंति कंपितमिति उदात्ताय उदात्तं कृत्वा अर्द्धह्रस्वशब्देन अर्द्धमात्रा लक्ष्यते इति हरदत्तादिग्रंथास्तु मतांतरस्य तत्र्याकथं
चिन्नेयाः केति किमोत् तिन्त्वचिन्तम् य इति अनुदात्तं सर्वमपादादावित्यधिकारादनुदात्तम् अस्त्वा इति अशेः कनिनि न्वरेण आद्युदात्तम् संहितायां तु एकादे
उदात्तेनोदात्त इत्योकार उदात्तः येरा इति द्वयमपि फिट्स्वरेणांतोदात्तम् एकादेशस्तु पक्षे स्वरितः स्वरितो वानुदात्ते पदादावित्युक्तेः मुखं च नासिका चेति वि
गृह्य प्राण्यंगत्वादेकवद्भावे मुखनासिकमिति स्यादत आह मुखसहितेति· तुल्यास्य आस्ये भवमास्यं शरीरावयवाद्यत् इत्यभिप्रेत्याह· ताल्वादीति आभ्यंतरेति
एतच्च प्रशब्दबलाल्लभ्यते तुल्यास्यं किं तत्रा अत्र पकारस्य तकारे परे झरो झरीति लोपो माभूत् प्रयत्नग्रहणं किम् वाक् श्र्योतति अस्य लोपेन माभूत् नमङ्णानाना मि
ति नासिका चेति चकारेण स्वस्ववर्गानुकूलं ताल्वादि समुच्चीयते अनुस्वारोत्तमा अनुनासिका इति तैत्तिरीयाणां प्रातिशाख्यम् यमानुस्वार अनुनासिकानां ना
सिके अनुनासिका आत्तमा इति कात्यायन प्रातिशाख्यं वर्गोत्तमा ङञणनमा अनुनासिका भवंति चशब्दात्स्वस्थानापरित्यागद्वारेण नासिकास्थानं द्वितीय
मेषामित्यर्थ इति तद्भाष्यं च एदैतोरित्यादौ न परत्वमसंदेहार्थेन तु तत्कालग्रहणार्थम् तेन प्लुतस्यापि संग्रहः पूर्वत्रासिद्धं यद्यपं स्वतंत्रो विधिः स्यात्तर्हि त्रिपादी
पूर्वप्रत्यसिद्धा इत्येव लभ्येत त्रैपादिकं तु पूर्वं प्रतिपरं नासिद्धं स्यादत आह अधिकारोयमिति यद्यत्र कार्यासिद्धत्वमिष्येत तर्हि पूर्वत्रासिद्धमिति मनोरथ इत्य
त्रौ उत्वं न स्यात् परत्वात् रोरीत्यस्य प्रसंगात् तथा च पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येति सिद्धांतो व्याकुप्येत अमू अमी इत्यादि च न सिद्ध्येदत आह·
त्रिपादीति· परं शास्त्रमिति च एतेन त्रिपाद्यां विहितं कार्यमसिद्धमित्यादि प्राचां ग्रंथः परास्तः विवृतावतेकंठमिति विवारएषां प्रयत्न इति भावः वर्गयमया इति वर्ग

म.र.
३

गायमगाश्चेत्यर्थः कादय इति लोकप्रसिद्धपाठापेक्षमिदम् चतुर्दशसूत्र्यां मावसानत्वायोगात् अइं विसर्गेति सादृश्यमुच्चारणे लेखने च बोध्यम् ऋऌवर्णयो
रिति आच आच रलौ तौ च तौ वर्णौ चेति विग्रहः उश्च उल् च ऋऌौ तयोर्वर्णयोरितिवा प्रथमान्तेन परिनिष्ठितविभक्त्या वा विग्रह इति सिद्धान्तात् ऋत्यक इति प्रक्र
तिभावः नाज्झलौ आकारसहित इति अत्र च कालसमयवेलासु इत्यादिनिर्देशाः प्रश्ने ये लिंगं न चैवमपि यियासो इत्यादौ गुरोरनृत इत्लिक्षताकारात्परस्य सनः
सस्य षत्वं स्यादेवेति वाच्यम् आश्च आश्चेति द्वंद्वे सवर्णदीर्घे णादीर्घात्परत्रक्तोपि प्रश्लिष्यते इति व्याख्यानात् यणादिकमिति शीतलशब्दे सवर्णदीर्घे आदि
शब्दार्थः अत्रेति अत्रैवेत्यर्थः यद्यपीति ग्रहणकशास्त्रस्य अद्याप्यनिष्पत्तेरिति भावः होढ इत्युपलक्षणं स्मास्वित्यत्र षत्वं वागाश्मीरित्यत्र रूपो ह इति आ
कारस्य घकारः दासीषृत्यादौ दादेरिति घत्वं च नेति बोध्यम् यदि तु विवृतमूष्मणामित्यत्र ईषदित्यनुवर्त्य स्वराणां चेत्यत्र निवर्त्य प्रयत्नभेदो व्याख्यायते
नदानाज्झलाविति सूत्रमास्त्विति भाष्ये स्थितम् वृद्धिरादैच् ऐजिह द्विमात्र एव तात्पर्यत्वान्नेन रूपेणैकत्वमित्यत्र त्रिमात्रो न एवमुत्तरसूत्रेपि तेन गंगोदक
मित्यादौ त्रिमात्रो न भूवादयो धातवः भूश्च वाश्चेति द्वंद्वः आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषः भूवौ आदी येषामिति बहुव्रीहिः भूप्रभृतयो वास
दृशाः सादृश्यं च क्रियावाचकत्वेनेत्यभिप्रेत्याह क्रियावाचिन इति क्रियावाचिनः किम् याः पश्यसीत्यादौ धातुत्वं माभूत् सन्निहितस्मिन् आतो धातो
रिति स्यात् भ्वादयः किम् हिरुक् पृथक् इत्याद्यव्ययानां शिष्ये इति भावार्थ तिङन्तस्य च माभूत् स्तंभादीनामुदित्करणेन सौत्राणां धातुत्वज्ञापने चुलुंपा
दीनां तु बहुलमेतन्निदर्शनमिति गणसूत्रेण संग्रहः चादयः अद्रव्यार्थाः किम् पशुः लिंगसंख्यान्वितं द्रव्यं इह तु स्यादेव लोधं नयन्ति पशु मन्यमानाः प
शु इति स[illegible]सर्गाः निस् दुस् इति सान्तौ निसस्तपताविति निर्देशात् अयोगवाहानामविशेषेणेति प्रकरणे निष्कृतं दुष्कृतमित्युदाहृत्य इदुदुप
धस्य सकारस्य[illegible]विसर्जनीय इति भाष्यकारोक्तेश्च उपसर्गस्यायताविति सूत्रे वामनोप्येवम् निरः कुषः सुदुरोरधिकरणे इति निर्देशाद्रेफान्तावपीति
तत्रैव सूत्रे हरदत्तः इति संज्ञाप्रकरणम् इको गुणवृद्धी गुणवृद्धिशब्दाभ्यामिति एतच्च पूर्वसूत्राभ्यां गुणवृद्धिपदे अनुवर्त्य गुणो वृद्धिरिति ये गुणवृद्धी द

गम
३

त्तियोजनयालभ्यते तेनेहनदिवऔत् द्यौःपन्थाः त्यदादीनामः सद्मं षष्ठ्यंतमिति· सूत्रे षष्ठ्यंतस्यानुकरणाच्छब्दस्वरूपपरतयानपुंसकत्वात्सोर्लुगितिभावः प-
दमिति तच्चसंभवतिसामानाधिकरण्ये इगंतस्यांगस्येत्यादिक्रमेणसंबध्यते मिदेर्गुणः मृजेर्वृद्धिरित्यादौतुसामानाधिकरण्यासंभवात्· मिदिमृज्योरवयवस्ये
कइतिसंब[illegible]नुइक एवस्थानेस्तइतिप्राचाव्याख्यातंयच्चनद्वीकाकृतोक्तम् अनियमप्रसंगेनियमार्थमिदमित्यादितत्सर्वंभाष्यविरोधादुपेक्ष्यंत ।
च्छेषपक्षंदूषयित्वापदोपस्थितिपक्षस्यैवभाष्येसमर्थितत्वादित्याहुः तच्छेषपक्षेपिदूषणोद्धारस्तुशब्दकौस्तुभेस्पष्टीकृतोऽस्माभिः अचांमध्यइति यत्तुप्राभ-
चोक्तं अंत्यादचःपर इतितन्न शमुचादीनामित्यादौअंत्यस्याचोऽसंभवात्तस्यैवांतावयवइति तेनत्रपूर्णीत्यादौ अंगस्यनांतत्वेनदीर्घःसिद्धःपरादित्वेतुसनसि-
ध्येत् अभक्तत्वेतुवहंलिहइत्यत्रवहाभ्रेलिहइतिखशिअरुर्द्विषदिति मुमिमोनुस्वारोनस्यात् अपदान्तत्वात् यत्तु अभक्तत्वेत्रपूर्णीतिदीर्घोनस्यादि-
तितन्नदादिग्रहणस्यादितुमर्थमिति अंगसंज्ञासूत्रस्थवार्तिकेनैवदूषितप्रायम् स्थानेयोगेति स्थानेनयोगोऽस्याइतिविग्रहःनिपातनादेत्वम् अनेका-
विधमिति स्थानार्थगुणप्रमाणकृतमित्यर्थः वलीयइति तेनचेतास्तोतेत्यत्रप्रमाणतआन्तर्यंवानकारोनेतिभावः तस्मिन्निति सप्तम्यन्तानामनुकरणंनि-
शब्दोनैरंतर्येपरः दिशिरुच्चारणक्रियः अचियणित्युक्तेव्यवहितेऽव्यवहितेचसतिप्राप्ते अव्यवहितस्यैवेति पूर्वस्यपरस्यचप्राप्तमपूर्वस्यैवेतिचनियम्यते
अव्यवहितस्येतितुफलितार्थकथनंपरस्ययदिति तस्मादित्युत्तरस्यादेरितितुनसूत्रितं आदेरित्यंशस्यसर्वादेशबाधकत्वापत्तेःसिद्धान्तेतुपरत्वात्सर्वादे-
शत्वबाधकमित्यनुपदमेववक्ष्यति अनेकाल्शित उदाहरणमिदमइश् इतः यत्तुवृत्तिकृताजश्शसोःशिरित्युदाहृतम् तन्न· सर्वादेशतायाःप्राक्शित्वस्य
वाभावात् तत्रहिडाणलोरिवआनुपूर्व्यादनेकाल्त्वेनैवसर्वादेशत्वमितिसिद्धांतः इत्यादाविति आदिशब्देनअतोभिसऐस इतिगृह्यतेपरत्वादिति अतएव
वश्चादेःपरस्येतिपृथक्क्रियतइत्युक्तम् उत्तरस्येत्यंशस्तुआशेसोरपिप्रवर्ततएव यत्तुप्राचा आदेरिति सूत्रंविहायवतापंचमीनिर्देशेनेत्याद्युक्तंतदसंबद्ध-
मितिस्पष्टमेव परनित्येति परान्नित्यंयथातुदतिरुणद्धि परमपिलघूपधगुणंबाधित्वाश्नमोनयारधेर्णिचुरंधयतिपरामपिउपधावृद्धिंबाधित्वारधिज-

भोरितिनुम् न च सोपि शब्दांतरप्राप्त्याऽनित्य इति वाच्यम् कृताकृतप्रसंगमात्रेणापि क्वचिन्नित्यताभ्युपगमात् अंतरंगं यथा उभयेदेवमनुष्या इह प्रथम
चरमेति परमपि विकल्पं बाधित्वा सर्वादीनि इति सर्वनामसंज्ञा विभक्तिनिरपेक्षत्वेनांतरंगत्वात् नित्यादंतरंगं यथा ग्रामणिनीत्यत्र नित्यमपि कुलस्य णत्वं नु
मं बाधित्वांतरंगो नपुंसकह्रस्वः अन्यथा नित्यत्वान्नुमि कृतेऽनजंतत्वाद्ध्रस्वो न अपवादोपि यद्यन्यत्र चरितार्थस्तर्ह्यंतरंगेण बाध्यत एव तद्यथा अयजे
इन्द्रं ग्रामे इह सर्वे इत्यं अत्रांतरंगेण गुणेन सवर्णदीर्घो बाध्यते स च यद्यपि यण्गुणयोरपवादस्तथापि समानाश्रये चरितार्थः तथा च वार्त्तिकम् इण्डि
शीनामाङ्गुणः सवर्णदीर्घत्वादिति · असिद्धमिति तेन पचावेदमित्यादौ एत्वस्य इत्यं त्वं न अकृतव्यूहा इति यद्यपि कृतमपि कार्यं निवर्तयन्तीति परिभाषांतरं प्रा
प्नोते फलं चैतुल्यं तथापि अकृते त्येव लघु प्रक्षालनाद्धि पंकस्य दूरादस्पर्शनं वरमिति न्यायादिति भावः नकुर्वंतीति यथा निषेदुषीमित्यादौ कसोरिट् अंत
रंगत्वात्प्राप्तमपि अभाविना संप्रसारणेन वलादित्वं नंक्ष्यतीत्यालोच्य न कुर्वंतीत्यर्थः ॐ इति परिभाषाप्रकरणम् ॐ इकोयणचि प्रत्याहारग्रहणेषु नह्याच्य
वाच्येन निरूढलक्षणादीर्घोज्झसि चेति ज्ञापकात्स्वादिष्व इत्यादिनिर्देशाच्च तेन इकुठ्छब्देन षट्षष्टिर्गृह्यंते यणशब्देन सप्रभाव्यमानत्वेन सवर्णग्राहक
त्वेपि गुणानामभेदकत्वेनानुनासिकानामपि यवलानां ग्रहणात् अतो नास्ति यथासंख्यम् न चेलक्ष्यार्थबोधात्पूर्वभाविनं शक्यार्थबोधमादाय यथासंख्य
मस्त्विति वाच्यम् एवमपि तृतीयचतुर्थाभ्यां ऋकारलृकाराभ्यां प्रत्येकं त्रिंशदुपस्थितौ लृवर्णानां रेफादेशस्य ऋवर्णानां लादेशस्य च प्रसंगात् तस्मादिह
स्थानेंतरतमसूत्रेणैव सिद्धिरित्यभिप्रेत्याह स्थानत आन्तर्यादिति अनविवद्वेति यरोनुनासिक इति पूर्वसूत्राद्वाग्रहणमनुवर्तत इति न्यासोद्योत इति सू
त्रे कैयटः एवं च सर्वत्र शाकल्यस्येति सूत्रेनाप्यपंचसूत्रं पूर्वोत्तरसूत्रद्वयं च नारंभणीयमिति भावः यत्तु दीर्घोदाचार्याणामिति सूत्रे आचार्यग्रहणं पूजार्थमित्य
भिप्रेत्य वा कृवाकृ इति भाष्योदाहृते हि त्वविकल्पे उपपत्तिं विनार्थक्लिष्टं तेन तन्मुधैव पूजार्थतायाः प्रामाणिकैरनुक्तेः अनुप्रभृतिष्विति सूत्रे शाकटायनग्रहण
स्यापि तथात्वापत्तेः न चेष्टापत्तिः संस्कर्त्ते तिन्निमकारपरकैयटहरदत्तादिग्रंथविरोधात्स्वग्रंथविरोधाच्च अतएव प्रातिशाख्यभाष्येपि आत्वारथमिति मंत्रे तत्का

रस्पद्वित्वविकल्पउदाहृतः माधवेन च आस्तेइत्यत्र सकारस्य द्वित्वविकल्प उक्तः एवंच धात्वंश इत्यत्र तकारस्य द्वित्वं असदित्युक्तिरेव असतीति दिक् स्थानिव।
दादेश इति धात्वंगकृत्तद्धिताव्ययसुप्तिङ् पदादेशा इति प्राचोक्तम् तत्किं परिगणनं उदाहरणमात्रं वा नाद्यः सिव्यक्तचङ्ङादीनामादेशस्य शानच श्चासंग्रह
पत्तेः नान्त्यः अव्ययस्यांगपदाभ्यां पृथग्ग्रहणवैयर्थ्यात् प्रस्तुत्येति वृत्तिकारोक्तं तदुदाहरणमपिमंदम् क्वामात्रस्य अनव्ययत्वात् कृत्त्वेन सिद्धत्वाच्च इत्या
शयेनाह आदेश इति अनल्विधाविति किम् तेन तस्मात्तस्य तस्मिंश्च विधौ माभूत् तत्र अलाविधौ यथा व्यूढोरस्केन अत्र सकारस्य स्थानिवत्त्वेन विसर्गेवद
इत्वमाश्रित्य अड्व्यवाय इति णत्वं प्राप्तं अलः परस्य द्योः पन्थाः हलङ्यादिलोपेन अलो विधौ ह्युकामः वलिलोपेन अलि विधौ यजेः क्तः कदुष्टः हशि चेत्तु
त्वं अल्चेह स्थान्यवयव एव गृह्यते न त्वादेशावयवः तेन रामायेत्यादौ सुपि चेति दीर्घः सिध्यति न द्विधौ हियजादित्वं नाश्रितं यश्चादेशावयवः न तु स्था।
न्यवयव इति तदेतत्फलमभिप्रेत्याह नतु स्थान्यलाश्रय इति आश्रयणं चेह यथाकथंचिन्न तु प्राधान्येनैवेत्याग्रहः तेन प्रपठ्येत्यत्र वलादिलक्षण इ।
ण न तन्निषेधादिति स्थानिवत्त्वनिषेधादित्यर्थः अल्विध्यर्थमिति तेन व्रश्चेत्यत्र वस्य संप्रसारणं न उरदत्वस्य स्थानिवत्त्वेन संप्रसारणतया न संप्रसारणे इ
ति निषेधात् न चोरदत्वं परनिमित्तं नेति वाच्यम् अंगाक्षिप्ते प्रत्यये परे तद्विधानात् प्रागभ्यासविकारेभ्यो गाधिकार इति पक्षं दूषयित्वा आसप्तमसमाप्तेरि
ति पक्षस्य आकरे सिद्धांतितत्वात् किंच पूर्वसूत्रेण स्थानिप्रयुक्तमतिदिश्यते न त्वादेशप्रयुक्तं वार्यते नायक इत्यादौ एचोयवायाव इत्यादीनामप्रवृत्तिप्रसंग।
त् अनेन तु वार्यते शब्दाधिकारमाश्रित्य भावाभावयोरुभयोरपि अतिदेशोयमिति स्वीकारात् न पदांतेति सूत्रे यलोपदीर्घादिग्रहणं चेह लिंगं अत एव ग
शयतीत्यादौ न वृद्धिः स्थानिनिमित्तयभवत्यास्तस्या आदेशेऽप्यभावातिदेशात् उक्तं च कामममतिदिश्यतां वासच्चासच्चापि नेह भारोऽस्तीति स्यादेतत् पूर्वत्वस्य सावं।
धित्वेन संनिहितस्यैव अवधित्वमुचितम् संनिहितं चेह त्रयं स्थानी आदेशो निमित्तं च तत्र न तावत्स्थानी अवधिस्तस्यादेशेनापहारात् नाप्यादेशनिमित्ते।
वैयाकरण इत्यत्र ऐकारस्यायादेशापत्तेः इत्याशंक्याह अचः पूर्वत्वेन दृष्टस्येति पूर्वत्वमुपलक्षणं न तु विशेषणमिति भावः एतेन अचः पूर्वत्वविज्ञानादैवो

म.र.
५

निवत्वात् न च न पदांते तिनिषेधः इह विधेयस्य लोपस्य पदानवयवत्वात् पदांतस्य स्थाने विधानेनेति व्याख्याने तु नेदं सिध्येत् सुवन्नाणि जितिहरदन्तादि
मतेऽन्तर्वर्तिसुपापदत्वात् न चेष्टवदित्यतिदेशेन णिचि विभक्त्वेन पदत्वबाधः णिचो लुप्तत्वात् न च प्रत्ययलक्षणं वर्णाश्रयत्वादिति भावः द्विर्वचनादेचेतिय
लोपादय आदिशब्दग्राह्याः वरे इति तु वरेयोऽजादेशः स न स्थानिवदिति व्याख्येयम् सहविवक्षाभावेपि निपातनाद्द्वन्द्वः सप्तम्यलुक् च अथोदाहरणानि पा-
दान्नेकानि संति कौ सः द्विर्वचने सुध्युपास्यः वरे यायावरः यश्च यङ इति वरच् अतो लोपः स च आतो लोप इटि चेत्यालोपे कर्तव्ये न स्थानिवत् यलोपे यातिः या
तेर्यङन्तात् क्विच् अतो लोपः यलोपः अल्लोपस्य स्थानिवत्वादातो लोप यलोपे न च पुनरालोपः शंक्यः चिणो लुङ्न्यायेन आतो लोपस्यासिद्धत्वात् स्थानिवद्भावात्
च स्वरे चिकीर्षकः सनोऽतो लोपः क्लिनीति ककारे कारस्य उदात्तत्वे कर्तव्ये न स्थानिवत् सवर्णानुस्वारयोः शिण्ढि १ दीर्घ प्रतिदीव्नः जशि सग्धिश्च मे अदनं ग्धिः अ
देः क्तिनि बहुलं छंदसीति घस्लृ आदेशः घसिभसोर्हलि चेति उपधालोपः झलो झलीति सलोपः धत्वं घस्य जश्त्वं सह स्य स इति सूत्रात् स इत्यनुवर्तमाने समानस्य
छंदस्यमूर्द्धप्रभृत्युदर्केषु इति सूत्रेण सः चरिजक्षतुः संयोगांतस्य तदंतस्येति अलोन्त्यपरिभाषयेति भावः यद्यपि विशेषणेन तदंतविधिलाभात् संयोगस्य
न्येवं स्त्रयितुमुचितं तथापि प्रत्येकं संयोगसंज्ञेति पक्षे दृषत्करोतीत्यादौ लोपं वारयितुं संयोगावंतौ यस्येति द्विवचनं तेन समासलाभार्थमंतग्रहणं वृ
त्तौ हि उपसर्जनानामेकत्वसंख्या औत्सर्गिकी द्वित्वादिकं तु पदं तल्लभ्यमिति भाष्ये स्थितम् यण इति वाचनिकं यद्वाऽव्याख्येयः व्याख्या च द्रु धा झलो झ
लीत्यतो झल्ग्रहणमपकृष्य झल एव लोपो विधीयते इति अंतरंगे लोपे कर्तव्ये वहिरंगस्य यणोऽसिद्धत्वमिति वा न च षाष्ठी असिद्धपरिभाषा त्रिपाद्यां स्य
त्वेनासिद्धमंतरंगलोपं न पश्यतीति वाच्यं कार्यकालपक्षाभ्युपगमात् न च नाजानंतर्ये वहिष्ट्वप्रक्लृप्तिरिति निषेधः तस्यानित्यत्वादुत्तरकालप्रवृत्ते लोपे जानं
तर्याभावाच्च तथा च वार्तिकं संयोगांतस्य लोपे यणः प्रतिषेधः न वा झलो लोपात् वहिरंगलक्षणत्वाद्वेति इह यथोद्देशपक्षे आद्यं वार्तिकद्वयं तृतीयं तु कार्यका
लपक्ष इति विवेकः यत्त्वाहुः वार्तिककृतो वचनं प्रत्याख्यानप्रकारद्वयं तु भाष्यकृत इति तन्निर्मूलम मतभेदे प्रमाणाभावात् यदप्याहुः काव्यं कलत्रं शाल्वं च।

राम
५

आचक्षाणः कावृकलतृशाल् अदभ्नयतेरधविति तद्रपिन पक्षत्रयेपि संयोगांतलोपस्य दुर्लभत्वात् आद्यपक्षद्वयेकरूप्यार्थं पूर्वं पूर्वमन्तरंगं परंपरं ब
हिरंगमिति अद्भ्योपणिलोपयोरसिद्धत्वस्यसुवचत्वात् अतएवकातंत्रपरिशिष्टेशुल्कयतेः क्विपिशुल्कइत्युदाहृतम् वांतयोः क्विपिऊठोदुर्वारत्वात् नच
स्थानिवत्त्वम् क्वौविधिंप्रतितन्निषेधात् विचिलोपोव्योरित्यस्यप्रसंगाच्च गिरिवेश्मयतेस्तु क्विपियणःप्रतिषेधार्थवचनारंभपक्षेगिरिवेट् इत्युचितम् प्र
त्याख्यानपक्षेतु मांतमेवेति दिक् इतिपक्षइति पक्षद्वयस्यापिभाष्येस्थितत्वादितिभावः चत्वारिरूपाणीति यत्तुवदन्ति धकारयकारोभयद्वित्वे उभयोःपुनर्द्वि
त्वेलोपविकल्पेन्यतरद्वित्वेऽनुभयद्वित्वेच नवरूपाणि तथाहि एकधंत्रिधा एकयंद्वियंत्रियंच एवंद्विधंत्रिधंचत्रिधेति नचांतरंगेद्वित्वे वहिरंगस्ययणः सि
द्धत्वंत्रैपादिकेंतरंगेवहिरंगपरिभाषानप्रवर्तते इति विसर्जनीयसूत्रेभाष्यकैयटयोर्व्यवस्थापितत्वात् इति अत्रेदंवक्तव्यं पुनर्द्वित्वमशुद्धं एकस्यांव्यक्तौ
एकंलक्षणंसकृदेवप्रवर्तते इति एकःपूर्वपरयोरितिसूत्रेभाष्येसिद्धान्तितत्वात् अन्यथाद्वित्वानामानन्त्यापत्तेः नचझरोझरीतिहलोपमामितिचलोपेनति
र्वोहः लोपस्यवैकल्पिकत्वात्कथमन्यथात्रिधंत्रिधंचेतिभवदुक्तिःसंगच्छेत किंचएवंसतिसर्वस्यद्वेइतिद्वित्वमपिपुनःपुनःप्रवर्तेत अतएवलिटिधातोरि
तिसूत्रेऽनभ्यासग्रहणंभाष्येप्रत्याख्यातं सन्नन्नाघङ्न्नाह्णाणिचिचङि द्वित्वाभावार्थंनद्दितितुकैयटादिभिरुक्तं तस्मादिहत्र्यजपञ्चमादीनिरूपाणिस्वीकु
र्वारूपानन्त्यमितिनवोक्तिरसंगतैव सकारद्वित्वेनाष्टौ विसर्गद्वित्वेनषोडशेतित्वन्यदेतत् यदप्युक्तम् त्रैपादिकेंतरंगेइत्यादि तदपिन नाकुँटः नार्पत्यइत्य
त्रविसर्गनिवारणायवृद्धेरसिद्धत्वस्यतत्रैवभाष्येस्पष्टत्वात् संयोगांतलोपेयणःप्रतिषेधइत्यस्यवहिरंगत्वेनप्रत्याख्यातत्वात् अयमपितथैवानूदितत्वा
च्च तस्मादिहयथोद्देशपक्षोग्राह्योवहिरंगपरिभाषायाअप्रवृत्तये तथाचभाष्येमयःपरस्ययणोद्वित्वंदध्यत्रेत्युदाहृतं नचैवंमपिइकोसवर्णेइतिशाक
ल्येनरूपांतरमस्त्विति वाच्यं समासेतन्निषेधात् नचनित्यसमासेनिषेध इति वाच्यम् भाष्येनित्यग्रहणस्यप्रत्याख्यातत्वात् यथोत्तरंमुनीनांप्रामाण्यात्।
नन्विहयणेवदुर्लभः सुधीशब्दस्यध्यायतेःसंप्रसारणं निष्पन्नत्वेनसंप्रसारणाच्चेतिपूर्वरूपापत्तेरितिचेन्न संप्रसारणपूर्वत्वेसमानाङ्ग्रहणंकर्त्तव्यमितिवा

म॰र॰
६

र्त्तिकोक्तेः संप्रसारणास्थानिकस्य अनथानावद्दइतिकेचित्तन्नपूनइत्य स्यासिद्धेः नवैवमपिनभूसुधियोरितियणिनिषेधःशंकाः आंगत्वेनप्रत्ययेपरतएवतस्यप्रवृ
त्तेः अनंतरस्येतिन्यायेनणस्नेकाचइतिओः सुपीतिचसूत्रद्वयेनप्राप्तस्यैवनिषेधाच्च धात्रंशइति अत्ररेफस्यद्वित्वेनद्वित्वप्रकरणेरहाभ्यामितिसाक्षाच्छ्रुतेन
निमित्तभावेनरेफस्यकार्यित्वबाधनात् सुध्युपास्यइत्यादौस्थानित्वेननिमित्तत्वमिकस्तस्मादित्युत्तरस्येत्यादिनिर्देशात् ज्ञापकात् नबाध्यतेइतिकैय्यटः तका
रस्यतुद्वित्वंभवत्येवेत्युक्तम् तच्चवेत्यतोत्ररूपद्वयंलाकृतिरितित्वेकमेवहलोयमांलोपःस्यादेतिझयोहइत्यतोऽन्यतरस्यामित्यनुवृत्तेः एतच्चलणसूत्रेभाष्ये
स्पष्टम् माहात्म्यमिति अत्रमलोपोनेत्यर्थः हलोयमांयमिसवर्णेलोपइतितुनसूत्रितम् आर्ध्मीत मृड्डुः शार्ड्डुः आत्विरित्यादौरेफात्परस्यलोपापत्तेः वांतो
यियकारादाविति विशेषणमात्मानस्यसंज्ञास्यादित्येतदर्थकस्ययेनविधिरितिसूत्रस्यअपवादभूतेनयस्मिन्विधिस्तदादावल्ग्रहणइतिवार्त्तिकेना
यमर्थोलभ्यते ओरोतोरिति पूर्वसूत्रेतयोरेववान्तोप्रतिस्थानित्वेननिर्णीतत्वादित्यर्थः ननुगव्यूतिरित्यत्रहलिसर्वेषामितिलोपःशाकल्यस्येतिवा
लोपः स्यादित्याशंक्याह वान्तइत्यत्रेतिलव्यमिति लुनातेरचोयत् सार्वधातुकार्द्धधातुकयोरितिगुणः अवश्यलाव्यमिति ओरावश्यकइतिण्यत् क्षय्य
मितिशकिलिङ्चेतिचातत्कृत्याः श्येयमिति अर्हेकृत्यतृचश्चेतिकृत्यः हरएहीति इहओमाङोश्चेतिपररूपंप्राप्तम् उरण्रपरः आंतरतम्यादितिर
फशिरस्कस्यअरइत्यस्यरेफद्वारकारेणस्थानसाम्यादित्यर्थः पक्षे —— द्वित्वमिति ऋधेर्धस्येतिभावः लोपोवेति झरोझरिऽन्यतरस्यामितिसूत्रा
द्विकल्पानुवृत्तेरेतच्चनाज्झलावितिसूत्रेभाष्यकैय्यटयोस्स्पष्टम् प्राचस्तुविकल्पानुवृत्तेरनुक्तेर्न्यूनता। यदपिव्याख्यातृभिः शरोचीतिज्ञापकमभिप्रे
त्यतत्रविसंवादार्थंभाष्यमुपन्यस्तम्। अनुवर्ततेविभाषाशरोचियद्वारपत्ययंद्वित्वमिति तन्न तदुत्तरभाष्येएवउक्तज्ञापकस्यदूषितत्वात्। लोपस्यहिनि
त्यत्वेऽचोरहाभ्यामितिद्वित्वंलोपापवादः स्यात्। तथाचशरोचीत्यस्यसार्थक्यंस्पष्टमेव। तस्माद्विकल्पानुवृत्तौज्ञापकांतरमनुसर्तव्यम्। भाष्यकारादिव्याख्या
नमेवबाशरणम्। द्वित्वलोपयोरिति। यत्तुद्वित्वविधानसामर्थ्याद्वा वेवशिष्येतेइतितन्न। लोपस्यवैकल्पिकत्वेनद्वित्वस्यपक्षेचरितार्थत्वात्। त्रिधमिति यणो

ए॰
६

मयइतिलक्षणांतरेणपुनर्द्वित्वे चतुर्द्धमपिबोध्यम्।एत्येधत्यूठ्सु।अत्रएचीत्यनुवर्तते।तच्चएतेरेवविशेषणं नत्वेधतेः।अव्यभिचारात्।नाप्यूठोऽसंभवा
दितिवृत्तिकारः।अत्रकैयटः।एधतेरपिविशेषणं माभवान्प्रेदिधदित्यत्रव्यभिचारसंभवात्।यद्यपीदंकैयटपुस्तकेषुप्रायेणानदृश्यतेतथापिक्वचित्दृश्यतएव
व।नचणौचङीतिह्रस्वेकृते नापमेधतिरितिवाच्यम्।एकदेशविकृतस्यानन्यत्वात्।नचैवमपिअजादेर्द्वितीयस्येतिधिशब्दस्यस्थानेधिधिशब्दादेशेसति
वस्तु सोऽरिवप्रकृतिप्रत्ययविभागसंमोहइतिवाच्यम्।द्विष्प्रयोगोद्विर्वचनंषाष्ठमितिषाष्ठभाष्येसिद्धांतितत्वात्।अन्यथाइहैवणिलोपोनस्यात्।जिघांसती-
त्यादौसनःसकारेणविशिष्टस्यद्वित्वेकृतेकुत्वंचनस्यात्।नचांतरंगत्वात्प्रथमंचङीतिद्वित्वेकृतेह्रस्वोनभवत्येवेतिवाच्यम्।ओणेऋदित्करणेनबहिरंगस्या
पिणौचङीतिह्रस्वस्यप्रथमंप्रवृत्तिरितिज्ञापितत्वात्।अत्रमाधवः।माभवान्प्रेदिधतइत्यत्रनातिप्रसंगः।एधंतस्यशब्दांतरत्वादेधतिग्रहणेनाग्रहणात्।
अतएवहिनभामुपूकमिगमीत्यत्रएधंतानांचभादीनामुपसंख्यानमित्युक्तम्।तत्रैवशब्दांतरत्वादप्राप्तावुपसंख्यानमितिकैयटन्यासकारहरदत्तादिभि
स्तैर्वैरेवोक्तम्।किंचण्यधिकस्यापिग्रहणेउपसर्गात्सुनोतीत्यत्रअभिषावयतीत्युदाहृत्यएधंतेनाभेर्योगात्सुनोतिंप्रत्यनुपसर्गत्वात्कथंषत्वमित्याशंक्या
भेःप्रकृत्यर्थविशेषणत्वेनसमाधानंभाष्यकाराद्युक्तमसंगतंस्यात्।नचहेरचङीतिलिंगात्प्रकृतिग्रहणेण्यधिकस्यापिग्रहणमितिभ्रमितव्यं।ज्ञापकस्य
कुत्वमात्रविषयत्वात्।तथाचवार्तिकम्हेरचङिप्रतिषेधानर्थक्यमङ्गान्यत्वात्।ज्ञापकंतुचङोऽन्यत्रएधंतेकुत्वमात्रस्येति।तस्माद्युक्तिविरोधाद्भाष्यवार्तिकवृत्ति
न्यासादिग्रंथैःपूर्वापरग्रंथेनचविरोधादुपेक्ष्योऽयंकैयटइति।अत्रेदंवक्तव्यम्।अस्तुविशिष्टस्यशब्दांतरत्वंतावतापिप्रकृतिभागस्यएधरूपताकेनापगतमिति
परिभाव्यताम्।नह्युपैधतइत्यादौतिङंतस्यएधरूपतानास्तीतिप्रकृत्यंशेसाहीयते।तथाचोपसर्गात्सुनोतीतिसूत्रेवार्तिकंसिद्धंत्ववयवानन्यत्वादिति।यत्तुअ
भिषावयतीत्यत्रभाष्यादिविरोधोद्भावनंतद्विपरीतम्।यतःप्रकृतेःसुनोतिरूपानपायात्।कैयटमतेसिद्धाययथोक्तव्यवस्था।त्वन्मतेतुरूपांतरत्वेनण्यधिक
स्याग्रहणादसंगतैवप्रागुक्तव्यवस्थास्यात्।कोह्येधयतिसावयत्योर्विशेषोयदेधतेर्ण्यधिकस्याग्रहणंसुनोतेस्तुग्रहणमिति।यदपिएधंतभादीनामुपसंख्या

८ तिभावः क्षीरस्वेवस्त्व इव क्षेत्रिय आजेः एषक् भाजिग्रहणमिह ज्ञापकमिति तन्नेत्यर्थः प्रयुक्तं प्रत्यादि ८

८.र.
७

नमुपन्यस्तं तदपि नास्माकं प्रतिकूलं। विशिष्टस्य शब्दान्तरत्वे तु प्रकृत्यंशस्य तु णिचा व्यवधाने न उपसंख्यानस्यावश्यकत्वात्। अत एव न तत्र त्यन्यासकारैः स्वो
क्त्या वा विरोधः प्रत्युत तत्रैव विरोधः। षाष्ठभाष्यवार्तिकयोरेत्येधत्योरिति योगं विभज्य एवेति विशेषितत्वात्तस्मादिह वृत्तिग्रंथो माधवग्रंथश्चासंगत एवेत्यभिप्रे
त्याचष्टे। एजाद्योरिति। अक्षौहिणीति। ऊहो ऽस्यस्याऊहिणी। अक्षाणामूहिनीति विग्रहः। परिमाणविशेषविशिष्टा सेना अक्षौहिणी। पूर्वपदात्संज्ञायामगइ
ति णत्वम्। यत्तु प्राचा विगृहीतम्। अक्षाणामूहः समूहो ऽस्यस्यामिति तदपूहिनीशब्देन षष्ठी तत्पुरुष इत्येवं परत्वेपैवकार्यं चिन्नेयाऊह इ शब्देन समासेन तत्र इनौ तु
वृद्धिर्न स्यात्। अंतरंगेण गुणेन बाधात्। अपवादभूताया अपि वृद्धेरूहिनीशब्दे न विग्रहे चरितार्थत्वात्। यथोक्तं प्राक् इणढ् शीनामादुणस्सवर्णदीर्घत्वादि
ति। स्वादीरेरिणोः। ईरेरिण्योरिति क्वाचित्कः पपाठः॥ स्वैरीति णिन्यन्तस्य स्त्रियां वृध्यभावप्रसंगात्। स्वैरिणीत्यत्र तु ङीपः प्राग्भागमादाय वृद्धिर्वा ध्यायन्तु व्या
च स्वस्थौ स्त्रियां विशिष्टपरिभाषयेति तन्निष्फलम्। प्रादूहोढोढ्येषैष्येषु। अत्रोहशब्दः केश्चित्प्रक्षिप्तः। भाष्यादौ तु न दृश्यत इति प्राञ्चः। इदानींतनपुस्तकेषु भाष्य
वार्तिकयोरूहशब्दो दृश्यत एव। नानर्थकस्येति। उपस्थितस्यार्थस्य शब्दं प्रति विशेषणत्वसंभवेत्यागायोगादिना। निनामा हवर्ष्यो तथा भूतस्यैव षत्वनया
भाजिग्रहणस्योपक्षीणत्वादिति चेत्। विभाड् विभ्राणिति रूपद्वयं हि साध्यम्। तच्च व्रश्चादिसूत्रेण न इति पठित्वापि सुसाधम्। एकस्य भ्राजतेः कत्वारस्य प्रा
गपि दातुं शक्यत्वात्। ऋभ्राजइति भ्राजभासइति विकल्पस्य वाचनिकतया ऋकारस्यात्मनेपदमात्रफलकतया वक्ष्यमाणत्वेन तत्स्थाने ऽकारस्य सुपठत्वा
च्च तस्मात्क्षीरदेवोक्तं ज्ञापकमपि सम्यगेव प्रेष्य इति एषसाहचर्यादेष्यो प्यनन्वयं गृह्यते तेन एषन्नादिषु एः क्वोत्स्यपि पररूपमेव न तु वृद्धिः प्रेष्यणितः प्रवत्स
तरेति अत्र कालापानुसारिणः वत्सरशब्दमपि पठित्वा वत्सरे दे यमृणं वत्सरार्णमिति उदाहरंति अपरे तु वत्सशब्दमपि पठंति तन्न सर्वभाष्यादिविरुद्धम्। अ
तादिवच्च इह एकः पूर्वपरयोरित्यनुवर्तते यथासंख्यं चेत्यभिप्रेत्याह पूर्वस्यांतवदिति स्थानिवत्सूत्रेणैव गतार्थमिदं सूत्रं न चाल्विध्यर्थमिति भ्रमितव्यम्। अ
स्याप्यल्विधावनिष्टत्वात्। अन्यथा अयजे इंद्रं इत्यत्र सवर्णदीर्घापत्तेः। तथा च वार्तिकम्। न वा अनादृष्यानिदेशादिति न विसर्गइति एतच्च सुस्वार्ते इत्यादावपि तुल्यम्

पाम
७

अत्रच काय्ये कालपक्षे वहिरंगत्वादसिद्धत्वमपिबोध्यम् नचनाजानंतर्ये इति निषेधः यत्रांतरंगेवहिरंगेवाश्रचोरानंतर्येन त्रेतिहरदत्तपक्षेतत्रास्य वपि
यत्रपश्चात्प्रवर्तमाने — चश्रानंतर्यमितिकैयटमते निषेधाप्रवृत्तेः वहुपेक्षत्वेन वहिरंगायां वृद्धौ अजानंतर्यसत्वेपि पश्चात्प्रवर्तमाने विसर्गे तदभावात्
उपसर्गेणेति यत्क्रियायुक्ताः प्रादयस्तंप्रत्येवगत्युपसर्गसंज्ञा इत्युक्तत्वादितिभावः प्रार्षभीयतीति शरोवीतिद्वित्वनिषेधः प्रेजनतइति एजदीनौ कंपनार्थस्तुप
रस्मैपदीएजतेकंपतइतितु प्राचां व्याख्यानंप्रामादिकमेव एङ्गेङिप्येवसिद्धे पररूपग्रहणमुत्तरार्थं रूपग्रहणंतुचिन्त्यप्रयोजनं एङिपररूप इत्येवसिद्धेः यथामिपूर्वइ
तिनियोगोवधारणमिति यदाहुः नावक्ष्ये यदा दृष्टः पररूपस्यगोचरः एवस्तुविषयोवृद्धेर्नियमेयंयदाभवेत् इति· एतेननियोजनंनियोगोव्यापारइतिभ
व्याख्यानंपरास्तम् यदैवपूर्वेज्वलनेशरीरं ममैवजन्मान्तरपातकानां इत्यादिप्रयोगविरोधात् उदाहृतवृत्तिस्थश्लोकविरोधाच्च लङः शाकटायनस्यैवत
पस्तपः कर्मकस्यैव इत्यादि सौत्रप्रयोगविरोधाच्च यत्तु श्लोकवार्तिकमिदमित्याहुस्तद्भ्रमसात् शकंध्वादिष्विति ——— शकंध्वादिविषयेतसिद्धा
नुगुणांपररूपंवाच्यमित्यर्थः अतएवाह तच्चटेरिति यदितु आदित्यधिकारादकारस्यैवेष्येततर्हिमनीषाप्रभृतंनसिध्येदिति नसिद्ध्येत् केचित्तुमनःपतच्छद योः
पृषोदरादित्वादन्त्यलोपेऽकारस्यैवपररूपमित्याहुः शकानांदेशविशेषाणां अंधुः कूपः शकंधुः कर्कोणांराज्ञामंधुः कर्कंधुः वदरीवाचीतु कर्कंधूशब्दोदीर्घां
न्तः अंदूदृंभूइत्यादिनोणादिषुवक्ष्यते अटतीत्यटाप चायचकुलस्य अटाकुलटा ईषडच्छे ईषगत्यादिषु आभ्यांगुरोश्चहल इत्यप्रत्ययेईषामनसईषा
मनीषा हलस्यईषाहलीषा लांगलदंडः मूर्धन्योपधः यत्तुप्रभुशंकरयोरीशःस्त्रियांलांगलदण्डकेइतिरभसकोशात् तालव्योपधः तस्मिन्परेप्याङ्गुण इ
त्येवभवति हलेशा पतन्नंजलिर्यस्मिन्नमस्कार्येत्वादितिपतंजलिः मार्तण्ड इतिकेचिदत्रसवर्णदीर्घमेवाहुः परामार्तंडमाश्रयन् पुनर्मार्तंडमारभत् वि
श्वामार्तण्डोव्रजंइत्यादिवैदिकप्रयोगास्तेषामनुकूलाः ओत्वोष्ठयोरिति अकारस्यओत्वोष्ठयोश्चएकत्रसमासेस्थितौसत्यां इदंप्रवर्तते तेनेहन हृषलस्थुतौ
स्थूलवशाणस्तइति अव्यक्तशब्दस्याचष्टे ध्वनेरिति अनुकरणस्येति परिस्फुटाकारादिवर्णस्येतिभावः तस्यचानुकरणत्वंकिंचित्साम्येनबोध्यम् यत्तुप्राचोक्तम्॥

म. कु.

अतः किं दकारांते मा भूदिति यच्च व्याख्यानम् दकारांत इति रूपानरोपलक्षणम् वटकमरु तद्वन्मादेरपीति निस्सारम् अत इति प्रश्लस्य दान्त इत्युत्तरस्य
चनिरालंबनत्वात् यत्तु व्याचख्युः अतो गुण इत्यतोऽत इत्यनुवर्त्य शब्दाधिकाराश्रयणात्सिद्धमिति प्रश्नः यदा जस्त्ववशाद्दान्तत्वं तदापि स्यात् पुनरद्ग्रहणेनु
ता नान्तत्वस्य विवक्षणा तुन्ने त्युनरमिति तच्चिंत्यं जश्त्वशास्त्रस्यासिद्धत्वेन पररूपस्यैव प्रवृत्तेः नाम्रेडितस्येति निषेधे पटत्पटदिती त्यु दाहरणस्यासंबद्धत्वा
पत्तेश्च तत्र हि भवद्गुकरीत्या प्राप्तिरेव नास्ति दान्तत्वात् एतेन अनुकार्यानुकरणयोरभेदविवक्षया विभक्त्यभावेन गाविन्यय मा हेतिवदपदत्वात् पटत् इतीत्यत्र
जश्त्वं नेति ग्रंथोपि प्रत्युक्तः उक्तग्रंथविरोधात् जश्त्वशास्त्रस्यासिद्धतया पररूपणैव बाधाच्च ननु तदापि नित्यतयाऽवकाशं पररूपविरहेण प्रयोग इति चेन्न अलौकि
कं प्रक्रियावाक्यमिति स्वयमेव व्याख्यातत्वात् संहितायां अविवक्षायां तत्संभवाच्चेति दिक् अकः सवर्णे अचि पर इति यदा तु ऊष्म।

णामीषद्विवृतत्वमाश्रित्य नाज्झलाविति सूत्रं प्रत्याख्यायते तदेह अचीति नानुवर्त्तनीयं अको किं दीर्घ इति सुवचम् वर्णद्वयं द्विमात्रमिति यत्तु प्राचा व्याख्यातं
तं दीर्घप्राप्ते ह्रस्व ऋकारः लृकारश्च विधीयत इति तद्भाष्यकैयटादिविरोधादुपेक्ष्यम् एङः पदान्तात् ङसिङसोश्चेत्यस्यारंभाद्दस्य पदान्तविषयत्वे लब्धेऽत
न्तरार्थं पदान्तादिति स्पष्टार्थमिहैव कृतम् सर्वत्र विभाषा गोः यद्यपि छन्दसि इति न प्रकृतं तथापि पजुष्युरित्यादिप्रक्रमाच्छन्दस्येवेदमिति संभाव्येत अतः
सर्वत्रेत्युक्तम् नन्वाचष्टे लोके वेदे चेति इह एङ इत्यनुवृत्त्य एङन्तस्य गोरिति व्याख्येयम् तेनेह न चित्रग्वग्रमिति प्रतिपदोक्तस्य एङो संग्रहणान्नेह चित्रगो
ग्रम् प्रकृतिभाव इति प्रकृत्यांतःपादमिति सूत्रात्प्रकृत्येत्यनुवृत्तेः यद्यपि भाष्ये इकोगुणवृद्धीति सूत्रे नान्तःपादमिति पाठः स्थितः षाष्ठभाष्ये त्वेवं तथा
पि शाकलसूत्रे ह्रस्वश्चेति चकारेण प्रकृत्येत्यनुकृष्यत इति भाष्यदर्शनात् प्रकृत्यांतःपादमिति पाठेपि साधुरेव नेति पाठे तु सर्वत्रेति सूत्रेण पूर्वरूपमेव
विकल्प्यते इत्यवधेयम् अवङ् स्फोटायनस्य अत्रापि एङन्तस्य गोरिति व्याख्येयं अगिति सूत्रयितुमुचितम् विभाषानुवृत्तेः स्फोटायनग्रहणं पूजार्थम् ग
वीति यत्तु प्राचा गवे इति प्रत्युदाहृतम् तन्न सत्यप्यवङि अतो गुणे इति पररूपेण रूपसिद्धेः न च सत्यवङि ङे यादेशः स्यात् स्त्रियां तु टाप् स्यात् इति वाच्यम् स
न्निपातपरिभाषया यादेशटापोः सुसमाधानत्वात् न च सा अनित्येति वाच्यम् तावतापि औत्सर्गिकतत्प्रवृत्त्येष्टसिद्धेः गवाक्ष इति गवामक्षीवेति विग्रहः अ

क्षणोऽदर्शनादित्यचूसमासांतः वातायनेरूढोयम् पुंस्त्वंलोकात् इन्द्रेचआरंभसामर्थ्यान्नित्यमिदम् इन्द्रेचनित्यमितिपाठस्तुभाष्यासंमतत्वादुपेक्षि
तः एहिकृष्णेतिदूराद्धूतेचेतिप्लुतः पतुकृष्णाएहि इतिप्राचोदाहृतं नन्वत्रदूराद्धूतेचेत्यादौवाक्यस्यटेरित्यधिकारात् चकारेति इहस्कोरितिकलोपोनयणः।
कार्यकालपक्षेवहिरंगपरिभाषयाअसिद्धत्वात्० स्थानिवद्भावाच्च पूर्वत्रासिद्धीयेनेतित्रुनास्तितस्यदोषः संयोगादिलोपेत्याद्युक्तेः दूराद्धूतेच हूतमाह्वानं
तच्चसंबोधनमात्रोपलक्षणं इत्यभिप्रेत्याह दूरात्संबोधनइतिउपलक्षणतयाव्याख्यानस्यफ लमुदाहरतिसक्तून् पिवेत्यादि गुरोरनृतः अपिशब्दोगु
रोरगुरोश्चेतिः प्लुतार्थः देवदत्तेति अस्यएह्येत्यादिः एवमग्रेपि सर्वःप्लुतइति तथाचाग्नीत्प्रेषणेपरस्यचेतिसूत्रेभाष्यम् सर्वःप्लुतःसाहसमनिच्छताविं
भाषाकर्त्तव्यइतिसाहसंशास्त्रत्यागः तदनिच्छताशास्त्रमनुसंधानेनापीत्यर्थइतिहरदत्तः वैकल्पिकेष्वनुष्ठानक्लेशंधर्माधिक्यफलकमपिअशक्ततया
तदनिच्छतेत्यर्थइत्यन्ये एते नष्टेपायनोविरहकातरआजुहावपुत्रेतीतिभागवतंव्याख्यातं प्लुतस्यवैकल्पिकत्वात्किंचइहपु त्रशब्दस्यवाक्यांतत्वंनास्तीत्य
पिसुवचम् आख्यातप्राग्वर्तिनोप्यनुकरणसंभवात् अपिचअसुप्लुतः प्रकृतिभावस्तुवैकल्पिकत्वान्मास्तु० तथाच ई चाक्रवर्मणस्येतिसूत्रेभाष्यं
ग्रहणेननार्थः वशाइयंवशेयमितिप्लुत प्रकृतिभावः सर्वोपिचाक्रवर्मणमतेनास्तीतिभावः अपिचइह प्रकृतिभावोदुर्लभएवअप्लुतवदुपस्थितइति
सूत्रात् उपस्थितंनामावैदिकइतिशब्दः तस्मिन्परेप्लुतोऽप्लुतवत्स्यात् इतिहितस्यार्थः एवंचतुर्द्धापिनिर्वाहेस्पष्टेआर्षःप्रयोगइतिश्रीधरोक्तिर्नादर्त्तव्या
द्विवचनमितिसुप्तिङन्तमित्यंतग्रहणेनसंज्ञाविधौप्रत्ययग्रहणेतदन्तग्रहणंनास्तीतिज्ञापितत्वादितिभावः तेनेहन कुमार्योरध्यावश्वअगारंकुमार्यगारंव
ध्वगारमिति स्पष्टंचेदंमाष्यादौ द्विवचनांतंप्रगृह्यसंज्ञंस्यादितिप्राचः प्रमादएवहरीएतावितिइहशाकलेनप्लुतप्रगृह्यादन्यत्रनित्यग्रहणादित्युक्तम्।
अत्रवृत्तिकारःमणीवादीनांप्रतिषेधोवक्तव्यइतिपठित्वामणीवरोदसीवदंपतीवजंपतीवेत्युदाजहार तच्चमुनित्रयानुक्तत्वादप्रमाणमितिकैयटहरद
त्तादयः एवंस्थितेमणीवोष्ट्रस्यलंवेतेप्रियौवत्सतरौममेतिभारतप्रयोगंसमर्थयंते इवार्थे वशब्दइतिवंप्रचेतसिजानीयादिवार्थेचतदव्ययमितिमे

९

दिनीव वायथा तथैवैवं साम्ये इत्यमरः ग्रंथव्याख्यावसरे शात्रवं वपुर्यशः इति कालिदासः प्रयोगस्याभियुक्तैरुदाहृतत्वात् कादंबखंडितदलानिव पंक-
जानि इत्यादिदर्शनाच्चेति भावः यत्तु पाठान्तरं वद्वा यथा तथेत्यादि तदयुक्तम् नामलिंगानुशासनप्रक्रमे तद्धितस्य वतेरननुगुणत्वाद् पत्यसमूहादिप-
र्यायमध्ये ण फिञ् वुञादीनामनुक्तेश्च अदसो मात् इह एकारो नानुवर्तते संभवादित्यभिप्रेत्याह ईदूताविति न तु ऊकारानुवृत्तिर्व्यर्था स्त्रियो फलेवाश्च
मू अमासात इत्यत्र पूर्वेणैव सिद्धेः मुत्वस्यासिद्धत्वेप्येकारान्तत्वात् अत आह रामकृष्णाविति पुंसि पूर्वेण न सिध्यति ओकारान्तत्वादिति भावः अदसो मादिति सू-
येपतिमुत्वमीत्वेनासिद्धे आरंभसामर्थ्यान् एकारेपीति तथा च एकारानुवृत्तितात्पर्यग्रह — फलकमाग्रहणमिति भावः अत्रेदं चिन्त्यम् ईदूत्सप्तम्यर्थे
प्रगृह्यम् अदसः एत्वाद्विवचनं इत्येव कुतो न सूत्रितम् एवं हि पूर्वसूत्रस्थमीदूद्ग्रहणं प्रकृतसूत्रे माग्रहणं च मास्तु एकदेशानुवृत्तिक्लेशोपि नेति॰ शेंछाद
समपीदं संदर्भशुद्ध्यर्थमुक्तम् वस्तुतस्त्वनुकरणार्थं तथा लोकार्थमपि संभवत्येव त्वे राम्रो मे राय इत्यादौ त्वे इति मे इत्यनुकरणे प्रयोजनलाभात् अस्मे इति
अस्मभ्यमित्यर्थः भ्यसः सुपां सुलुगिति शे आदेशः शेषे लोपः निपातं अनाङिति पर्युदासादेवाङ्रूपनिपाते लब्धे निपातग्रहणं उभयार्थं स्पष्टार्थमिति वक्तं
म् आ एवमिति पूर्वप्रक्रान्तस्य वाक्यार्थस्यान्यथात्वद्योतकोयमाकारः पूर्वमित्थं नामंस्था इदानीं त्वमेवं मन्यसे इत्यर्थः आ एवं किलेति स्मरणद्योतकोप्ययमाकारः वा
क्येत्यादि तथा च भाष्यम् ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् इति अत्राङित्वलक्षणएव तात्पर्यं लाघवात् अ
न्यस्य ङित्वं तत्त्वर्थसिद्धं ईषदर्थे इत्यादिस्तु अवयुत्यानुवादः एवं च अभ्र आं अपः इत्यत्र सप्तम्यर्थे वृत्तेरप्याकारस्य ङित्वाद् आङोनुनासिकश्छंदसीति प्रवर्तते तद
तिभावः ओत् निपातः किम् देवो सि वा पवायाहि संबुद्धौ ऋषिर्वेदः तदुक्तमृषिणेत्यादौ तथा दर्शनादित्यभिप्रेत्याह अवैदिक इति संबुद्धौ किम् अहो इति
अत्र परत्वाद्विकल्पो माभूत् यत्तु ओदित्यत्र निपातानुवृत्तेः इहच संबुद्धिग्रहणस्य प्रत्युदाहरणं वृत्त्यादावुक्तं गवित्ययमाहेति तन्न तत्र प्रगृह्यसंज्ञासत्त्वेपि
प्रकृतिभावप्रसक्तेः इको सवर्णे इत्यत्र हि पदान्तग्रहणमनुवर्तते इत्याकरे स्पष्टम् एवं च प्लुतप्रगृह्या इति सूत्रेपि तत्संबंध आवश्यकः गवित्ति च न पदम् आ

राम ९

नुकार्यानुकरणयोरभेदविवक्षयार्थवत्त्वाभावेन विभक्तेरनुत्पादात् उञः निपात एकाजिति प्राप्ते विभाषेयम् ऊँ अनुनासिक इति तेनास्मिन्परे परोऽनुना
सिक इति विकल्पः पदे तन्नूँ इति पठसि पदे तन्नू इति वा न दीर्घमित्यादि एतदर्थमेव तत्रानुनासिकग्रहणं अन्यथा यरोऽमि नम्वेत्येवावक्ष्यत् मयउञो वो वा
मयः परस्येति मयः परादिति तु प्राचः प्रमादः षष्ठीनिर्दिष्टस्यैवादेशा उच्यन्ते इति भाष्यात् आदेशविधौ स्थानिनः षष्ठ्या एव न्याय्यत्वाच्च असिद्धत्वादिति
अत एवेदं वत्वं त्रिपाद्यां विधीयते प्रकृतिभावमात्रबाधनार्थत्वे हि इको यणचीत्यस्यानन्तरं मयउञो वो वेत्येवावक्ष्यत् परां च अन्ववर्तयिष्यत् इह मयउञ इतोपरे
अष्टाविंशतिरूपाणि तथाहि उम् इति प्रगृह्यत्वे किमु इति वत्वपक्षे किम्विति ऊँ आदेशे किमूँ इति आदेशस्य स्थानिवत्त्वेन मयउञ इति प्रकृतिभावापवा
दभूते आन्तरतम्यादनुनासिके वकारे किम्वँिति अननुनासिकाननुनासिकयोर्मयो यण इति द्वित्वस्य मकारस्यानचि चेति द्वित्वस्य च विकल्पेन वत्वपक्षे रूपाष्ट
कं तदभावे द्वयमिति दशकं प्रगृह्यसंज्ञाविरहपक्षे तु मयउञ इति वत्वस्यासिद्धत्वादिको यणचीति यणेव तस्य सिद्धत्वान्मोऽनुस्वारे वा पदान्तस्येति परसवर्ण
पक्षे अनुनासिकाननुनासिकवकारद्वयोपेतं एकादशरूपं अनुनासिकस्य द्वित्वे हलो यमामिति लोपस्य वैकल्पिकत्वादकरणे त्रिवकारं द्वादशरूपं पै
रसवर्णाभावपक्षेऽनुस्वारस्य परत्वान्नासिके द्वित्वे द्वे संकलनया चतुर्दश इति शब्द इकारस्याणो प्रगृह्यस्येत्यनुनासिकविकल्पनात् अष्टाविंशतिरिति इत्य
च्संधिः ॥ ॥ स्तोश्चुना श्चुः स्तोरिति समाहारद्वंद्वः सौत्रं पुंस्त्वं श्चुनेति सहयुक्तेति सूत्रे विनापि तद्योगे तृतीयेति वक्ष्यते योग इति एतदध्याहारलभ्यं अत्र।
स्थान्यादेशयोर्यथासंख्यम् निमित्तकार्यिणोस्तु न शादिति ज्ञापकात् अल्पाच्तरमित्यादौ तु सौत्रत्वान्न श्चुत्वम् तज्ज्ञानमित्यादौ तु भवत्येव स्तोः श्चोः श्चुः
इति सुवचम् न च तस्मिन्निति निर्दिष्ट इति परिभाषोपस्थानेन यज्ञः याच्ञा इत्यादि न सिध्येत् तु शादिति लिंगेन तस्या इहानुपस्थानाभ्युपगमात् श्नाइहा।
पि कार्यिनिमित्तयोर्यथासंख्यं न तोःषीति ज्ञापकात् श्चोश्चुरित्युचिते ईड्ढ्वे ईड्डे इत्यादौ न पदान्तादिति ज्ञापकान्न दोषः सर्पिष्टममिति ह्रस्वात्तादाविति षत्वम् प्र
[illegible]भाषायामिति यत्तु प्राचामपटि नित्यमिति पठितं यच्च हलन्तप्रकरणे षण्णां षड्णामित्युदाहृतम् यच्च यरोऽनुनासिक इति वाऽनुनासिक इति तत्रैव व्या

स्यातंतत्सर्वंभाष्यविरोधादुपेक्ष्यम् यवादिगणादिति यच्चिभंनसौ मत्वर्थ इति संहितापाठे तस्मा विनितान्पूर्वेदकारं प्रश्लिष्य भत्वेनाप्येतंत्तस्मा धातुं शक्यं इतिके
चित् तन्नमृन्मा   नित्यादावतिप्रसंगात् उदःस्था अनुस्वारस्य ययीत्यत्र समस्तमपि सवर्णग्रहणं इह निष्कृष्य संबध्यते एकदेशे स्वरितत्वप्रतिज्ञानादित्या
श्रयेनाहुः पूर्वसवर्णः स्था दि ति अघोषस्येत्यादिः एतेन सस्य तकार इति प्राचां ग्रंथाः प्रत्युक्ताः यदपीह चयो द्वितीयाः शरीत्यस्योपन्यसनं तदतिरभसात् नाभ
च्छिवइति यत्तु प्राचा ततशिव इत्यत्र जश्त्वे कृते खरि चेत्युक्तं तन्न तदोदात्तत्वेन जषत्वोपन्यासवैयर्थ्यात् यत्तु तन्मोत्रणो क्रमुत दोवावसान इति चर्त्वे कृते प।
श्याच्छिव इत्यनेन संबंधे कृत्वा जशो न इति जश्त्वे खरि चेति चर्त्वमिति तदतिस्थवीयः जश्त्वं प्रति अवसाने चर्त्वस्यापवादत्वात् जश्त्वे शिवशब्दानपेक्षणाच्च।
भाविन्यवसानभंगे वावसान इत्यस्य पूर्वमप्रवृत्तेश्च प्रवृत्तस्य वा निवृत्ति संभवात् तदुक्तम् अकृतव्यूहाः पाणिनीया इति कृतमपि शास्त्रं निवर्तयन्तीति च अ
न्ययाहरिस्यमित्यत्रापि तदुक्तरीत्या प्रवृत्तो विसर्गः केन वार्यताम् अथ तनोतीति तदिति क्विबंतं ब्रूषे एवमपि जश्त्वे न दकारोऽस्तु चर्त्वे कृते चुत्वमिति तु न न्याय्य
म् चुत्वं प्रति चर्त्वस्यासिद्धत्वात् यत्तु न मुने इत्यत्र नेति योगविभागस्यासिद्धत्वमिह नेत्याहुः तदपि न असिद्धत्वेपि रूपसिद्धौ निर्बाधायां योगविभागस्य अगतिक
गतिभूतस्य इह आश्रयणे प्रमाणाभा   वात् आक्रंस्यते इति आङ् उद्गमन इति तङ् स्नुक्रमोरिति नेट् समसंबंधी विधिरिति समकर्मकं विधानमिति तु नोक्त
म् अनुवादयोरपि यथासंख्यस्येष्टत्वात् समूलाकृतजीवेषु हन् कृञ्ग्रह इत्यत्र यथा ङ्णोः कुक्टुकोः पूर्वांतत्वात् प्राङ्कृसाये इत्यत्र सात्पदाद्योरिति षत्वं न
सुगणट्साये इत्यत्र न पदान्ताट्टोरिति ष्टुत्वं न पुष्करे तीर्थविशेषे सीदतीति पुष्करसत् तस्यापत्यं पौष्करसादिराचार्यः बाह्वादित्वादिञ् अनुशतिकादित्वादुभ
यपदवृद्धिः ङः सि धुट् उभयनिर्देशे पंचमीनिर्देशो बलीयान् परत्वादित्यभिप्रेत्याह सस्येति सीति सप्तमीनिर्देशस्तु लाघवार्थः षट्संत इति धुट् श्चुत्वेन नकारः
यत्वाहुः चयो द्वितीया इति पक्षे तस्य थ इति तन्न चर्त्वस्यासिद्धत्वात् अत एव धुडभावपक्षे षट्संत इत्यत्र टस्य णेन टकारनकारविसर्गाणां द्वित्वविकल्पात् षो
डश स्वयः शर इति सकारस्य द्वित्वे द्वात्रिंशत् न च तत्र चर्त्वस्यासिद्धत्वं शंक्यम् पूर्वत्रासिद्धीयमद्वित्वे इत्युक्तेः न च शरोऽचीति निषेधः शंक्यः तस्य सौत्रद्वित्वमात्र

विषयत्वात् अत एव खयः शर इति वार्त्तिकस्य वत्सरः अप्सरा इत्युदाहरणं भाष्ये दत्तम् धुटः परादित्वेन पदान्तादित्वनिषेधार्थं अत एव वक्ष्यमाणस्तुगि
हैव न कृतः यत्त्वाहुः एवमपि प्रक्रियालाघवार्थं नुडेव कर्तुमुचित इति तन्न च यो हितीया इति पक्षे थकारापत्तेः श्चुत्वं धुटि सिद्धं वाच्यम् अटतीत्यट् श्च्योतति इह धुगा
न शितु कृशीति सप्तमी पूर्वत्र कृतार्थायान इति पंचम्याः षष्ठीं कल्पयतीत्याह नस्येति ननु प्रकृते धुङ् वास्तु किंतु कामेवम् शङ्कोटीत्यस्य हि पदान्तात् रूपःस्पर।
स्य शास्त्व इत्यर्थ आकारे स्थितः एवं च धुटः परादित्वात्तस्त्वं छुम्भुरित्यत्र ष्ठो न स्यात् विपूर्वाद्रूपेणादिकेशप्रत्ययम ध्वश्वो नन्यभिनो विरपृशामित्यादेरप्युदाहरणम्।० अतः
पूर्वो न स्तुकू कृतः नन्वेवं कुर्वेच्च शेते इत्यत्र पदान्तस्येति णत्वनिषेधो न स्यादिति चेन्न कार्यकालपक्षे वहिरंगत्वेन नुको ऽसिद्धत्वात् यथोद्देशे तु स्तोश्चुनेति योगो
विभज्यते नेति अनुवर्तते ण इति च स्तोश्चुना योगे णत्वं स्यात् नकारार्थमिदम् सकारग्रहणं वर्गग्रहणं चोत्तरार्थं ततः श्चुरिति पूर्वमनुवर्तते एवं नश्च तिसृत्रे कुर्वन्नृत्सी
दतीत्यत्र पदान्तस्येति णत्वप्रतिषेधो धुटः परादित्वे प्रयोजनमिति प्राचां ग्रंथोपि यथोद्देशपक्षे बोध्यः यत्तु वदंति इदं प्रयोजनं वहिरंगपरिभाषया गतार्थत्वादप्रयुक्त
मिति तन्न पाक्षिकं त्रिपादिस्थेंतरंगे परिभाषेयं न प्रवर्तते इति सुध्युपास्य इत्युदाहरणे सोक्ता सद्ध्वनिरुद्धं चेत्संतानावत् सञ्च्छंभुरिति इह श्चुत्वं तु कोरसिद्धतामा
श्रित्य नश्छवीति रुत्वं नाशंक्यं छत्वस्यासिद्धत्वात् ङः मो ह्रस्वात् ङम् प्रत्याहारः संज्ञायां च कृतं टित्वं सामर्थ्यात्संज्ञिभिः संवध्यते तेन यथासंख्यं ङुट् णुट् नुटः प्रव
र्तन्ते नित्यग्रहणं विस्पष्टार्थम् हे मपर इति मय उञो वो वा इति च विकल्पद्वयस्य मध्ये पाठादेव नित्यत्वलाभात् सुगण्णीश इति एपदञ्जे पौनस्त्यानिवत् पूर्वत्रा
सिद्धे तन्निषेधात् ङः मुटः परादित्वं कुर्वन्नास्ते इत्यत्र णत्वप्रतिषेधार्थं अत एव चखड मो ह्रस्वादचि ङ्डे इति नासूत्रि परणत्वं प्रति पूर्वस्य द्वित्वस्य सिद्धतया णत्वा
पत्तेरिति प्राञ्चः यत्त्वाहुः वहिरंगपरिभाषया गतार्थत्वादुभयमप्यसंगतमिति तदपि पाक्षिकं राज्ञः इत्यत्रेव यथोद्देशे त्रैपादिके ऽन्तरंगे परिभाषाविरहस्यो
कत्वेन प्राचां ग्रंथस्य सौष्ठवात् कथमन्यथा द्वियंत्रिपं चस्वयमेवोक्तमिति दिक् ननु परमदंडिना वित्यादावंतर्वर्तिविभक्त्या पदत्वान्नुट् स्यादिति चेन्न उत्तरप
त्वे चापदादिविधाविति प्रत्ययलक्षणप्रतिषेधात् अत एव परमवाचौ परमगोदुहौ परमलिहौ वित्यादौ कुत्वघत्वढत्वादीनि न यत्तु प्राचा उत्तिच पद इत्यतः

म॰स॰
११

पदे इत्यनुवर्त्य अजादेः पदस्येति व्याख्यानान्नानड्मुट् नेत्युक्तं तदनेन प्रत्युक्तम् इहैव नलोपं वारयितुं उकरीतेरेव तेनाप्यनुसर्तव्यत्वात् समः सुटि यद्यपि मोनुस्वा
रेणासिद्धं तथापि अनुनासिकत्वत्रिसकारकत्वसिद्ध्यर्थमिदम् अत्रानुनासिकः अयमधिकारो विधिर्वेति द्वैतम् आद्ये अत्र ग्रहणमनर्थकम् अधिकारादेव
रुप्रकरणालाभात् तुशब्दस्त्वधिकारपक्षे परस्मात्कार्यिणो विशेषद्योतनार्थः परस्य नित्यं रुत्वं पूर्वस्य तु वानुनासिक इति विधिपक्षे व्यर्थः वाग्रहणं तु स्पष्टार्थं अ
नुनासिकात्पर इति ज्ञापकादेव सिद्धेः नहि विकल्पं विना ऽनुनासिकाभावपक्ष इति संभवति इदमेव ध्वनयितुं वृत्तौ तु वेति शब्दो नोक्तो अनुनासिकात् ल्यब्लोपे भ
पंचमीत्याह अनुनासिकं विहायेति एवं च संसर्गवद्विप्रयोगस्यापि विशेषावगतिहेतुत्वाद्वत्सा धेनुरानीयतामित्यत्रेव संभाविता ऽनुनासिकत्वगुणक एव तु
पस्थितत्वात् आकांक्षितत्वाच्चावधित्वेन संबध्यत इत्यभिप्रेत्याह रोः पूर्वस्मादिति अनुस्वारागम इति आगमत्वं च परशब्देनैव लभ्यते पूर्वौ तु नाभ्यामेजित्यत्र पूर्व
शब्देन एवोरिवेति भावः विसर्जनीयस्य सरीति एतच्च मण्डूकप्लुत्या खरवसानयोरिति सूत्रादनुवर्तते नन्वनुस्वारस्यानच्त्वात्ततः परस्य द्वित्वं न स्यादेवेत्या
शंक्याह अनुस्वारविसर्गेत्यादि अकारोपरीति यदि तु इकारोपरि पठ्येत तर्हि पयः सु पशः सु इत्यादौ इणः परस्य षत्वं स्यादिति भावः अच्त्वादिति न चैवं हरिंक
न्नो हरिं स्मरेदित्यादौ यणादिप्रसंगः त्रिपादीस्थत्वेन विसर्गादीनामसिद्धत्वात् अनुस्वारस्यापि द्वित्व इति अपिशब्दात्ककारस्यापि वचनान्तरेणेति अचो रहाभ्यामि
ति कृतेपि यणो मय इति भवत्येवेति भावः पुमः खय्यम्परे पुंस इति संयोगान्तलोपे कृते ऽवशिष्टभागस्येदमनुकरणम् पर्युदासादिति इदुदुपधस्येति षत्वविधायके
सूत्रे इति भावः अप्रत्ययस्य यो विसर्ग इति वैयधिकरण्येन व्याचक्षाणानां प्राचां मते नेदं वक्ष्यमाणरीत्या सामानाधिकरण्येनान्वये तु षत्वप्राप्तावप्राप्तिर्बोध्यम् भ
व्याजादेशेनेति आदेशो हि उपदेशः खशादिः असिद्धप्रकरणत्वानन्तरं खशान्नः शस्य यत्वं विकल्प्यते तेन न सुप्रस्थेन निर्दिष्टं सौप्रस्थं तत्र भवः सौप्रस्थीयः यत्वा
स्यासिद्धत्वाद्धन्त्योपधादिति वुञ् नेत्यादि प्रयोजनान्याकरे स्थितानि एवं च यत्वस्यासिद्धतया ऽम्परत्वाभावात् पुमः खयीति रुत्वं नेत्यर्थः पुंस्थानमिति वक्षि
म्स्लुट् व्याजादेशः ननु आदेश इह दुर्लभः वर्जने प्रतिषेधः अमनयोश्चेति वार्तिकादिति चेत् सत्यम् ~~बहुलं~~ क्यप् न्नवधकगात्रं विचक्षणाजिराद्यर्थमिति वार्ति

एम
११

केवलग्रहणात्समाधेयम् तथाचखशादित्वप्रयोजनगणनेवार्त्तिकम् रुविधिःपुंस्यानमितिणत्वंपर्याख्यानंमितिनिष्ठानत्वमाख्यातइतिचशकारेण
व्यवधानात् कृत्यचइतिणत्वंननथाआख्यातइत्यत्रसंयोगादेरातइतिनत्वंनपत्वस्यासिद्धत्वात्परावनाविरहात्एवंचनध्याख्येतिसूत्रेख्याग्रहणंनकर्तव्यमि
तिभावः नचख्याप्रकथनेइत्येतदर्थंतदितिवाच्यं नस्यसार्वधातुकमात्रविषयत्वात् अत्रचसंख्यानत्वंनमःख्यात्रेइत्युत्तरवार्त्तिकंप्रमाणम् संख्यानइतिजिह्वा
मूलीयस्यप्राचांसंज्ञा सइहनशर्परेविसर्जनीयइत्यस्यप्रवृत्तेरित्यर्थः यदितुस्वतंत्रोपिधातुरार्द्धधातुकेइष्येत तदाजिह्वामूलीयस्यदुर्वारतयाइदंवार्त्तिकमसं
गतंस्यात् यत्तुहरदत्तमाधवादिभिरुक्तम् ख्याधातुरपिखशादिर्यत्वविधिरप्युभयसाधारणाइति तच्चिंत्यम् भाष्येचक्षिङःएवोपक्रमात् सार्वधातुकेपिखशा
दिप्रयोगापत्तेश्च नचेष्टापत्तिःमाधवेनार्द्धधातुकएवायंखशादिरित्युक्तत्वात् सार्वधातुकेऽनभिधानस्यैवशरणीकर्तव्यत्वापत्त्यागौरवग्रस्तत्वाच्चेत्यास्तांता।
वत् स्यादेतत् वह्वःपुंमांसोऽस्मिन्कुलेवहुपुमख्यातीत्यत्ररुत्वंस्यात् उरःप्रभृतिषुपुमशब्दस्यैकवचनांतस्यैवपाठात् नेहकप् सार्वधातुकेचख्याने प्रयो
गोनिर्वाधएवेतिचेत् इष्टापत्तेः संहितायाअविवक्षायांतुरुत्वंनेनिस्सृष्टमेव यत्तुप्राचाख्याधातोर्नेतिकेचिदित्युक्तम् तन्नयदिख्याञादेशइत्यर्थस्तर्हिके।
चिदित्यनुचितं स्वतंत्रेधातौचेत् तर्हिसार्वधातुकविषयेपिनिषेधःस्यात् नचेष्टापत्तिःनिर्मूलत्वात् चक्षिंस्तायस्वेभि यत्तुप्राचात्राहीत्युक्तं तत्रपरस्मैपद
मयुक्तंआयतेर्ङित्वात्त्रापतइतित्राःसइवाचरतीत्यर्थेकर्त्तरिक्विवंताद्वाचारक्किपिवावोध्यम् प्रशानिति प्रपूर्वाच्छाम्यतेःक्विप् अनुनासिकस्यक्वीतिदीर्घः।
मोनोधातोरितिनःतस्यासिद्धत्वान्नलोपोनतु न्येपकारोपर्यकारउच्चारणार्थःतेनन्वःपुनातीत्यादिसिद्धम् उभयथर्क्षुइत्यतःउभयथेत्यनुवृत्तेर्विकल्पःफलि
नइत्याशयेनाहरुःस्याद्धेतिकुप्वोः सूत्रेखर्परत्वाद्विसर्गःजिह्वामूलीयस्यखर्त्वात् खर्परेशरीतिविसर्गलोपः जिह्वामूलीयस्यशर्त्वान्नवाशरीतिविसर्ग
एववाअत्रादेशयोःकपावुच्चारणार्थौवाद्विसर्गइतियत्तुप्राचाचोक्तं विकल्पइत्युक्तम् तन्न ≍क≍पाभ्यामुक्तेविसर्जनीयस्यसत्वप्रसंगात् कानाम्रेडितेकान्का
नीतिवाच्येआम्रेडितग्रहणंयत्रद्विरुक्तिस्तत्रैवयथास्यात् इहमाभूत् कान्कान्पश्यसीति अत्रएकःकिंशब्दःप्रश्नेद्वितीयःक्षेपेकान्कुत्सितान्पश्यसीत्य

पदेइत्यनुवर्त्य अजादेः परस्येतिव्याख्यानात् ङमुट्नेत्युक्तं तदनेन प्रत्युक्तम् इहैव नलोपं वारयितुं उक्तरीतेरेव तेनाप्यनुसर्तव्यत्वात् समः सुटि यद्यपिमोनुस्वा
पदेइत्यनुवर्त्य अजादेः परस्येतिव्याख्यानात् ङमुट्नेत्युक्तं तदनेन प्रत्युक्तम् अत्रानुनासिकः अयमधिकारो विधिर्वेति द्वैतम् आद्ये अत्रग्रहणमनर्थकम् अधिकारादेव
त्रेणसिद्धं तथापि अनुनासिकत्वत्रिसकारकत्वसिद्ध्यर्थमिदम् अत्रानुनासिकः अयमधिकारो विधिर्वेति द्वैतम् आद्ये अत्रग्रहणमनर्थकम् अधिकारादेव
त्रेणसिद्धं तथापि अनुनासिकत्वत्रिसकारकत्वसिद्ध्यर्थमिदम् पूर्वस्यतुवानुनासिकइति विधिपक्षे व्यर्थः वाग्रहणतुस्पष्टार्थे अ
रुप्रकरणलाभात् तुशब्दस्त्वधिकारपक्षे परस्मात्कार्यिणोविशेषद्योतनार्थः परस्यनित्यं रुत्वं पूर्वस्यतुवानुनासिकइति विधिपक्षे व्यर्थः वाग्रहणतुस्पष्टार्थे अ
नुनासिकात्परइति ज्ञापकादेव सिद्धेः नहि विकल्पं विनाऽनुनासिकाभावपक्षइति संभवति इदमेव ध्वनयितुं वृत्तौ तु वेति शब्दौ नोक्तौ अनुनासिकात् ल्यवलोपे
पंचमीत्याह अनुनासिकं विहायेति एवं च संसर्गवद्विप्रयोगस्यापि विशेषावगतिहेतुत्वादवसाधेनुरानीयतामित्यत्रेव संभाविताऽनुनासिकत्वगुणकएव तु
पस्थितत्वात् आकांक्षितत्वाच्चावधित्वेन संबध्यतइत्यभिप्रेत्याह रोः पूर्वस्मादिति अनुस्वारागमइति आगमत्वं च परशब्देनैव लभ्यते पूर्वौ तु नाभ्यामेति त्यत्रपूर्व
शब्देनऐचोरिवेति भावः विसर्जनीयस्य सरीति एतच्च मराडूकप्लुत्यास्वरवसानयोरिति सूत्रादनुवर्तते नन्वनुस्वारस्थानवृत्त्वात्ततः परस्यादित्वेनस्यादेवेत्या
शंक्याह अनुस्वारविसर्गेत्यादि अकारोपरीति यदितु इकारोपरि पिपठिषति तर्हि पयः सुपरशः सुइत्यादौ इणः परस्य षत्वं स्यादिति भावः अचत्वादिति नचैवं हरिः क
शंक्याह अनुस्वारविसर्गेत्यादि अकारोपरीति यदितु इकारोपरि पिपठिषति तर्हि पयः सुपरशः सुइत्यादौ इणः परस्य षत्वं स्यादिति भावः अचत्वादिति नचैवं हरिः क
नोहरिं स्मरेदित्यादौ यणादिप्रसंगः त्रिपादीस्थत्वेन विसर्गादीनामसिद्धत्वात् अनुस्वारस्यापि द्वित्वइति अपिशब्दात्ककारस्यापि वचनांतरेणेति अचोरहाभ्यामि
तिद्वित्वेपि यणोमयइति भवत्येवेति भावः पुमः खय्यम्परे इति पुंस् संयोगान्तलोपेकृते ऽवशिष्टभागस्येदमनुकरणम् पर्युदासादिनिइदुदुपधस्येतिषत्वविधायके
सूत्रे इति भावः अप्रत्ययस्ययोविसर्गइति वैयधिकरण्येनव्याचक्षाणानां प्राचांमते नेदं वक्ष्यमाणरीत्या सामानाधिकरण्येनान्वये तु षत्वप्राप्तावस्तिवोध्यम् अ
स्त्रे इति भावः अप्रत्ययस्ययोविसर्गइति वैयधिकरण्येनव्याचक्षाणानां प्राचांमते नेदं वक्ष्यमाणरीत्या सामानाधिकरण्येनान्वये तु षत्वप्राप्तावस्तिवोध्यम् अ
स्वाजादेशेनेति आदेशोहि उपदेशे सखशादिः असिद्धप्रकरणत्वानंतरं खशान्तः शस्य यत्वविकल्प्यते तेन समुप्रस्थाननिर्देशं सौप्रस्थं तत्र भवः सौप्रस्थीयः यत्वाभ
स्यासिद्धत्वाद्धत्वयोपधादिति वुञ् नेत्यादिप्रयोजनान्याकरे स्थितानि एवं च पत्वस्यासिद्धतयाऽम्परत्वाभावात् पुमः खयीति रुत्वं नेत्यर्थः पुंस्यानमिति चक्षिभ
स्यासिद्धत्वाद्धत्वयोपधादिति वुञ् नेत्यादिप्रयोजनान्याकरे स्थितानि एवं च पत्वस्यासिद्धतयाऽम्परत्वाभावात् पुमः खयीति रुत्वं नेत्यर्थः पुंस्यानमिति चक्षिभ
ल्युट् स्याजादेशः ननु आदेशइहदुर्लभः वर्जने प्रतिषेधः असनयोश्चेति वार्त्तिकादिति चेत्सत्यम् बहुलं तत्र पत्ववधकगात्रविचक्षणाजिराद्यर्थमिति वार्त्ति

म॰र॰ ११

राम ११

केवहुलग्रहणात्समाधेयम् तथाचखशादित्वप्रयोजनगणनेवार्तिकम् रुविधिःपुंस्ख्यानमिति णत्वं पर्यास्ख्यानमिति निष्ठानत्वमाख्यातइति चशकारेण
व्यवधानात् कृत्यचइतिणत्वंनतथा आख्यातइत्यत्र संयोगादेरातइतिनत्वंनपत्वस्यासिद्धत्वात्परावतावि रहात् एवंचनध्याख्येतिसूत्रे ख्याग्रहणं नकर्तव्यमि
तिभावः नचख्याप्रकथनेइत्येतदर्थंतदितिवाच्यं नसस्य सार्वधातुकमात्रविषयत्वात् अत्रच संख्यानत्वंनमःख्यात्रेइत्युत्तरवार्तिकंप्रमाणम् संख्यानइति जिह्वा
मूलीयस्यप्राचांसंज्ञा सइहनशर्परेविसर्जनीयइत्यस्यप्रवृत्तेरित्यर्थः यदितुस्वतंत्रोपिधातुरार्द्धधातुकेइष्येत तदाजिह्वामूलीयस्यदुर्वारतयाइदंवार्तिकमसं
गतंस्यात् यत्तुहरदत्तमाधवादिभिरुक्तम् ख्याधातुरपिखशादिर्यत्वविधिरप्युभयसाधारणइति तच्चिंत्यम् भाष्येचक्षिङःएवोपक्रमात् सार्वधातुकेपिख्शा
दिप्रयोगापत्तेश्च नचेष्टापत्तिःमाधवेनार्द्धधातुकएवेत्यं ख्शादिरित्युक्तत्वात् सार्वधातुकेऽनभिधानस्यैवशरणीकर्तव्यत्वापत्त्यागौरवग्रस्तत्वाच्चेत्यास्तां ना
वत्स्यादेतत् बहवःपुमांसोऽस्मिन्कुलेबहुपुमख्यातीत्यत्र रुत्वंस्यात् उरःप्रभृतिषुपुमन्शब्दस्यैकवचनांतस्यैवपाठात् नेहकप् सार्वधातुकेचख्याते प्रयो
गोनिर्वाधएवेतिचेत् इष्टापत्तेः संहितायाअविवक्षायांतुरुत्वंनेतिस्पष्टमेव यत्तुप्राचाख्याधातोर्नेतिकेचिदित्युक्तम् तत्र यदिख्याञादेशइत्यर्थस्तर्हिके॥
चिदित्यनुचितं स्वतंत्रेधातौचेत् तर्हिसार्वधातुकविषयेपिनिषेधःस्यात् नचेष्टापत्तिःनिर्मूलत्वात् चक्षिङ्ख्यायस्वेति यत्तुप्राचात्राहीत्युक्तं तत्रपरस्मैपद
मयुक्तं त्रायतेर्ङित्वात् त्रापतइतित्राःसद्वावरतीत्यर्थेकर्तरिक्विवलादाचारक्विपिवाबोध्यम् प्रशानिति प्रपूर्वाच्छाम्यतेःक्विप् अनुनासिकस्यक्वीतिदीर्घः
मोनोधातोरितिनःतस्यासिद्धत्वान्नलोपोनन्वन्ये पकारोपर्यकारउच्चारणार्थःतेनन्वःपुनातीत्यादिसिद्धम् उभयथर्क्षु इत्यतःउभयथेत्यनुवृत्तेर्विकल्पःफलि
तइत्याशयेनाहरुःस्याद्वेतिकुप्वोः सूत्रेखरूपरत्वाद्विसर्गः जिह्वामूलीयस्यखर्त्वात् खर्परेशरीतिविसर्गलोपः जिह्वामूलीयस्यशर्त्वान्नवाशरीतिविसर्ग
एववाऽऽदेशयोः कपावुच्चारणार्थौ वाद्विसर्गइतियत्तुप्रा वा चात् विकल्पइत्युक्तम् तन्नःकःपाभ्यामुक्ते विसर्जनीयस्यसत्वप्रसंगात् कानाम्रेडितेकान्का
नीतिवाच्ये आम्रेडितग्रहणंयत्रद्विरुक्तिस्तत्रैवयथास्यात् इहमाभूत् कान्कान्पश्यसीति अत्रएकः किंशब्दः प्रश्ने द्वितीयःक्षेपे कान्कुत्सितान्पश्यसीत्य

र्थः कस्कादिषु च अत्र प्राचा षष्ठु विसर्जनीयस्य कः पोनेत्युक्तं नासौ सूत्रार्थः ॥ कः पयो रस्वरितत्वात् नञश्चाप्रकृतत्वात् किंतु आर्थिकार्थकथनं तत्र निष्प-
नयना हः कः पयोरिति कौतस्कुत इति कुतः कुत आगत इत्यर्थे अव्ययात्त्यपि प्राप्ते गणपाठसामर्थ्यादण् सर्पिष्कुण्डिकेति नित्यं समास इत्येव सिद्धे इह पाठा-
स्य प्रयोजनं तु तत्रैव वक्ष्यते सेनासुरेति यद्धि हि ह्रस्वस्य तुक् स्यात् तर्हि ह्रस्वस्य चर्त्वे सति चद्वयं स्यात् संनिपातपरिभाषया वर्णलोपप्रसक्तौ तु छकारोपरि चकारः श्रूये-
तेति भावः ॥ इति हल्संधिः ॥ शर्परे सत्वादेरयमपवादः यदि तु शर्परे नेत्येवोच्येत तर्हि प्रकृते सत्वे निषिद्धेऽपि कुप्वोः ≍क≍पौ स्याताम् वासः क्षौमं अद्भिः प्सातं
इति विसर्जनीयवचनात्तु विकारमात्रं बाध्यत इत्याशयेनाह नत्वत्यदिति तदेव स्फुटयति इहेति सोपदादौ अपदाद्योरिति सूत्रे तु व्यत्ययेन एकवचनं यत्तु
स्वरविशेष्यते सुपदादौ खरीति तदा यथाश्रुतं साधु किंतु खरीति मण्डूकप्लुत्यानुवर्त्यमिति क्लेशः न चानुवृत्तौ सत्त्व रत्राप्यावश्यकता स्वरं विना विसर्गस्य दुर्लभ-
त्वेन तदनुवृत्ते निष्फलत्वात् पाशपकल्पपकाम्येष्विति वृत्तिः संभवप्रदर्शनमेतत् ननु परिगणनं अन्यस्यासंभवात् प्रातःकल्पमिति अधिकरणशक्तिप्र-
धानस्यापि प्रातःशब्दस्येह वृत्तिविषये शक्तिमत्परत्वं दोषाभूतमहः दिवाभूता रात्रिरितिवत् गीः काम्यतीति इह इणः ष इति षत्वं न तत्रापि काम्ये रोरेवेत्यस्यानु-
वृत्तेः यदि तु तत्रैवेदं पठ्येत तर्हि षत्वमात्रप्रतिषेधेऽपि पूर्वेण सत्वं स्यात् इणः षः पूर्वस्यापवादः इदं सूत्रं स इति चद्वयमप्युत्तरत्रानुवर्तते तेन यथासंभवं इ-
णः परस्य षः अन्यस्य स इति विवेकः पुरः प्रष्ठ्याद् इति पृपालनपूरणयोः भ्राजभासेत्यादिना क्विप् तदंताज्जसजसंततो स्फुटीकर्तुं पूः पुराविन्युमन्यस्त इदु-
दुपधस्य इदुतौ उपधे यस्य समुदायस्य न स्यावयवो यो विसर्जनीय इति वैयधिकरण्येन संबंधः अप्रत्ययस्येति तु अप्रत्यये यो विसर्ग इति संवक्ष्यते संभवति
सामानाधिकरण्येव्यधिकरणस्यान्याय्यत्वात् न च विसर्गस्य प्रत्ययत्वमप्रसिद्धमिति वाच्यम् अग्निः करोतीत्यादौ स्थानिवद्भावेन तत्प्रसिद्धेः न चातिदेशं प्रति
त्रिपाद्या असिद्धत्वशंका अप्रत्ययस्येति निषेधेनैव सिद्धत्वज्ञापनात् अत एवाग्निरित्यादौ रोर्विसर्गः सिध्यति अन्यथा पदान्तत्वान्न स्यात् विसर्गविधिस्तु पुनरि-
त्यादौ चरितार्थः ज्ञापकं च विशेषापेक्षं तेनाचः परस्मिन्निति त्रिपाद्यां न प्रवर्तते एवं च पूर्वत्रासिद्धे न स्थानिवत् इति सिद्धान्तः उक्तयुक्तिमूलकः ननु वाचनि-

कइति प्रपंचितं शब्दकौस्तुभेऽस्माभिः नन्वेवं मातुःकार्यमित्यादौ षत्वं स्यादिति चेन्न कस्कादिषु भ्रातुष्पुत्रशब्दस्य पाठेन ङसिङसोरेत उकारात्परस्य षत्वने
तिज्ञापनात् एवंच अप्रत्ययस्येत्येतदपि व्यधिकरणमेवेति हरदत्तोक्तं नानीवादर्तव्यम् मातुरिति अत्र हि कृत उदित्येकादेशशास्त्रं विसर्गप्रतिपरंपरया प्रयोजन
कं आकरे तु एकादेशनिमित्तादिति प्रचुरः पाठः तत्र एकादेशशास्त्रनिमित्तं यस्य उकारस्य तस्मादित्यर्थः मुहुःकामेति इह कुप्वोःᳵकᳶपाविति प्रवर्तते इत्तौ मुहु
स्कामेति क्वचित्सकारः पठ्यते तेन त्वामामादिकमिति हरदत्तः द्विस्त्रिश्चतुरिति इह द्वित्रिभ्यां सुजंताभ्यां साहचर्याच्चतुःशब्दोऽपि सुजन्त एव ग्रहीष्यते कृत्वोर्थग्रहणं तु ज्ञा
पकं साहचर्येन सर्वत्र व्यवस्थापकमिति तेन दीधीवेवीटामित्यत्र धातुसाहचर्येण्यागमस्येटो ग्रहणं उभयत्र विभाषा चेयम् चतुरित्यस्य इदुदुपधस्येति प्राप्ते
इतरयोरप्राप्ते न च तयोरपि इसुसोः सामर्थ्ये इत्यनेन सिद्धिः शंक्या इसः प्रत्ययस्य अर्थवतश्च तत्र ग्रहणात् चतुष्कपाल इति इदुदुपधस्येति नित्यं षः व्यपेक्षा
विरहेऽपीति निषृतु सर्पिष्कुण्डिकामानयेत्यादौ इत्यर्थः व्यपेक्षायामिति इदं सर्पिष्कुण्डिकाया इत्यत्रेत्यर्थः यत्तु पारायणिकास्त्वाहुः कस्कादिषु सर्पिष्कुण्डिका
दीनां पाठऽन्तभ्रमदस्य त्वेपि षत्वार्थ इति तज्ज्ञाप्यविरोधादुपेक्ष्यं अपः सहितेति न त्वपसो विकारः जानपदेति ङीष्प्रसंगात् अयस्कर्णीति अपद इव कर्णो यस्याः
नासिकोदरौष्ठ्यादिना ङीष् अधःशिरसी पदे इति सूत्रे तु षष्ठ्याः स्थाने प्रथमा वा अध्यात् अधस्पदमिति मयूरव्यंसकादित्वात् समासः शिरस्पदमिति षष्ठीसमा
सः ॥ इति विसर्गसंधिः ॥ ससजुषो रुः पदस्येत्यनुवृत्तं ससजूर्भ्यां विशेष्यते विशेषणेन तदन्तविधिः न च सजूःशब्दांशे ग्रहणवता प्रातिपदिकेन तदन्तवि
धिर्नास्तीति निषेधः शंक्यः तस्य प्रत्ययविधिविषयत्वात् सांतं सजुषशब्दांतं च यत्पदं तस्य रुः स्यात् स चालोऽन्त्यस्य एवं स्थिते फलितमाह पदांतस्येति सजुषशब्दस्य
ति तदंतस्य पदस्येत्यर्थः तेन सजुषौ सजुष इत्यादौ नातिप्रसंगः न च सजूरित्यत्राव्याप्तिः व्यपदेशिवद्भावोऽप्रातिपदिकेनेति निषेधादिति वाच्यं येन विधिरिति
सूत्रे शब्दकौस्तुभेऽस्मां प्रत्याख्यातत्वात् व्यपदेशिवद्भावोऽप्रातिपदिकेनेति ग्रहणवतेति च परिभाषाद्वयमपि प्रत्ययविधिविषयकमिति दिव उत्सूत्रे कैयटह
रदत्ताभ्यामुक्तत्वाच्च एवं च परमसजूर्भ्यामित्याद्यपि निर्बाधम् एवं स्थिते इह सजुषशब्देन तदंतविधिर्नेति प्राचामुक्तिरापाततः इत्यवधेयं भोभगोअसंधिःसौ

त्र इति भगो अघो शब्दयोरोकारस्य अकारस्य च पूर्वरूपं सौत्रत्वान्नेत्यर्थः यदि तु भोस् भगोस् अघोस् इति सांतं रांतं वानुकृत्य भो इत्यादीनां त्रयाणां अलोंत्यस्य
यः स्यादपूर्वस्य रोऽश्चेति वाक्यभेदेन व्याख्यायते तर्हि संधिर्न्याय्य एव युक्तं चैतत् अन्यथा विभोरिदं सुप्रभागोर्यं सस्तु प्रभगुः तस्य सुप्रभगोरिदं रघोरिदमित्य
त्रापि यत्वापत्तेः भवति ह्ययं भो शब्दादिपूर्वो रुः न चात्र भोशब्दादेर्लाक्षणिकत्वादग्रहणं विभाषा भवद्भगवदघवतामोच्चावस्येति वार्तिकेन निष्पन्नानां भ
वदादिप्रकृतिकानां भोशब्दादीनामपि लाक्षणिकत्वाविशेषात् अनर्थकत्वमप्युभयत्र तुल्यम् रु विशिष्टानामेवार्थवत्त्वात् ननु रोरुकारस्यानुबंधत्वाद्रे
फमात्रं विसर्गस्य स्थानि तथा च नत्विधाविति स्थानिवद्भावो न स्यादित्याशंक्याह न ह्ययमिति यथाऽग्रहीदित्यत्र ग्रहोऽलिटीति दीर्घस्य स्थानिवद्भावेनेट्त्वा
दिट ईटीति प्रवर्तते एवमिहापि विसर्गस्य रुत्वात् यत्वं प्रवर्तेतेति भावः तथा च स्थानिवत्सूत्रे भाष्यम् विशिष्टं ह्येषोऽल्माश्रयते इट् नामेति इतोपि हेतोर्भो
त्वंगेत्यादिपाठस्य प्रामाणमशुद्धमित्यवधेयम् निपाता इति भो भगो इति सूत्रे निर्दिष्टा स्वादेराकृतिगणत्वान्नात्र बोध्याः तथा च विभाषा भवद्भगवदिति वार्तिकं।
नाश्रयणीयं अन्यथा पुंल्लिंगैकवचनमात्रे भो हरे इत्यादिसिद्धावपि भो हरि हरयो भो विद्वद्वृंद भो गंगे इत्यादि न सिध्येदिति भावः एतच्च वृत्तिकारहरदत्तादिमतेनो
क्तम् भाष्यस्वरसरीत्या तु विभाषेत्यादिवार्तिकमारब्धव्यमेव किंतु निपातोपि भोः शब्दोस्ति तेन द्विवचनादौ स्त्रीनपुंसकयोश्च नोक्तदोषः युक्ततरं चैतत् हे भ
भवन्तीतिवत् हे भो इति प्रयोगस्याप्यदृष्टत्वात् तस्य च वार्तिकारंभ एव सिद्धेः सुः पाट् प्याडंगहै हे भोः इत्यमरोक्तानां तु संबोधनार्थानां निपातानां सहप्रयोगायोग
त् किंच अत्र भवान् हरिः तत्र भवान् ततो भवान् इतिवत् तत्र भो इत्याद्यपि वार्तिके सत्येव सिध्यति इतराभ्योपि दृश्यन्ते इति सर्वविभक्त्यंतात्त्रलो भवदादियोग
एवेष्टत्वात् किंच आमंत्रितत्वे पदात्परस्याष्टमिकोनिघातः आमंत्रितं पूर्वमविद्यमानवद्भावः आम एकांतरमिति विधिः वाक्यादेरामंत्रितस्येति द्विर्भा
वः सुवामंत्रित इति परांगवद्भावश्चेत्यादि सर्वं सिध्यति न त्वन्यथेति दिक् भगो अघो इति निपातावपि यदि प्रामाणिकौ तर्हि आस्तां नाम आमंत्रितकार्यसि
द्धिस्तु वार्तिकायत्तैवेति सुधीभिराकलनीयम् यत्तु वदन्ति सकारांतानेवैतान् निपातानाख्याय रुत्वोत्वे भाष्ये प्रत्याख्याते इति तदतिरभसात् स्यादेतत् निप

तानामभ्युपगमेयत्नविधौन एव गृह्येरन् प्रतिपदोक्तत्वात्· ननु संबुद्ध्यन्ताः लाक्षणिकत्वादिति चेन्नैवम् स्वरितेनाधिकार इत्यत्र अधिकः कारोऽधिकारः इति
व्याख्यानमाश्रित्य लक्ष्यानुरोधेन स्वरितत्वमाश्रित्योभयग्रहणात्· भुवश्च महाव्याहृतेरिति सूत्रे महाव्याहृतिग्रहणं लक्षणप्रतिपदोक्तपरिभाषाया अनित्या।
त्वज्ञापनार्थमिति हरदत्ताद्युक्तेश्च नन्वेवमपि भोरिदमित्यादावतिव्याप्तिः परस्परसाहचर्येण निपातानां वार्त्तिकोक्तानां च ग्रहणेऽप्यन्येषामग्रहणात् व्यो।
र्लघुर्लघुप्रयत्नतरः लघूच्चारणतरः सचान्तरतम्या ह्रस्वः यस्यय इत्याह॰ वयाविति ओतो गार्ग्यस्य ओकारादिति यत्तु ओकारान्तादगादिति प्राचा व्याख्यातं तत
न्न· अंगस्याप्रकृतत्वात् असंभवाच्च नह्युदाहरणेषु ओकारान्तमंगमस्ति हलि सर्वेषां यकारस्येति वकारस्तु नानुवर्तते भोभगो अघो अपूर्वस्यासंभवात् अ
पूर्वस्य यद्यपि संभवति वृक्षवृकेरोतीति तथापि तत्र लोपाप्रसंगः अशीत्यनुवर्त्य अशाहलो विशेषणात् वृक्षवृवहतीत्यादि तु अनभिधानादसाध्वित्याहु
गव्यमित्यत्र तु पदान्तत्वं नास्ति गव्यूतिरित्यत्र तु वकारप्रश्लेषान्न वलोप इत्युक्तम् ननु देवानम्पा इत्यादौ लोपो व्योरित्येव सिद्धम् मैवम् तं प्रतियत्नस्यासि
द्धत्वात् देवायातीत्यत्र वल्परत्वाभावाच्च अहोरात्र इति रात्राह्नाहाः पुंसीति पुंस्त्वम् अहरादीनामिति उभयत्राप्यादिशब्दः प्रकारे तेन स्वर्वेक्षार्थिनः सम्म
शुष्मः विप्रः कर्विः काव्येना स्वर्चना इत्यादि ग्राह्यं तृढो दृढ इति ऊदित्वेन वेट्कत्वाद्यस्य विभाषेति निष्ठायां नेट् दृढत्वघत्वष्टुत्वढलोपाः यत्तु प्राचा प्रत्युदाहृतं
दृढ इति तन्न अत्र ढलोपस्यैवाभावात्· तथाहि दृढः स्थूलबलयोरिति सूत्रेण दंहेर्नकारहकारयोर्लोपस्तकारस्य ढत्वं च निपात्यते न त्वसिद्धकाण्डस्य ढत्व
स्येह प्रवृत्तिः दादेर्धातोरिति घत्वेन बाधात्· न च इड्भावो ढत्वं च निपात्यतां घत्वष्टुत्वढलोपास्तु भविष्यन्त्येवेति वाच्यम् तथा सति परिदृढय्येत्यत्रल्यपि ला।
घुपूर्वादिति णेरयादेशो न स्यात्· परिदृढीकन्येत्यत्र च अणिञोरिति ष्यङ् स्यात् ढलोपस्यासिद्धत्वेन गुरूपोत्तमत्वादिति भाष्ये स्थितम् यत्तु प्राचा व्याख्यातं दृहे
रेवेदं निपातनं दृहवृहाविति तु प्रकृत्यन्तरं तस्य निष्ठायामागमशास्त्रस्यानित्यत्वादिडभावे वा दुहेत्यत्र वेति योगविभागात् पक्षे घत्वाभावे ढत्वे ढलोपे च प्रत्युदा
हरणमिदं द्रष्टव्यमिति तन्न· उभयोरपि निपातनाभ्युपगमात् तदाह वामनः अथ दृहिः प्रकृत्यन्तरमस्ति तस्याप्येतन्निपातनं नलोपवर्जमिति युक्तं चैतत्॰ अन्य

म॰र॰
१४

थाहि अस्माण्णोरयन स्यात् व्यइत्तु स्यात् उत्वमेवेति सिद्धासिद्धयोरन्तुस्यक्तत्वेन विप्रतिषेधे परमित्यस्याप्रवृत्तौ निष्प्रतिपक्षत्वादुत्वमेव भवतीत्यर्थः तदुक्तं पूर्व
त्रासिद्धेनास्ति विप्रतिषेधोऽभावादुत्तरस्येति एतेन विमतिकार्ये प्राक् पश्चादुत्वमन्वे इत्यादि व्याख्यातं सूत्रे सुइति पृथक्पदं लुप्तषष्ठीकमित्याह॰ एतत्तदोर्यः सु
रिति एतत्तदर्थगतसंख्याभिधायीयः सुस्तस्येत्यर्थः एतत्तदोर्विहित इति व्याख्यानेतु परमसददाति षरमैषददाति इत्यादौ नस्यात् अर्थद्वारकसंबंधाश्रया
णोलिंगत्वनञ्समास इति वोध्यम् अकोः किमिति साकाङ्क्षयोः शब्दान्तरत्वात् अप्रसंग इति प्रश्नः एषक इति अकोरिति प्रतिषेध एव तन्न प्रपतितस्तद्ग्रहणेन
गृह्यते इति परिभाषां ज्ञापयतीति भावः बहुलग्रहणेति ऋा तएव लोपं विना पादपूरणेपि क्वचिद्भवति सास्मा अरंत अस्मे इति छेदः ❀ इति स्वादिसंधिः ❀ अ
र्थवद्धातुः प्रत्ययं प्रत्ययांतं चेति सूत्रे तंत्रादिना उभयं विवक्षितमिति भावः तथाहि॰ प्रत्ययस्यैव पर्युदासे कृत्तद्धितेति सूत्रेण तद्धितांतस्य संज्ञाविधानं व्या
र्थं स्यात्॰ न च तत्रापि तदन्तं न ग्राह्यमिति वाच्यम् अर्थवदित्यस्यानुवृत्तिसामर्थ्यात्तदंतग्रहणात्॰ प्रशंसायां हि मतुप् एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वं
च प्रशंसामूलं न वार्थवदित्यस्य पूर्वसूत्रे चरितार्थतया धातुप्रत्ययपर्युदासेनैव तल्लाभात् तस्मात्प्रत्ययान्तं वर्जयित्वेत्युचितमेव यदि तु प्रत्ययो न पर्युदस्येत
नहि सात्पदाद्योरिति सूत्रे सातिग्रहणं व्यर्थं स्यात् अर्थवदिति किम् धनं वनमित्याद्रौ प्रतिवर्णं संज्ञा माभूत् तस्यां हि सत्यां स्वादयः सुः ननु संख्याकर्मादेरभा
वात् न भविष्यतीति चेन्न॰ एकवचनमुत्सर्गतः करिष्यते इति सिद्धांतात् हुंफडादिभ्य इव सोर्दुर्वारत्वात् न चार्थवद्ग्रहणपरिभाषयानर्थकेन स्यादिति वाच्यम्
तस्याविशिष्टरूपोपादानविषयत्वात्॰ अधातुरित्यादिपर्युदासबलेन यद्यप्यर्थवत्त्वं लभ्यते तथापि उत्तरार्थं तदित्युक्तम् एतच्च सुप्तिङन्तमिति सूत्रे भाष्ये ध्व
नितम् यत्त्वाहुः पर्युदासो नार्थवत्त्वं गमयति अनर्थकयोरपि धातुप्रत्यययोर्दर्शनात्॰ अधीते यावक इति अधिपूर्वस्येङः प्रयोगात्॰ विशिष्ट एवार्थवान् ननु
केवलः इङः अयने इत्याद्यर्थनिर्देशस्तु अवयवे समुदायार्थारोपात् एवं कत्वप्यनर्थकः यावशब्दादपि तदर्थप्रतीतेः ओषधेश्च विभक्तावप्रथमायां अकबेरि
चकारके इति विभक्तिकारकग्रहणाभ्यां तन्निवयुक्तन्यायस्यानित्यत्वकल्पनाच्चेति अत्रेदं वक्तव्यं धातुरनर्थक इति नावद्याहतं क्रियावाचकत्वं विना धातुत्वा

राम
१४

योगात्· आरोपितं तदिति चेन्· सत्यं तावतैवेष्टसिद्धेः प्रकृतिप्रत्ययविभागः तत्तदर्थविभागश्च सर्वः कल्पित एव परमार्थतस्तु स्फोट एवार्थवानिति सिद्धान्तात्
उक्तं च हरिणा उपायाः शिक्ष्यमाणानां बालानामुपलालनाः असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते इति कथमन्यथा इङो द्विर्वचनमाडादपश्च सुः तथा
च प्रत्याहाराह्निके अर्थवन्तो वर्णा इति प्रघट्टके अध्येति अधीत इत्यत्र इकारोऽर्थवानिति भाष्ये स्पष्टमेवोक्तं एवं कन्प्रत्ययोऽप्यर्थवानेव स्वार्थिकानां प्रकृ
त्यर्थे नैवार्थवत्त्वात् कल्पनामात्रमिदमिति चेन्न॥ उक्तोत्तरत्वात्॥ नैषा कल्पना शास्त्रकृतां संमतेति चेन्न॥ द्वितीयचतुर्थतुर्याणि इति सूत्रे पूरणात् स्वार्थे
अन्यस्य पूरणार्थतायाः भाष्यकारैरेवोक्तत्वात्। प्रत्यय इति महासंज्ञां कुर्वतः सूत्रकृतोऽपि संमतमेवेदं। यदपि ओषधेश्चेत्यादि तदपि न। अनित्यत्वे।
औत्सर्गिकप्रवृत्त्या इष्टसिद्धेः। इष्टस्य त्वेय्य प्रकृतौ न्यायस्य निर्विषयत्वापत्तेश्च। अनित्यत्वज्ञापनस्य कथंचिदावश्यकत्वेऽर्थवद्ग्रहणस्यैव ज्ञापकत्व
संभवाच्च। उत्तरार्थस्यापि इह किं चित्रयोः इति न्यायेन इहकरणस्य सफलत्वौचित्यात्। ओषधेश्चेत्यादौ विभक्तिकारकग्रहणयोरेवेत्थं सति प्रत्याख्यान
संभवाच्चेति दिक्। अधातुरिति किं। अहन्। नलोपो माभूत्। न च कार्यकालपक्षे प्रत्ययान्तत्वे न पर्युदासोऽस्त्विति वाच्यं। प्रत्ययलक्षणेनोक्तपर्युदासप्रवृत्ते
र्न ङिसंबुद्ध्योरिति निषेधेन ज्ञापितत्वात्। कथमन्यथा राजेत्यादौ नलोपः स्यात्। अप्रत्ययः किं। हरिषु। करोषि। अत्र सुप्सिपोर्माभूत्। अप्रत्ययान्तः किं।
तत्रैव विभक्तिविशिष्टयोर्माभूत्। न चान्तवद्भावेन कांडे कुड्ये इत्यादौ प्रातिपदिकत्वं स्यादिवा। तथा च ह्रस्वो नपुंसक इति ह्रस्वत्वे सोरुत्पत्तिश्च स्यादिति वा
च्यं। कार्यकालपक्षेणेष्टसिद्धेः। यथोद्देशेऽपि विभक्त्येकादेशो नान्तवत्। सप्तम्यधिकरणे चेत्यादिनिर्देशात्। ह्रस्वो नपुंसक इति सूत्रे प्रातिपदिकग्रहणं
वा उक्तेऽर्थे सामान्यापेक्षं ज्ञापकमस्तु। यत्तु वदंति प्रत्ययपर्युदासो न कर्तव्यः प्रत्ययान्तपर्युदासेनैव गतार्थत्वात्। व्यपदेशिवद्भावेन तस्यापि प्रत्ययान्तत्वा
दिति। तन्न। प्रत्ययग्रहणे यस्मात्स विहितस्तदादेर्ग्रहणात् केवलस्य अतथात्वात्। अन्यथा त्वदुक्तरीत्या सुप्तिङोरपि तदन्तत्वात्पदत्वं स्यात्। तथा च हरिषु
करोषीत्यादौ षत्वं न स्यात् सात्पदाद्योरिति निषेधात्। अधातुप्रत्ययाविति सिद्धे नञ्द्वयोपादानं स्पष्टार्थम्। महासंज्ञाकरणं श्रुत्यनुरोधात्। तथा चाथर्वणे प

म॰र॰
१५

थतेको धातुः किं प्रातिपदिकं कः प्रत्यय इति। डित्थादीन्यव्युत्पन्नानीहोदाहरणं। अव्युत्पत्तिपक्षस्यैवेदमेव ज्ञापकमिति प्राञ्चः। यत्तु व्युत्पत्तिपक्षेपि निपातार्थ-
मनुकरणार्थं चेदमिति हरदत्तेनोक्तं॥ तच्चिंत्यं॥ तत्रापि प्रकृत्यादिकल्पनसंभवात्। वस्तुतस्तु व्युत्पत्तिपक्षेपि बहुपटवदित्याद्यर्थं सूत्रं। न चैवं बहुच्पूर्वे इत्येव
सूत्र्यतामिति वाच्यं। मूलकेनोपदंशमित्यादौ कृदंतत्वेनातिप्रसंगात्। न च समासग्रहणं नियमार्थमिति निस्सारः। अर्थवत्सूत्रं विना समासग्रहणस्य निय-
मार्थत्वायोगादिति दिक्॥ कृत्तद्धितसमासाश्च॥ अर्थवदित्यनुवर्तते। तत्सामर्थ्यात्तदंतविधिः। न हि जहत्स्वार्थायां वृत्तौ कृतां तद्धितानां चार्थोस्ति। भूतपूर्व-
गतिलभ्यस्तु न प्रशस्तः। अजहत्स्वार्थायामपि न प्रत्ययमात्रेणार्थपर्यवसानं इत्यभिप्रेत्याह। कृत्तद्धितांताविति॥ लिट् धुक् इत्यादौ अधातुरिति कर्तेत्यादौ।
अप्रत्ययांतमिति पर्युदासे प्राप्ते कृदंते विधिरयं। नियमार्थमिति न च प्रत्ययांतत्वेन पर्युदासे प्राप्ते विध्यर्थमस्त्विति शंक्यं। वाक्यस्याप्रत्ययांतत्वात् प्रत्य-
यग्रहणे यस्मात्स विहितस्तदादेरेव ग्रहणात्। ननु स्त्रीप्रत्यये तदादिनियमो निषिद्धः एवं च राजकुमारीत्यादौ विध्यर्थमस्त्विति चेन्मैवं॥ अंतरंगस्यापि ह-
ल्ङ्यादिलोपस्य लुग्विषये प्रवृत्त्या श्रूयमाण एव सुपि समासप्रवृत्तेः। तत्र चाप्रत्ययांतत्वेन प्रसक्तायाः संज्ञायाः एकदेशविकृतन्यायेन विभक्तिलुक्यपि सु-
लभत्वात्। अत एव गोमत्प्रिय इत्यादौ नुमादयो न। लुकः प्रागंतरंगप्रवृत्तौ तु सुरेवा। नन्वेवमपि असमर्थसमासे दशदाडिमादिवदनर्थके विध्यर्थमस्त्वि-
ति चेन्न। अर्थवदित्यस्यानुवृत्तेः कृतत्वात्। कथं तर्हि असमर्थसमासे संज्ञेति चेद्धर्मिग्राहकमानादेवेति गृहाण॥ असूर्यललाटयोरिति हि असूर्यशब्दे उ-
पपदे खश् विधीयते। उपोच्चारितं पदमुपपदं। पदं च सुप्तिङंतमिति॥ नियमशरीरमाह॥ यत्र संघात इत्यादि पूर्वो भाग इत्युपलक्षणं। उत्तरस्तु प्रत्ययो
नेत्यपि बोध्यं। अन्यथा जन्मवानित्यादौ संज्ञा न स्यात्तद्धितग्रहणस्योपगवादौ चरितार्थत्वात्। पूर्वो भागः पदमिति किं। बहुच्विशिष्टस्य प्रातिपदिकसंज्ञा
यथा स्यात्। तेन बहुपटव इत्यत्र प्रथमजसो लुकि बहुपटुशब्दस्य चित्स्वरे पुनर्जस्युपोत्तमोदात्तत्वं सिध्यति। यद्वा प्रकृतिप्रत्ययभावानापन्नसंघातवि-
षयको नियमोस्तु। न चाद्यपक्षे राजपुरुषावित्यादौ पुरुषावित्यादेः संज्ञा स्यादिति वाच्यं। अर्थवत्त्वेनैव वारणात्। प्रत्ययार्थो हि विशिष्टस्यान्वेति। न तूत्तर-

एम
१५

पदार्थमात्रे। येन पूरुषावित्यस्यार्थवत्त्वं स्यात्। नियमफलमाहुः तेनेत्यादि॥ नन्वेवमपि मूलकेनोपदंशमित्यादौ वाक्यस्य संज्ञा दुर्वारा कृद्ग्रहणे गतिका
रकपूर्वस्यापि ग्रहणादिति चेन्नैवं। समासग्रहणकृतनियमेन परत्वाद्बाधात्। एवं च कृत्तद्धितेति सूत्रे कृद्ग्रहणपरिभाषा नोपतिष्ठत एव निष्फलत्वादिति ता।
त्वं। यत्तु वदन्ति समासग्रहणं न नियमार्थं किंतु विध्यर्थमेव। अर्थवत्त्वं हि वृत्तिमत्त्वं वृत्तिश्च द्विधा शक्तिर्लक्षणा च न च सा समासे ऽस्तीति। अत्रेदं वक्तव्यम्। सिद्धान्ते ता
वदेकार्थीभावाभ्युपगमाद्वृत्तिर्नास्तीति बाधितमेव॥ मीमांसकमतेपि लक्षणास्त्येवं। यदाहुः। सर्वत्रैव हि वाक्यार्थो लक्ष्य एवेति च स्थितमिति। अथ नैयायिकरी
त्योच्येत तदपि न। बहुपटव इत्याद्यसिद्धेः॥ तद्धितग्रहणं तद्धितशिष्टपरमिति चेन्न। पचतकीत्यादावतिव्याप्तेः। किंचैवं कृद्ग्रहणपरिभाषया मूलकेनोपदंशमि
त्यादावतिव्याप्तिर्दुर्वारैवेत्यास्तां तावत्॥ चकारोनुक्तसमुच्चयार्थः। तेन निपातस्यानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्येति गतार्थं। येषां द्योत्योप्यर्थो नास्ति तदर्थ
मिदं। अवद्यति। अनुकरणेषु तु अनुकार्येण सहाभेदविवक्षायां अर्थवत्त्वाभावादेव न प्रातिपदिकत्वं भूसत्तायामिति यथा। भेदविवक्षायां तु संज्ञा स्यादे
व। भुवो वुगिति यथा॥ लिंगविशिष्टस्येति॥ लिंगबोधकप्रत्ययविशिष्टस्यापीत्यर्थः। परिभाषायाः प्रयोजनं तु। अयस्कुंभी। अतः कृकमीति सत्वं तद्धि के
सादिष्वपरपदेष्वेव विधीयते। किंच॥ कुमारीमाचष्टे कुमारयति। णाविष्ठवदिति टिलोपः एवं यामिनयति महानिइत्यत्र आचारे क्विपि फलं॥ ड्याब्भ्यां प्रागिति।
तेन लोहितिका आर्यिका च सिध्यति॥ तथा हि स्वार्थिकत्वेनान्तरंगः परश्च लोहितान्मणाविति कन् ङीपं बाधेत। ततः लोहितिकेत्येव स्यादिष्यते तूभयं। ङीप्यग्र
हणासामर्थ्यात्तु कृतान्तात्कन्निरूपद्वयं सिद्धं। वर्णादनुदात्तादित्यस्य वैकल्पिकत्वात्। आर्यशब्दात्तु न तामिवचन इत्यत्र ज्ञापयिष्यमाणो ऽयं न स्वार्थिकोपि कन्
आब्ग्रहणसामर्थ्यात्पूर्वं न प्रवर्त्तते तेन उदीचामातः स्थाने यकपूर्वाया इति इत्वविकल्पः सिध्यति। स्यादेतत्। एवं सति बहुगोमत्केति न सिध्येत्। बहुगोमच्छब्दा
त्कपः प्राक् उगित्लक्षणङीप्प्रसंगादिति चेन्नैवं॥ अकृत एव समासे ऽलौकिकप्रक्रियावाक्य एव उत्तरपदस्यावयवीभूय समासान्तः प्रवर्त्तत इति वक्ष्यमाणत्वा
त्॥ स च विभक्तेः पुरस्तादित्येके। परस्तादिति परे। न तु तद्धितान्तत्वात्सुब्लुकि पुनः सुपि च कृते समास इति सिद्धान्तः। तस्मादन्तरंगादपि तद्धितात्प्राक् ङ्यापोः प्रवृत्त्यर्थं।

थतेकोधातुः किंप्रातिपदिकं कः प्रत्यय इति। डित्थादीन्यव्युत्पन्नानीहोदाहरणं। अव्युत्पत्तिपक्षस्यैवेदमेव ज्ञापकमिति प्राचः। यत्तु व्युत्पत्तिपक्षेपि निपातार्थ
मनुकरणार्थं चेदमिति हरदत्तेनोक्तं॥ तच्चिंत्यं॥ तत्रापि प्रकृत्यादिकल्पनसंभवात्। वस्तुतस्तु व्युत्पत्तिपक्षेपि वहुपटव इत्याद्यर्थं सूत्रं। नचैवं वहुच्पूर्वे इत्येव
सूत्र्यतामिति वाच्यं। मूलकेनोपदंशमित्यादौ कृदंतत्वेनातिप्रसंगात्। नच समासग्रहणं नियमार्थमिति निस्तारः। अर्थवत्सूत्रं विना समासग्रहणस्य निय-
मार्थत्वायोगादिति दिक्॥ कृत्तद्धितसमासाश्च॥ अर्थवदित्यनुवर्तते। तत्सामर्थ्यात्तदंतविधिः। नहि जहत्स्वार्थायां वृत्तौ कृतां तद्धितानां चार्थोस्ति। भूतपूर्व
गतिलभ्यस्तु न प्रशस्तः। अजहत्स्वार्थायामपि न प्रत्ययमात्रेणार्थपर्यवसानं इत्यभिप्रेत्याह। कृत्तद्धितांतानां विति॥ लिट्भुक् इत्यादौ अधातुरिति कर्तेत्यादौ।
अप्रत्ययांतमिति पर्युदासे प्राप्ते कृदंते विधिरयं। नियमार्थमिति न च प्रत्ययांतत्वेन पर्युदासे प्राप्ते विध्यर्थमस्त्विति शंक्यं। वाक्यस्याप्रत्ययांतत्वात् प्रत्य-
यग्रहणे यस्मात्स विहितस्तदादेरेव ग्रहणात्। ननु स्त्रीप्रत्यये तदादिनियमो निषिद्धः एवं च राजकुमारीत्यादौ विध्यर्थमस्त्विति चेन्मैवं॥ अंतरंगस्यापि ह-
ल्ङ्यादिलोपस्य लुग्विषये प्रवृत्त्या श्रूयमाण एव सुपि समासप्रवृत्तेः। तत्र चाप्रत्ययांतत्वेन प्रसक्तायाः संज्ञायाः एकदेशविकृतन्यायेन विभक्तिलुक्यपि सु-
लभत्वात्। अत एव गोमत्प्रिय इत्यादौ नुमादयो न। लुकः प्राग् अंतरंगप्रवृत्तौ नुसुरेव। नन्वेवमपि असमर्थसमासे दशदाडिमादिवदनर्थके विध्यर्थमस्त्व-
ति चेन्न। अर्थवदित्यस्यानुवृत्तेरुक्तत्वात्। कथं तर्हि असमर्थसमासे संज्ञेति चेद्धर्मिग्राहकमानादेवेति गृहाण॥ असूर्यललाटयोरिति हि असूर्यशब्दे उ-
पपदे खश् विधीयते। उपोच्चारितं पदमुपपदं। पदे च सुप्तिङंतमिति॥ नियमशरीरमाह॥ यत्र संघाते इत्यादि पूर्वो भाग इत्युपलक्षणं। उत्तरस्तु प्रत्ययो
नेत्यपि वोध्यं। अन्यथा जन्मवानित्यादौ संज्ञा न स्यात् तद्धितग्रहणस्याप्युपगवादौ चरितार्थत्वात्। पूर्वो भागः पदमिति किं। वहुच्विशिष्टस्य प्रातिपदिकसंज्ञा
यथा स्यात्। तेन वहुपटव इत्यत्र प्रथमजसो लुकि वहुपटुशब्दस्य चित्स्वरे पुनर्जसि उपोत्तमोदात्तत्वं सिध्यति। यद्वा प्रकृतिप्रत्ययभावानापन्नसंघातवि-
षयको नियमोस्तु। नचायं पक्षे राजपुरुषावित्यादौ पुरुषावित्यादेः संज्ञा स्यादिति वाच्यं। अर्थवत्त्वेनैव वारणात्। प्रत्ययार्थो हि विशिष्ट एवान्वेति। न तूत्तर

पदार्थमात्रे।येन पूरुषाविस्यस्यार्थवत्वंस्यात्।नियमफलमाहतेनेत्यादि॥नन्वेवमपिमूलकेनोपदंशमित्यादौवाक्यस्यसंज्ञादुर्वारा कृद्ग्रहणेगतिका
रकपूर्वस्यापिग्रहणादितिचेन्नैवं।समासग्रहणकृतनियमेनपरत्वाद्बाधात्।एवंचकृत्तद्धितेतिसूत्रेकृद्ग्रहणपरिभाषानोपतिष्ठतएवनिष्फलत्वादितित।
त्वं।यत्तुवदंतिसमासग्रहणंननियमार्थंकिंतुविध्यर्थमेव।अर्थवत्वंहिवृत्तिमत्वं वृत्तिश्चद्विधाशक्तिर्लक्षणाच नचसासमासेस्तीति।अत्रेदंवक्तव्यम्।सिद्धांतेता
वदेकार्थीभावाभ्युपगमाद्वृत्तिर्नास्तीतिवाधितमेव॥मीमांसकमतेपिलक्षणास्त्येवं।यदाहुः।सर्वत्रैवहिवाक्यार्थोलक्ष्यएवेतिचस्थितमिति।अथनैयायिकरी
त्योच्येत नतदपिन।वहुपटवइत्याद्यसिद्धेः॥तद्धितग्रहणंनद्विशिष्टपरमितिचेन्न।पचतकीत्यादावतिव्याप्तेः।किंचैवंकृद्ग्रहणपरिभाषयामूलकेनोपदंशमि
त्यादावतिव्याप्तिर्दुर्वारैवेत्यास्तांतावत्॥चकारोनुक्तसमुच्चयार्थः।तेननिपातस्यानर्थकस्यप्रातिपदिकसंज्ञावक्तव्येतिगतार्थं।येषांद्योत्योप्यर्थोनास्तितदर्थ
मिदं।अवद्यति।अनुकरणेषुतुअनुकार्येणसहाभेदविवक्षायांअर्थवत्वाभावादेवनप्रातिपदिकत्वंभूसत्तायामितियथा।भेदविवक्षायांतुसंज्ञास्यादे
व।भुवोवुगितियथा॥लिंगविशिष्टस्येति॥लिंगवोधकप्रत्ययविशिष्टस्यापीत्यर्थः।परिभाषायाःप्रयोजनंतु।अयस्कुंभी।अतःकृकमीतिसत्वं नद्धिकं
स्यादिष्वपरपदेषुविधीयते।किंच॥कुमारीमाचष्टेकुमारयति।णाविष्टवदितिटिलोपःएवंयामिनयंत्यहानिइत्यत्रआचारेक्विपिफलं॥ङ्याब्भ्यांप्रागिति।
तेनलोहितिकाआर्यिकाचसिध्यति॥तथाहिस्वार्थिकत्वेनांतरंगःपरश्चलोहितान्मणाविति कन्ङीपंवाधेत।ततःलोहितिकेत्येवस्यादिष्यतेतूभयं।ङीपग्र
हणासामर्थ्यात्तुकंतात्कनिरूपद्वयंसिद्धं।वर्णादनुदात्तादित्यस्यवैकल्पिकत्वात्।आर्यशब्दस्तुनसामिवचनइत्यनज्ञापयिष्यमाणेः।त्यंनस्वार्थिकोपिकन्
आवग्रहणसामर्थ्यात्पूर्वंनप्रवर्ततेतेनउदीचामातस्थानेयकपूर्वायाइतिइत्वविकल्पःसिध्यति।स्यादेतत्।एवंसतिवहुगोमत्केतिनसिध्येत्।वहुगोमच्छब्दा
त्कपःप्राक्उगिल्लक्षणङीप्प्रसंगादितिचेन्नैवं॥अकृतएवसमासेऽलौकिकप्रक्रियावाक्येएवउत्तरपदस्यावयवीभूयसमासांतःप्रवर्ततइतिवक्ष्यमाणत्वा
त्।।स्वविभक्तेःपुरस्तादित्येके॥परस्तादितिपक्षेतुनतद्धितांतत्वात्सुब्लुकिपुनःसुप्यिचकृतेसमासइतिसिद्धांतः।तस्मादंतरंगादपितद्धितात्प्राक्ङ्यापोःप्रवृत्त्यर्थं।

ङ्याव्ग्रहणमितिस्थितं। यत्त्वाहुः। आवग्रहणंस्पष्टार्थमितितदनेनप्रत्युक्तं। वस्तुतस्तुङ्यापोर्ग्रहणंमास्तु॥ सुवंतात्तद्धितोत्पत्तिरितिहिनिष्कर्षः। सुपःप्रागेव
ङ्याप्प्रवर्तेते। स्वार्थादिप्रयुक्तकार्याणांक्रमिकत्वस्वीकारादित्यवधेयं॥ सुडःस्थाविति॥ सोरुकारो वेणास्त्रसावित्यत्रविशेषणार्थः। असीत्युक्तेहिअसका
रादावित्यर्थःस्यात्॥ तथाचावाजमर्वस्तुपयुउस्त्रियासुइतिनसिध्येत्। ङसेरिकारोयुष्मदस्मद्भ्यांङसोशित्यत्रअस्यग्रहणंमाभूदिति। सदित्युएकवचनस्य
चेत्यत्रपंचम्याइत्यनुवृत्तेःपरिशेषादन्यत्रङसोत्रग्रहणंभविष्यतीत्युच्यतेतर्हिटाङसिङसामितेनरर्थः। जश्शसोर्जकारशकारौ जसःशीतस्माच्छसोनः।
इत्यनयोर्विषयविभागार्थौ। अन्यतरस्यनिरनुबंधकत्वमेवास्त्विति चेन्न। जसोजकाराभावे औङित्यस्यापिस्यात्। ततश्चप्रत्ययस्यवकारांतत्वनापिसंभाव्येत। ए
वंशसःशकाराभावेओटोडित्वंसंभाव्येतअतोऽसंदेहार्थंतत्करणं चित्यात्। औटष्टकारःसुडितिप्रत्याहारार्थः। टाटकारस्तुटाङसीतिविशेषणार्थः। ङेप्रभृ
तीनांङकारोघेर्ङितीतिविशेषणार्थः। सुपःपकारस्तुप्रत्याहारार्थः। एवंचसर्वेषांसफलत्वेपिसंज्ञार्थोइतिप्राचोग्रंथोऽसंगतएव। सम्यक्ज्ञानंसंज्ञा। तदर्थोःवि
शेषणार्थोइतियावत्। इतिभंक्त्वाव्याख्यानेपिक्लिष्टत्वमेवेत्युपेक्षितं। तिङस्त्रीणित्रीणीतिसूत्रात्त्रीणित्रीणीतिपदंतान्येकवचनेत्यादिसूत्रंचसंपूर्णमनुव
र्ततइतिव्याचष्टे। सुपस्त्रीणित्रीणीत्यादिना। एकशइति। एकैकमित्यर्थः। संख्यैकवचनाच्चेतिवीप्सायांप्रथमांतात्शस्। यत्तुप्राचाएकैकशइत्युक्तंतदयुक्तं। श
सेवीप्सायांउक्तत्वेन द्विर्वचनायोगात्। येननाप्राप्तिन्यायेन द्विर्वचनापवादःशसइतिसिद्धांतात्। यत्त्वाहुः। सर्वस्यद्वेइत्यत्रएकैकशोददातीतिभाष्यप्रयो
गात्। तान्येकेतिसूत्रेकारनिर्देशाच्चोभयंसाध्वितितन्न। उदाहृतभाष्यस्यान्यविषयत्वात्। यत्रतद्धितेनानुक्तावीप्साभवतितत्रद्विर्वचनंइत्युपक्रम्यतद्यथा
एकैकशोददातीतिभाष्येउदाहृतं। व्याख्यातंचकैयटेन॥ अस्यार्थोप्येकशब्दोस्तितस्यवीप्सायां द्विर्वचनेवहूल्यार्थादितिशस्प्रत्ययइति। नचैषोर्थः प्रकृ
तेसंभवतीत्यास्तांतावत्। रामइति॥ संज्ञाशब्दोयंअयुतन्तइतिपक्षेअर्थवत्सूत्रेणप्रातिपदिकसंज्ञा। करणाधिकरणयोश्चेत्यधिकारेघापवादेनहलश्च।
तिघञ्प्रत्यये। रमंतेऽक्रीडंतियोगिनोऽस्मिन्निति व्युत्पादनेतुकृत्तद्धितइतिसूत्रेणेतिविवेकः। सरूपाणामेकशेषः। एकविभक्तौयानीति। विभक्तिःसारूप्येउपलक्ष

एकशइतिसूत्र ४

एम
१६

णां नत्वेकशेषे निमित्तं। एवं चानैमित्तिकत्वेनांतरंगोयमेकशेषः सुबुत्पत्तेः प्रागेव प्रवर्त्तते। यद्येतन्नारभ्येत तर्हि प्रत्येकं विभक्तिः स्यात्। द्वंद्वश्च प्रवर्त्तेत। आ
रब्धे त्वेकशेषेऽनेकसुबंतविरहात् द्वंद्वस्याप्राप्तिरेव फलिता भवतीति भावः। सरूपाणामेवेति॥ एतच्च उत्तरसूत्रस्थस्य एवकारस्येहानुकर्षणाल्लभ्यते तेन मा
तृशब्दयोर्जननीवाचिपरिच्छेत्तृवाचिनोर्नैकशेषः। मातृभ्यामित्यादौ सारूप्येपि औजसादिषु वैरूप्यात्। एक एवेति॥ एतच्च सहविवक्षायामेव प्रवर्त्तते इतरे
तरयोगद्वंद्वस्य विषये इति यावत्। यत्र ह्यनेकस्यार्थस्य मिलितस्येतरान्वयः स तथाभूतो विषयः। इदं च इदितो नुम् धातोरिति लिंगाल्लभ्यते न्यायाच्च। तथा
हि। यः शिष्यते स लुप्यमानार्थाभिधायीति स्थिते श्रूयमाणैकशब्दोपस्थितं सर्वमविशेषादेकरूप्येणैवान्वेतुमर्हतीति। यद्वा। पूर्वसूत्राद् द्वंद्व इत्यनुवर्त्य द्वंद्वे प्रसक्ते।
सतीति व्याख्येयं। स्यादेतत्। द्वंद्वे कृते सतीत्यर्थे सु मेवं पंथानौ पंथान इत्यादौ समासांतापत्तिः। करौ करा इत्यादौ एकवद्भावापत्तेः सर्वे सर्वेषामित्यादौ द्वंद्वे च वि
भाषा जसीत्यनयोरापत्तेश्चेति दिक्। यत्तु प्राचा राम राम औ इति स्थिते इत्युक्तं एकरूपं शिष्यते एकविभक्तौ परत इति च तत्रेत्थमुक्तिसंभवः। राम राम इत्यत्रावयवयो
रिव समुदायस्यापि प्रातिपदिकसंज्ञास्ति मिलितेनार्थवत्त्वात्। न चार्थवत्त्वेपि समासग्रहणस्य नियमार्थत्वान्नैवमिति वाच्यं। यत्र संघाते पूर्वो भागः पदं त
द्विषयको नियम इत्युक्तत्वाद्दृषदुपटवदित्याद्यनुरोधेन नियमस्य सजातीयविषयताया औचित्याच्च। तथा चैकाचो द्विर्वचनन्यायेन समुदायप्रातिपदिका
द्वे द्विर्वचनाद्युत्पत्तिः। तावताप्यवयवार्थानां सख्यान्वयेनानुग्रहसंभवात्। नन्वेवं रामकृष्णावित्यादिष्वपि द्वंद्वं विनैव समुदायाद्विभक्तिः स्यादिति चेन्मैवं।
द्वंद्वविधावनेकं सुबंतमित्यस्यानुवृत्त्या एकाचो द्विर्वचनन्यायस्य बाधादिति दिक्। इत्थमुक्तिसंभवेसत्यपि समुदायादेकविभक्तौ परत इति पक्षः किमर्थमुपे
क्षितः इति चेत् शृणु। अस्मिन्पक्षे मातृमातरावित्यादावपि एकशेषः स्यात्। नन्वेकविभक्ताविति यावत्येवकारं चापकृष्य एकविभक्तौ यानि सरूपाण्येवेति व्या
ख्येयमिति चेन्न। आवृत्तौ मानाभावात्। विभक्तेरेकशेषविशेषणत्वे फलाभावाच्च। न च पयः पयो जरयतीत्यादिव्यावृत्तिः फलं सहविवक्षायामित्यस्यावश्य
कत्वात्। अन्यथा पयः पयो नयतीत्यत्र गौणमुख्यकर्मणोरेकशेषापत्तेः। देवदेव इत्यादावतिप्रसंगाच्च। प्रस्तुतश्चायुक्त्या उभयविशेषणत्वे भिक्षाणां समूहो भै

स॰र॰
१८

क्षमितिनसिध्येत्।तथाहि॰भिक्षा३आम३इतिस्थितेअन्तरङ्गानपिविधीन्बहिरङ्गोपिप्लुतिर्लुकिकृतेविभक्तिपरत्वाभावादेकशेषोनस्यात्।लुकालुप्तेप्र
त्ययलक्षणाभावात्।किंच॰रामावित्यादौपरत्वान्नित्यत्वाच्चवृद्धिरेचीत्येकादेशेकृतेविभक्तिपरत्वाभावादेकशेषोनस्यात्।उभयतआश्रयणेऽन्तादिवद्भावा
भावादितिदिक्।यत्तुप्राचाव्याख्यातंपक्षान्तरमुपन्यस्तंसविभक्तिकानामेकशेषइतितन्न।निवर्त्तमानानांविभक्त्यासहैवनिवृत्तावपिशिष्यमाणएकव।
चनश्रवणप्रसंगात्।अथोच्येतयुगपदधिकरणवचनतायांद्विवचनबहुवचनान्तानामेकशेषःद्वंद्वोप्येवं।तथाहि।अजहत्स्वार्थायांवृत्तौएकैकमने।
कार्थाभिधायिपरस्परंसमभिव्याहारात्।तथाच॥अलौकिकेद्वंद्वैकशेषयोःप्रक्रियावाक्येद्विवचनबहुवचनयोरेवप्रवेशात्।विभक्त्यन्तानामेकशेष
इतिपक्षोनिर्वाधएवेतितन्नदृष्टिना।जहत्स्वा र्थायांवृत्तौनदयोगात्।पक्षान्तरेपि॰प्रथमप्रवृत्तस्यैकवचनस्यत्यागायोगात्।अन्यथाषष्ठीतत्पुरुषाद्युच्छेदापत्तेः
।तत्रापि॰पूर्वपदस्योत्तरपदार्थेउपसंक्रमेणषष्ठ्याद्ययोगात्।तथाचभाष्यं॰सेयंयुगपदधिकरणवचनतादुःखाचदुरुपपादाचेति॰यदपिव्याचख्युःव्य
क्तिपक्षेयावद्व्यक्तिःतावच्छब्दप्रयोगेप्राप्तेएकस्यैवप्रयोगोयथास्यात्इतिसूत्रं।आकृतिपक्षेतुएकेनैवाकृत्यविनाभूतानेकव्यक्तिलाभादनर्थकमितितन्न
।व्यक्तिपक्षेपिनब्राह्मणान्हन्यादित्यत्रब्राह्मणशब्देनैवैकेनापिअनेकस्यतंत्रेणसुवचत्वात्।अन्यथाजातिपक्षेपिवासःसनस्यकुसुमयोश्चनस्मिन्नित्या
दिनानार्थानुरोधेनसूत्रंविनाऽनिर्वाहात्।तस्माज्जातिव्यक्तिपक्षयोरुभयोरपितंत्रेणप्रयोगनिर्वाहेपिसर्वत्रतंत्रेणैवबोधनीयमितिनियामकाभावात्पा
क्षिकोद्वंद्वःसूत्रंविनादुर्वारःघटोयंघटोयमितिनानाशब्दप्रयोगदर्शनात्तद्वत्घटघटावितिद्वंद्वस्यन्याय्यप्राप्तत्वात्।नचैवमपिघटकलशावितिद्वंद्वापत्
त्तिः।विरूपाणामपिसमानार्थानामितिवार्त्तिकाद्दृश्यतेबोध्यतेइतिब्रुवत्यारूपशब्दस्यार्थपरत्वमाश्रित्यवार्त्तिकस्यापिसूत्रेणैवक्रोडीकाराच्च।तस्माद्घटघटोघ
टकलशावित्यादिपाक्षिकानिष्टवारणायपक्षद्वयेपिसूत्रमावश्यकमित्यवधेयं॰एवंस्थितेसूत्रवैयर्थ्यमेवहृदिनिधाययदिहव्याचख्युःनानेनैकशेषो।
विधीयतेइत्यादियच्चसमुदायादेकस्याविभक्तावितिपक्षंप्रत्याख्यायपुनराहुः।रामरामऔइतिस्थितेइति॰अलौकिकमेतत्प्रक्रियावाक्यमूह्यतेनतुलौकि।

राम
१९

कं अलौकिके च विभक्त्येकादेशादिकार्यं न प्रवर्त्तते प्रयुक्तानामेवान्वाख्यानादित्यादि तत्सर्वं संदर्भविरुद्धं न्यायविरुद्धं च। प्रयुक्तानेवह्यन्वाख्यातुमलौ
किकमुत्प्रेक्ष्यते शास्त्रीयकार्यं च सर्वमलौकिकेष्वेव प्रवर्त्तते न तु परिनिष्ठिते। प्रथमयोः पूर्वसवर्ण इत्यादीनां प्रवृत्तिं विना परिनिष्ठितरूपाला
भात्। परिनिष्ठिते तत्प्रवृत्तेर्दुरुपपादत्वाच्चेत्यास्तां तावत्। अमि पूर्वः अम्यचीति अमि योऽच् तस्मिन्नः मोऽवयवेऽचीति यावत्। तेन मकारसहितस्य पूर्वरूपं न।
एवमक्षाद्रूहिन्यामित्यादावपि ऊहिन्यां योऽच् तस्मिन्नित्यादि बोध्यं इकोयणचीत्यज्ग्रहणस्यानुवृत्तेर्निर्विवादत्वात्। पदास्वैरिबाह्येत्यादिनिर्देशाश्चेह लिंगान
स्माच्छसः। तच्छब्देन संनिहितः पूर्वसवर्णदीर्घः परामृश्यते। शस इत्यवयवषष्ठी स चावयवः परत्वेन विशेष्यते पूर्वसवर्णदीर्घात्परस्य शसोऽवयवस्येति तदे
तदाह परोयः शसः सकार इति परो यः शस् इति तु नोक्तं असंभवात्। नहि कृते पूर्वसवर्णदीर्घे ततः परः शस्संभवति अट्कुप्वाङ् रषाभ्यामिति पंचमीनिर्दे
शाद्व्यवहितस्याप्राप्तौ वचनमिदं तत्र सर्वैर्व्यवायो संभवी एकैकमात्रव्यवाय इत्यपि नार्थः क्षुभ्नादिषु क्षुभ्नशब्दपाठसामर्थ्यात् सरूपाणामित्यादिनिर्देशाभ
च्चेत्यभिप्रेत्याह व्यस्तैर्यथासंभवमिलितैश्चेति ननु एवमादर्शेनेत्यादौ अतिप्रसंगः नत्वाङादिभिरेव व्यवधाने इति नियमः अप्राप्ते विधिरयमित्युक्तत्वात्
सत्यं योगविभागोऽत्र बोध्यः व्यवायेपीत्येको योगो विध्यर्थः अट्कुप्वाङ्नुमित्यन्यो नियमार्थः छंदसोभिसोऽलुक् निषेधं बाधितुमिति तेन पर्याणद्धमित्यत्रोपसर्गा
दसमासेपीति णत्वं सिध्यतीति भावः नुम्ग्रहणमिति नत्स्थानिकस्य स्वाभाविकस्य वानुस्वारमात्रस्योपलक्षणमित्यर्थः तेन बृंहिर्वृद्धौ इदित्वान्नुम् तस्यानु
स्वारः तृंह हिंसायां स्वाभाविकोऽत्रानुस्वारः बृंहणं तृंहणं। उभयत्रापि णत्वं सिद्धं द्रविणेन प्रेन्वनं इह हन्तेः पचङ्आदेः सनुम् इति णत्वं न यथा नक्षत्रं दृष्ट्वा
वाचं विसृजेदिति विषयेन नक्षत्रदर्शनस्य कालविशेषोपलक्षणत्वात् सत्यपि दिवा नक्षत्रदर्शने वाङ्न विसृज्यते उपलक्षितस्य कालविशेषस्याभावात् रात्रौ त्वस
त्यपि नक्षत्रदर्शने विसृज्यते तस्य सत्वात् तथेहापि बोध्यं ननु एवं नुम्ग्रहणं व्यर्थं अनुस्वारस्याट्त्वेनैव संग्रहात् उरः केणेत्यादौ विसर्गजिह्वामूलीयादिव्यवा
धाने ह्येषैव गतिरिति चेत् सत्यमित्याह तद्वेति स्यादेतत् उक्तरीत्या नुम्विसर्जनीयेति सूत्रेपि नुम्ग्रहणं त्याज्यं स्यात् तत्राप्यनुस्वारस्य लक्षणीयत्वात् अन्य

म॰ र॰
१०

थाऽसंभवात् नहि षत्वप्रवृत्तिवेलायां सर्पींषीत्यादौ नुम् लभ्यते षत्वस्यासिद्धत्वेन ततः प्रागेवानुस्वारप्रवृत्तेः यद्यपि सुहिन्सु इत्यत्र संभवत्येव तथापि तत्रैवाति-
व्याप्तिं वारयितुं लक्ष्यानुरोधान्नुम्स्थानिकेनुस्वारे लक्षणाश्रयणीयेव व्याख्यानात् तस्य च शास्त्रत्वेन तद्व्यवाये षत्वस्यासिद्धत्वादिति चेन्मैवं उक्तरीत्या तत्रत्य
विसर्गग्रहणस्य प्रत्याख्यानसंभवेपि नियमार्थं नुम्ग्रहणं तथाहि अनुस्वारेण व्यवधाने चेत्षत्वं तर्हि नुम्स्थानिकेनैवेति नियम्यते तेन पुंस्वित्यादौ षत्वं नेति
दिक् यस्मात् प्रत्ययविधिः अत्र प्राचोक्तं यस्माद्धातोः प्रातिपदिकाद्वेति तन्न तिङ्न्तादीनामपि तरवादिकं प्रत्ययं गत्वा तत्संकोचस्य निर्मूलत्वात् आमुष्यायणइत्यादौ
वृद्ध्यभावापत्तेश्च नहि प्रातिपदिकादयं तद्धितः किंतु सुबंतादिति दिक् अतो भिस ऐस् नन्वैस् इत्येवास्तु न चातो गुण इति पररूपापत्तिः एकारोच्चारणवैयर्थ्यापत्तेः
अन्यथा इत्समेव विदध्यात् इति चेन्सत्यं एदेतोर्हि मात्रत्वाविशेषेण गौरवाभावात् ऐस्कृतः एवं च पररूपशंकैव नास्तीति महल्लाघवं यत्त्वाहुः ऐस्करणं निर्जरसै
रित्येकारश्रवणार्थमिति तद्भाष्यविरुद्धं सन्निपातपरिभाषया जरसादेशाप्रवृत्तेः निर्जरैरित्येव भाष्ये सिद्धांतितत्वात् नामि परिभाषाविरोधादिति एतच्च रु-
धादिभ्यः श्नमिति सूत्रे श्नान्नलोप इति सूत्रे च भाष्ये कैयटयोः स्पष्टं आरंभसामर्थ्यादिति सुपि चेत्यस्य तु नमामसमर्थ्योः रामाभ्यामित्यादौ सावकाशत्वादिति भावः।
एवं च रामशब्देनामीत्यस्योपन्यासोलेखकप्रमादादिति यत्तु सत्त्वंतं आदेशप्रत्यययोः एकापि षष्ठी विषयभेदाद्भिद्यते इत्याशयेन व्याचष्टे आदेशः प्रत्ययाव-
यवश्चेति यदि तु आदेशावयवो गृह्येत तर्हि तिसृणामित्यादौ दोषः यदि च प्रत्यययोर्यः सकारः तर्हि रामेष्वित्यादौ न स्यात् यद्यप्येवं वैरूप्येण व्याख्याने सहविवक्षावि-
रहात् द्वंद्वो न प्रयुज्यते तथापि सौत्रत्वाद्बोध्यः विवृतातोषस्येति यत्तु वदंति सकारस्य सोष्मणोऽघोषस्य तादृश एव षकार इति तन्न मूर्धन्यठकारे इति प्रसंगात् तथा च प्रा-
तिशाख्यं वर्गे वर्गे च प्रथमाव घोषौ युग्मौ सोष्माणावनुनासिकोन्त्य इति ननु दधि सेचौ दधि सेच इत्यादौ प्राक्कृदुत्पत्तेः समासे षत्वं वारयितुं पदादादिः पदादिरिति पंच-
मीसमासो भाष्ये उक्तः ततश्चेहापि सात्पदाद्योरिति निषेधः स्यादिति चेन्मैवं स्वादिष्विति या पदसंज्ञा तामाश्रित्योक्तनिषेधो न प्रवर्तते इति सातिग्रहणेन ज्ञापित-
त्वात् यत्त्वाहुः प्रत्ययविषयेनायं निषेध इति ज्ञाप्यत इति तन्न व्यतिसे इत्यादौ षत्वापत्तेः ननु पदस्यादिरिति पक्षे व्यतिसे इत्यत्र षत्वं दुर्वारं न च व्यपदेशिवद्भावे-

राम
१०

नमेऽइत्यस्यापि तिङन्तत्वात्पदत्वशंकां प्रत्ययग्रहणे यस्मात्तद्विधिः तदादेरेव ग्रहणात् अन्यथा रामेष्वित्यादावपि षत्वनिषेधापत्तिरिति चेत् सत्यं न वयं प्रत्ययमा
त्रस्य तदन्ततां ब्रूमः किंतु प्रकृतिप्रत्ययसमुदाये प्रवृत्तां पदसंज्ञामेकदेशविकृतन्यायेन लुप्तप्रकृतिके प्रत्यये प्यानयामः रामौ रामाः इत्यादावपि ह्येकदेशविकृ
तन्यायेनैव पदत्वमेकादेशात्प्रागेव पदसंज्ञाप्रवृत्तेः न चैकादेशे कृते सुप्तिङन्तमित्यस्य प्राप्तिरस्ति उभयत आश्रयेणान्तादिवदिति सिद्धान्तात् यत्तु वदन्ति प्रकृति
सन्निधाने प्रत्ययस्य पदत्वं नास्ति मंत्रेषु सर्वेषामित्यादिनिर्देशादिति तन्मंदं उक्तरीत्या पदत्वाभावे न्यायसिद्धज्ञापनस्यासंभवादनुपयोगाच्च सर्वादीनि सर्वना
मानि सर्वादीनि इति तद्गुणसंविज्ञानो बहुव्रीहिः हलि सर्वेषामित्यादिनिर्देशात् द्वंद्वे चेति स हि समुदायस्य निषेधः न त्ववयवानामिति वक्ष्यते न च तदन्तविधिं विना
समुदाये संज्ञाप्रसक्तिरस्तीति भावः ननु तदन्तसंज्ञायाः किं फलं न च परमसर्वस्मा इत्यादौ स्मायादयः फलं अंगाधिकारे तदन्तविधिनैव तत्सिद्धेरित्यभिप्रत्याहा।
ऽनेनेति न चेहापि प्रातिपदिकादित्यनुवृत्तेः सर्वनाम्नां तद्विशेषणे तदन्तविधिर्भविष्यतीति वाच्यं समासप्रत्ययविधौ प्रतिषेध इत्युक्तेरिति भावः अकच्चेति च
कारात्परमसर्वत इत्यत्र तसिल् जसः शी अनेकाल्त्वादिति ननु शित्वादिति भावः अवर्णान्तादिति अवर्णान्तादंगात्परस्येत्यर्थः अतो येषां तेषां केषामित्यादौ
नाव्याप्तिः सर्वनाम्नो विहितस्याम इति सर्वनाम्नः परस्येति तु नोक्तं दक्षिणोत्तरपूर्वाणामित्यत्र सुट्प्रसंगात् द्वंद्वे चेति निषेधो हि समुदायस्य न त्ववयवस्य न चात
स्मादयमाम् विहितः किंतु समुदायादेवेति न सुट् विहितविशेषणत्वस्याश्रयणे प्रमाणं तु दक्षिणोत्तरपूर्वाणामिति भाष्यप्रयोग एवं पंचत्रिंशदिति पंचत्रिंश
च्चेति द्वंद्वः पंचाधिका त्रिंशदिति तत्पुरुषो वा यत्तु प्रत्याहारा एकचत्वारिंशदिति प्राचां ग्रंथं व्याचक्षाणेनोक्तं नायं मध्यमपदलोपी तत्पुरुषः तथा सति राजन्य
हुवचनद्वंद्वेऽध्वकहेमिषु संख्येति विधीयमानः पूर्वपदप्रकृतिस्वरो न स्यात् तस्मात्समाहारद्वंद्व एवायं एकविंशतिरित्यादौ नपुंसकत्वं तु न भवति लोका
श्रयत्वाल्लिंगस्येति तच्चिंत्यं समासभेदेन स्वरभेदइष्टापत्तेः तथा च बहुव्रीहौ संख्येय इति सूत्रे संख्यायास्तत्पुरुषस्योपसंख्यानं निस्त्रिंशाद्यर्थं अन्यत्राधि
कलोपादिति वार्तिकं व्याचक्षाणो भाष्यकार आह एकाधिका विंशतिरेकविंशतिः द्व्यधिका विंशतिः द्वाविंशतिरिति अत एवेति द्वयोर्द्विवचनस्यैव न्याय्य

त्वादितिभावः नन्वेवं सर्वादिषु पाठो व्यर्थः सर्वनामकार्याणां स्मायादीनां द्विवचनेऽभावात् न चोभाभ्यां हेतुभ्यां उभयोर्हेत्वोरित्यत्र सर्वनाम्नस्तृतीया चेति पाक्षिक
कतृतीयातः फलमिति युक्तं निमित्तकारणहेतुषु सर्वासां प्रायदर्शनमिति वार्त्तिकेन गतार्थत्वात् न च वृत्तिकृता सर्वनाम्नस्तृतीया चेति सूत्रे पठितत्वादिदं वार्त्तिकं स
र्वनामसंज्ञासापेक्षमिति वाच्यं भाष्ये हेताविति सूत्रे तस्य पठितत्वात् तएवान्नेन कारणेन वसत्यन्नस्य कारणस्येत्युदाहृतं हरदत्तेनेत्याशंक्याह तस्येह पाठस्त्वि
ति अयच्प्रसंगादिति अयं भावः उभादुदात्तो नित्यमित्यत्रोभादुदात्त इति योगो विभज्यते अवयववृत्तेः संख्याया विना उभशब्दादवयविन्यर्थेऽयच् स्यात् उभयो
मणिः ततो नित्यं उभशब्दाद्वृत्तिविषये नित्यमयच् स्यात् स्वार्थे तेन उभयपक्षविनीतनिद्र इत्यादावयच् यथा नित्यः एवं कप्रत्ययेऽपि स्यादिति नन्वेवमकचि क
निष्पयचूदुर्वोर इति चेत् नैवं योगविभागस्येष्टसिध्यर्थतया उभौ साभ्यासस्येति निर्देशेनत्व यत्र द्विवचनं न श्रूयते तत्रैवायजिति व्याख्यानात् तथा च वार्त्ति
कं अन्याभावो द्विवचनटाब्विषयत्वादिति अकचि हि सति तन्मध्यपतितस्तद्ग्रहणेन गृह्यत इति न्यायेन उभशब्दस्य द्विवचनविषयत्वं न विहन्यते कप्रत्यये
तु विहन्यतेऽतएव तदुक्तमिति वार्त्तिककृतेति शेषः यद्यपि पूर्ववार्त्तिके टाब्व्युक्तस्तथापि नासौ विवक्षितः टाब्विषयत्वमपि द्विवचनपरत्व एव बोध्यमिति कै
यटादिभिर्व्याख्यातत्वादित्याशयेन व्याचष्टे द्विवचनपरत्वाभाव इति टाबेकादेशस्यापि पूर्वान्तत्वेन ग्रहणाद्द्विवचनपरत्वमस्तीति भावः यद्यप्युभाविन्या
दौ द्विवचनपरत्वं दुरुपपादं उभयतआश्रयणेऽन्तादिवद्भावविरहात् तथाप्युभशब्दादुत्पन्ने द्विवचने लुकानापहृतं यत्र ततोऽन्यत्रायजिति हि विवक्षि
तोऽर्थः यद्यपि भाष्ये कप्रत्ययस्यापि स्वार्थिकत्वेनोभशब्दात्परस्य द्विवचनत्वमस्तीत्याश्रित्योभशब्दपाठः प्रत्याख्यातः तथापि प्रौढिवादमात्रं तत् कृत्रिम
स्येव द्विवचनस्येह गृहीतुमुचितत्वात् अन्यथात्र तसिलादावतिप्रसक्तत्वात् ननु कारकविभक्त्यन्ताद्विहितोऽत्र न तसिलो स्वार्थिकत्वेऽपि द्वित्वमात्रं नाभिधत्त इ
ति चेन्न कप्रत्ययस्याप्यज्ञातार्थबोधकत्वात् पंचकपक्षेऽधिकबोधकत्वध्रौव्याच्चेति दिक् नास्तीति अनभिधानादिति भावः तथा चोभयशब्दस्य द्विवचनानुत्पा
दात् सर्वविभक्तित्वं नाव्ययत्वे प्राप्ते तद्धितश्चासर्वविभक्तिरिति सूत्रे कृत्तद्धितानां ग्रहणं च पाठ इति भाष्ये कैयटेनावतारितं अस्तीति पचतिकल्पं पचतिरूपमि

त्यादिद्वारेणैव पाठस्योपक्षीणत्वादनभिधाने प्रमाणं नास्तीति भावः तयप्प्रत्ययान्ततयेति उभयशब्दस्येति भावः नित्यैवेति परेव उभया आश्रिता इति त्वांद
सत्वाद्धाध्यं अव्युत्पन्नावितिएतच्च पस्पशायां कैयटे स्पष्टं एके काशिकाकाराः एतं तं मन्ये इत्युदात्तस्यउतत्वः पश्यन्नित्यनुदात्तस्य च दर्शनादिति भावः एकः प्रथ
मः संहितयापाठे नांतत्वस्यास्फुटत्वेपि नांतश्छन्दव्याऽन्यथा एकश्रुत्या सकृदेवपठेत् नचतांतेविप्रतिपत्तव्यं त्वतत्वसमसिमेत्यनुवादानीतिपिटूक्त्रात् तथा
चक्रुश्च त्रः सखा रुक्त्वदूभवति सूतउत्वदिति वेदभाष्यकाराश्चैत्यंव्याचख्युः त्वदितिसर्वनामसुपठितोनुदात्तोयमन्यपर्यायइति जयदेवोपि प्रायुंक्त त्वदथर
मधुरमधूनि पिबंतमिति त्वत्तोऽन्यस्याः अधर इति विग्रहः नतु नवाधर इति पश्यतिदिशिदिशि रहस्ति भवंतमिति पूर्ववाक्येन सहानन्वयापत्तेः नेम इति श्रूय
ते च यनेमस्मिन् ददृशे सोम इति सम इति तथा च श्रूयते नभंतामन्यके समे मा वो नृक्का यवृक्कोसमस्मै उरुष्याणो अघायतः समस्मात् उतो समस्मिन् इ
त्यादिसिमः कृत्स्नेच शक्तेच स्यान्मर्यादावचद्योः श्रूयते च आर्द्रात्रीवासक्तनुते सिमस्मै उद्धक्रमलकमजते सिमस्मात् उभयत्रापि सिमशब्दः सर्वपर्यायइ
ति वेदभाष्यं गणसूत्रइति यद्यपि भाष्येऽष्टाध्याय्यां सूत्रे ऽपुरीति वक्तव्यमिति वार्त्तिकं पठितं तत्रापि तद्गणसूत्रस्यशेषः नतु जसि विभाषाविधायकस्य
अंतइत्यपि रूपं जसः शीविधानात् टावंतात्याप्यभावात् अंतरायामिति प्राकारद्वाल्ययांत दंतर्वर्त्तिन्यां वेत्यर्थः लिंगविशिष्टपरिभाषया एकादेशस्य पूर्वांत
त्वेन ग्रहणाद्वा प्राप्तिर्बोध्या त्यद् तद् एतौ उक्तपरामर्शकौ तत्राद्यः त्वांदस इति गणरत्नकारः तन्न स्पष्टं छंदसि च दूलमिति सूत्रे छंदोग्रहणवैयर्थ्यापत्तेः एको न्या
र्थे प्रधाने च प्रथमे केवले तथा साधारणे समानेऽल्पे संख्यायां च प्रयुज्यते स्वाभिधेयेति स्वस्य पूर्वादिशब्दस्याभिधेयेनापेक्ष्यमाणस्यावधेर्नियम इत्यर्थः दि
शः सपत्नी भव दक्षिणस्याः इत्यादावपि व्यवस्थायास्त्वेव प्रसिद्धत्वात् तु नावधिवाची शब्दः प्रयुज्यते न च संज्ञानिषेधः आधुनिकसंकेतो हि संज्ञा न च दिक्षु सास्ती
ति अस्त्वातिप्रकरणे कैयटहरदत्तादयः अत्र दिक्षु चिरंतनः कुरुषु त्वाधुनिकः संकेत इत्यत्र व्याख्यानं वचनमेव प्रमाणं एतेन विश्वेषां देवानामिति व्याख्यातं
वेदे प्रसिद्धत्वाद्देवगणविशेषे विश्वशब्दस्य आधुनिकसंकेताभावात् दक्षिणा गाथका इति इह अमुकस्मात् कुशला इति अवध्यन्वयसंभवेपि तन्नियमो ना॥

म.र. २०

स्तीति भावः एवं अधरेतां वूलरागः उत्तरे प्रत्युत्तरे च शक्त इत्यपि प्रत्युदाहर्तव्यं कथं तर्हि तथा परेषां युधि चेति कालिदासः अपरे प्रत्यवतिष्ठंते इत्यादि च आ।
ग्राहुः देशवाचितया व्यवस्था विषययोरेव परापरशब्दयोरूपवाराद्‌त्रौ प्रतिवादिनि च प्रयोगः नचैवमुपसर्जनतानहि लाक्षणिकत्वमुपसर्जनत्वं किं
तु स्वार्थविशिष्टार्थांतरसंक्रमः स च समासादिवृत्तावेव अत एव भूवादिसूत्रे एतान्यपीति एतत्प्रतिपाद्यानि वस्तूनीत्यर्थ इति कैयटोक्तिः संगच्छते वस्तुतस्तु
परापरशब्दयोर्देशांतरनिष्ठत्वादिकमेवार्थः शत्रुत्वादिकं तु आर्थिकोर्थः असंज्ञायां किं उत्तराः कुरवः सुमेरुमवधिमपेक्ष्य कुरूत्तरशब्दो वर्त्तत इत्यस्तीह
व्यवस्था किंतु आधुनिकसंकेतोयमित्याहुः स्वमज्ञातिधनाख्यायाम् आत्मात्मीयज्ञातिधनवाची स्वशब्दस्तत्र ज्ञातिधनयोः पर्युदासात् आत्मात्मीयोपरि
शिष्टाविस्याशयेन व्याचष्टे आत्मीया इत्यर्थः आत्मान इति वेति यत्त्वाहुः आत्मनि स्वशब्दो नपुंसकः तेन स्वे स्वा इत्युदाहरणं तत्र न संभवतीति तच्चिंत्यं आत्म
न्यपि स्वशब्दस्य पुंस्त्वात् विभाषा जसीति प्रकरणे स्वमात्मीये इत्येव वक्तव्ये गुरुनिर्देशं कुर्वतः सूत्रकारस्यैवात्र प्रमाणत्वात् यदपि स्वोक्तेर्थे उपष्टंभार्थं स्वो ज्ञात
वात्मनि स्वं त्रिष्वात्मीये स्वो स्त्रियां धने इत्यमरसिंहोक्तिमाहुः तदपि चिंत्यं कोषे हि आत्मनीति पूर्वान्वयि स्वमित्युत्तरान्वयि तथा च हेमचंद्रः स्वः स्वगो।
तभस्तोः स्वो ज्ञात्यात्मनोः स्वं निजे धने इति मेदिनीकारोपि स्वः स्यात्पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीये ऽस्त्रियां धन इति तस्मात् स्वे स्वा इत्यस्य आत्मान इति विवरणं स।
म्यगेवेति स्थितं ज्ञातिधनवाचिनस्त्विति नाऽऽत्मीयास्ते ज्ञातिधनयोरपि आत्मीयत्वं पुरस्कृत्य प्रवृत्तौ सर्वनामता ऽस्त्येवेति ध्वनयति एतदर्थमेव हि सूत्रे।
आख्याग्रहणं कृतं अंतरं बहिर्योगोपसंव्यानयोः बहिरित्यनावृतो देश उच्यते तत्राद्यमर्थं गृहीत्वाह बाह्या इत्यर्थ इति द्वितीये तु आभ्यंतरा इत्यर्थो बोध्यः
बाह्येन हि आभ्यंतरस्य योगो ऽस्ति अर्थद्वयमप्याकरे स्थितं उपसंव्यानशब्दोपि करणव्युत्पत्त्या उत्तरीयपरः कर्मव्युत्पत्त्या तु अंतरीयपरः पूर्वादिभ्यो नवभ्यो वा।
अत्रेदमवधेयम् एतत्सूत्रं जसः शीत्यत्रानुवर्त्य वाक्यभेदेन व्याख्येयं वा छंदसीत्येतदमिपूर्व इत्यत्र यथा एवं चाष्टाध्याय्यां पूर्वापरेत्यादि त्रिसूत्री गतार्थेति म।
हृत्या घवं एकशब्दस्याष्टावर्था उक्ताः तत्र विशेषमाह संख्यायामिति अन्येषु सप्तसु तु वचनांतरमपि स्यादेव एके एकेषा इति यथेति भावः न बहुव्रीहौ कृते न बहु।
व्रीहौ निषेधोयमर्थः उपसर्जनीभूता न सर्वादय इति वक्ष्यमाणत्वादत आह विकीर्षित इति समासात्प्रागेवेति च प्रक्रियेति अलौकिके विग्रहवाक्य इत्यर्थः नन्व

एम २०

स्तुतत्राकच् अतआह सचेति नचनिमित्तस्यानुपसर्जनत्वस्यविनाशोऽनुसत्वात्प्रागेवसंज्ञानभविष्यतीतिवाच्यं अकृतव्यूहपरिभाषाया अनित्यत्वात् त
त्रचैतत्सूत्रस्यैवज्ञापकत्वात् अतिभवकानिति एतदेवज्ञापनफलमितिभावः दृष्टापत्तिं कृत्वेतिच्छेदः शू डितिसतुकग्रहणं प्रकृतिप्रत्यापत्तिवचनंवा
अनित्यत्वेज्ञापकं लक्ष्यानुरोधाच्चव्यवस्थेतिभावः यथोत्तरमिति तथाचाद्यत्वे भाष्यकारोक्तैवव्यवस्थेतिभावः यत्तुप्राचोक्तं वहुव्रीहौसर्वादेःसर्वनाम
तानस्यात् प्रियसर्वाय सूत्रकारमतेवहुव्रीहौनसर्वनामता भाष्यकारमतेगौणत्वमात्रे त्वत्कपितृकोमत्कपितृक इत्यत्र समासावयवयोर्युष्मदस्मदोः स
र्वनामत्वादनंगकार्यत्वेनाकच्प्राप्त्समाभूत्कप्रत्ययएवस्यादित्येतदर्थमिदं सूत्रमितिन्यासकृन्मतमिति तत्रेदंवक्तव्यं किंवहुव्रीहेःसंज्ञानेतिविवक्षितं
उभतदवयवानांसर्वादीनामिति नाद्यः समासावयवयोर्युष्मदस्मदोरित्युत्तरग्रंथविरोधात् समुदायेप्राप्तिविरहाच्च नचनदंतविधिनाप्राप्तिः वहुव्रीह्यवय
वानांउपसर्जनतयासर्वादिवहिर्भावेनतदंतेप्राप्तेर्दूरापास्तत्वात् अतएवनद्वितीयोपि नचोपसर्जनानांपाठात्पर्युदासोवार्त्तिककृतोक्तोनतुसूत्रा रूढइ
तिवाच्यं अन्वर्थसंज्ञावलेनसूत्राक्षरैरेवतल्लाभात् एतेनसूत्रकारमतेवहुव्रीहौनसर्वनामतेत्यपिपरास्तम् वहुव्रीहावेवेतिनस्यार्थः भाष्यकारमते
इत्याद्यपिन विशेषोपादानेनहिसूत्रकारवार्त्तिककारयोःमतमन्यादृशमितिप्रतीयतेऽरेवदत्तोवामेनाक्ष्णापश्यतीत्युक्तेदक्षिणेननपश्यतीतिवत् तच्चनसू
त्रवार्त्तिकमतेपिगौणपर्युदासस्यस्पष्टत्वात् यत्तुत्वत्कपितृकइत्यादि तदित्थं प्राचाव्याख्यातं त्वंपितायस्येतिविगृह्यवहुव्रीहिसमासेकृतेसमासावयवयोःस
मासांतःपातिनोर्युष्मदस्मदोःसर्वार्थवाचकत्वेनसर्वनामसंज्ञाकत्वादज्ञातार्थेविवक्षायांअव्ययसर्वनाम्नामितिअकच्प्रसज्येत तस्यसैप्रभृतीनामि
त्यंगाधिकारविहितत्वाभावेनांगसंज्ञानपेक्षत्वात् ततश्चत्वकत्पितृकइत्याद्यनिष्टंप्रसज्येतेतिन्यासकृतापिअन्वर्थसंज्ञावलादेवसंज्ञानिरासेकृतेऽकच्च
नभविष्यतीत्याशंक्य समुदायोहिविशेषेवर्त्तनेपूर्वपदंतुसर्वार्थतायाअनपेतमेवेत्युक्तं तदेतत्सर्वंप्रामादिकमेवतथाहिजहत्स्वार्थायांवृत्तौसमासावयवयो
रर्थएवनास्ति अजहत्स्वार्थायामपिस्वार्थविशिष्टान्यपदार्थवृत्तित्वेनोपसर्जनत्वंस्पष्टमेवएवंचसमासांतःपातिनोर्युष्मदस्मदोः सर्वार्थवाचकत्वेनेत्यादिग्रं

र्वशब्दस्यस१

म.र.
३१

थः समुदायोहीत्यादिन्यासग्रंथश्च पक्षद्वयेपिव्याहतः किंचैवं अति सर्वायेत्यत्रस्मायादेशोदुर्वारः अंगाधिकारे तदंतग्रहणात् त्वदुक्तरीत्या सर्वार्थतानप
पात् नहिपूर्वपदे सर्वार्थताउत्तरपदेत्तुनेति युक्तिमत् अपिचैवंगौणत्वे सर्वादीनां सर्वार्थवाचकत्वं नास्तीति स्वोक्त्या सह विरोधः स्यादितियत्किंचिदेतत् यदपि
व्याचख्युः त्वंपितायस्येत्यादौ विग्रहवाक्ये प्राप्तासंज्ञा निषिध्यतेइति तदपिन विग्रहवाक्यं हि लौकिकमलौकिकं वा विवक्षितं नाद्यः प्रक्रियावाक्येऽयं निषेधःन
तु लौकिक इति कैयटग्रंथविरोधात् प्रकृतसंदर्भगतपूर्वापरस्वग्रंथविरोधाच्च नद्वितीयः तस्ययुष्मद् सुपितृसुइत्याकारकत्वेन त्वंपितेत्याकारकत्वायोगात् यदपि
व्याचख्युः नन्वतिसर्वादौ संज्ञा न प्रवर्त्ततेत्वत्कपितृकादौ तु प्रवर्त्ततइत्यत्र किं विनिगमकं तत्राह अनंगकार्यत्वेनेति अंगशब्दः समुदायपरः तेनातिसर्वेइत्यत्र
अंगस्य संज्ञापेक्षितास्त्वनायोगात् स्मायादिविधानादवयवमात्रस्य सत्यपि सर्वनामत्वे दोषाभावात् समुदाये च समुदायार्थं प्रति सर्वादेरुपसर्जनत्वात् तदं
तस्य संज्ञा न भवतीति युक्तं इह तु अवयवमात्रस्य साचिकीर्षिता नसमुदायस्य अवयवश्च स्वार्थमात्रप्रधान इति स्यात्प्रसंग इति वैषम्यमस्तीत्याशय इति त
दपिन अंगाधिकारे तदंतविधेः सर्वसंमतत्वेनावयवमात्रे सत्यपि सर्वनामत्वे दोषोनास्तीतियुक्तेर्व्याहतत्वात् अंगाधिकारपरिभाषयास्मैस्यात् इति स्वग्रंथ।
विरोधाच्च अथायमाशयः प्राक्प्रवृत्तापि संज्ञार्थान्तरोपसंक्रमेसतिगतेतितर्हि अकजपि गच्छतु ननु कार्यकालपक्षे स्मायाद्यर्थे पुनः संज्ञापेक्षिता सा च दुर्ल
भेत्याशय इति चेत् अस्त्वेवं नत्वसौ प्रकृतग्रंथार्थः न्यासग्रंथविसंवादेन इति न्यासकृन्मतमिति वाक्यशेषविरोधात् न्यासग्रंथस्त्वनुपदमेवोदाहरिष्यते यदपि
व्याचख्युः अंगमप्रधानं वा ध्वंतद्धि रूढमनंगं वाधकमित्यर्थः तथा च कप्रत्ययापवादत्वादकच्स्यादित्यर्थ इति तदपिक्लिष्टत्वपर्थे न्यासग्रंथासंमतं च तथाहि त्वम्
त्कपितृकोमत्कपितृक इति वृत्तिग्रंथं व्याख्यायन्यासकारः उक्तप्राहननुचान्वर्थसंज्ञाकरणादेवात्र संज्ञानिरासे कृतेऽकच्न भविष्यति नह्यत्र सर्वार्थता संभवति
विशेषविषयत्वात् नैतदस्ति समुदायो हि विशेषवृत्तेः पूर्वपदंतु सर्वार्थतायामनपेतमेव भवतु तर्हि अनयोरनंतरयोरेतत्सूत्रविषयता प्रियविश्वायेत्यादि तु
नोपपद्यते नहि प्रियविश्वादयः शब्दाः सर्वेषां नामानि नापि तदवयवभूतानां विश्वादिशब्दानां किंचित्सर्वनामकार्यमुपपद्यते स्मै प्रभृतीनामंगकार्यत्वात् विश्वा

राम
३१

दिशब्दानामनंगत्वात् एवंमन्यंते त्वत्कपितृकोमत्कपितृकइत्यत्राकज्माभूदित्येतदर्थंतावदेतदारब्धव्यं प्रियविश्वायेत्यादावपिविस्पष्टार्थंभविष्यतीति।
अनेनहिन्यासग्रंथेनागसंज्ञानपेक्षत्वमेवार्थोलभ्यतेसचस्वोत्प्रेक्षितव्याख्यायांदूरंतस्तारितएवयदपिव्याचख्युः यद्यपिसूत्रवार्त्तिककृतोरप्येतन्मतंतथा।
पिन्यासकृताविवृतत्वात्न्यासकृन्मतमित्युक्तमिति तदपिस्वकीयः वार्त्तिककृतास्यार्थस्यास्पष्टत्वात्न्यासकृतासमासेकृतेसतीत्यादिवदतान्वदुक्तार्थस्य
दूरंत्यक्तत्वेनतद्विवृतत्वाभावाच्चयदप्याहुः न्यासकृच्छब्देनसूत्रकारएवविवक्षितइत्यादितदपिनसूत्रकारमतेवहुव्रीहाविन्यादिपूर्वग्रंथेनसहविरो।
धात्भाष्यकारमतेत्विति ग्रंथेनतस्यविच्छिन्नत्वाच्चतस्मादिहप्राचः प्रक्रियाग्रंथः तद्व्याख्यातृग्रंथाश्चापातरमणीयाएवेत्यास्तांतावत् यदितुप्रक्रियाग्रं
थोपिकथंचिद्भाष्याविरोधनव्याख्येयइत्याग्रहः तर्हीत्थंव्याख्यायतां ननुप्रियविश्वायेतिगौणतयागतार्थम् अतोनिष्कर्षमाह सूत्रकारमतइति वहुव्रीहा
विति विकीर्षितेसतीतिशेषः गौणत्वमात्रइतिमात्रशब्दोवधारणेगौणत्वएवनतुनःप्राक् तथाचसूत्रेप्रत्याख्यातेइतिभावः न्यासकृन्मतस्यतु अतिफल्गु
त्वात्स्वरूपव्याक्रियैवपराक्रियेत्याशयेनाह त्वत्कपितृकइत्यादिना ए तच्चप्राचीनतत्त्वद्ग्रंथपरिशीलनशालिभिर्विभावनीयं प्रकृतमनुसरामः सं
ज्ञाकार्यमितिसर्वनामसंज्ञाप्रयुक्तस्मायादिकमित्यर्थः अंतगणकार्यमिति अड्डतरादिभ्यःपंचभ्यः त्यदादीनामः तदोःसःसावित्यादिकमित्यर्थः तृ
तीयासमासार्थेति इहपूर्वसदृशेतिविहितः समासोगृह्यतेप्रतिपदोक्तत्वात्नतुकर्तृकरणेकृतेतिनेनत्वयकाकृतेइत्यत्रनिषेधोनसमुदायस्येति।
तत्रैवद्वंद्वशब्दस्यमुख्यत्वात् नचद्वंद्वेयानिसर्वादीनिइतिसंबंधः कारकाणांक्रियायेवान्वयात् नचद्वंद्वेविद्यमानानियानीतिसंबंधःविद्यतिक्रियाध्या
हारेगौरवात्निषेध्यायाभवतिक्रियायाएवप्राधान्येनतदन्वयस्यैवन्याय्यत्वाच्च किंच त्यदादीनांद्वंद्वोनास्तिएकशेषेणवाधितत्वात् ततःप्राचीनास्त्वदं
नाः तत्रकाकचोर्नविशेषः नचदक्षिणोत्तरपूर्वाणामित्यत्रेष्टमपिपुंवद्भावंनिषेद्धुमिदंकिंनस्यादितिवाच्यं सर्वनाम्नोवृत्तिमात्रइतिमात्रग्रहणं हिक्वचि
सर्वनामत्वेनदृष्टानांसंप्रतिसंज्ञाभावेपिपुंवद्भावार्थं अतएवदक्षिणपूर्वायैइत्यत्रसंज्ञाभावेपिपुंवद्भावः तस्मात्न्यायवलात्फलवलाच्चसमुदायग्र।

हणामेवोचितंयद्यपित्वाङ्कूव्दस्तांनइतिपक्षेः वयवनिषेधेपिफलंसुवचंतथापिशास्त्रस्याल्पविषयतास्यात्न्यायश्चविरुध्येतेतिभावः सुट्प्रसंगइति
वर्णाश्रमेतराणामित्यादाविितिभावः नचनिषेधसामर्थ्यमनागस्यत्रतसिलादेर्मौत्स्याचरितार्थत्वात्जसाधारमितियद्यपिशीभावेनजसस्त्रपह्रियतेतत
थापिऔपचारिकमाधारत्वंबोध्यंयद्वाजसः इःजसिःतस्मिन्नौत्रःसप्तम्यालुक्इत्यर्थतोव्याचष्टेजसाधारमितिजरायाजरसन्यतरस्यांविभक्ताविितिःज्ञ।
त्वश्रष्टनश्राविभक्तावित्यतोनुवर्ततेतेनजरायाइदंजारमित्यादौनातिव्याप्तिरितिभावः पदेतिपदंअंगंचविशेष्यविशेषणेनचतदंतविधिरितिभावःतद
नुसारिमिरिति इनातोःपूर्वविप्रतिषेधेएकसूत्रोपात्तत्वात्स्यादेशोपिग्रहीतुमुचितइतितेषामाशयः अतएवबीतजन्मजरसःपरंशुचिब्रह्मणःपदमुपेतुमि
च्छतामितिभारविप्रयोगमसमंजसंमत्वावीतजन्मजरसः इतिपठनीयमितितेरुक्तं एतच्चभाष्यविरुद्धमिति भाष्यकृताहिटाङसीतिसूत्रेइनातोप्रत्या।
ख्यायनादेशमदादेशंचविधायनादेशेपरेएत्वंयोगविभागेनसाधितं वहुवचनेझल्येत्ओसिचततःआङिचआङिचपरेतएत्वंस्यात्एमेएततः॥
आपःसंवुद्धौच आपएकारःस्यात्संवुद्धौआङि·ओसिच नचैवंअनेनेत्यत्रहलिलोपःस्यादितिवाच्यंअनादेशस्यनकारेपरेविशिष्यविधानात् तथाहि।
अनापिनकारेआपिचपरेस्यादित्यर्थःसूत्रेअइतिनोतस्यनपुंसकनिर्देशःनचङसेरदादेशकृतेपररूपंस्यादितिवाच्यंअकारोच्चारणसामर्थ्याद्दीर्घसंभ
वादितितेथा[illegible]नरसन्यतरस्यामि   तिसूत्रेउक्तं गोनर्दीयआह अतिजरैरितिभवितव्यं सन्निपातपरिभाषयेति एवंचपूर्वविप्रतिषेधेनेत्या
दिसर्वंभाष्यविरुद्धमित्यर्थः पद्दन्नोअत्रशसप्रभृतयोनिमित्ततयोपात्ताःतेचपदाद्यादेशा ·नुरूपानप्रकृतिविशेषानाक्षिपंतीत्याह पादइंतेति यद्य।
पिशीर्षनछंदसीत्यतःछंदसीत्यनुवर्ततेतथापिभाषायामपिक्वचिद्भवतिमासश्छंदसीतिवार्त्तिकेछंदोग्रहणात् ज्ञापकादितिवक्ष्यतेप्रामादिकमिति
तथाहि आस्नोवृकस्यवर्तिकाममीकेइतिमंत्रेमुखादित्यर्थः औचित्याद्कस्यचिद्वर्त्तिकामंतरास्यादिति मंत्रांतरसंवादाच्च एवंहृद्याजुह्वानआसनिआस
न्यंप्राणमूचुरित्यादावपिव्याख्यातंचतथैववेदभाष्येषुअतएवहरदत्तेनापिकाशिकायाःप्रामादिकत्वमाविष्कृतमितिध्येयं अहन्नोपोतःअत्रप्राञ्चःअनंत

भस्यांगस्याकारस्यलोपः स्यादिति तथासतितक्ष्णोत्यादौ नकाराकारस्यापिलोपः स्यात् भस्यांगस्यानोऽकारस्येति व्याख्याने तु अन सामनमे त्यादौ स्यात् तंत्राद्यन्या
दिनाऽन्नंतस्य भस्यानोऽकारस्येति व्याख्यानेपि अनस्तक्ष्णोत्यादौ अतिव्याप्तिरेव अतोव्याचष्टे अंगावयव इत्यादि भस्येत्यनेन आक्षिप्तः प्रत्ययविशेषः अंगं चेति
द्वयमनोविशेषणं अयंतु अकारस्य अतोनोक्तदोष इति भावः एतच्च ष्यङः संप्रसारणमिति सूत्रे भाष्ये स्पष्टं षाष्ठ्यांपदे इति द्वयं तेनैव सामर्थ्यादेकपदत्वे लब्धे
पि समानग्रहणं [illegible]समानमेव अखंडमिति यावत् तत्र यथा स्यात् तेन समासेन भवति राजनाम यूष्ण इति यूषो मंडः मुद्गामलकयूषस्तु भेदी दीपन पाचनं इति
दर्शनात् इति [illegible]ति एतेन पंचमीसमासस्य पाक्षिकतां ध्वनयति तथाहि भाष्ये वैमिदिना माथितिकः अपीपचन्निति प्रयोजनत्रयं उक्तं तच्चान्यथा सिद्धं ए
कावुपदेशे इत्य[illegible]विहित विशेषणाश्रयणादेव वेमिदितेत्यत्र इणनिषेधेन मथितं पण्यमस्येति विग्रहे ठक् ठिठस्येकादेशेय स्येति चेत्यच्लोपे इसुसुक्तां
तात्क इति कादेशस्तु न भविष्यति ठस्याभावात् न च स्थानिवद्भावेन ठत्वं अल्विधित्वात् न ठस्य क इत्यत्र हि स्थान्यादेशयोः अकार उच्चारणार्थः अपीपचन्नित्यत्रा
पि णिलोपस्य चङ्ग्यकारयोरेकादेशस्य च स्थानिवद्भावं विनापि सिद्धं विदिसाहचर्याद् अभ्यस्तादपि लङः एव के जुस् विधानात् न च सिचा साहचर्यात् लुङ एव
किं न स्यादिति वाच्यं पूर्वसाहचर्यात् परसाहचर्यस्य बलीयस्त्वात् इति दिक् पूर्वत्रासिद्धेनेति एतच्च न्यायसिद्धमित्यवोचाम त्रिपाद्या असिद्धत्वेन तत्रत्ये
कर्तव्ये अचः परस्मिन्नित्यतिदेशस्याप्रवृत्तेः तस्येति तस्य पूर्वत्रासिद्धेनेत्यस्य तथा च स्थलत्रये स्थानिवद्भावो वक्तव्य इत्यर्थः संयोगादिलोपे च कुत्वल
त्वे निगाल्यतेणत्वे माषवपनी इहयस्येति अल्लोपस्य स्थानिवत्त्वेन नकारस्य प्रातिपदिकांतत्वाभावात् णत्वं न यत्त्वाहुः कथंचित् स्थानिवत्त्वाभावेपि पूष्ण इत्या
दौ रषाभ्यामित्यस्य नोपयोगः ष्टुत्वेन सिद्धेः तथा च षग्रहणमुत्तरार्थमित्याकरे स्थितं तत्र अश्व भसवादेनैतदुपन्यस्तमिति सए वायं भस्तकदः तथाहि उत्तरा
र्थं तथापीह षग्रहणं स्थितं तत्र अश्व पूष्णः पुष्णानीत्यादौ रषाभ्यामिति णत्वस्य प्रवृत्तिः केन वार्यतां नाम ष्टुत्वेन इति चेत् न तस्यासिद्धत्वात् न च वचनप्रामाण्या
त्सिद्धत्वं पुष्टः पुष्टिरित्यादौ चरितार्थत्वात् तस्य षयोगेणा इत्यंशोऽचरितार्थः इति चेन्न तस्य पृथगनुक्तेः इह षात्परस्येत्युक्तिस्तु चरितार्थेत्यस्यापि तुल्यत्वाच्च एवम

पुत्रएर्थेषग्रहणमित्याकरो विरुध्येतेति चेन्न आकरे हि हषग्रहणं विना लक्ष्यासिद्धिर्नास्ति इत्येवाभिप्रेतं ननु पुन्नामीत्यादौ रषाभ्यामित्यस्याप्रवृत्तिरिति
दिकृन्नलोपः प्रातिपदिकान्तस्येति लुप्तषष्ठीके इति सौत्रत्वान्न तु षष्ठीतत्पुरुषयोः पूर्वपदे सापेक्षत्वेन समासासंभवात् प्रातिपदिकस्य पदविशेषणत्वाच्चेति भावः
तदन्तस्येति षष्ठीतत्पुरुषः तस्यान्तो योनकारः तस्येत्यर्थः उक्तं च हरदत्तेन विशेष्यमन्तस्येत्यस्य नेत्येतदविभक्तिकं तथैव प्रातिपदिकेत्येतत्पदविशेषणमिति
मनुप्राचोक्तं प्रातिपदिकान्तस्य पदां तस्येति यत्तु व्याख्यातं अन्तस्येत्युभाभ्यां संबध्यते इति तन्नौरवप्रस्तं अन्तस्येत्यस्यावृत्तिप्रसंगात् व्यधिकरणषष्ठीद्वयाप।
तेश्च यदि तु अभेदेनैव संबंधेन प्रातिपदिकेनेव नेत्यनेनापि पदं विशेष्यते तदा विशेषणेन तदन्तविधौ सौत्रमन्तग्रहणं शक्यमकर्तुं विभाषा ङिश्योः शीति न
पुंसकाच्चेति विहितः ननु जश्शसोः शिः तस्मिन्भत्वासंभवात् भस्येत्यनेनासर्वनामस्थानस्यैव यजादेराक्षेपात् तदन्तदाह असर्वनामस्थानेति अत एवेति।
दोषणी इति प्रयोगात् यद्यपि समाहारद्वंद्वस्य एकशेषकृतेपि भाष्यमुयोजं तथापि ककुदित्यस्य पृथक्पदत्वं न्याय्यम् अन्यथा ककुद एकत्वं बाह्वोर्द्वित्वं
च न लभ्यत इति भावः तमुपाद्रवदुद्यम्य दक्षिणं दोर्निशाचर इति रघुः तत्र दक्षिणं दोरिति उद्यम्येत्यनेन कर्मतया संबध्यते दोषं तस्येति दोषं तस्य तथाविधा।
सभजतश्चापस्य गृह्णन्गुणमिति श्रीहर्षप्रयोगः तत्र दोषं हस्तं दूषणं च भजतश्चापस्य गुणं मौर्वीं अतिशयं च गृह्णन्निति संबंधः अमरव्याख्यानारस्तु दोषश
ब्दं स्त्रियामपि स्वीकृत्य भागुरिमतेन टापि दोषेत्युक्तादौ दोषा च भुजो बाहुः पाणिर्हस्तः करस्तथेति धनंजयनिघंटुमुदाजह्रुः द्वयोरन्हो भव इति तद्धितार्थे ति स
मासः कालाद्वञ् द्विगोर्लुगनपत्ये इति लुक् राजाहःसखिभ्यः इति टच् अन्होन्ह एतेभ्य इत्यन्हादेशः अन्हः साय इति स्यते घंजि अवसानवचनः सायशब्दः सं।
स्याविसाये तिज्ञापकादेकदेशिसमासः इत्यदन्ताः॥ हाहानिति गंधर्वविशेषवाचकं अव्युत्पन्नं प्रातिपदिकमिदं कौमारास्तु जहातीति हाहा इति क्रियाशब्दं
दंतो विश्वपावद्रूपमाहुः तन्मते प्रत्युदाहरणं तु अकारो वासुदेवः स्यात् तेन सह वर्तत इति साः तान् सानिति बोध्यम् इत्यादन्ताः आङो नास्त्रियाम् पुंसीति तु नोक्तं
अमुना कुलेनेत्यत्र यथा स्यात् न च तु मारूपसिद्धिः मुत्वस्यासिद्धत्वादिकोचीति नुमो प्राप्तेः नादेशे तु नासिद्धत्वं नमुनेति निषेधात् न च नमुनेति निषेधो नुमप्यस्तु

नेदित्यकारस्योच्चारणार्थत्वादिति वाच्यं अमुष्मै कुलायेत्याद्यसिद्ध्यापत्तेः अच्च घेः इदुद्भ्यामिति ङेरिति औदिति च पदत्रयमनुवर्त्तते इत्याशयेन व्याचष्टे इदु
द्भ्यामुत्तरस्येत्यादिना घेर्ङित्युत्तरस्येति तु नोक्तं सूत्रे घेरित्यस्य षष्ठ्यन्तत्वात् तत्राद्यस्यादेशे च प्रमाणाभावात् औदिति पूर्वसूत्रे इदुद्भ्यामुत्तरस्य ङेरिति कॢप्तसंबंधस्य
त्यागायोगाच्च औत् स्यादिति अत्र व्याचख्युः औतस्तित्वं स्वरितार्थं न विभक्तावितीत्वनिषेधस्तु न भवति अनित्यत्वात् अनित्यत्वं च इदमस्थमुरिति थमो म
कारस्येत्संज्ञापरित्राणार्थादुदित्करणादनुमीयत इति तत्रैवोक्तमिति तच्चिंत्यं न विभक्ताविति सूत्रे ङेरौत्तकार उच्चारणार्थः नेत्संज्ञक इति स्वयमेवोक्तत्वे
न पूर्वापरविरोधात् युक्तं चोच्चारणार्थत्वं न तु स्वरितार्थत्वं स्तीर्णं बर्हिषि समिधाने अग्नावित्यादौ स्वरितत्वादर्शनात् अदिति न परत्वं तु वृद्धावित्यादाववत्वे कृते
स्त्रियां टाप् माभूत् इत्येतदर्थमित्याहुः तदपि चिंत्यं तपरग्रहणाद्धि टापा सह दीर्घो माभूत् टाप् तु स्यादेव लक्षणद्वयबाध्यमानाभावात् अतएव हल्ङ्याब्भ्य इति सू
त्रे भाष्यवार्त्तिकयोर्विवरणे च सन्निपातपरिभाषया टाप् नेत्युक्तं टापा व्यवधाने ह्यानंतर्यविघातः स्यादिति तस्मात् औत इव अतोपि तपरकरणं उच्चार
णार्थमेवेत्यवधेयं अनडुहः सौ सोर्ईत्येव सिद्धे अनङ्विधानमन्यतोपि स्यादिति ज्ञापनार्थं तेनोशनसः संबुद्धौ अनङ् सिध्यतीति प्राञ्चः तच्चिंत्यं सोर्ईत्युक्ते
हि अदुशनेत्युत्तरसूत्रेणापि डा स्यात् न तत्प्रशनेत्यत्र सर्वनामस्थाने चासंबुद्धाविति दीर्घः स्यात् पुरुदंसेत्यत्र सांतमहत इति दीर्घः स्यात् यद्वा संज्ञापूर्व
कोविधिरनित्य इति वा अंगवृत्तपरिभाषया वा समाधानं बोध्यं हल्ङ्याब्भ्यो दीर्घात् दीर्घादित्येतत् ङ्यापोरेव विशेषणं न तु हलोऽसंभवादित्याह दीर्घादि
ति परमिति न त्विदं विहितविशेषणं यासां क्व इत्यादावव्याप्तेः न च तत्र हलंताद्धि हितत्वेन निर्वाहः यः स इत्यादावतिव्याप्तेः कर्तेत्यादावव्याप्तेश्चेति भावः ह
लिति तस्य च सुतिसीत्येवंरूपत्वं एकदेशविकृतन्यायेन बोध्यं लुप्यत इति यद्यपीह लोपो व्योरित्यतो लोप इत्यनुवर्त्तते तेन च तत्कर्मभावसाधनं तथापीह कर्म
धनं हलिति प्रथमांतेन सामानाधिकरण्यादिति भावः दीर्घग्रहणं किं अतिखट्वः निष्कौशांबिः ननु इह समस्तस्य ङ्यावंतत्वं नास्ति न च स्त्रीप्रत्ययेन तदादिनि
मो नास्तीति वाच्यं अनुपसर्जनेहितया इह तूपसर्जनत्वात्तदादिनियमोस्त्येव सत्यं तथापि उत्तरपदस्य ङ्यावंतत्वेन सोस्तः परत्वानपायात् नहीदं विहित वि

शेषणामित्यवोचाम अतएव बहुश्रेयसीत्यत्र सुलोपः स्यादेतत् गंगीयतेः क्विप् गंगीः इहेकारस्य स्थानिवद्भावेनाप्त्वाद्दीर्घत्वाच्चातिव्याप्तिरिति चेत्सत्यं ङीई
आआप् इति प्रश्लिष्य दीर्घग्रहणस्य प्रत्याख्यानान्न कश्चिद्दोषः सुतिसीति किं भेत्ता तासेस्तकारस्य लोपो माभूत् नचैवमपि अभैत्सीत् इत्यादौ सिचो लोपा
पत्तिः सुतिभ्यां साहचर्येणाविभक्तेरेव ग्रहणात् अपृक्तं किं भिनत्ति छिनत्तीति प्रत्युदाहरंति तच्चिंत्यम् विशिष्टस्याहल्त्वात् सुतिसीनां हलिति क्लिष्टं व्याख्याया।
तिप्रसंगापादनस्यानुचितत्वात् यदप्याहुः सुरां सुनोतीति सुरासुत् तमाचष्टे सुरास्तयति ततः क्विप् सुराः सुरासौ सुरासः इह सुनोतेरेव पदस्य तस्य लोपं व्यावर्त्ते।
यितुं अपृक्तग्रहणमिति तदपि न परस्परसाहचर्येण सुतिसीनां विभक्तीनामेव ग्रहणात् अन्यथा सिचो लोपापत्तेरुक्तत्वात् प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहण
चहल्त्वं किं विभेदनन्तु प्रथमहल्ग्रहणं व्यर्थं हलंतात्परेषां संयोगांतलोपसंभवात् अत्राहुः संयोगांतस्य लोपे हि नलोपादिर्न सिध्यति राजन्नेनैव लोपः स्यात् हु
लसस्माद्विधीयते तथाहि सखेत्यत्र नलोपो न स्यात् संयोगान्तलोपस्यासिद्धत्वात् स्यादेतत् संयोगांतलोपो नासिद्धः न ङिसंबुध्योरिति सूत्रे संबुद्धिग्रहणं ज्ञा
पकात् नचैवं गोमानित्यादावपि नलोपापत्तिः ज्ञापकस्य विशेषविषयत्वात् यत्र हि नकारविभक्त्योरानंतर्यं तत्रैव सिद्धत्वं व्याख्यानात् यत्त्वाहुः हे ब्रह्मन्निति नपुं
सकार्थत्वान्नैतज्ज्ञापकमिति तन्न लुका लुप्ते प्रत्ययलक्षणाभावेन संबुद्धौ वा नपुंसकानामित्यस्यावश्यकतया च संबुद्धिग्रहणस्य नपुंसकविषयत्वासंभवे
नोक्तज्ञापकस्य सुस्थत्वात् तस्मान्न लोपो न प्रयोजनमिति चेत् इह तर्हि भिनोत्रेत्यत्र रोरुत्वं न स्यात् तदिदमुक्तं नलोपादिरिति तथा अविभर्भवान् अजागर्भ
वानित्यत्र तिलोपो न स्यात् रात्सस्येति नियमात् अत्रेदमवधेयं ङ्याब्ग्रहणं सोरेव विशेषणं न तु तिस्योः व्याख्यानात् अस्मिन्नेव सूत्रे दीर्घहल्पृक्तग्रहणं तिस्यो
श्च ग्रहणं न कर्त्तव्यं भवतीति भाष्यं चेह प्रमाणम् यदि हि ङ्याब्ग्रहणं तिस्योरपि विशेषणं स्यात् तर्हि कथं तिस्योर्ग्रहणस्याकर्त्तव्यतां ब्रूयात् यत्तु ङ्याब्भ्यां तिस्यो
रसंभव एवेति तत्र ङ्यंतादसंभव इति सत्यं आवंतात्तु आचारक्विवंताल्लङः तिप्सिपौ स्त एव अगंगात् अगंगाः इतिवत् यथा न च शपा व्यवधानं एकादेशस्य पूर्वान्त
वेन ग्रहणात् न च स्थानिवद्भावः अपूर्वविधित्वात् अत्रायं निष्कर्षः ङ्यापः सोरित्येवं सूत्रयितुमुचितं न च सुराः सुरासौ इत्यादौ धातोः सकारे प्रसंगः ङ्याब्भ्यां साह

चर्योत् प्रत्ययाप्रत्यययोरिति परिभाषया वप्रत्ययस्यैव सो ग्रहणात् राजेत्यादौ नलोपस्तु नङिसंबुद्ध्योरिति ज्ञापकेन साधित एव किंचाभिनोत्रेति उत्वमपि सूपपा
दं संयोगान्तलोपो रोरुत्वे इति सिद्धकांडे पाठात् हरिवो मेदिनं त्वेति यथा अविभर्भवा नित्यत्रापि न दोषः रात्सस्येत्यत्र तकारस्यापि प्रश्लेषणारात् सस्येति छेदात् ननु
उखास्रदित्यादौ संयोगादिलोपः स्यादिति चेन्न दत्वे कृते तदप्राप्तेः असिद्धं दत्वमिति चेन्न सिद्धकांडे वस्वादिषु दत्वमिति पाठात् नन्वपदांतत्वाद् दत्वं न स्यादिति चेन्न
सावपि पदं भवतीति पक्षाश्रयणात् नदीजंतत्वसर्वनामस्थाने परेवीति छित्वा यजादौ सर्वनामस्थाने परे दंनेति व्याख्यानम् नचैवं राजेत्यादौ नलोपे कृते सौ रुत्वविसर्गौ स्या
तामिति वाच्यम् हल्ङ्यादिति सिद्धे पृथिमथी सा कारविधानेन प्रथमं सुलोपस्य ज्ञापनात् ननु नैतज्ज्ञापकं संबुद्धौ चरितार्थत्वात् हे पंथाः मंथाः अभुक्षाः नत्र हि दी
र्घो संबुद्धावित्ति पर्युदस्तः नलोपश्च निषिद्ध इति चेन् एवं तर्हि नलोपात् प्राक् संयोगांतलोप इत्यर्थेन ङिसंबुद्ध्योरिति सूत्रमेव ज्ञापकमस्तु तथा हि ङिसंबुद्ध्यो।
रिति षष्ठी न तु सप्तमी ङे लुक् लुप्ततया प्रत्ययलक्षणाभावात् ङ्यंतस्य संबुद्ध्यंतस्य च प्रातिपदिकस्येति सामानाधिकरण्येनान्वयः न च प्रथमं संयोगांतलोपं वि
ना संबुद्ध्यंतं प्रातिपदिकं लभ्यते तस्मान् ङ्यापः सोरिति न्यासेन किं चिद्बाधकं यद्वि तु वस्वादिषु दत्वमिति वार्तिकं प्रत्याख्यायते अधातुग्रहणेनैवोखास्रदित्यादौ
दीर्घाभावसिद्धेः तर्हि हल्ङ्यापः सोरिति सूत्रमस्तु यत्तु यथाश्रुतं सूत्रं प्राचा व्याख्यातं ङ्यंतादावंताद्दीर्घाच्चेति तन्न ङ्यापोर्हि दीर्घो न तु तदंतमपि न च दीर्घात् ङ्यंत
हिमाद्दीर्घाद्योऽतीत संज्ञास्थितादिरर्थो लभ्यते दीर्घादिति पंचम्या अनन्वयात् समासे उपसर्जनयोर्ङ्याबोर्विशेषणायोगात् उक्तं हि भाष्ये सविशेषणानां वृत्तिर्न वृत्तस्य
च विशेषणयोगो नेति एतेनानदीसंज्ञं ह्रस्वं इउवर्णान्तमित्यपि प्राचो वृत्तिः प्रत्युक्ता सख्युरसंबुद्धौ इहेनोत्सर्वनामस्थाने त्यतः सर्वनामस्थाने इत्यनुवर्तते तदसंबु
द्धावित्यनेन न विशेष्यते गोतो णिदिति सूत्राण्णिदित्यनुवृत्तं तत्सामानाधिकरण्येन सप्तम्याः प्रथमाकल्प्येत्त इत्याह संबुद्धिवर्जे सर्वनामस्थानमिति सख्युरसंबुद्धि
इत्येवं तु सूत्रं युक्तं ख्यत्यात्परस्य कृतयणादेशयोः खितीशब्दयोरेतदनुकरणं ख्येति एवं तितीशब्दयोरपीति उभयत्राप्यकार उच्चारणार्थः ननु मुख्यपत्यादिशब्दैकदेशा
नुकरणमिदम् सख्युर्यः पत्युर्नः संख्यायाः संवत्सरसंख्यस्य च आपत्यस्य च तद्धित इत्यादिनिर्देशात् इत्यभिप्रेत्याह खितिशब्दाभ्यामित्यादि परस्येति ग्रहणमेः

म॰र॰
२५

पूर्वपरयोरित्यधिकारनिवृत्त्यर्थं। औत् एतच्च नदीसंज्ञके षु इदुद्भ्यामिति पूर्वसूत्रेणाबाध्यते घिसंज्ञकेषु अच्च घेरित्युत्तरसूत्रेण तस्मात्संज्ञाद्वयशून्ययोः स्वविषयः
नचतादृश उकारोस्ति अत आह उकारेति यत्तु प्राचा घिनदीसंज्ञावर्जिताभ्यामिदुद्भ्यां परस्येत्युक्तं तन्न तादृशस्य उकारस्याप्रसिद्धेः समुदायस्येति नचपर्युदा
सेपि पर्युदस्यमानसमर्पके सखिशब्देनदंतग्राहकत्वशंक्यं विशेष्यासन्निधानात् यत्विह ग्रहणवतेत्याद्युपन्यस्तं हरदत्तेन यच्च स्यात्यान्सूत्रे कैयटेनमन्वन्त
स प्रत्ययविधिविषयत्वात् गौणत्वेपीति अस्या घनङ्वदितिभावः तथा च येन विधिरिति सूत्रे परमसखायाविति वहुव्रीहिः तत्पुरुषे हिटचाभाव्यमिति कै
यटः तथा द्वितीया श्रितेति सूत्रे सामसखेति प्रतीकमुपादाय वहुव्रीहित्वान्न समासांत इति कैयटः मिदचोन्त्यादिति सूत्रे तृज्वत्क्रोष्टुः स्त्रियां चेति सूत्रे च भाष्य।
कैयटयोः सख्यधातौ माधवग्रंथे च स्फुटमेतत् अनुद्युक्षो वरुण इंद्रसखा आग्नेया हिमरुत्सखा नीव्रं सोमं पिवति गोसखायं इत्यादिप्रयोगाश्चैवमेव संगच्छं
ते नत्र वहुव्रीहिप्रयुक्तस्य पूर्वपदप्रकृतिस्वरस्यदर्शनेन गौणत्वात् एतेन घिसंज्ञासूत्रे शोभनः सखास्य सुसखिरित्युदाहरंतो हरदत्तन्यासकारौ तदनुगा
मिनश्चान्ये उपेक्ष्याः पतिः समास एव एवकार इष्टतोवधारणार्थः अन्यथा हि समासे पतिरेव इति संभाव्येत धात्वादेरित्यादि ज्ञापकानुसरणे च प्रतिपत्तिगौ
रवं स्यात् अथ कथं सीतायाः पतये नमः पराशरश्च नष्टे मृते प्रव्रजिते क्लीवे च पतिते पतौ विति उच्यते पतिरित्याख्यातः पतिः णौ टिलोपे अच इरित्यौणादि
क इः अयं पतिशब्दः पतिः समास एवेत्यत्र न गृह्यते लाक्षणिकत्वात् एतेन कृष्णस्य सखिरर्जुन इति भारतं सखिना वानरेंद्रेणेति रामायणं च व्याख्यातं वहुग
ण वहुगणौ प्रातिपदिके संख्यावाचके गृह्येते ननु संघवैपुल्यवाचकेऽपि संख्यायतेऽ न येत्यन्वर्थसंज्ञाविज्ञानात् अत एव डतिरपि नद्धित एव गृह्यते वनु
नासाहचर्याच्च न तु पातेर्डतिः षड्भ्यो लुक् षड्भ्यः परयोरिति वहुवचननिर्देशोऽर्थप्राधान्यसूचनार्थः षडर्थगतसंख्याभिधायिनोरिति फलितोर्थः प्रत्ययलो
पे स्थानिवत्सूत्रेणासिद्धे नियमार्थमिदं प्रत्ययस्यासाधारणं रूपं यत्र प्रयोजकं तदेव कार्यं प्रत्ययलोपे सति भवति न तु प्रत्ययाप्रत्ययसाधारणमिति तेन शोभना
दृषदोऽस्य सुदृषन् प्रासाद इत्यत्रात्वसंतस्येति दीर्घो न यद्वा यत्र प्रत्ययः प्राधान्येनाश्रीयते तत्राल्विधावपि विध्यर्थमिदं तेनात्रणोडित्यत्र हलादोपि तिसा।

राम
२५

वेधातुकेविहितइमलुप्तेपितस्मिन्भवति वर्णाश्रयेनास्तिप्रत्ययलक्षणंइतितुवर्णप्राधान्यविषयकंतेनगवेहितंगोहितमित्यत्रअवन्अस्मादिति अत्र
प्राचाअव्ययेत्यपिपठितंतनुअव्ययानांप्रायेणनिर्लिंगत्वादव्ययीभावस्यक्लीवत्वेपिलिंगांतराभावाच्चोपिक्षितंवस्तुतस्त्विति अर्थप्राधान्यबोधकस्यव
हुवचनस्याभावात् गौणत्वेपित्रयादेशोन्याय्यःअस्थ्याद्यनङ्इतिभावःअकारोवक्तव्यइतितथाचवहुत्वाभावेऔडुलोमिशब्दइकारांतःवहुत्वेतुअ
कारांतःउडुलोमशब्दोऽन्यएवतस्यचइकारांतेषुव्युत्पादनंप्रासंगिकमितिभावःतथाचोडुलोमिशब्दस्यइदंतस्यवहुत्वेदंतत्वमितिनिभ्रमितव्यंइतिइदं
नाःक्विदितितेनआतोलोपइटिचेत्यालोपइतिभावःपयीपप्यादयइतियत्तुप्राचोक्तंएवंदेवयज्यतिलक्ष्म्यादयःतत्रदेवान्यजतइतिविग्रहेइनिमौणादि-
कस्तत्रेणह्रस्वांतस्यैवदेवयजिंशब्दस्योज्ज्वलदत्तादिभिःसाधितत्वात् अग्नौद्विजानदेवयजीन्निहन्मःइतिभट्टिप्रयोगस्यह्रस्वविषयतयैवव्याख्यातत्वा
त् नचयजेर्दीर्घईप्रत्ययःप्रतिपदोक्तोस्तिवहुलग्रहणात्कल्प्यतइतिचेत्तन्भवेदेवंयद्यनन्यथासिद्धंकल्पकमुपलभ्येतवेदेपिह्रस्वएवप्रयुज्यते आय
जित्वामनवेजातवेदसंइतिअतिलक्ष्मीशब्दस्यतुनदीत्वाद्ध्रस्वेआडागमेनुटिआमिचकृतेमहदेववैलक्षण्यमितिनवातप्रमीमांस्यम्एतत्त्वमूलएवस्प
ष्टीभविष्यतिक्विवंतेतिएतच्चमाङ्मानेशब्देचइतिधातोमाधवग्रंथेस्पष्टं वहुश्रेयसीति ईयसश्चेतिनकप्नाप्युप. सर्जेनह्रस्वःईयसोवहुव्रीहेर्नेतिनिभ
वेधात् यूस्त्र्याख्यौ ईदूदंताविति इहवर्णयोरेवसंज्ञेत्यपिपक्षोस्ति आछीनद्योरितिसूत्रस्वरसात् तयोस्त्र्याख्यत्वंतुङ्यादिषुस्वतःकचित्तुस्त्रीवाचकवर्ण
समुदायेघटकत्वेनप्रवेशात्शक्तिपर्याप्त्यधिकरणत्वस्याविवक्षितत्वात् तेननद्यंतादित्यादिव्यवहारोनविरुध्यते एवंघिसंज्ञायामपिइउवर्णौनदंतंवाघि
संज्ञिइतिपक्षद्वयंवोध्यं वर्णसंज्ञापक्षेअसखीत्यस्यसखिभिन्नस्यावयवइत्यर्थःननुसखिशब्दावयवंवर्जयित्वेति तेनातिसखिनेत्यादिनिर्वोधमित्य
वधेयं पूर्वमितिस्त्रेःप्रागित्यर्थःवक्तव्यमितिसंज्ञायायथोद्देशंप्रवृत्तौन्यायसिद्धमिदंकार्यकालत्वेतुवाचनिकंअचिश्नुइहधोरितिधातोरेवविशेषणं
ननुश्नुभ्रुवोरव्यभिचारादित्याह इवर्णोवर्णेनधातोरितिश्नुप्रभृतीनामिवर्णोवर्णयोरितिव्याख्यानेतुटूयङ्वङोर्ङित्वंव्यर्थंवैयधिकरण्यंचदोषःस्त्रिपनि

म॰ र॰
२६

अयुतन्दिदिवतुः ऊयतुः इत्यादौ चातिव्याप्तिः तद्वारणायैव वर्णौ वर्णयोरव्यरत्वेन विशेषणे तु क्लिष्टतेति भावः आंतरतम्यादिति स्थान तदिति भावः एरनेका
चः अचि श्नुधात्विति सूत्रे द्वंद्वनिर्देशेपि धातुरेवेह संबध्यते न तु श्नुभ्रुवौ तयोरिवर्णासंभवात् धातुग्रहणं चावृत्त्या उभयोर्विशेषणं संयोगस्यांगस्य चेति स्याच
ष्टे धात्ववयवसंयोगेत्यादि तत्र धातुना संयोगस्य विशेषणादिह यणा उन्न्यौ उन्न्यः अंगविशेषणं तु हरिं हरीन् इत्यादिसिद्धये यदि हि धातुनांगं न विशेष्येत न त
र्हि इहापि प्रध्यं प्रध्य इत्यादाविव पूर्वरूपं पूर्वसवर्णं च बाधित्वा यणा स्यात् धात्ववयवसंयोगपूर्वको न भवति य इवर्णः तदंतत्वादंगस्य वृश्चि[illegible]शब्दस्येति भा
ष्यकृता हि बुद्धिपरिकल्पितमपादानमाश्रित्य भीत्रार्थानामिति सूत्रं प्रत्याख्यातं तेन न स्वसंबंधमात्रविवक्षायां षष्ठीवेति भावः सूत्रमते ष्या॰ वृश्चिकसंबंधि
नीति अद्योपमलोपाविति न च परत्वाद्वेरपृक्तस्येति स्यादिति वाच्यं वेरपृक्तलोपाद्वलिलोपः पूर्वविप्रतिषेधेनेति वार्त्तिककारोक्तेः कौ लुप्तमिति नपुंसके भावे
क्तः कौ लोप इत्यर्थः इदं सर्वं कुमारीमिच्छन् कुमारीत्यत्रापि बोध्यं अनन्यतयेति गौणत्वेपि अन इणिवयोः प्रवृत्ते रूकृतत्वाच्चेति बोध्यं दीर्घस्या॰ ज्ञेति एतदर्थं
कृतयणानिर्देश इति भावः नन्वतिसखेः भूपतेः इति गुणविषये व्यावर्त्तेपि तु यणानिर्देश इति चेत् अस्त्वेवं तथापि दीर्घप्रवृत्ते दुर्वारत्वात् न हि कृ[illegible]भाव्यं
न हि दीर्घश्चिन्त्यत्र [illegible]णमस्ति सोत्रस्य विकृतनिर्देशस्याव्याप्त्यतिव्याप्त्युभयवारकत्वेन सार्थक्यलाभेन तथैव औचित्यात् भाष्यारूढत्वाच्च यत्तु भा[illegible]वे
ति केचिदित्युक्ता[illegible]ः सुस्व इत्याद्युक्तं यच्च तद्धा स्यात् अभिरूभयमप्येतद्भाष्ये स्थितमित्युक्तं पश्चात्रोपष्टंभार्थं प्रसादकृता सस्युः पत्युः प्रसिध्येयेतत्[illegible]
दित्याह पाणिनिः साधारणानन्यन्वाना सुस्युः सुत्युः सुखीः सुतीः सुखीपति सुतीयतौ यौक्तिवेनोनयोर्विदुः निष्ठादेशस्य पूर्वत्रासिद्धत्वात् लून्युरादिकं सुस्पष्ट
त्यादिसाध्येतदुभयं भाष्यगौरवादिति विचारचिंतामणिस्थश्लोकोपन्यसनं कृतं तदेतत्सर्वं भाष्यकैयटापर्यालोचनमूलकं इति कृतं बुद्धयस्तव विदां कुर्वंतु
शुष्किय इति यत्तु शुष्क्युः पक्युः शुष्क्यः पक्यः इत्युदाजह्रुः भाष्ये स्थितमिति चोपसंजह्रुः तदतिरभसात्॥ इतीदंताः तृज्वत्क्रोष्टुः क्रुश आह्वाने अस्मात्सित
नीतितुन्नन्यये क्रोष्टुशब्दः तृचि तु क्रोष्टृशब्दः द्वावपि सृगालवचनौ तत्राविशेषेणाद्वयोः प्रयोगे प्राप्ते सर्वनामस्थाने स्त्रियां च तजंतमेव नतीयाद्यावचभयम

एम
२६

न्यत्र तु तृज्वं तत्र एवेति नियमार्थं त्रिसूत्री आरभ्यते क्रोष्टुरिति तु न्नंतात् प्रथमा तृज्वदिति तृतीयांताद्वतिः निमित्तव्यपदेशनादात्म्यशास्त्रकार्यरूपविषयकत्वेना।
तिदेशस्य षड्विधत्वेपि प्राधान्यादिह रूपमेवातिदिश्यते तच्च नपवादेर्यस्य कस्यचित् किंतु क्रुशेरेव उपस्थितत्वादर्थतः प्रांतयोश्चेत्यभिप्रेत्य फलितमाह क्रोष्टु
शब्दस्याने इति नियमार्थमिति अन्येषां संज्ञाशब्दानां माभूदित्येतदर्थमित्यर्थः क्रोष्टेति अनङ् हलङ्यादिलोपात्परत्वादुपधादीर्घः स च सर्वनामस्थाने चेत्यं।
नेन यद्यपि लभ्यते तथापि परत्वादस्तृन्नित्येव न्याय्यः कृतेप्यनङि एकदेशविकृतस्य नन्यत्वेन तृज्वत्वात् अन्यथा गुणे कृतेपि दीर्घो न स्यादिति भावः रात्सस्येह
तकारोपि प्र[illegible]ते इति पक्षांतरं तेन हल्ङ्यादिसूत्रस्थाने ङ्यापः सौ रिति निष्कर्षे अविभर्भवान् इत्यादि सिध्यति अजेर्षेत् इत्यत्र तु चत्वस्यासिद्धत्वात्।
लोपो न ननु की[illegible]तेः क्विपि कीर्नेर्ईर्नि स्यादिति चेत् यथालक्षणमप्रयुक्ते इति भाष्यं एतेनावर्वर्ते इति व्याख्यातं परत्वादिति न च नुरा[illegible]त्यइ[illegible]वाच्यं [illegible]त्वङ्ग
विकृते सन्निपातपरिभाषया नुटो दुर्लभत्वादिति भावः नुमचिरेति ननु रेण स्वविषये प्राप्तं सर्वैर्बाध्यं बाध्यसामान्यचिंताश्रयणात् तथा च वक्ष्यते नुमदी
र्घोत्वानामपवाद इति एवं चाविशेषात् नुडप्यनेन बाध्यः तत्कथं विप्रतिषेधः उत्सर्गापवादयोस्तदयोगादिति चेत् सत्यं अत एव तदंशे विप्रति[illegible]षेधं दूषयि
त्वा नजि सूत्रमस्तु इति ज्ञापकात् नुडिति भाष्यकृतोक्तमिति संतोष्टव्यं इत्युदंताः हूहूरिति अव्युत्पन्ना संज्ञेये अतिचमूशब्दे त्विति प्रथम[illegible]लिंगग्रहणं वेतु।
क्तेः तथा च एवमतिचम्वादय इति प्राचो ग्रंथो भाष्यविरुद्ध इति भावः वर्षाभ्व इत्य वर्षाभूशब्दस्य नित्यस्त्रीत्वात् स्त्रीलिंगप्रकरण एव यत[illegible]त्तं वक्तुं युक्तं पु
ल्लिंगे तु क्रियाशब्दाभिप्रायेण कथंचिद्योज्यमिति व्याचख्युः तद्भस्मात् दर्दुरो हि पुल्लिंगोयं भेके मंडूकवर्षाभूशालूरप्लवदर्दुरा इत्यमरो[illegible]क्तेः भिन्नलिंगानां
न द्वंद्व इति तेन परिभाषितत्वात् भेकां पुनर्नवायां स्त्री वर्षाभूर्दर्दुरे पुमानिति पादवकोशाच्च दर्दुरेषणीति पाठांतरं वा इति पुल्लिंगस्य प्राचां संज्ञा दंभनीति
दृभी ग्रंथे तुदादिः व्युत्पादित इति यद्यप्युज्ज्वलदत्तेन दंफूरिति पवर्गद्वितीयं पठित्वा दंफेर्नलोपाभावो निपात्यते इति व्याख्यातं तथापि वृत्त्यंतरेषु दृभी ग्रंथ
इत्यस्मात् ऊप्रत्यये नुमागमो निपात्यत इत्युक्तं एतच्च माधवग्रंथे स्पष्टं दशपादीकृतो दर्भणां दंभूः नुमागमो नुस्वारश्च निपात्यत इत्युक्तं अयमूकारो न।

म॰ र॰
२७

धातोरित्युवङोप्रसंगात् इकोयणाचीति यण् सचामिपूर्वः प्रथमयोः पूर्वसवर्णाइत्याभ्यांवाध्यते इत्याशयेनोदाहरति दंभूमित्यादि नचेहदन्कारेतियणाशंक्यः तत्र
अर्थवतएवग्रहणात् अस्यतुदन्शब्दस्यचानर्थकत्वादितिभावः एवंचायंहूहूवदितिफलितं श्रीपतिमतेनाह दन्निती ति माधवस्तु अंदूदंभू इत्यादिसूत्रे
गाद्दन्शब्दे उपपदेकू प्रत्ययः उपपदस्यदन्नादेशश्चनिपात्यतेइत्याहदंभूरिति तत्सर्पजातिभेदइति केचित् कपिरित्यन्ये दन्कारोपि अत्रदन्नितिनां
तपाठोमुख्यः मांतपाठेपिकेषांचित् वक्तव्यइति वर्षाभ्वश्चेतिचकारोनुक्तसमुच्चयार्थः अनुक्तंचभाष्यवार्त्तिकवलान्निर्णेयमितिभावः तथाचवर्षाभूपुं
नर्भ्वश्चेतिवार्त्तिकंव्याख्यायभाष्यकारआह अन्यत्स्यमिदमुच्यते वर्षादन्कारपुनःपूर्वस्यभुव इतिवक्तव्यमितिवामनेनतु दन्शब्दोनपठितएव एवंस्थि
ते यत्राचादन्कारेतिपठितं यच्चतत्पौत्रेणमहाभाष्यकारवचनमर्थतोनुवदतीत्युक्तं यच्चान्यैर्वार्त्तिकेनपूरितं अर्थमुदाहरतिइत्यवतारितं तत्सर्वंरभ।
सकृतमेव नचभाष्येपिदगित्येवपाठइतिभ्रमितव्यं अंदूदंभूइतिनिपातितः इतिमाधवग्रंथेनकैयटादिग्रंथैश्चविरोधापत्तेरितियत्किंचिदेतत् दीर्घ।
पाठेवृत्त्ययंभाष्यवृत्त्यादिवहुग्रंथसंमतःपाठः अनुस्मृतोनुह्रस्वः पठ्यते यत्तुतद्दिवृत्तावुक्तं एकदेशविकृतस्यानन्यत्वात्कारपूर्वस्यापिसिद्धमिति तन्न तथा
यणाप्रत्ययविशिष्टस्यान्यत्वात् नह्ययणप्रत्ययोपिविकारः तस्माद्ध्रस्वपाठेकारपूर्वकस्यउवङेव तथादीर्घपाठेकारपूर्वस्योवङिति विवेकः स्वयंभुवितिता
प्राचातुदृग्भूकाराभूशब्दोवर्षाभूवदुदाहृतो तन्निर्मूलत्वादुपेक्ष्यमितिभावः इत्यूदंताः नृचइहछंदस्युभयथेतिसूत्रादुभयथेत्यनुवर्तनेनछंदसीतितन्निर्दि
ष्टं तेनचिंताजर्जरस्वेनृसावतनृणांकानामशांतेःकथानृणामेकोगम्यस्त्वमसीत्यादिप्रयोगाः संगच्छंते केचित्तुछंदसीत्यनुवर्तयंति तदयुक्तंपूर्वसूत्रेणैवसिद्धि
नृचेतिसूत्रस्यवैयर्थ्यापत्तेः यदपिपूर्वसूत्रेतिसृचतसृ इत्यनुवर्तयंति तदप्ययुक्तं अविशेषेणविकल्पदर्शनात् तथाचधाताधातॄणामितिमंत्रेतैत्तिरीयेह्र
स्वः पठ्यते वहृचैस्तुदीर्घइतिदिक् इत्यृदंताः ओतोणिदिति गोतइत्यपहाय ओतइतिवाच्यमित्यर्थः तथाचगामित्यत्रपरत्वाद्वृद्धौसत्यामात्वंनस्यादित्याशंक्य
निरवकाशतया आत्वेनवृद्धिर्वाध्यतइति ओतोम्शसोरितिसूत्रेभाष्यकृतोक्तंकैयटोपितत्रेत्थमाह ओतइतिसूत्रंपाठं गोतइत्योकारोपलक्षणातयावाच्या

राम
२०

स्वेयमिति हल्यादिग्रंथेष्वप्येवमेवस्थितं स्मृतौ रिति यत्वाहुः गोशब्दे नञ्ओणादिकेनसादृश्यात् घोशब्दएवलक्ष्यते नत्वोकारांतमात्रं तेन स्मृतौः स्मृजवौ।
स्मृतवदित्येव भवतीति तद्भाष्यविरुद्धं गोघोभ्यामेव परस्मिणित्वाभ्युपगमे घौतो मशसोरित्यात्वस्य स्मृतामित्यादिरवकाशः स्यात् तथा च गामित्यत्र परत्वादृ
द्धेर्दुर्वारत्या उदाहृतभाष्योक्तं आत्वस्य बाधकत्वं निरवकाशत्वं चं नसंगच्छते इति दिक्। इत्योदंताः। रायोहलि अर्थे रैर्विभवा अपीत्यमरात् सुरुं संरौ राभूपसा
सृजेत्यादिप्रयोगाच्च रायिश्छांदसइतिभाष्यं तच्च कप्जंतस्य रैशब्दस्य छांदसत्वपरं न तु केवलस्यापीति वांतो पीतिसूत्रे कैयटः केवलोपिछांदसइति पक्षांत
रं सएवाह इत्यैदंताः ग्लौर्मृगांकः कलानिधिरित्यमरः एवं जनानवतीति जनौः ज्वरत्वरेत्यूठूएत्येधतीति वृद्धिः जनावौ जनौ वइत्यादि इत्यजंताः पुंल्लिंगाः रमे
ति लिंगविशिष्टपरिभाषया प्रातिपदिकत्वात्स्वादयः यत्तु आवंतत्वादिति यच्च व्याचख्युः प्रत्ययांतत्वात् प्रातिपदिकत्वेपि पृथक्ङ्याप्ग्रहणात् [illegible] यद्
ति तं न ङ्याब्ग्रहणस्यान्यार्थतायाः प्रागेवोक्तत्वात् एङ्ह्रस्वादिति परत्वात्प्रतिपदोक्तत्वाच्च संबुद्धौ चेत्येत्वे कृते हल्ङ्यादिलोपो न प्राप्नोति स्या[illegible]ना
दाप्त्वेप्याकाररूपत्वाभावात् आङ्आवित्याकारं प्रश्लिष्य दीर्घग्रहणप्रत्याख्यानात् यथाश्रुतेपि एङ्ह्रस्वादिति लोपस्यैव परत्वेन न्याय्यत्वा[illegible]निभावः या
डापः यद्यपि यडित्येवोचितं न चातो गुण इति पररूपापत्तिः अकारोच्चारणसामर्थ्यान्नैवं तद्बाधात् तथाप्युच्चारणार्थोकार इति संभाव्येत आ[illegible]ः स्पष्टार्थमाट्कृ
तः वृद्धिरेचीतिवृद्धिः यत्तु पाचाम्याट्श्चेत्युदाहृतं तन्न पाट्स्याटोष्टकारस्य समुदायानुबंधत्वेनेह आटोऽभावात् सर्वनाम्नः स्याड्ढ्रस्वश्च दी[illegible]चारणमाग्वत्
अत्र वदंति सर्वनाम्नो सुड्ढ्रस्वेत्येव सूत्र्यतां एवं च याटि परे ङित्वादंत्यादेशे सुङि सर्वस्यामित्यादि सिद्धं स्याट्करणे ह्रस्वविधाने च प्रयोजनं चिं[illegible]यमिति अत्रेयं
चिंता असुड्ढ्रस्वेत्युक्ते मुष्मै इत्यादि न सिध्येत् इति वस्तुतस्तु आमि सर्वनाम्नः सुट् पाटो ह्रस्वश्चेति सूत्रयितुं युक्तं न चैवं याट एव ह्रस्वापत्तिः दीर्घोच्चारणसामर्थ्या
त् ह्रस्वोच्चारणेप्यकारसामर्थ्यादेवातो गुणस्य वारयितुं शक्यत्वादित्यवधेयं विभाषा गौणत्वाद प्राप्तेर्विभाषेयं यत्वाहुः नबहुव्रीहाविति निषेधेप्राप्ते इति तदापा
ततः तस्या लौकिकप्रक्रियावाक्यांतर्गतसर्वादिविषयत्वात् अस्य च समासविषयत्वात् योत्तरेति यत्वाहुः या पूर्वा सा उत्तरा यस्याः उत्तरपूर्वेति तद्भ्रमात् पूर्व।

निपातनवैपरीत्यापत्तेः नीयस्येति इदं हि पुंनपुंसकयोरवश्यकं अनेनैव सिद्धो विभाषा द्वितीयातृतीयेति सूत्रं न कर्तव्यमिति भावः अंवार्थनद्योः अत्रवार्त्ति
कं मातुर्मातच्पुत्रार्थमर्हतेदिति मातृशब्दस्य संबुद्धौ मातजादेशो भवति मात्रा पुत्रस्य स्लाघ्यत्वे द्योत्ये गार्गीमाता ऽस्य गार्गीमातृकः तस्य संबोधनं हे गार्गीमा
त नद्यृतश्चेति समासांतस्यापवादोऽयं यत्रतु श्लाघ्यत्वं न द्योत्यं किंतु स्वरूपकथनमात्रं तत्र कवेव गार्गीमातृकः आवंतं पदं गमिति यूस्त्र्याख्यौ नदीति सूत्रं
व्याचक्षाणो रूजं अतिस्वह्वायेत्यत्र लाक्षणिकत्वान्नयादृग्एवमतिमवीयेत्य त्रन स्याडिति नद्धभसान्नद्यतिदेशस्य विषये लक्षणप्रतिपदोक्तपरिभाषा
प्रवर्त्तते अतिदेशवैयर्थ्यापत्तेः तेन पादुर्द्वारः स्यात् अस्तु प्रसंगएव नास्ति संज्ञोपसर्जनयोः पाठात्पर्युदासात् केचित्विति परिशिष्टकारादयः ङिति
ह्रस्वश्च अप्राप्तविभाषेयं ह्रस्वयोरप्राप्ताविति रयोस्तु नेयङुवङ्स्थानाविति निषेधे प्राप्ते आरंभात् इहेयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिंगाविति त्रीणि
ईदूतोर्विशेषणानि ह्रस्वयोस्तु स्त्रियामित्येव नतु नित्यस्त्रीत्वपर्यंतं अन्यथा इष्वशनिप्रभृतीनामुभयलिंगानां पटुमृदुप्रभृतीनां सर्वलिंगानां च स्त्रीत्वेपि
नदीत्वं न स्यात् कैयटरीत्या नित्यस्त्रीत्वाभावात् हरदत्तमतेपि ह्रस्वांशे नित्यग्रहणव्यावर्त्यालाभाच्च अत एवाख्याग्रहणमपहाय स्त्रीशब्दमात्रं निष्का
ष्यसंबध्यते न तदेतदाह इत्वोचइउवर्णौ स्त्रियामिति औत्वे प्राप्ते इति परत्वादिति भावः यत्तु प्राचा आ दिति सूत्रे घिनदीसंज्ञावर्ज्जिताभ्यामिति व्याख्यातं न्या
सावक्षरार्थः किंतु पूर्वोत्तरसूत्रं ह्यवललभ्यः एवं चुइदुभ्यामिति सूत्रानुपन्यसनं प्राचः प्रामादिकमेव अचिरऋतः गुणाद्धे [illegible]
तोत्यत्र ऋतो ङीति गुणस्य निस्लः पश्येत्यत्र प्रथमयोरिति पूर्वसवर्णदीर्घस्य प्रियतिसृ आगतः प्रियतिस्लः स्वस्मिन्पत्र्न्नातउदित्युत्वस्य परत्वमपवादइत्य
र्थः वाध्यसामान्यचिंतायां स्वविषये प्राप्तस्य सर्वस्य वाधादिति भावः विशेषचिंतायां तु मध्येपवाद इति न्यायेन दीर्घोत्वयोरेव वाधः स्यात् ननु गुणस्य सा
मान्यविशेषपक्षौ च जानिव्यक्तिपक्षवत् लक्ष्यानुरोधाद्व्यवस्थितौ इति कैयटादौ स्पष्टं यत्तु व्याचख्युः अपवादशब्दो वाधकत्वोपलक्षकः पूर्वविप्रतिषे
धेन गुणमपि वाधत इत्याशय इति तन्निर्मूलं क्लिष्टं च यदपि प्रसादकृतोक्तं गुणस्य पूर्वविप्रतिषेधेनेतरयोः परविप्रतिषेधेन वाधक इत्यपेक्षितं तन्न ।

विधेरचरितार्थत्वात् न च टाबेश्चरितार्थता यणागतार्थत्वात् त्रिचतुरोर्विशेषणादिति श्रुतत्वाद्धि त्रिचतुरोरित्यस्यैव स्त्रियामिति विशेषणं नांगस्येति भा
कः प्रियत्रिरिति अत्र व्याचक्षते स्त्रियामन्यपदार्थत्वेन बहुव्रीहिरूपमंगं तत्र वर्तते त्रिशब्दस्तु पुंनपुंसकयोरेवेति निर्ह्रासादेशो नेत्यादि अत्रेदं वक्तव्यं अजहत्स्वा
र्थायां त्रिशब्दोऽनर्थकः अजहत्स्वार्थायां तु स्त्रियां वर्तत एव न तत्कथं पुंनपुंसकवृत्तिता संगच्छतामिति अत्रेदं तत्त्वं अजहत्स्वार्थैव वृत्तिरिहाभिमता लक्ष्यानु
रोधात् तेनांगं स्त्रियामिति सम्यगेव त्रिशब्दस्य पुंनपुंसकवाचितानुभूतपूर्वगत्या उत्तरपदार्थप्रधानत्वात्तु तृष इत्यादिसिद्धांतप्रवादस्यैवमेव निर्बाधा
त्वात् एवं प्रियत्रिसा पुमानित्यत्र स्त्रियां वृत्तिरपि भूतपूर्वगत्यैव अजहत्स्वार्थापक्षे तु स्त्रीनिष्ठसंख्यासमर्पकयोः त्रिचतुरोरिति विवक्षितोर्थः प्रत्ययोत्तरप
दयोश्चेत्येतत्सूत्रगतभाष्यग्रंथसंदर्भश्चेह प्रमाणं अनित्यत्वादिति इकोचीत्यग्रहणं चेह लिंगं तद्धि संबुद्धौ नुमं वारयितुं कृतं [illegible]
द्योपसंभवात् संबुद्धिश्च लुका लुप्तेति प्रत्ययलक्षणेन नुमः प्राप्तिर्वाच्या प्रत्ययलक्षणं च न लुमतेति निषेधस्यानित्यतां विना दुर्लभमिति आकरे [illegible] वे
दमनित्यत्वं संबुद्धिगुणमात्रविषयकमित्यभिनिवेष्टव्यं लक्ष्यानुरोधेनान्यत्रापि क्वचिदभ्युपगमे बाधकाभावात् तथा च प्रियत्रिस्र प्रियत्रि इति रूपद्व
यमपि उक्तरीत्यैव कैयटेन समर्थितं पूर्वविप्रतिषेधेनेति न चात्र प्रमाणाभावः प्रियत्रिसृणी प्रियत्रिसृणि इत्यादिभाष्योदाहरणस्यैव तत्र प्रमाण
त्वात् ह्रेरत्वे सत्यावित्ति विभक्तिसंनिपातकृतमपि त्यदाद्यत्वं टापो निमित्तं सन्निपातपरिभाषाया अनित्यत्वात् न यासयोरित्यादिज्ञापकाच्चेति भावः इ
यां देशेति अजादौ यद्यादेशो विहितः स उपसर्जनत्वे पुंसि विद्यमानस्य स्त्रीशब्दस्यैवामादिषु चतुर्ष्वेव न त्वन्यत्र गुणनाभावादिभिः पूर्वोक्तैर्बाधितत्वादि
त्यर्थः नेयङुवङ्स्थानावस्त्री इति सूत्रे तु इयङुवङोः इति स्थानिनो अधिकरणोऽस्तु इयङुवङोः स्थानावपि इति षष्ठीसमासः फलितार्थमाह इयङुवङोः स्थितिर्ययोरिति यत्रेय
ङुवङौ निष्पद्येते तत्रैवायं निषेधः यत्र त्वपवादेन बाध्येते तत्र न निषेध इत्येतदर्थं स्थानग्रहणं वामि यद्यपि प्रकृतो निषेधोऽनेन विकल्प्यत इति प्राचः त
थापि निषेधविकल्पे विधिविकल्प एव फलतीति तथा च लाघवात् एवं सूत्रार्थ उचितः इत्याशयेनाह वा नदीसंज्ञौ स्त इति ङिति ह्रस्वश्चेति सूत्रेऽप्येवमेवक

म.र.
२९

यंतन्ही ति उवङ्स्थानत्वेन नदीत्वाभावात् ह्रस्वोनुपपन्न इत्याक्षेपः वहवइति केचित्तु वामीत्यत्रवाग्रहणमिहापकृष्यव्यवस्थित विभाषांवाश्रित्यस
मादधुः तन्मंदम् तथासतीहनग्रहणस्यवामीत्युत्तरसूत्रस्यचवैयर्थ्यापतेः अन्येतुसामान्येनपुंसकमितिकथंचित्समादधुः नषट्स्त्रियामुक्तंतन्नभवतीति।
व्याख्यानात् अनंतरोङीविवक्ष्यवहितस्थावपिनिषिध्यतइत्याशयेनाहङीप्टापोनेतिराःपुंवदिति रैशब्दस्यस्त्रीलिंगतायाअपिस्मरणादितिभावः तथाचक्षीरस्वामी
रात्येनंराःस्त्रीत्येकइति स्त्रियांनौस्तरणिस्तरिरित्यमरः इत्यजंतास्त्रीलिंगाः अनोम् स्वमोरिति अमोऽम्विधानंलुग्बाधनार्थं अम्स्यादिति एतच्चप्राचामनुरोधे
नव्याख्यातं संयोगांतलोपोरुलइत्यभिप्रायेणवा वस्तुतस्तु मइत्येवपदच्छेदः लाघवात् तत्रसोर्मिकृतेज्ञानमितिसिद्धंद्वितीयैकवचनेतु अ[illegible]देः परस्येत्यकार
स्यमकारेकृतेऽत्यस्ममस्यसंयोगांतलोपेसिद्धमिष्टं यत्तुवदंति एवंसतिसुपिचेतिदीर्घत्वंस्यादिति तन्न सन्निपातपरिभाषाविरोधात् यदपिदीर्घविधौमा
नप्रवर्त्ततइति तदपिन रुधादिभ्यः श्नम् श्नान्नलोपइति सूत्रयोः सुपिचेति दीर्घत्वेसन्निपातपरिभाषाप्रवृत्तेर्भाष्यकृताध्वनितत्वात् कैयटेनोपपादित
त्वाच्च यदप्याहुः अतिजरसमितिनसिध्येदिति तदपिन द्वितीयैकवचनेहि अतोमिति वाधित्वापरत्वाज्जरसिकृते सन्निपातपरिभाषयालुकोप्रवृत्तेरूपसिद्धिः
सुष्ठैव प्रथमैकवचनेतु अतिजरमित्येवेष्यते सन्निपातपरिभाषया जरसादेशस्याप्रवृत्तेः अनइतितकारउच्चारणार्थः भसंज्ञायामिति सुडेरपुंसकं।
स्येतिपर्युदासेनासर्वनामस्थानत्वादिति भावः यस्येतिचइत्यस्यायंतत्रस्यतदाह इवर्णावर्णयोरिति औङश्शीमिति विभक्तित्वात् [illegible]
जश्शसोः जसासाहचर्याच्छसपिसुवेवगृह्यते तेनेहन कुंडशोददाति श्शीसर्वनामधीत्यविभक्तिकोनिर्देशः महत्संज्ञाकरणं पूर्वाचार्यानुरोधात् अन्यतमस्यापि
ति एवंचसामान्यादिष्वन्यतमत्तमइत्यादिप्रयोगाःप्रामादिकाएवेतिभावः सोरमादेशइति यत्तुप्राचोक्तं स्वमोरमादेशेवाजरसिति तद्भाष्यविरुद्धं एवंच
अजरसंवर्त्ततइतिहे अजरसमितिचापशब्दएव अजरसंपश्येतितुप्रयोगः साधुः किंतु अमादेशेकृतेजरस् इतिप्राच उक्तिरेवासाध्वी परत्वाज्जरसोन्या
प्यत्वात् पूर्वविप्रतिषेधेप्रमाणाभावात् फलाभावाच्च सांतमहतः संयोगस्य सांतेतिपृथक्पदंलुप्तषष्ठीकं संयोगस्येत्यनेनसमानाधिकरणमितिव्याचष्टे सां

राम
२९

नसंयोगस्येति उपधाया इति उपधाग्रहणं पूर्वत्वमात्रोपलक्षणं पारिभाषिकार्थस्येहासंभवात् मासंश्छंदसीति मासित्यस्य नकारः स्यात् भादौ प्रत्यये छंदसीति वा
क्यार्थः माङ्भिः शरद्भिर्दुरोदरे तवद्युदाहरणं ह्रस्वो नपुंसके इह ह्रस्वश्रुत्या अच इत्युपस्थितं तेन प्रातिपदिकस्य विशेषणात् तदंतविधिरित्याह अजंतस्येति प्रातिप
दिकस्याच इतितु न व्याख्यातुं संभवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वात् सुवाग्ब्राह्मणकुलमित्यादौ अतिव्याप्तेश्च सन्निपातेनेति अवर्णमाश्रित्य कृतो
यादेशः कथं तल्लोपे निमित्तं स्यात् एतच्च एओङ् सूत्रे इको गुणवृद्धीति सूत्रे च भाष्ये ध्वनितं कैयटेन प्रतिपादितं शब्दकौस्तुभे निष्कर्षं प्रापितमिति तत एवावधार्यं एवं
च याधातोः सुभं याशब्दस्य क्लीबस्य ङयि सुभंय्य इति यन्माधवेनोदाहृतं तन्नादर्तव्यमिति भावः स्वमोर्नपुंसकात् अयं लुक् पूर्वविप्रतिषेधेन त्यदाद्यत्वस्य किमः
कादेशस्य च वाधकः परत्वाद्धि त्यदाद्यत्वे अमूभावेन तं कुलमिति स्यात् इकोऽचि विभक्ताविति अतिसखीनि कुलानि इत्यत्र सख्युरसंबुद्धाविति णिद्वद्भावात् वृद्धिः प्राप्ता [illegible]
इत्यत्र तु अचो ञ्णितीत्यैत्वम् प्रियक्रोष्टूनीत्यादौ तृज्वद्भावं प्राप्तः ननु नुम्नुटोः को विशेषः तत्राह नामीति नुमस्तु अंगभक्तत्वात्तस्मिन्सति दीर्घो न स्यादिति भावः तृ
तीयादिषु पुंवदिति अर्थान्नुमह्रस्वयोः प्रतिषेधोऽयं प्रवृत्तिनिमित्तभेदादिति पीलुशब्दस्य हि वृक्षत्वव्याप्यजातिः वृक्षे प्रवृत्तिनिमित्तं फले तु फलत्वव्याप्यजातिः
वृक्षविशेषप्रभवत्वं वा उभयथापि पुंनपुंसकयोर्नैकं प्रवृत्तिनिमित्तमिति भावः अस्थिदधि अतिदध्नेति दधि अतिक्रांतेनेत्यर्थः यत्तु प्रियदध्नेति उरःप्रभृतिषु
दधिमधुशालीति पाठान्नित्यः कप् प्राप्तः भाष्यकारप्रयोगादेव प्रियदधिशब्देन भवतीत्याहुः तच्चिंत्यं भाष्ये तादृशपाठस्य बहुषु पुस्तकेष्वनुपलंभात् स्त्रियां
तु प्रियदध्या प्रियदध्ये इति केचित् तन्न सन्निपातपरिभाषया वहिरंगपरिभाषया च ङीपोऽप्रवृत्तेः तस्मात्पुंसीव स्त्रियामपि अतिदध्नेत्यादिकमेव वोध्यं सु
धीनीति परत्वान्नुमा इयङ् वाध्यते सुधियेति पुंवत्वपक्षे नुमोऽभावादियङ् बहुश्रेयस्यो ऽप्रसक्तात् बहुश्रेयसी कुलं अत्र नपुंसकह्रस्वत्वेन ईयसो बहुव्रीहे
र्नेति ह्रस्वमात्रस्य प्रतिषेधादिति श्रीपतिपुरुषोत्तमविश्वरूपादयः अन्ये तु उपसर्जनह्रस्व एव निषिध्यते नपुंसकह्रस्वत्वं तु स्यादेव बहुश्रेयसि बहुश्रेयसिनी
इत्याहुः स्नुः प्रस्नुः सानुरस्त्रियामित्युभयलिंगः सानुशब्दः तस्य नपुंसकत्वे रूपमाह स्नूनि सानूनीति पुंसि शंभुवत् प्रियक्रोष्टूनीति यत्तु प्राचा प्रियक्रोष्टूनि

त्युक्तं तत्पूर्वविप्रतिषेधपरभाष्यवार्त्तिकविरुद्धं यत्तु न्यासकृद्भिः विभाषा तृतीयादिष्वचीत्येतद्विषयको विप्रतिषेधः भाष्ये प्रियक्रोष्टुने इत्यारण्यायेत्यस्यैवो
दाहृतत्वादिति तन्न उदाहरणस्य संकोचकत्वे मानाभावात् यदाहुः नचोदाहरणमादरणीयमिति किंच पूर्वविप्रतिषेधस्य वैकल्पिकतृज्वद्भावमात्र
विषयकत्वे तत्र तृज्वद्भावग्रहणं व्यर्थमेव स्यात् प्रियक्रोष्टुनेत्यादेर्विप्रतिषेधं विनापि पक्षे सुसाधुत्वात् नच प्रियक्रोष्ट्रे इत्यादिनिवृत्तिः फलं पुंवद्भावपक्षे
तस्य दुर्वारत्वात् रूपमपि तथोदाहृतत्वाच्च नच समाहारद्विगौ पंचक्रोष्टुने इत्यादौ पुंवद्भावाभावात्तत्र तृज्वद्भावनिवृत्तिः फलमिति वाच्यं एवमपि भाष्योदा
हरणस्य मंदत्वं स्यात् उपलक्षणं तदिति चेत् हंतैवं प्रियक्रोष्टूनीत्येवोपलक्ष्यतां भाष्योदाहृतप्रातिपदिकांशानुग्रहायेति दिक् सुत्वेति पुंवत्त्वपक्षे नुमभावा
य णा सुलुनेति अः सुपीति परं बाधित्वा परत्वान्नुम् यदिगंतमिति एतच्च रादाने इति धातोः अतिरिव्राह्मणकुलमिति प्रत्यक्ममाधवेन [illegible]शीकृतं अन्ये
तु सुधीश[illegible]भाषितपुंस्कः स एवेदानीमिगंतः एकदेशविकृतस्यानन्यत्वादतः पुंवद्भावो भवतीत्याहुः तथाच रूपमालादौ पुंवद्भाव उदाहृतः तस्मादेजंते
षु क्लीबे पुंवद्भावो माधवमतेनास्ति मतांतरे त्वस्ति अतः प्रघवा प्रणया सुनावेत्यादि प्राचोदाहृतमपि नातीव दुष्यति इत्यजंतानपुंसकलिंगाः लिङिति
लिह आस्वादने क्विप् लिट् सुलिट् त्विति हस्य जश्त्वेन डः तस्य खरि चेति चर्त्वेन टः तस्यासिद्धत्वात् डस्सीति पक्षे धुट् चर्त्वे तकारः नपदांता ट्टोरिति [illegible]प्रतिनि
षेधः चयो द्वितीया इति तु नेह प्रवर्त्तते चर्त्वस्यासिद्धत्वात् एतेन नतेच प्रत्याहाराणां कचत्वारिंशदिति प्राचो ग्रंथं व्याचक्षाणो [illegible]
ठाभ्यां रूपद्वयमिति तत्प्रत्युक्तं तथाच प्रातिशाख्येपि ऊष्मादयं प्रथमं स्पर्शमेके द्वितीयमाहुरपदांतभाजं इति श्लोके अपदांते इत्यादिविशेषणं संगच्छते
दादेर्द्धातोर्घः धातोरित्यावर्त्तते तत्रैकमतिरिच्यमानमुपदेशकाललक्षयतीत्याशयेनाह उपदेश इति आवृत्तिफलं पृच्छति उपदेशे किमिति अव्याप्त्यति
व्याप्तिपरिहारः फलमित्याह अधोगित्यादिना एकाचो वशो भष् झलीति निवृत्तमिति यत्तु प्राचोक्तं प्रातिपदिकसंज्ञस्य झलिपरतः पदांते चेति तन्मामा
दिकमेव अधोक् अधोग् अजघोः इत्यादिसिध्यापत्तेः प्रातिपदिकग्रहणस्याप्रकृतत्वाच्च तत्र रूलोनिमित्तत्वानुपयोगाच्च धुग्भ्यां धुक्षु इत्यादौ पदांतत्व

त्येवसिद्धेः यदपि तन्त्यो त्रेणाव्याख्यातं फलितु परे प्रातिपदिकसंज्ञस्येवेत्यादि तदपि निर्मूलं निष्फलं चेत्युपेक्ष्यं भष्भावइति नशत्वचर्त्वयोरसिद्धत्वाज्झभ्यांप्रा
गेवेति भावः षत्वचर्त्वेइति चर्त्वस्यासित्वात्पूर्वं षत्वं ततश्चर्त्वमिति भावः वाद्रुह द्रुहेर्दादित्वान्नित्यं प्राप्ते ऽन्येषामप्राप्ते उभयत्र विभाषेयं ननु द्रुहादयोदि
वादिषु अनेनैव क्रमेण पठ्यंते तत्र वाद्रुहादीनामित्येवास्तु दिवाद्यंतर्गणस्य पुषादेरंतर्गणो रधादिः तदंतर्गणो द्रुहादिरस्तु मेवं तथाहि सति यद्भुः[illegible] किंन स्या
त् निर्दिष्टं यद्गणेन चेति निषेधात् दोधुक् दोधुट् इग्यणः यणः स्थानेइति विधिप्रदेशेषु सूत्रशाटकवज्ज्ञाविसंज्ञाश्रयणामिति भावः वाहऊठ् वसोः संप्र।
सारणमित्यतो नुवृत्तं संप्रसारणं ऊठो विशेषणं तेनालोंत्यस्येति न यत्तु प्राचा वा शब्दस्येत्युक्तं नासौ सूत्रार्थः किंतु कथंचित् फलितार्थकथन[illegible]
छंदस्येवेति छंदसि सहः वहश्चेति सूत्रे छंदसीत्यनुवृत्तेरिति भावः यत्तु ऊठि कृते सवर्णदीर्घः भूहः भूहेत्यादि प्राचोक्तं तद्भाष्यविरुद्धं तथाहि ऊठ्ग्रह।
णं मास्तु संप्रसारणमेव विधीयतां तस्य लघूपधगुणे कृते वृद्धिरेचीति वृद्धौ सिद्धं विश्वौह इत्यादि एवं स्थिते क्रियमाणं वहिरंगपरिभाषां ज्ञापयति
सत्यां हि तस्यां वहिरंगस्य संप्रसारणस्यासिद्धत्वादंतरंगो गुणो न स्यादिति भाष्ये स्थितं नन्वनकारांते अकारांतोपसर्गे चोपपदे रूपे विशेषः स्यादिति
चेत्तमेवं भाष्यकारोक्तज्ञापकवलेनैव तादृशस्थलेषि प्रत्ययाभावस्यानुमानादिति केयटहरदत्तादयः एतेन वा पूहः प्रौह इत्यादि प्रयोगा अपि परा
स्ताः अथवा ऊहतेः क्विप् इत्यवधेयम् वसुस्रंसु वस्वुः प्रत्ययः तेन तदंतं ग्राह्यं ससजुषोरुरिति सूत्रात् सेत्यनुवर्त्ततेन च वसोरेव विशेषणं न तु स्रंसु।
ध्वंसोः अव्यभिचारात् नाप्यनडुहः असंभवादित्यभिप्रेत्याह सांतवस्वंतस्येति पदांते इति फलीति प्राचः प्रमादः सस्तमित्यादावतिव्याप्तेः सहेः साडः
सहेरिति किं सहडेनवर्त्तते इति सडः यस्य नाम्नि डशब्दोस्ति यथा मृड इति सडस्यापत्यं साडिः हांताः दिव औत् प्रातिपदिकस्येति [illegible]मनस्स दिवेर्डि।
विरिति न्यासोहि तत्सूत्रेणाव्युत्पन्नस्य वा नतु दिवु क्रीडादाविति धातोः निरनुबंधकग्रहणे न सानुबंधकस्येति परिभाषया तेनाक्षद्यूरित्यादौ न भवति ओ।
तस्तकार उच्चारणार्थः सुद्युभ्यामिति उकारस्य संप्रसारणत्वाद्धल इति दीर्घः प्राप्तः ठदिति तपरसामर्थ्यान्न भवति यत्तु प्राचोक्तं दिवौकाः आत्वममी।

तित दुपेक्षितं मुनित्रयानुक्तेः निष्फलत्वाच्च यामिति रूपं तु योशब्दस्यैवेति बोध्यं वांताः षट्चतुर्भ्यश्च बहुवचननिर्देशादर्थस्य प्राधान्यं विवक्षितं अर्थाच्चा
मः परत्वं शब्दद्वारके तेन तदंतविधौ सत्यपि परमेचतुर्णामित्यादावेव भवति ननु बहुव्रीहौ न देतद्दक्ष्यति गौणत्वे तु नुट्नेष्यते इत्यादिना द्वित्व इति अ
चोरहाभ्यामित्यनेना रांताः कमलालक्ष्मीः मांताः मो नो धातोः पदांत इति म्लीति तु पद्यपि प्राचानुवर्त्तितं तथापि काशिकादावभावात् निष्फलत्वाच्चोप।
श्यं किमः कः ननु इमश्च इत्येव सूत्र्यताम् त्यदादीनां इमोऽः स्यात् इति व्याख्यास्यते किंशब्दश्च इदं प्राक्पठिष्यते नानर्थक इति निषेधारंभसामर्थ्याच्चालो
त्यविधिर्न भविष्यति तत्किं कादेशेनेत्याशंक्याह अकच्सहितस्यापीति टेरित्वेककइति स्यात् कुतिहोरित्याद्यर्थे किम इत्यवश्यं वक्तव्यमिति भावः नन्वेवं
गणकार्यत्वाभावादुपसर्जनेपि स्यात् मैवम् त्यदादीनामित्यनुवर्त्त्यवचनविपरिणामेन त्यदादेः किम इति व्याख्यानात् अनुवृत्तिसामर्थ्याच्चेद हसूत्रेद्वि
पर्यंतानां इति नियमस्यत्यागात् उत्सर्ग इति तेन न तदोसः साविति सूत्रेऽनंत्ययोरिति किं हेस इति भाष्यं भोऽच्युत इति च न विरुध्यत इति भावः नाम्नी
त्यत्र मूलं तु प्रचुरप्रयोगादर्शनमेव यत्त्वाहुः इदमस्तु संनिकृष्टं समीपतरवर्त्ति चैतदो रूपं अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयादिति वचना
देवंविधस्यार्थस्याभिमुखीकरणानर्हत्वादिति तदापाततः सन्निकृष्टादिशब्दानामिव इदमादीनामपि संबोध्यसमर्पकत्वे बाधकाभावात् विप्रकृष्टस्या
पि बुध्या संनिधापितस्य बहुशः संबोधनदर्शनाच्च तथा च भट्टिः हा पितः क्वासि हे सुभ्रु बह्वेवं विललाप सः इति अनाप्यकः प्रत्याहार इति ननु टापि विभा
क्ताविति विशेषणादिति भावः अनभ्यासविकार इति तेन भृञामित् अर्त्तिपिपर्त्योश्चेति इत्वे अलोन्त्यविधिरस्त्वेव विभर्त्ति पिपर्त्ति ननु स्मायादेशात्प
रत्वादनादेशः स्यादित्याशंक्याह नित्यत्वान्ङेः स्मै इति कार्यं विधातुमिति अपूर्वं बोधयितुमित्यर्थः ईषदर्थे क्रियायोग इति श्लोके तु ईषदर्थादयो न वि
धीयंते किं त्वनूद्यंते तेन एनादेशो न एतेन न क्षभीरुरयं त्वमेव न तदिमं राष्ट्रे गृहं प्रापयेत्यपि व्याख्यातं भीरुत्वस्यानुवादत्वेन विवक्षितत्वात् मांताः सुगा
णिति अनुनासिकस्य क्विझलोरिति दीर्घः न च तस्मिन्कर्त्तव्ये ऽल्लोपणिलोपयोः स्थानिवद्भावः शंक्यः दीर्घविधौ तन्निषेधात् क्वौ विधिं प्रति निषेधा

दितिभावः एतेनसुगण्णीश इति प्राचोग्रंथंगणपतेः क्विविति व्याचक्षाणाः उपदेश्यादिति ध्वनयति तदीयग्रंथोपि समर्थनीय इत्याग्रहेतु इत्थंसमर्थ्यतां सर्वलो
पित्वेनक्विविवाचरतीतिक्विप्शब्दादाचारक्विबंतात्कर्त्तरिक्विप्तेनविजित्यर्थः णांताः उपधादीर्घ इति सर्वनामस्थाने चासंबुद्धावित्यनेनङौ संबुद्धौ चेति प्राचा
मनुरोधेनेयंव्याख्याकृतंतस्यसंबुद्ध्यंतस्यचपदस्येतिषष्ठ्यंततयाव्याख्यानंतूचितंएवंहिप्रत्ययलक्षणंसुलभमितितदर्थंनिषेधसामर्थ्यानुसरणात्के
श्रोनकर्त्तव्यः पूर्वस्मादपिविधौस्थानिवत्त्वमाशंक्याह नचेतिषाष्ठीमिति वाहऊठित्यत्रज्ञापितत्वेन तद्देशस्थत्वादितिभावः इत्यसिद्धत्वादिति नियम
मसूत्राणांविधिरूपेणप्रवृत्तिः सामान्यशास्त्रतात्पर्यसंकोचकतावेतिपक्षस्यघुञ्ञोलुङी तिसूत्रेभाष्यकृताध्वनितत्वादितिभावः निषेधरूपेषु
णांप्रवृत्तिरितिपक्षेतुपूर्वत्रासिद्धमित्यनेनेतिबोध्यंसुविधिमुदाहरति आत्वमित्यादिनास्वरविधौतुपंचार्मेदिक्संख्येसंज्ञायामितिसमासेनलोपेकृतेत्र
वर्णांतंपूर्वपदंजातमिति अमेचावर्णान्द्व्यच्त्र्यच् इतिपूर्वपदाद्युदात्तत्वंप्राप्तंनलोपस्यासिद्धत्वान्नभवति संज्ञाविधौपंचेत्यत्रनलोपेकृतेपि इत्यादिना।
स्त्रीप्रत्ययेषुवक्ष्यति कृतितुम्विधौतुवृत्रहभ्यांह्रस्वस्यपितीतितुङ्न कृतिकिंवृत्रहच्छत्रंच्छेवेतितुकस्यादेव प्रतिदिवेति कनिन्युवृषितक्षिराजिधन्वि
सुप्रतिदिवेइतिक निन् हलिचेति यत्तुउपधायांचेत्युपन्यस्तंतन्नदिववेकारस्यानुपधात्वात् इन्हन् उपधायाइति उपधादीर्घस्यैवायंनियमः ते
नवृत्रहायते इत्यत्रअकृत्सार्वधातुकयोरितिदीर्घोभवत्येवतथावृत्रहणीत्यत्रअनुनासिकस्यक्विझलोरितिदीर्घः सोपिनियमेनव्यावर्त्यते उ
पधादीर्घमात्रापेक्षयानियमविज्ञानात् इतिभावः हंतेरत्पूर्वस्येतिसूत्रंयोगविभागेनव्याचष्टे हंतेः प्रसंगादस्यउदाहरणमाह प्रहण्यादिति प्रकृतो
पयुक्तमंशमाह अत्पूर्वस्येति एकाजुत्तरेतिनवाल्लोपेकृतेएकाच्त्वंनास्तीतिवाच्यंपूर्वस्मादपिविधौस्थानिवत्त्वात् नचपूर्वत्रासिद्धेनस्थानिवदितिवा
च्यं तस्यदोषः संयोगादिलोपलत्वणत्वेषु इत्युक्तेः यत्तुअह्नोप्वाडिति सूत्रेवृत्रघ्नः सुघ्नइतिभाष्यमुपादायकैयटेनव्याख्यातं प्रातिपदिकांतेतिणत्वः।
प्रसंगइति ततपंचमीसमासोमास्त्वित्याशयेन तस्यदोषइत्यत्रणत्वग्रहणंमास्त्वित्याशयेनवाबोध्यम् णत्वग्रहणप्रत्याख्यानंतुभाष्येध्वनितंश।

ब्दकौस्तुभे च प्रपंचितं वस्तुतस्तु कुमति चेति नित्यं णत्वमिह न्याय्यं सर्वथा वैकल्पिकं नित्यं वा प्राप्तं णत्वं नियमेन निवर्त्यत इति सिद्धं भाष्ये तु कुव्यवाये हादेशे
षु प्रतिषेधो वक्तव्यः किं प्रयोजनं वृत्रघ्नः सुघ्नः प्राघ्ना निहंतेः रपूर्वस्येत्यत्र पूर्वग्रहणं न कर्त्तव्यं भवतीत्युक्तं एतच्च वार्त्तिकाशयवर्णनमात्रं न तु वस्तुस्थितिः वा
र्त्तिकेन सूत्रावयवप्रत्याख्यानापेक्षया योगविभागमाश्रित्य वार्त्तिकार्थोपसंग्रहस्यैव न्याय्यत्वादिति दिक् माधवेनोक्तमिति इत्यहितदोषो ग्रंथः भसंज्ञाया
मल्लोपे उत्तरपदमनच्कं स्थानिवद्भावश्चाल्विधित्वान्नेत्येकाजुत्तरपदत्वाभावात् प्रातिपदिकांतनुम्विभक्तिषु चेति विकल्पो भवति वृत्रघ्नो वृत्रघ्ना इति त।
ज्ञं श्येति किंच अल्विधित्वान्नेत्यसंगतं अल्विध्यर्थमेव अचः परस्मिन्नित्यस्यारंभात् तस्याप्रवृत्तौ युक्तं पंतरस्यैव वाच्यत्वात् विकल्प इत्यप्यसंगतं कुम
तिवेति सूत्रस्य दुर्वारत्वात् इत्यवधेयं मघवा बहुलं अर्वणस्त्रसावनञ इति सूत्रात् त इत्यनुवर्त्तते तदपेक्षया च मघवेति षष्ठ्यर्थे प्रथमा तदाह मघवन्
शब्दस्येति अधातोरिति अधातुभूतपूर्वस्यापीत्यर्थः अंचतिग्रहणं हि नियमार्थं धातोश्चेद्भवति अंचतेरेवेति एवं च गोमानिवाचरति गोमानित्यादौ संप्रा।
तिधातुत्वेपि विध्यर्थमधातुग्रहणं एतच्च मूल एव स्फुटी भविष्यति ननु कुर्वन्नित्यादाविव संयोगांतलोपस्यासिद्धत्वेन नांतत्वाभावाद्दीर्घत्वं न स्यादित्या
शंक्याह इहेति बहुलग्रहणादिति क्वचिदन्यदेवेत्यर्थकादित्यर्थः निपातनादिति महेहेकारस्य घकारः अवुगागमः कनिन् प्रत्ययश्चेत्यस्य त्रितयस्य नि
पातनादित्यर्थः प्रत्याख्यानमिति तथा च छंदसीवनिपावित्यत्र कैयटेनोक्तं मघवा बहुलमित्येतन्न कर्त्तव्यं श्वन्नुक्षन्निति निपातनान्मघशब्दात् मो
तुपा च भाषायामपि शब्दद्वयस्य सिद्धत्वादिति यत्तु अत्र वार्त्तिककृतोक्तं अर्वाणस्तमघोनश्च न शिष्यं छांदसं हि तन् मतुवन्योर्विधानाच्च छंदस्युभयद
र्शनादिति यच्च तद्व्याख्यावसरे कैयटेन भाषायामसाधुतेत्युक्तं तत् वनिवंतमध्योदात्तमघवन्शब्दविषयकं छंदस्येव वनिप्विधानात् अतो न कैयट
स्य पूर्वापरविरोध इति ध्वनयन्नाह छंदसीत्यादि अंतोदात्तत्वमिति यद्यपि श्वन्नुक्षन्नित्यत्र कनिनंता एत इत्युज्वलदत्तादिग्रंथमहिम्नाप्याद्युदात्तत्वं ल
भ्यते तथापि रक्षा समद्रो अरुणस्सुपर्णः पूषा त्वेतो नयतु अग्निर्मूर्द्धा निर्मज्जानं न पर्वणो जभार त्वमर्यमा भवसि यत् इत्यादौ तत्सूत्रोपात्तानामुक्षा

न्नादीनामंतोदात्तस्य निर्विवादतया कनिप्प्रत्यय एवोचित इति भावः मघवा बहुलमिति सूत्रे मघोन इति प्रतीकमुपादाय मघशब्दस्याकारस्य यस्ये-
तिलोपमाशंक्य नेतदस्ति अन्यदेव हीदमव्युत्पन्नप्रातिपदिकं तथाहि भाषायामप्यस्य प्रयोगो दृश्यत इति वदन्न्यासकारोपि मघवनशब्दस्यांतोदात्तत्वे भाषा-
यामपि साधुत्वे चानुकूलः एवं स्थिते मतुपमाश्रित्य त्रादेशं प्रत्याचक्षाणो भाष्यवार्तिककर्तॄणां मघवा नित्यत्रादेशपक्षेपि दीर्घस्वीकुरुत एव फलभेदे प्रत्याख्या-
नासंभवः अतो बहुलग्रहणाच्चासिद्धत्वमिति यदुक्तं तद्भाष्यादिसंमतमेव यत्त्वाहुः मतुप्पक्षेपि छांदसत्वान्न दीर्घ इत्येव भाष्यस्याशय इति तन्न मतुव्वंतस्य छांद-
सत्वे मानाभावात् उदाहृतभट्टिकाव्ये च हविरोधाच्चेति दिक् एतेन श्वन्नुक्षन्नित्यत्र निपातस्य मघवन्नित्यस्य त्रादेशे दीर्घाभावान्मघवन्निति क्षीरस्वामिग्रंथः प्रत्यु-
क्तः तथा च कातंत्रसूत्रे ष्वीमघवान्मघवा वेति विचारचिंतामणावपि मघवानेव मघवेत्युक्तं काशिकायामपि दीर्घ एव दृश्यत इत्यलं बहुना अर्वणस्तु यद्यपि
ऋधातोर्वनिपि गुणे च अरिति रूपं तस्मान्मतुपि अर्ववानित्यादि सेत्स्यति छंदसीवनिपाविति वनिपि वेदे अर्वेति लोके तु नञः धातोरेव वनिपि सेत्स्यति रूढिशब्द-
श्चायं वाजिवाहार्वगंधर्वहयसैंधवसप्तय इत्यमरकोशात् अतोर्थोपि न भिद्यते तथापि नांतनांतयोः सर्वत्र प्रयोगप्राप्ते व्यवस्थार्थमिदं सूत्रं तत्र चोक्तो गुरि-
तित्रिसहश्रीवत् यत्तु हरदत्तेनोक्तं अर्वन्मघवन्शब्दयोर्द्वयोरपि भाषायामसाधुत्वमेव अर्वाणमर्वन्नित्यादिभाष्यादिति तदापातनः भाष्यस्य विशेषविषय-
तायाः प्रागेवोक्तत्वात् तथा च श्रीहर्षः वाहैरलुप्यंत सहस्रदृग्गर्वगर्व इति प्रायुंक्त ननु गुणा अभेदका इति पक्षे सूत्रे अनुनासिकोच्चारणेपि आंतरतम्यादनुना-
सिकः स्यादित्याशंक्याह आदिति यत्त्वाहुः इहानुनासिकेन अनणत्वेन सवर्णग्रहणाभावात् नच तपरस्तत्कालस्येत्यनणित्विध्यर्थमिति वाच्यं भाव्यमा-
नः सवर्णान्न गृह्णातीति निषेधात् गुणानामभेदकत्वेपि शुद्धैकव्यक्तेः सूत्रे निर्देशान्नातिप्रसंग इति अत्रेदं वक्तव्यं अनणित्विध्यर्थमिति शंकायां भाव्यमा-
दित्याद्युत्तरमसंगतं तस्याविषयत्वात् यत्त्वाहुः भाव्यमानोणित्यादि अन्यथा चोः कुरित्यादावपि निषेधापत्तेः तत्रादित्करणसामर्थ्यान्न निषेध इति चे
रमनेन वक्रबंधनप्रयासेन न परस्तत्कालस्येति सूत्रे अप्रत्ययग्रहणस्य भाष्यकृतानानुवर्तितत्वाच्च किंच शुद्धैकव्यक्तेरित्यसंगतं अभेदकत्वे दोषस्य दुरुद्ध-

रत्वात् एकाच्व्यक्तिगृह्यत इत्युक्तत्वाद्धि व्यक्त्यंतरं न निर्दिष्टमित्यर्थः फलितः स च गुणानां भेदकत्वे सत्येव संगच्छते नान्यथेत्यास्तां तावत् एतेन भाव्यमानोऽण् स
वर्णाश्रयः प्रत्ययो नेति निषेधादाकारो नानुनासिक इति प्रसादग्रंथोपि प्रत्युक्तः दीर्घस्य णत्वेन मूलशैथिल्यात् थोन्थः स्यान्यादेशौ द्वावप्यनक्षो थेन्थे इत्ये
वसिद्धे इतो द्रवनं आभुक्षि न्नर्थे न्यादेश इति केचित्तु अन्यादेशमाहुः तत्राकारप्रश्लेषो व्यर्थः यत्तु न्यासकृता सा वाचोक्तं अनेकाल्त्वेपि थकारमात्रस्या
यमादेशः निर्दिश्यमानस्यादेशा भवंतीति न्यायादिति तन्न नहि शिष्टस्याप्रसंगे नोक्तपरिभाषाया इह विषयाभावात् प्रसंगादाह स्त्रियामिति सुपथीति इ
नः स्त्रियामिति कप् तु न कृतः समासांतविधेरनित्यत्वात् युवोरनाकाविति सूत्रे सुपथीति भाष्याच्च नपूजनादिति निषेधस्तु नायं विषयः षचः प्राचीनस्ये
व सइति विहितस्य माणत्वात् पथिमथीत्यात्वं थोन्थश्च लिंगविशिष्टपरिभाषया प्राप्तं विभक्तौ लिंगविशिष्टाग्रहणान्न भवति शाविति यत्तु प्राचा इतोत्सर्वनाम
स्थाने थोन्थ इति सूत्रद्वये सुटीति व्याख्यातं तदसत् निर्वीजलक्षणापत्तेः क्लीबे औङः श्यां सुपथी अत्रातिव्याप्तेः सुपंथानि पश्येति शसि रूपस्यासिद्धिप्र
संगाच्चेति भावः अत्रेदमवधेयं पंथानमात्मन इच्छतीति पथी पतितः ततः क्विप् अल्लोपयलोपौ एकदेशविकृतस्यानन्यत्वात्पथिमथीत्यात्वं न्थः पंथाः इतोत्स
र्वनामस्थान इत्यत्वं न भवति इत इति तपरकरणात् एरनेकाच इति यणं वाधित्वा परत्वान्नित्यत्वाच्च थोन्थः संयोगपूर्वकत्वान्न यण् पंथियौ पंथियः

पंथियं पंथियौ भस्य टेर्लोपः पथः पथा पथीभ्यां पथीभिः इत्यादि एतेन इतोत्सर्वनामस्थान इत्यत्रस्या न्यादेशो वतपरकरणं मुखसुखार्थं मिति
हरदत्तग्रंथः प्रत्युक्तः यत्तु न्यासकारस्तदनुसारिणोन्ये च सखीः सुतीरिति वत् पथीः पथ्यौ पथ्यः इत्याद्युदाजहुस्तच्चिंत्यं सावात्वस्य दुर्वारत्वात् यत्तु प
थिमथ्यृभुक्षामिति नात्र प्रकृत्यनुकरणमेतदिति तदप्यपार्थकं एकदेशविकृतन्यायस्य दुर्वारत्वात् पंथा इत्यत्रापि नित्यत्वाद्विशेषविहितत्वाच्च पूर्व
मात्वं कृते अनंतत्वेनन्यादेशाप्रसंगाच्च यदप्याहुः अल्लोपस्य स्थानिवत्त्वादिह कौ लुप्तं न स्थानिवदिति तु नेहाश्रीयत इति तदपि चिंत्यं तथा सति यण् प्रसं
गात् स्वप्नयादिति सूत्रे सखीः सुतीरित्यादि निर्वाहाय क्वौ लुप्तं न स्थानिवदित्यस्य कैयटादिभिः संचारितत्वात् इतोदित्यत्र तपरकरणं कुर्वतः सूत्रकृतोपि

कूलत्वाच्च तस्मात्तत्वंन्यादेशस्वन्याय्य एवेति स्थितं एतेन मथीः मथ्योः मथ्यः इत्याद्यपि प्रत्युक्तं मंथाः मंथियो मंथियः इत्यादेरेव न्याय्यत्वात् यदपि ऋ
भुक्ष्यो ऋभुक्ष्य इत्यादि तत्र सावर्णत्वं दुर्वारमित्युक्तमेव ओडादिषु यणा दुर्लभः संयोगपूर्वकत्वात् तस्मादृभुक्षाः ऋभुक्षियो इत्यादि बोध्यं ष्णांता षट् इत्य
दिग्नः संख्यां विशेषयितुं तत्सामर्थ्याच्च पूर्वत्र संज्ञापरमपि संख्याग्रहणमिह संज्ञिपरं संपद्यत इत्याशयेनाह संख्येति यत्तु प्राच्या उपदेशकाले [illegible]
नांताचेत्युक्तं तस्य चेन्यत्र नलोपे कृतेपीत्यादि स्वग्रंथविरुद्धं संप्रत्यनां तत्त्वेपि उपदेशे नांतत्वमासीदिति किमसिद्धत्वेन न न्वयं पूर्वापरविरोधः काशिकाया
मपि तुल्य इति चेत् किं ततः बाधेद्दृढेन्य साम्यात्किं दृढेन्यदपि बाध्यतामिति न्यायात् यत्तु व्याचख्युः उपदेशकाले योषकारनकारौ तदंतेत्यर्थः देवदत्तस्य गु
रुकुलमितिवत् समुदायेन संबंधात् नासमर्थसमास इति तदापाततः अवयवेन संबंधव्याख्यानात् समुदायेन संबंधादित्युक्तेः परस्परव्याघातात् किंचय
त्र उपसर्जनपदार्थः ससंबंधिकः तत्र द्वयी विधा सापेक्षोपि समस्यत इत्येका प्रधानपदार्थस्यैव कुलादेर्गुर्वादिनेव देवदत्तादिनापि संबंधः स च गुरुणा सह
उत्पत्तिरारंभः देवदत्ते न सह तु तदीयगुरुत्वाद्यात्मरूपो गुरुघटित इति द्वितीया विधा उक्तं च हरिणा संबंधिशब्दः सापेक्षो नित्यं सर्वः समस्यते वाक्यवत्सा व्यपे
क्षा हि वृत्तौ न हीयते इति समुदायेन संबंधो येषां गुरुकुलादिना संस्पृश्यावयवास्ते तु युज्यंते न तद्वता सहेति च अत्र तु उपसर्जनं न ससंबंधिकं येन द्वयी
विधावकाशमासादयेत् नन्विहापि अंतशब्दः ससंबंधिकार्थोस्तीति चेन्न उपदेशकाले पोषकारनकारविनिवद्धिसत्तदन्वयस्यात्यक्तत्वात् अन्यथा हि उपदेश
काले यो पस्य इति वक्तव्यं स्यात् वस्तुतस्तु तदपि न अंतशब्दो हि अवयविनि साकांक्षः न तु यत्र कुत्रचित् अन्यथा ऋद्धस्य राजपुरुष इति स्यात् राज्ञोपि दे
शं तु ईशितव्यं प्रति साकांक्षत्वात् राजा प्रभौ नृपे चंद्रे यक्षे क्षत्रियशक्रयोरिति कोशात् यद्वा तु ऋद्धं प्रत्यनाकांक्षत्वेनेति ब्रूषे तर्हि समं प्रकृतेपि सन्निपाते
तथा च उपदेशकाल इति व्याख्यानं निष्फलमपीति भावः यत्त्वाहुः परिभाषाया अनित्यत्वाद्धृत्कुस्यादिति तत्साहसमात्रं इष्टस्थलेप्यप्रवृत्तौ परिभा
यानिर्विषयत्वापत्तेः किंच उपदेश इति निर्मूलमपि यत्तु वदंति अंतग्रहणसामर्थ्यादौपदेशिकत्वं लभ्यते इति तदपि न संख्येत्यस्याकर्षणेन संज्ञिपरा

म॰सु॰

त्वसंपादनेनचसामर्थ्यापक्षयात् नोपधाया नेतिलुप्तषष्ठीकमंगस्यविशेषणं गौणत्वेऽपिति। बहुवचननिर्देशस्यार्थप्राधान्यार्थत्वादितिभावः प्रिय।
पञ्चामितिनकारद्वयमध्येचकारः अष्टन आ हलादाविति रायोहलीत्युत्तरसूत्रात् हलीत्यपकृष्यतेतच्चविभक्तेर्विशेषणमितिभावः तेनाष्टानामित्यत्रनु
टःपश्चादेवसन्निपातपरिभाषयाअनित्यत्वादात्वंनतुनतःप्राक् अन्यथाअष्टन् आमितिस्थितेपरत्वान्नित्यत्वाच्चआत्वेकृतेऽनांतत्वेनषट्संज्ञाभावान्नुट्
नस्यात्। नचपश्चादुद्देशपक्षेऽन्तरंगत्वात्प्रागेवकृताषट्संज्ञाएकदेशविकृतन्यायेनकृतात्वेऽपिसुलभेतिवाच्यं अल्विधौउक्तन्यायायोगादितिभावः अष्टाभ्य
ओश् कृताकारादितिननुहलीत्यपकृष्यतइत्युक्तंतत्कथंकृताकारादित्यतआह अष्टभ्यइति कृतात्वस्येदमनुकरणंनतुलक्षणावशात्संपन्नमात्वंनथाहि
सतिवर्णग्रहणाज्ञापकेनतस्यवैकल्पिकतयालाघवार्थमष्टभ्यइत्येवब्रूयात् इतिभावः इदमिति श्रुतमनुमितंचेत्यर्थः अष्टनोदीर्घादितिदीर्घांतादष्टनःप
रा असर्वनामस्थानविभक्तिरुदात्तास्यात् अष्टाभिःदीर्घात्किं अष्टभिःमध्योदात्तमिदंषट्त्रिचतुर्भ्योहलादिरितिबाधित्वाझल्युपोत्तममित्यस्यप्रवृत्तेः ष
ट्त्रिचतुर्भ्योयाझलादिर्विभक्तिस्तदंतेपदेउपोत्तममुदात्तंस्यात् इतितस्यार्थः एवंस्थितेह्रस्वव्याहत्यर्थेक्रियमाणदीर्घग्रहणंआत्वस्यनित्यत्वेव्यर्थमेवस्यादि
त्यर्थः पूर्वस्मादपीति एवंचप्रियाष्टइतिहरदत्तोदाहृतेष्टुत्वंनसंभवतीतिभावः नचपूर्वत्रासिद्धीयेनस्थानिवदितिनिषेधः तस्यदोषइतिसापवादत्वा
त् ननुरषाभ्यामितिप्रतिपदोक्तंणत्वंतत्रग्रहीष्यामः नतुष्टुत्वविधिलभ्यमितिचेत् मैवम् भाष्यमतेतदयोगात् तथाहिरषाभ्यामितिसूत्रेऽपदांतस्यमूर्द्ध
न्यइतिसूत्रमनुवर्त्यणग्रहणंपदांतस्येतिनिषेधसूत्रंचभाष्येप्रत्याख्यातं नचमूर्द्धन्यशब्देनष्टुशब्देनवानिर्वर्त्यमानेणकारेवैषम्यमुच्चंयथोत्तरं सु
नीनांप्रामाण्यमितिस्थानिवद्भावएवोचितःशब्दकौस्तुभेतस्यदोषइत्यत्रणत्वग्रहणमास्त्विति निष्कर्षः कृतस्तद्दीत्याप्याह कार्यकालपक्षइति गर्वयथो
द्देशमाश्रित्यष्टुत्वमस्त्वितिवाच्यं फलभेदेप्रत्याख्यानासंभवेनकार्यकालपक्षस्यैवेहन्याय्यत्वादितिभावः अतएवपंचमीसमासप्रत्याख्यानपक्षोपष्टंभे
नापिष्टुत्वंप्रत्याशानकार्या फलैक्यायकार्यकालस्यैवन्याय्यत्वेनासिद्धत्वस्यदुर्वारत्वात् निष्ठायांसेटीतिसेड्ग्रहणात् ज्ञापकात्पूर्वस्माद्विधौस्थानिवद्भावः।

स्यानित्यत्वयानेह प्रवृत्तिरितितु संभवेदुपेक्षायदिलक्ष्ये दृष्टंप्रमितं स्यात् लक्षणैकचक्षुष्कतायांतु अनित्यत्वपुरस्कारोऽनुचित एवेत्यास्तांतावत् जश्शसोरि।
ति औङ्त्वंहि लुगुटाविव गौणत्वेन न भवति आङ्स्थाभ्य इति बहुवचननिर्देशात् अन्यथाहि कृतात्वानुकरणेपि एकवचनेनैव निर्दिशेत् अष्टाभ्य औशिति अष्ट इति
वा एतच्च ध्वनितं तिसूत्रे भाष्यकैयटयोः स्पष्टं तथा च औङ्त्वविधौ कृतात्वनिर्देशबलेनानुमीयमानमात्वमपि प्राधान्य एवोचितं तथा च जसि प्रियाष्टानः इत्येव
स्यान्नतु प्रियाष्टा इतीत्याशंक्योक्तं भाष्ये यथालक्षणमप्रयुक्त इति न भवत्येवात्रात्वमित्यर्थ इति कैयटः वामनोपि अष्टाभ्य औशिति सूत्रेन दंतग्रहण[illegible]ष्टा।
ष्टावित्युक्ता प्रियाष्टान इत्यत्रात्वस्याभावाद्दोषो न भवतीत्याह हरदत्तस्तु तन्त्रे वप्रियाष्टान इत्यत्रेति वृत्तिग्रंथमुपादाय यथा पुनर्गौणतायामात्वं न भवति
तथा नद्विधावेव वदपत इति प्रतिज्ञापश्चूनस्य आविभक्तावितिसूत्रे एकवचननिर्देशात् उपसर्जनेप्यात्वं भवविषये आतोलोपः प्रियाष्टः पश्येत्यादिवदन्यू
र्वे प्रतिज्ञानार्थविपरीतं भाष्यवृत्त्यादिविरुद्धं कथमभिहितवानिति सएव प्रष्टव्यः हलादावेवेति यद्यपि हलीत्यस्यापकर्षमकृत्वापि व्याख्यानं भाष्ये प्र
तीयते तथापि तस्यापरितोषग्रस्तत्वं प्रपंचितमन्यत्रेति भावः प्रियाष्टा इति प्रथमैकवचनं उक्तं संगृह्णाति प्रियाष्टा इति नांताः भुदिति वुध्यतेः क्विप् धांताः
ऋत्विग्दधृक्स्रग्दिगुष्णिक् किंचिदिति कृतावुपपदे यजेः क्विन् धृष्णोतेर्द्विर्वचनमंतोदात्तत्वं च सृजेः कर्मणि क्विन्नमागमश्च दिशेः कर्मणि उत्पूर्वात्स्निहेः क्विन् उपस
र्गान्लोपः ष्यतेः अंचेः सुप्युपपदे क्विन् चेत्यर्थः युजेरिति क्रुंचेरप्येवं नलोपाभावस्त्वधिकः कनाविति इकारस्तूच्चारणार्थ इति भावः सन्निहित इति पू
र्वसूत्रस्थः तृतीये पात्वधिकार इति तत्र सन्निधौ धातुग्रहणस्यानुवृत्त्यानुवृत्तेरभावेनाधिकारत्रयाभावात् युजेरसमासे सर्वेति यत्तु प्राचोक्तं सुटीनितन्न सर्व
नामस्थान इत्यस्यैव प्रकृतत्वात् लक्षणायां वीजाभावात् क्लीवे युजी इति द्विवचनेति व्याप्तेश्च यत्तु वदंति नपुंसके शसि युंजीत्यत्र नुम्नस्यादिति तन्न ना
पुंसकस्य झलच इति नुमः संभवात् सुलोप इति कुत्वस्यासिद्धत्वात् परत्वादादौ नुम् ततो हल्ङ्याब्भ्यो दिलोप इति भावः क्विन्प्रत्ययस्य कुः पदांत इति यत्तु प्रा
चोक्तं झलीति तन्न झलीत्यस्यासंनिहितत्वात् निष्फलत्वाच्च यत्तु तत्पौत्रेण व्याख्यातं झलीत्यनेनोमं इकस्तुन्या झलीत्यस्मिन्ननुवर्त्तमानेपि न कश्चिद्दोष इति तन्न

म॰सु॰
३५

स्वष्टइत्यादौ अतिव्याप्तेः खन्निति खंजतौ तेखन् खजिगतिवैकल्ये पचेत्र जेः दीर्घश्चेतियत्तु प्राचो व्याख्यातं विणोणिन्वादुपधावृद्धिरितितन्न पंचपाद्यार
शपाद्यौवानेनक्वि दीर्घपरिवविधानात् स्कोः संयोगेतिलुप्तषष्ठीकं झलंताभ्यां विशेष्यतइतिव्याचष्टे पदांतइत्यादिना भृज्जतीतिभृट् क्विप् सस्येति जश्
त्वस्यासिद्धत्वात्पूर्वं श्चुत्वमित्यर्थः एतेन प्राचो विपरीतोक्तिः प्रत्युक्ता ऊर्गिति ऊर्ज बलप्राणनयोः अस्माच्चुरादिण्यंताद्धा जभासेत्यादिना क्विप् णिलोपः
स्वर्नो कुत्वेनस्थानिवत्पदांतविधित्वात् पूर्वत्रासिद्धत्वाच्च इह जांसि ष्ववयाइति नोदाहृतं मंत्रेष्वेनवद्धाक्येतिप्रकृत्या अवेयज इति विहितस्य णिवन
ण्वम्पदादस्य पदांतेडसम्भवादसत्वात् यत्तु श्वेतवाहुक्थशासपुरोडाशवयाजांडस्मिति प्राचोक्तं तन्न डसः प्रकृतिभूतयोर्वहियज्योर्दीर्घाभावात् पदपि
अवयाइति प्रतीकमुपादाय णिविनिति प्राचा व्याख्यातं तन्न अपवादस्य डसो विषये उत्सर्गस्य णिवनोप्रवृत्तेः तदोः सःसावनंत्ययोः अनंत्ययोः किं हे सपर
त्वात् पदाद्यत्वं बाधित्वासत्वं स्यात् ततो हल्ङ्यादिलोपे रुत्वविसर्गौ स्यातां किंच स्त्रियां सेतिन स्यात् वस्तुतस्तु अनंत्यग्रहणं शक्यमकर्तुं नचोक्तदोषः पु
नःप्रसंगविज्ञानेत्यदाद्यत्वसंभवात् सकृद्गताविति पक्षेपि तदोः सस्साविस्यानंतरं अदस इति योगं विभज्यादस एव दस्य सत्वं नान्यस्य दस्येति व्याख्या
तुं शक्यत्वात् ननु यथान्यासे द्वौ यतेः क्विपि स्व इति प्राप्नोतीति नियमेतु द्व इति स्यादितिचेन्नैवं गौणो अत्वसत्वयोरसंभवेन द्वावित्यस्यैवन्याय्यत्वात् ङे प्रथमयो
रम् ङे इति पृथक्पदं लुप्तषष्ठीकं प्रथमाशब्दः प्रथमाद्वितीययोः समुदाये गौणा इति व्याचष्टे ङे इत्यस्येत्यादिना ङे सुटोरमिति सुवचं अधिकरणत्वविव
क्षयेति यदितु शेषे इति विभक्तिविशेषणं स्यात्तर्हि व्यर्थमेवतत् आत्वयत्वाभ्यां विशेष विहिताभ्यां स्वविषये लोपस्य बाधसंभवात् नन्वेवं अं मले
प इति पक्षस्य निरालंबनत्वापत्तिः साम आकमिति ससुड्निर्देशेन तस्यापि ज्ञापितत्वादिति भावः युवं व स्त्राणीति शेषे लोपः यत्तु काशिकायामुक्तं पंचा
स्याश्च चतुर्थ्याश्च षष्ठीप्रथमयोरपि यान्यद्विवचनान्यत्र शेषे लोपो विधीयत इति तद्भाषापेक्षया छंदसि तु प्रथमाद्विवचनमपि शेषे लोपस्य विषय ए
वेति बोध्यम् मपर्यंतस्य किमिति अधिकारसूत्रे किमर्थमिति प्रश्नः अंगकार्ये इति एतेनांगवृत्ते पुनर्वृत्तावविधिरिति परिभाषार्थतउपनिबद्धा अंगे अंगा।

राम
३५

[illegible] वृत्तेष्वर्त्तनं यस्य तदंगवृत्तं शास्त्रं तस्मिन्कृते सति प्रवृत्ते सति पुनरन्यस्य प्रवृत्तौ प्राप्तायां अविधिरिति हि तस्यार्थः एषा च परिभाषा ज्यादादीयसः
[illegible]ज्ञेति सूत्रद्वयेपि ज्ञापितेति भाष्ये स्थितं अन्यथा हि ज्यादादिति आकारं न ब्रूयात् वहोर्लोपइत्यतो लोपमे[illegible]वर्त्तयेत् अकृत[illegible]वेति दी[illegible] [illegible]पा
नि[illegible] ज्ञाजनोर्ज्जं विदध्यात् अतो दीर्घो यञीति दीर्घो भविष्यतीति न चैवं द्वाभ्यामित्यत्र त्यदाद्यत्वे कृते सुपि [illegible]ति दीर्घो न स्यादिति वाच्यम् द्वयोरिक[illegible]
निर्द्देशेनोक्तपरिभाषाया अनित्यत्वज्ञापनात् यत्तु केचित्परिनिष्ठि तस्येति पठंति द्वाभ्यामिति तु दीर्घं विनानपरि[illegible]निष्ठितमिति च वदंति तन्माष्यविरुद्धं [illegible]
ति जायते इत्येषामपि दीर्घं विनाऽपरिनिष्ठितत्वेन भाष्योक्तज्ञापकद्वयस्यापि शिथिलमूलत्वापत्तेः यदि तु भ्यसोभ्यमिति सूत्रे भाष्येपि परिनिष्ठितस्येत्येतत्पाठ
स्तर्हि वाचनिकतामेवाश्रित्य पक्षांतरतया योज्यः अनित्यत्वबलफलितार्थकथनं त्वनुज्ञा[illegible]यांशप्रविष्टमिति वास्तु एवं तु काशिकादिग्रंथोपि कथंचिन्नतु शाकय।
इति दिक् मकारांतरमित्युपलक्षणं जसः शीत्यत्र जसः स इति सकारं प्रश्लिष्य मांतस्य जस इति व्याख्यानाददतोमिति सूत्रादमग्रहणमनुवर्त्य अम् अमेवेति
व्याख्यानादेति वोध्यम् अविभक्तिकमिति तथा च ङे प्रथमयोरिति पूर्वसूत्रेण प्राप्तस्य अमः प्रतिषेधोयमिति भाष्ये शंकितं नच तथैव किं न स्यादिति वाच्यं
स्त्रीनपुंसकयोर्नत्वाप्राप्तेर्युष्मान्ब्राह्मणीः कुलानि वा अलिंगत्वे युष्मान्ब्राह्मणानित्यादेरपि असिद्धिप्रसंगात् त्वयोचि अविकिं युवाभ्यां यदि तु युष्मदस्मदो
[illegible] हलीत्यतो हलीत्यनुवर्त्तते तदा इह अचीति मास्तु परिशेषादेव सिद्धेः युष्मदस्मदोः हलादाविति योचीत्यज्ग्रहणात्परिशेषसिद्धमिदं रायो हली
त्य[illegible]ध्यालब्धवा ननु एवं किमनादेशग्रहणे न न ह्यादेशो हलादिरस्ति मेवं भ्यमः सत्वात् अभ्यम् पक्षे तु योचीत्यत्रानुवृत्त्यर्थमनादेशग्रहणं वोध्यम् प
[illegible]र्दये शीति न चांत्यलोपपक्षे पररूपं वाधित्वा सवर्णदीर्घः स्यात् अकारोच्चारणसामर्थ्यादिति वाच्यं एत्वनिवृत्त्यर्थकारोच्चारणस्य चरितार्थत्वात् युष्मद
[illegible]भ्यां ङसोश इति शित्वं सर्वादेशार्थं अन्यथा हि आदेः परस्येति स्यात् न चैवेप्यर्थ्यं आदेशव्यपदेशेन यत्वनिवृत्त्यर्थत्वात् न चावयवस्यादेशे सत्यपि विभक्तेरना
[illegible]रानां स्येति वाच्यं सर्वे सर्वपदादेशा इति सिद्धांतात् इदमेव शित्वं ज्ञापयति सर्वे सर्वपदादेशा इति अर्थवत्येवस्यान्यादेशे भावविश्रांतिरित्यर्थः सिच्वङ

न्यस्तुवचनसामर्थ्यादनर्थकस्यापिवांछ्यः इदंत्ववधेयं अंत्यलोपपक्षे अशःस्यादेशः आप्तः अंगवृत्तपरिभाषयावारणीयः यदितु अंगस्यसकार्येतद्विष
यित्वेवसापरिभाषानत्वंगाधिकारमात्रपरेतिदुराग्रहस्तर्हि अशित्यत्रातोगुणाइतिपररूपेणाकारं प्रश्लिष्याकाररूपएवअशभवतिनविक्रियतेइतिव्या
ख्येयं स्सुस्यादेशस्यापवादोशितितन्न अशादेशप्रवृत्तिकालेशेषेलोपाभावेनस्यादेशस्याप्रसक्तेःभाविनइतिकृतेहिशेषेलोपकारांतत्वाप्राप्तःसुडूसमुद्का।
स्यस्याधिमित्वेननिर्देशसामर्थ्यान्निवर्ततेइतिभावः शेषेलोपष्टिलोपेइतिपक्षेतुसुडूहणंव्यर्थमेव आकमिदीर्घोच्चारणमवर्णदीर्घार्थं अन्यथापररूपंस्यात्
नचाकारोच्चारणसामर्थ्यादेवनिवृत्याअभ्यमइवचरितार्थत्वात् इहयुवावौद्विवचनेत्वमावेकवचनइतिसूत्रद्वयेद्विवचनेकवचनशब्दौनप्रत्ययपरौकिंत्वर्थपरौ
वितिक्रमव्याख्यानं तत्फलंदर्शयतिसमस्यमानेइत्यादिनाद्व्येकत्वेतिपंचकंप्रातिपदिकार्थइतिपक्षेसंख्यायाअपिप्रातिपदिकार्थत्वादितिभावः त्रिकपक्षेतुद्व्येका।
र्थवाचिनौइतिपाठः संख्यायाविभक्त्यर्थत्वेपिसंख्येयस्यप्रातिपदिकार्थत्वानपायात् समासार्थोमुख्यविशेष्यं अन्यसंख्यश्चयुष्मदर्थगतसंख्येनरसंख्यायु
क्तश्चेदित्यर्थः लइतिअर्थेपरत्वाश्रयणसामर्थ्यादेवभूतपूर्वगतेरपिस्वीकारात् प्रत्ययपरत्वेतुनस्यातामिति अव्याप्तिःस्यादित्यर्थः एवंचतुर्थश्लोकेपिनयु
वावौत्वमौचनेत्युक्ताप्रत्ययपरत्वेऽतिव्याप्तिर्ध्वनिता एवंचाव्याप्त्यतिव्याप्तिपरिहाराय अर्थपरत्वमाश्रितमिति फलितं नचकृतिमाकृत्रिमन्यायविरोधः वचनग्रह
णसामर्थ्यादेवतद्बाधात् अन्यथाहिद्वित्वेएकत्वेइत्येवब्रूयात् द्वित्वेएकत्वेचयाविभक्तिःतस्यामितिव्याख्यानसंभवात् इतिभावः अतित्वाकमतिमाकमितिय
तुवदंतिसाम आकमित्यत्रयद्यपिसुडूग्रहणंनस्यानिविशेषणंबाधात् तथापिउपलक्षणं तुभवतिनेनयस्यामस्सुडग्रेभावीतस्यैवामआकमाभवितव्यंनचै
तद्ग्रहणात्वेसंभवतीत्याकल्पप्रवर्त्तते नचसमुदायनिर्देशेविशेषणत्वमुपलक्षणत्वंवाविहाय तृतीयःप्रकारोस्ति नचसुडामोःपृथक्स्यानितत्वमिद्धनिर्दिश्यतेचय
द्वस्यद्विवचनस्यचाभावात् यद्वितुसूत्रेअमेतिसमाहारद्वंद्वोव्याख्यायेत योग्यतावलाच्चसशब्देनसुडेवगृह्येत तथाहियदिसुडूग्रहणमनवाच्यशिष्टं ततःस
ामोनस्यात् अन्यत्रतुसाहित्यविवक्षयाकेवलस्यामोऽप्रसक्तेरिति अत्रेदंवक्तव्यंयस्यामःसुडग्रेभावीत्यादिनावद्बाधितंआकमापद्यतेस्यसुडन्वयाभावात्आ

[illegible]नः सुडूभावी इति चेत्तर्हितमेवोपलक्षयेत् आदेशद्वारकेणापरंपरासंबंधेन स्थानिनमुपलक्षयतिचेत् हंतैवं युष्माकमित्यादौ सुट्श्रूयेत साम इति निर्देशात्
म स्योत्तश्रूयत इति चेन्न निर्देशस्य गौणत्वात् त्वाचरितार्थत्वेन सामर्थ्याभावात् यदपि समाहारद्वंद्वप्रक्रमस्य अन्वाचयशिष्टत्वे दूषणाभिधानं तदप्यसं[illegible] इति
क साहित्यविवक्षया केवलस्याप्रसक्तिरिति परमवशिष्यते तदपि न प्रक्रियादशायां स्थितस्याम: उत्तरकालभावित्वेनोत्प्रेक्षितस्य सुट्श्च एकबुध्युपारोहेणान
साहित्याभ्युपगमात् अतीतानागतयोस्वंद्रष्टेतिवत् तत्रोभयोरेकस्मिन्दर्शने संबंध इति चेदिहाप्येकस्मिन्नादेश इति तुल्यं तथा च इरयोरे इति सूत्रे द्वंद्व इत्याशंक्या
ज्ञोनस्य इरे विश्रान्तो लोपे रेभावे तस्य कसूप्रभृतिषु चरितार्थेनयाइटिक्तोते इरयोरिति द्विवचननिर्देशात् लाक्षणिकस्यापि रेभावः पुनः क्रियत इति स्थितमाकं
रे इरयोरित्येकशेषः साम इति तु द्वन्द्वः सहविवक्षा तूभयत्र तुल्यैव वस्तुतस्तु सामस्माकमिति सूत्रे केवलोप्याम् तत्रेणानिर्दिष्टः तस्य आकमिस्यानिवद्भावे
नाम्त्वात् समुद्धत्वाद्वा साम इति प्रवर्त्तते गौणत्वेन तु प्रथमप्रवृत्त्यैव पर्यवसानं अत एव शेषे लोपष्टिलोप इति पक्षेणास हफलैक्यमपि सिध्यति सर्वथापि अ
नित्वणामतिमयामिति केश्चिदुत्प्रेक्षितं समर्थयितुं नाभिनिवेष्टव्यं अतित्वाकमतिमाकमित्यादेर्भाष्यकृतैवोदाहृतत्वादिति दिक् षष्ठ्यादिविशिष्टयोरिति
[illegible] सर्वस्य पदस्येत्यधिकाराल्लभ्यते स्थग्रहणं तु विभक्तौ श्रूयमाणायामेव यथा स्यान्न तु लुप्तायामित्येतदर्थमिति वक्ष्यति वदेरशेषैरिति युष्मान्रक्षतु
[illegible]वद इति तु भाष्यः पाठप्रयुक्तः असमानि त्यस्य समानवाक्यस्थत्वाभावादेवाप्राप्तेः स्थग्रहणादिति तिष्ठतिरहानौ वर्त्तते यथा समये तिष्ठ सुग्रीवेति समयं मा
हासीरिति गम्यते तेन पश्वादीन विजहतोरेवादेशा इत्यर्थः युष्मत्पुत्र इति युवयोर्युष्माकं वा पुत्र इति विग्रहः पदात्परत्वं संपादयितुमिति शब्दः प्राचा तु ना
सोप्रयुक्तः तत्र पदात्परत्वाभावादेवादेशो न भविष्यतीति किं स्थग्रहणेन न च वा ह चवादि पंचकेति पंचानां मध्येऽन्यतमेन योग इत्यर्थः युक्त इति नपुंसके भावे क्तः
पश्यार्थैः अत एव निपातनात् भावेशः दर्शनं पश्यः तच्चेह ज्ञानमात्रं अदर्शनं लोप इत्यत्र यथा न तु चाक्षुषज्ञानमेव अनालोचन इति निषेधात् तदेतदाह
[illegible]क्षुषज्ञानार्थैरिति भक्त इत्यादि अन्नाध्यावस्युः येन हरेस्त्वं भक्तः तेनैव कारणेनाहमपि भक्तः इति योऽन्यपदितु तेनेत्यनेन भक्तत्वत्राणे हेतुर्निर्दिश्यते ततः॥

सापेक्षविधानेत्वमेवतदिममितिवत् अन्वादेशोनस्यादिति अत्रेदंवक्तव्यं सापेक्षविधानेन्वादेशत्वंनास्तीतितावदसंगतं आदेशोहिविधिः किंचिद्विधायप
स्मादितरविधिश्चान्वादेशः नतुनिरपेक्षत्वगर्भः अशब्दार्थत्वात् शास्त्रेतथाऽपरिभाषितत्वाच्च नचप्रयोगदर्शनादेवतथाकल्प्यतइतिवाच्यंवक्ष्यद्विपतो
न्मथितात्वगस्य अर्थेनमद्रेस्तनयाशुशोचेत्यादौसापेक्षत्वेपिप्रनादेशदर्शनात् तत्रहेतुत्वंनशब्देनोपात्तमितिचेन्नतदेनमुद्दिश्यविहितशासनंविधेर्विधेति
कीनाशनिकेतनातिथिं इत्यादिप्रयोगविरोधात् नक्तंभीरुरयमितितुनविधिः किंत्वनुवादः अतस्तदिममितिनविरुध्यते एवंस्थितेयेनत्वंभक्तइतियच्छ
व्यवहारलेशोव्ययीः किंतुनेनत्रापतइत्येवसंबंधः प्रक्रांतार्थत्वाच्चनपक्षव्दापेक्षेति दिक् अत्रतेनेतिपूर्वंविद्यमानंपदंततोहरिरितिप्रथमांतंततःपरा
स्याटेभ्यः तथात्रायतइत्यस्मात्परंसइतिप्रथमांतंनवत्रायतइतिभिन्नवाक्यस्यमितिभ्रमितव्यं सहरिस्त्वांमांत्रायतइतितंत्रेणानेककारकसंबंधात् अनु
संगास्युपगमेषियकतिङ्क्ष्यमितिपरिभाषितैकवाक्यत्वानपायाच्च सामंत्रितं संज्ञाविधावपिमहासंज्ञाकरणासामर्थ्यात्मदंतग्रहणं आमंत्रणमामंत्रितउ
प्वारात्तत्साधनेष्टत्तिः विभक्त्यंतेनचामंत्र्यतेनतुकेवलयाविभक्त्येत्याशयेनाह नदंतमिति आमंत्रितंपूर्वमविद्यमानवत् यत्तुप्राचोक्तंविशेष्यपूर्वंसंबो
धनेतरपूर्वंचसंबोधनंहित्वान्यस्मात्संबोधनात्परयोर्नैते आदेशाइतिकेचिदिति तत्रकेचिदित्यनुचितं उक्तार्थस्यप्रकृतत्वेनसूत्रीसिद्धत्वात् यच्चव्याख्यस्मु
त्रिस्त्र्यामयमर्थइति तच्चतृतीयसूत्रार्थस्यतेनासंस्पर्शात् पादःपत् तदवयवस्येति निर्दिश्यमानस्यादेशाइतिपरिभाषयेदंलभ्यते दांताः अग्निमंथतो
तिमथ्नातेर्मंथतेश्चक्विपिएतदेवरूपंइदितस्तुनलोपाभावात् अग्निमन् अग्निमंथावग्निमंथः थांताः ङकारइति आंतरतम्यादितिभावः ह्रस्वव्यंजनत्वाहि
तिव्यंजनस्यहिह्रस्वईषत्सदृशः दीर्घस्तुविसदृशइतिभावः उक्तंचेति वार्त्तिककृतेतिशेषः केचित्तुपूर्वस्यैवमुत्वादमु घ्र इत्युदाहरंतितन्नभाष्यादौनोक्तः।
मित्युपेक्षितं उदईत् अचः इत्यस्यापवादः चांताः अत्वसंतस्यचाधातोः इहाधातोरितियोगोविभज्यतेतत्सामर्थ्यादनंतरस्यासंतस्यैवप्रतिषेधः नात्वंतत्
स्येतिकैयटहरदत्तादयः तदेतद्दर्शयतिधातुभिन्नासंतस्यचेति उभेअभ्यस्तं देइत्यनुवृत्त्यैवसिद्धे उभेग्रहणंसमुदायप्रतिपत्त्यर्थइतिव्याचष्टे उभेसमुदि

तइति अन्यथाहिनेनिजतीत्यत्रअभ्यस्तानामादिरित्याद्युदात्तत्वंप्रत्येकंपर्यायेणस्यात् जक्षित्यादयःषट् जक्षइति पृथक्पदं इतिशब्देनजक्षिरेवपरा
मृश्यते इतिआदिर्येषामित्यतद्गुणसंविज्ञानोबहुव्रीहिः तदेतदाह षड्धातवोऽन्येइति गांताः गोपायतीतिगुप् क्विपिक्विबंते आयादयआर्द्धधातुकेवेतिआ
याभावः पांताः त्यदादिषु अनालोचनेकिंनपश्यतीतितादृशः कर्मण्यण् तादृशादयस्तुरूढिशब्दत्वादसत्ताप्यवयवार्थेनव्युत्पाद्यंते अतएवाज्ञानार्थाद्दृ
शेरितिसंगच्छतेभाष्येतुकर्मकर्तरिव्युत्पत्तिर्दर्शितातमिवेमंपश्यंतिजनाः सदृवायंपश्यतिज्ञानविषयोभवतीत्यर्थः तत्रविषयत्वापत्तिमात्रवृत्तित्वेपिविष
यीकरणात्तवृत्तित्वादज्ञानार्थाद्दृशेरितिसंगच्छते नशोवा अत्रमस्त्यपीत्यपाणिनीयंनष्टमित्यादावतिप्रसक्तंच नगितिषडगकाः प्राग्वत् शांताः नुमविसर्जनीयशर्व्य
वायेपि ष्टुत्वेनेति सनःसस्यरुत्वविसर्गयोः कृतयोः वाशरीतिविकल्पात्पक्षेसकारःतेनशराव्यवायेसुपःसस्यषत्वंपूर्वस्यष्टुत्वंनत्वादेशप्रत्ययोरितिषः
अपदांतस्येतिनिषेधादितिभावः एवंस्थितेसकारग्रहणेनसिद्धेशरग्रहणस्यप्रयोजनंचिंत्यंव्याख्यानादिति असंभवादितिहरदत्तोक्तिस्तुनादर्तव्यासु
हि न्सुइत्यत्रसंभवादितिभावः संयोगांतेतिनचास्मिन्कर्तव्येवहिरंगत्वेनांतोलोपस्यासिद्धत्वंशंक्यंपदसंज्ञासापेक्षत्वेनसंयोगांतलोपस्यैववहिरंगत्वात्
कथंतर्हिकिंव्यकलृत्रंशात्वं वा वक्ष्याणिसंयोगांतलोपोनेतिप्रागुक्तमितिचेतन्न नत्रहियणः प्रतिषेधोनवाभ्रलोलोपादितिपक्षद्वयेपिलोपाभावेनिर्णीते
तत्रैकरूप्याय पूर्वंपूर्वमंतरंगमितिग्रहीतुंयुक्तं अतिदेशेनलभ्यस्यपदत्वस्यनत्वप्रयुक्तलोपस्यचलक्षपूर्वभागेविश्रांतेःस्पष्टत्वात् इहतुआद्यपक्षद्वयेसं
योगांतलोपस्यसष्टतयातदैकरूप्यायवहिर्भूतनिमित्तापेक्षंवहिरंगमित्यस्यैवन्याय्यत्वादितिदिक् तक्षिरक्षिभ्यामित्यादि यत्तुवदंति पुलंचकंपुक्तं वा
[illegible]तौपुकलोपः पुलपुलौ पुल्वांवः चक्रौचर्भ्यां पूः पुक्तौपूर्भ्यामितितन्न सर्वमनेनप्रत्युक्तं अयंतुविशेषः तकुरकुइत्यत्रसंयोगांतलोपोनिर्विवादःतत्र
[illegible]पिदुर्लभइति दिधगिति यत्तुदहेर्हो ढःषढोरितिकत्वस्यासिद्धत्वात्संयोगांतलोपेढस्यजश्त्वेदिधडितिनैमिषोणोक्तंतत्रामादिकंदादेर्घइतिघत्वस्यढत्वा
[illegible]स्यजागरूकत्वात् पांताः विद्वानितिविदेःशतुर्वसुः अदादित्वाच्छपोलुक् सेदिवानिति भाषायांसदवसश्रुवः इतिक्वसुः सेडयइति ननुतदनुवंधग्रह
॥

णेनातदनुबंधकस्येतिपरिभाषयाविदेः शतुर्वसुरित्यस्येववसोः संप्रसारणंयुक्तंनक्वसोः सत्यं वसोरुकारानुबंधकरणांक्वसोः सामान्यग्रहणार्थंउगित्वस्य
स्थानिवद्भावेनापिसिद्धेः इहगमिप्रभृतिभ्यः क्वसुर्नोदाहृतः छांदसत्वात् कवयस्तुप्रयुंजते श्रेयांसिसर्वाप्यधिजग्मुषस्ते नंतस्थिवांसंनगरोपकंठा
इत्यादिछांदसा अपिकचिद्भाषायांभवंतिमासश्छंदसीतिसामान्यापेक्षंज्ञापकमाश्रित्यकथंचित्समाधेयं पुंसोसुङ् विवक्षितइतितेनपरमपुमानित्या
त्रपरत्वादसुङि कृतेसमासांतोदात्तत्वेभवदसुङ एवाकारस्यभवतिपरसप्तम्यांतुनैतत्सिध्येत् सर्वनामस्थानोत्पत्तेः प्रागेवपुंशब्दोकारस्योदात्तत्वेस्वंसन
धर्मिणा हलस्याऽतेनहुर्मणोऽनुदात्तस्येव आदेशस्यप्रसंगात् नचोकारस्यकृतेपिस्वरोऽनंत्यत्वान्निवर्त्तयिष्यते असुङ श्चांत्यत्वात्करिष्यतइतिवाच्यं अंत
रंगोस्वरःकृतेव्यवहिरंगस्यासुङोऽसिद्धत्वादितिभावः एतच्चकैयटहरदत्तादीनांअनुरोधेनोक्तंवस्तुतस्तुपरसप्तमीपक्षेपिस्वरूपपादः अकृतव्यूहपरि
भाषायाः अंतरंगपरिभाषापवादत्वादित्यवधेयं नन्वेवमसमासेपिअसुङि कृतेप्रातिपदिकस्वरेणसतिशिष्टेनप्रत्ययस्वरस्यबाधात् असुङ उदात्त
त्वंस्यात् इष्यतेतु कारस्यपुमान् पुमांसंपरिपात्वित्यादौतथैवपाठादितिचेत् सत्यं डुमसुनोनित्करणसामर्थ्यात्प्रातिपदिकस्वरोनभवतीतिहरद
त्तः नन्वेतदयुक्तं प्रकृतिप्रत्ययविभागशून्येष्ववफिषइत्यस्यप्रवृत्तेरितिचेत्सत्यं कचित्सखंडेष्वपिप्रवृत्ताविदंलिंगं यद्यप्यसिद्धंवहिरंगमित्येवेदं
सिद्धं तथापिवहिरंगपरिभाषाया अनित्यत्वमपिज्ञापयितुंनित्करणमितिनिष्कर्षः ऊच्चारणार्थइति यत्तुप्राचोक्तमुङाविनाचितियत्त्वपौत्रेणव्याख्या
तंउकारउगित्कार्यार्थइति तदसंगतमितिभावः हेपुमन्निति असंबुद्धावित्युक्तेर्नदीर्घः पुंस्विति संयोगांतलोपेमोनुस्वारः नुम्स्थानिकस्येवानुस्वारस्याप
लक्षणानुम्विसर्जनीयेतिनषत्वं असंबुद्धाविति एतच्चवाचनिकंयत्तुहरदत्तादयआहुः सोर्डेतिवाच्येऽनङ्सावितिवचनेनक्वचिदनङ एवश्रवणा
स्यज्ञापितत्वादेतत्सिद्धमितितत्तुप्रागेवदूषितं अंगवृत्तपरिभाषयावासमाधेयं अदसऔसुलोपश्च ननुसोरौत्वौकारोविधीयतांत्यदाद्यत्वेनअसावि
तिसिद्धंकिंसुलोपविधानेनमैवंअसकौस्त्रीत्यत्रटापिप्रत्ययस्यादितिद्वित्वप्रसंगात् असुकइति औत्वाभावेत्यदाद्यत्वंसादुत्वं असुकइतित्वसाधुः

सत्वेनमु~~नस्यनान~~ एवं अमुकौ अमुकशर्मा इत्यादयोप्यसाधव एव अमुकाअदकः शर्मेत्यादेरेवव्याप्यत्वात् एतद्बहुवचने पारिभाषिकस्य बहुवचन
स्यग्रहणे अमीभिरित्यादिसिद्धावपि जसि अमी इति न सिद्ध्येत् नह्यत्र एकारस्य बहुवचनपरतास्ति अतो व्याचष्टे बह्वर्थोक्ताविति न मुने नेति विषयसप्तमीत्या
हनाभावे कर्तव्य इति अन्यथा घेः परत्वाभावान्नाभावो न स्यादिति भावः नचैवमपि कृतेपि नाभावे सुपि चेति दीर्घः स्यात् दीर्घं प्रति मुत्वस्यासिद्धत्वात् अत आह कृ
तेवेति सन्निपातपरिभाषया वा समाधेयं अत्रेदमवधेयं अधुनेतिवत् अमुनेति वक्तव्ये नमुन इत्युक्तिर्नेति योगविभागार्था तेन रामः रामेभ्यः इत्यादिसि
ध्यति अन्यथा हि रोरसिद्धतया उकारस्य इत्संज्ञालोपो कथं स्यात् तांन चानुनासिकनिर्देशसामर्थ्यादित्संज्ञालोपो प्रत्यसिद्धत्वं नेति वाच्यं तरूस्थूलमित्यादौ हशि
चेत्यस्य व्यावृत्तये अतो रोरित्यत्राप्यनुनासिकस्यैव निर्देशेन तत्रैव चरितार्थत्वात् नचातो रोरित्यत्र मास्त्वनुनासिकना प्रतिपदोक्तग्रहणेनैव निर्वाहादिति वाच्यं एवा
मपि देवरुहीत्यत्र रुधातोर्ईर्वारत्वात् राम इत्यादावपि अनुनासिकस्य रोः अवर्णस्यापाद्यमानतया चरितार्थत्वस्य सुवचत्वाच्च एवं च स्थानिवत्सूत्रस्यापि
प्रवृत्तौ परत्वाद्विसर्गोपि लभ्यते प्रत्ययः परश्चेत्यादिनिर्देशो यत्वविधावश्ग्रहणं चेह लिंगं इति दिक् इति हलंताः पुंल्लिंगाः नहो धः द्रुइत्येव नोक्तं तथा
द्विसति [illegible]मित्यत्र रुदाभ्यामिति न त्वं स्यात् रुषस्तथोरिति च न स्यात् अत्रेदमवधेयं सुष्ठु अनड्वाहो यस्यामिति बहुव्रीहौ स्वनड्वान्नित्यादि पुंवदेव रूपं प्र
तुर्योरादिस्त्री[illegible]त्वा स्वनड्वाहीत्युदाजहुः तच्चिंत्यं अनुपसर्जनाधिकारविरोधात् गीरिति पॄ निगरणे शब्दे च क्विप् ऋत इदिति ईत्वे वोरुपधाया इति दीर्घः पूरि
ति पॄ पालनपूरणयोः उदोष्ठ्यपूर्वस्येत्युत्वं आशिषाविति आशासः क्वावुपसंख्यानमित्युपधाया इत्वं शासिवसीति षत्वं इति हलंताः स्त्रीलिंगाः
अन्वादेश इति अयं च अम्येवेति व्याख्यातारः तस्य लुका लुप्तत्वेपि वचनसामर्थ्यात्प्रत्ययलक्षणमित्याहुः वस्तुतस्तु सूत्रेणैवैनत् वक्तव्यः एनं एनौ इत्या
दितुल्यपदाद्यत्वेन सिद्धं क्लीबेऽमित्लुका लुप्तेपि नकारोच्चारणसामर्थ्यादेनदादेशः नचैवं एतद्वितत इत्यत्रापि तदापत्तिः एकपदाश्रयत्वेनांतरंगे त्वमोर्लुकि चरि
तार्थत्वेन बहिरंगे सामासिके लुकि तदप्रवृत्तेः रोः सुपि अहर्भातीति प्राचां तु अहन्नित्युपन्यस्तं तदिहानुचितं अहोभ्यामित्याद्यर्थं तया कथं वियोज्यं अस्

कुरूत्वदस्त्विति एतच्च क्षीरस्वामिग्रंथे स्पष्टं बहूर्जीति अन्त्यादिति च वाचनिकं तथा च वार्त्तिकं बहूर्जि प्रतिषेधः अन्त्यात्पूर्वं नुममेके इति भाष्ये तु अचः परो यो
हलं तदंतस्य नुम् इत्यर्थमाश्रित्य प्रथमवार्त्तिकं प्रत्याख्यातं एवं तु उर्दमाने गर्हे गर्ह्णीयामित्यादीनामपि क्विवंतानां नुमानभाव्यमेव यथोत्तरं मुनीनां प्रामा
ण्यमिति दिक् अचत्रोप स्येति क्वौ लुप्तनस्यानिवदिति तु नेहाश्रीयते तस्य काचित्कत्वात् क्वौ विधिं प्रति न स्यानिवदित्यस्यैव सार्वत्रिकत्वादिति स्पष्टमाकरे
अस्थाहि भूतानीति सप्तविंशत्यधिकापंचशती त्यर्थः तथाहि सोनवानां अन्त्यस्य द्वित्वे ऽष्टादश औ डि· चतुर्णां मध्ये पूजार्थानां त्रयाणां त्रद्वित्वे सप्त अनुना
सिक स्तु नास्ति प्रगृह्यत्वात् जसि त्र द्वित्वस्यानुनासिकस्य च विकल्पात् द्वादश संकलनया सप्तत्रिंशत् एवं द्वितीयायाम पि टा यां चतुर्दश भ्यामि अष्टचत्वारिंश
त् भ्यः· वैर्णय मानां द्वित्वात् भिसि चतुर्विंशतिः ङ·यि सप्त अनुनासिकस्तु नास्ति एकारस्यानएत्वात् भ्यसि भ्याम्वत् ङ·सौ ङ·सादि पंचके च प्रत्येकं चतुर्दश
सुपि गत्यर्थे त्रयाणां ककारषकारयोर्द्वित्वेन उकारस्यानुनासिकेन चतुर्विंशतिः एवं कुकूपक्षे षस्ओ ङ·षयोर्द्वित्वे ऽनुनासिकेन च अष्टचत्वारिंशत् कुगभा
वि त्रयाणां ङ·कारद्वित्वे अनुनासिके च द्वादश सु १८ औ ७ जस् १२ अम् १८ औ ७ शस् १२ टा १४ भ्यां ४८ भिस् २४ ङे ७ भ्यां ४८ भ्यस् ४८ ङसि १४ भ्यां ४८ भ्यस् ४८ ङस् ओस्
आम ङि· ओस् प्रत्येकं १४ सुप् ८४ अत्रेदमवधेयं पूजायां जसि नुमागमे कृते नः स्य पा क्षिके द्वित्वे सकारत्रयसहितं रूपषट्कं एवं शस्यपीति संकलनया द्वा
दश तथा च रूपं प्रहाग्निभूतान्यमिति भाष्यव्यतिरिक्तमतेर् इति दिक् यत्तु वदंति उद्यमे वंद्वित्व पुनर्द्वित्व लोपविकल्पैः अष्टपंचाशतो वृद्ध्या त्रिसप्तत्य
धिकं शतमिति तच्चिंत्यं पुनर्द्वित्वस्याप्रामाणिकत्वात् रूपानंत्यप्रसंजकत्वाच्च अष्टपंचाशतो वृद्धौ उपपत्त्यभावाच्चेति दिक् गिरश्चौ इत्ति मत्वादचद
त्यत्रोपः अलो पे इति वचनात्तियो देशाभावः स्वप् इति शोभनाश्रापो ऽस्मिन्स इसीति बहुव्रीहिः आकृपूरिति समासांते प्राप्ते न पूजनादिति निषेधः यत्तु
अनित्यत्वादिति प्राचोक्तं तत्रामादिकं द्यंतरूपसर्गेभ्य इति तु न भवति तत्रापद इति कृतसमासांतस्यानुकरणमिति वक्ष्यमाणत्वात् सुपुमांसीति पुंसो सु
ङ्·ति सह त्रे सुटीति व्याचक्षाणस्य प्राचो मते शसि नैतत्सिध्येत् औ डि· चातिव्याप्तिः अस्माकं तु सर्वनामस्थाने इति यथासूत्रं ब्रुवतां सर्वं सुस्थमिति भावः

इतिहलंतानपुंसकलिंगाःस्वरादिनिपातमव्ययंस्वरादयश्चनिपाताश्चेतिसमाहारद्वंद्वःस्वरितिस्वर्गेपरलोकेचअंतरितिमध्येप्रातःप्रत्यूषेपुनरप्रथमे।
विशेषेचसनुतरंतर्द्धानेस्वराद्याःपंचरेफांताःउच्चैसमहतिनीचैसूअल्पेशनैसूक्रियामांद्येऽश्रधकूसत्येवियोगशीघ्रसामीप्यलाघवेष्वित्यन्येऋतेवर्जने
युगपदित्येककालेआराद्दूरसमीपयोःपृथग्भिन्नेह्यसूअतीतेन्हिश्वोनागतेन्हिदिवादिवसेरात्राविति निशिसायमितिनिशामुखेचिरमितिबहुकालेम।
नाकूईषत्इमावल्पेजोषंसुखेमौनेचतूष्णीमितिमौनेबहिसूअवसूइमौबाह्येसमयेतिसमीपेमध्येचनिकषेत्यंतिकेस्वयमित्यात्मनेत्यर्थेवृथेतिव्यर्थेन
क्तमितिरात्रौनञ्निषेधेहेतावितिनिमित्ते इद्धेतिप्राकाश्ये अद्धेतिस्फुटावधारणयोःतत्वातिशययोरित्येकेसामीत्यर्द्धजुगु प्स योःवत्तेनतुल्यमित्या
दिभिर्विहितौवतिप्रत्ययःयस्तूपसर्गाद्धात्वर्थेइतिविहितःसनेहगृह्यतेयद्दत्तोनि वतोयास्मिसनासनत्सनात्एतेनित्येउपधेतिभेदेतिरसंतर्द्धौतिर्यग
र्थपरिभवेचअंतरेतिमध्येविनार्थेचअंतरेणेतिवर्जनेज्योगितिकालभूयस्त्वेप्रश्नेशीघ्रार्थेसंप्रत्यर्थेचकमितिवारिमूर्द्धनिंदासुखेषुशंसुखेसहसे।
त्याकस्मिकाविमर्शयोःविनेतिवर्जनेनानेत्यनेकविनार्थयोःस्वस्तीतिमंगलेस्वधापितृदानेअलंभूषणपर्याप्तिशक्तिवारणनिषेधेषुवषट्वौषट्श्रौ
षट्एतेहविर्दानेअन्यदित्यन्यार्थे अस्तीतिसत्तायांउपांश्वित्यप्रकाशोच्चारणरहस्ययोःक्षमेतिक्षांतौविहायसेतिविपदर्थेदोषेतिरात्रौमृषामिथ्ये
त्यौवितथेमुधेतिव्यर्थेपुरेत्यविरतेचिरातीतेभविष्यदासन्नेचमिथोमिथसूएतौरहःसहार्थयोःप्रायसूइतिबाहुल्येमुहुसूइतिपुनरर्थेप्रवाहुकमि
तिसमकालेऊर्द्ध्वार्थेचप्रवाहिकेतिपठांतरंआर्यहलमितिबलात्कारेशाकटायनस्तुआर्येतिप्रतिबंधेहलमितिप्रतिषेधविवादयोरित्याहअभीक्ष्ण
मितिपौनःपुन्येसाकंसार्द्धंएतौसहार्थेनमस्नतौहिरुक्वर्जनेधिक्निंदाभर्त्सनयोःअमशीघ्रेऽल्पेचआमंअंगीकारेकिमेत्तिङ्व्ययेतिकासूप्रत्ययादि
त्यादिभिश्चविहितःप्रत्ययोपीहगृह्यतेइत्येकेपपाचतरांकारयामासप्रताम्ग्लानौप्रशान्समानार्थेप्रतान्विस्तारेमामाङ्एतौनिषेधाशंकयोःआकृति
गणाइति तेनान्येपिज्ञेयाःतथाहिकामंस्वाबंधेप्रकाममित्यतिशयेभूयइतिपुनरर्थेसांप्रतमितिन्याय्येपरमितिकिंत्वर्थेसाक्षात्प्रत्यक्षेसावितिर्यगर्थेस

ग·सु·
४०

त्यमित्यर्थे ऊरीगीकारे मंक्षु आशु एतौ शीघ्रे संवत् वर्षे अवश्यं निश्चये सपदि शीघ्रे बलवदित्यतिशये प्रादुस् आविस् इति प्रकाशे अनिशं नित्यं नित्यदा।
सदा अजस्रं संततं एते सातत्ये उषेति रात्रौ रोदसी द्यावापृथिव्यर्थे ओमित्यंगीकारे ब्रह्मणि च भूरिति पृथिव्यां भुव इत्यंतरिक्षे झटिति द्रागिति स्रागिति तिन साशी।
घ्रे सुष्ठु प्रशंसायां दुष्ठु निकृष्टे सु पूजायां अह आश्चर्ये कु इति कुत्सिते षदर्थयोः अंजसेति तत्वशीघ्रार्थयोः मिथ इति द्वावित्यर्थे भाजक् शीघ्रे चिराय चिर
रात्राय चिरस्य चिरं चिरेण चिरादित्येते चिरार्थकाः अस्तमिति विनाशे आनुषक् आनुपूर्व्ये अनुषक् अनुमाने अम्नस् शीघ्रसंप्रतिकयोः स्थाने इति युक्तौ।
वरमितीषदुत्कर्षे सुदिप्सुक्लृपक्षे वदिक्लृन्पक्षे इत्यादि चेति समुच्चयादिषु वा स्याद्विकल्पोपमयोरेवार्थेपि समुच्चये हेति प्रसिद्धौ अहेति पूजायां एवे।
त्यवधारणे अनवक्लृप्तौ च एवमिति उक्तपरामर्शे नूनमिति निश्चये तर्के च शश्वदिति पौनःपुन्ये नित्ये सहार्थे च युगपदिति एककाल्ये भूयस् पुनरर्थे आ
धिक्ये च कूपत्स्वपदिति प्रश्ने प्रशंसायां च कुविदिति भूर्यर्थे प्रशंसायां च नेदिति शंकायां प्रतिषेधविचारसमुच्चयेषु च चेदिति यद्यर्थे चण्। अयं चेद
र्थे णित् समुच्चयादौ त्वननुबंधः कच्चिदिति इष्टप्रश्ने यत्रेत्यनवक्लृप्त्यमर्षगर्हाश्चर्येषु नावकल्पयामि न मर्षये गर्हे आश्चर्यं वा यत्र भवान् वृषलं
याजयेत् नहेति प्रत्यारंभे हंतेति हर्षविषादे अनुकंपायां वाक्यारंभे च माकिः माकिं नकिरिति त्रयोपि वर्जने माङ्नञौ स्वरादिषूक्तौ इह पाठस्तु नि
पातत्वार्थः तेनाद्युदात्तत्वमस्ति ध्वंतीति प्रांचः तच्चिंत्यं फिट्स्वरेणापि इष्टसिद्धेः पदप्याहुः सत्ववचनानामपि अव्ययसंज्ञार्थं स्वरादिपाठ इति तदपि
चिंत्यं लक्ष्मीवाचकस्यापि माशब्दस्याव्ययत्वापत्तेः तस्मादुभयत्र पाठफलं चिंत्यं यावत्तावदेतौ साकल्यावधिमानावधारणेषु साकल्ये यावत्कार्यं
तावत्कृतं अवधौ यावद्गंतव्यं तावत्तिष्ठमाने यावद्दत्तं तावद्भुक्तं अवधारणे यावदमत्रं ब्राह्मणानामंत्रयस्व त्वे विशेषवितर्कयोः द्वे वितर्के चे इति पा
ठांतरं रै दाने अनादरे च रैकरोति ददातीत्यर्थः त्वैरै किंकरिष्यसि श्रौषड्वौषट् एतौ हविर्दाने स्वाहा देवताभ्यो दाने स्वधेति पितृभ्यः श्रौषडादीनामने
काचामुभयत्र पाठः स्वरभेदार्थः तुमिति तुंकारे गुरुं तुंकृत्य हुंकृत्य तथा हि निदर्शने खल्विति निषेधे वाक्यालंकारे निश्चये च किलेति वार्तायामली

एम
४०

केचअथेतिमंगलानंतरारंभप्रश्नकार्त्स्न्येष्वधिकारप्रतिज्ञासमुच्चयेषु अयंस्वरादिरिति तेनमंगलवाचकस्यसत्वार्थत्वे अव्ययत्वंसिध्यतितथाचश्रीहर्षः उ
दस्यकुंभीरथशातकुंभजाग्र्यतुष्कचारुत्विषिवेदिकोदरे यथाकुलाचारम थावनीद्रुजांपुरंध्रिवर्गःस्नपयांबभूवतामिति अत्रहि अथस्नपयांबभूवेत्यस्यमं
गलंस्नपनंचकारेत्यर्थः निपातस्तुस्वरूपेणैवमंगलंमृदंगध्वनिवत् सुष्ठुस्वरभेदार्थःपाठः स्मेत्यतीतेपादपूरणेच आदहस्तु पक्ष्मभिर्हिंसाकुत्सनेषु अवदत्तं
मितिइहानुपसर्गत्वात् अचउपसर्गात्तइतिनभवति अहमितिसुवंतप्रतिरूपकं एतेनगेयकेनविनीतौवामितिव्याख्यातंयुवामित्यर्थेहिवामित्यव्ययं अस्ती
तितिङंतप्रतिरूपकंएवमस्मीत्यहमर्थेत्वामस्मिवच्मि आहेतुजाचेत्यर्थे आसेतिबभूवेत्यर्थइत्यादि अइतिसंबोधनेअधिक्षेपनिषेधेच आइतिवाक्यस्मर
णयोः इसंबोधनजुगुप्साविस्मयेषु ईउऊएऐओऔसंबोधने यथुसम्यगर्थेपशुमन्यमानाःशुकंशेघ्येयथाकथाचेत्यनादरे पाट्प्याट् अंगहेहेभोः अ
येएतेसंबोधनेद्येनिहिंस्मप्रातिलोम्यपादपूरणेषुविषुनानार्थे एकपदेइत्यकस्मादित्यर्थे युतकुत्सायां आतइति इतोपीत्यर्थे आकृतिगणइतितद्यथा
यत्तदितिहेतौ आहोस्वित्विकल्पे सीमसर्वताभावे कंपादपूरणे सुकमिति अतिशये अनुकंवितकेशंवट् अंतःकरणेआभिमुख्येच वपादपूरणेइवार्थे
चदिष्ट्याआनंदेचट्चाटुप्रियवाक्येहुमितिनिर्भर्त्सनेइवेतिसादृश्ये अद्यत्वइदानीमित्यर्थेइत्यादि अत्रेदमवधेयंस्वरादिचादयोराकृतिगणत्वाविशे
षेपियेषांनिपातस्वरइष्टस्तेचादिषु अन्येस्वरादिषु स्वरद्वयभाजस्तूभयत्रबोध्याःयथाउतशब्दःस्वरादिषुईड्योनूतननैरुतेत्यंतोदात्तप्रयोगात् यत्तुउत
शब्दस्यस्वरादितामुक्त्वानिपातस्वरमाशंक्यांतोदात्तत्वनिपातमाश्रित्यसमादधुस्तद्भ्रमात् स्वरादेर्निपातत्वात् अंतोदात्तनिपातनवैयर्थ्यात् यदपिका
शिकायामुक्तंस्वरशब्देसक्ध्वकृदिवाह्वयानक्तमित्यादयोंतोदात्ताइति यच्चसनात्निरसएवमादयआद्युदात्ताइतितत्सर्वंप्रामादिकंलक्ष्यविसंवादा
न्निर्मूलत्वाच्चेतिशब्दकौस्तुभेप्रपंचितंनद्धितश्चासर्वविभक्तिः सर्वेतिवचनत्रयात्मिकेत्यर्थः नेतिकिंत्वेकवचनमेवोत्पद्यतइतिभावः तद्धितः किं एकः द्वौ
त्रयः असर्वेत्यादि किम् औपगवः क्तक्तं जंतःजीवमेइतितुमर्थसेसेनिति असेप्रत्ययःपिबध्यैइतितेनैवशध्यैप्रत्ययःपाघ्रेतिपिबादेशःयत्नाद्रुःक

नेरिशाविति तद्भ्रमसात् अव्ययकृतोभावे इति सिद्धांतात् अंतग्रहणमौपदेशिकत्वप्रतिपत्त्यर्थं तेनेह न आधये चिकीर्षवे लक्षणप्रतिपदोक्तसन्निपातपरिभा
षाभ्यां सिद्धे तयोरनित्यत्वज्ञापनायेदं क्त्वानो सुन्कसुनः उदेतोरिति उत्पूर्वादिणो भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् विसृप इति सृपितृदोः
कसुन् आव्ग्रहणमिति तथा च वार्त्तिकं अव्ययादापो लुग्वचनानर्थक्यं लिंगाभावादिति सूत्रस्थानि संभवन्तु स्त्रियामिति सूत्रे स्त्रीसमानाधिकरणादि
तिपक्षे एवं हीत्वा वोध्यः स च नास्ति नः भूतमियं ब्राह्मणीत्यादावतिव्याप्तेः अलिंगत्वे आप्यप्राप्त एव विधानं तत्स्मृतिविरोधमाशंक्याह सदृशमिति लिंगकारकेति
विभक्तिवचने शब्दौ कारकसंख्यापराविति भावः यथा वाचेति परिगणनमिदमित्येके अन्ये तु उदाहरणमात्रमित्याहुः वगाह इति आदिरेवाकारो लुप्यते नान्त्यः
अपिनासोऽहवर्पान् ॥ इत्यव्ययानि खट्वेति अशूप्रुषिलटिखटिकणिविशिभ्यः क्वन् पंचाजीति न चात्र मदंतविधिविरहादेव टाप्नेति वाच्यं अमहन्पूर्वे
ग्रहणेनानुपसर्जनाधिकारेण च स्त्रीप्रत्ययेषु तदंतविधिज्ञापनात् मूषिकेति वृश्चिकृषोः किकन्नित्यधिकारे मुषेर्दीर्घश्चेति किकनि इकारमध्यो मूषि
कशब्दः यस्तु मूषस्तेये इति दीर्घोपधास्तं ज्ञायां कुन्निसूषकशब्दो माधवेनोक्तस्ततोऽप्ययं टाप्प्रत्ययस्त्वादिनीत्वमिति तु विशेषः यत्तु वृत्तौ त्वो अजादिगणे पाठं न प्र
युक्तं तस्य जातिलक्षणङीष्बाधनार्थत्वात् संज्ञायाश्च अजातित्वादित्याहुः तच्चिंत्यं व्याघ्रीत्यादिवत् संज्ञात्वेऽपि जातित्वानपायात् भस्त्रफलेति भस्त्रेव फलानि
यस्या इति विग्रहः ङ्यापोरिति एतच्च फलनिष्पन्नाविति धातौ माधवग्रंथे स्थितं भाष्ये तु प्रायेण दीर्घ एव पठ्यते प्रत्यकपुष्पेति पाककर्णेत्यादिसूत्रस्य भा
ष्यवार्त्तिकपर्यालोचनयेदमुक्तं तेन सत्प्राक्कांडेति प्राचः पाठो नादर्त्तव्यः शूद्रा चेति शूद्रशब्दष्टापमुत्पादयति जातिश्चेत् महत्पूर्वे तु न जातिश्चेदितीहापि
संबध्यते पुंयोगेत्विति पुंयोगश्च टापत्यरूप एवेति न नियमः किंतु जन्यजनकभावोऽपि तेन वैश्यात् शूद्र्यां जन्याम्माहिष्यो यौ सुतौ स्मृताविति सिद्धं महाशू
द्रीति आभीरी तु महाशूद्री जातिपुंयोगयोः समेत्यमरः अत्रेदमवधेयं अजादिगणे शूद्रेत्येव पाठ्यं जातिरिति व्यर्थं मुख्यकार्यसंप्रत्ययाज्जातिलक्षणो ङीषे
व बाधिष्यते पुंयोगे हि गौणी वृत्तिः अमहदित्यापि व्यर्थं महाशूद्रशब्दो हि विशिष्ट एव जात्यंतरे वर्तते तत्रावयवस्यानर्थकतया शूद्रशब्दार्थसमवेतस्त्रीत्वा

भावातूलापः प्रसंग एव नास्ति या तु महती शूद्रा न त्र महाशूद्रेतीष्यत एव कुञ्ज्वेत्यादित्रयो मीहलंतादित्येके कुञ्च्वानालभेत उष्णिहककुभौ इत्यादिप्रयोगमु
दाहृत्य अदंता अपि भाष्ये स्वीकृताः पुंयोगेपीति यदुक्तं ष्ठ दयः प्रथमजातादौ वर्त्तते न दा अदंतत्वादेव टाप् सिद्धः यदा तु ज्येष्ठस स्त्रीत्यादि विवक्षा न दा पुंयोग
लक्षणो ङीष् प्राप्तः सोनेन वाध्यत इति सूचपि तु मपि शब्दः मूलान्नञः नञः किंशतमूली अमूलेति ओषधिजातिरियं उगितश्च भवंतीति सर्वादिषु भवतुङ
न्युदित् पठितः भातेर्डवतुरिति वुत्पादितश्च शत्रंतात्तु ङीपि शपृश्यनोरितिनित्योनुम् वनोरवसुत्वानमिति सुयजोर्ङ्वनिप् अतिधीवरीति दधातेः क्वनिभ
पू शर्वरीति शृधातोर्वनिप् गुणो क्तेहशांतात्परत्वेपि हशंताद्विहितत्वाभावात् ङीव्रयोर्निषेधो न अवावेति न्यासकारस्तु प्रायिकोयं निषेधः तेनावावरीत्या
ह नत्वेन द्भाष्यादौ दृष्टं पक्षेडाविति तथा च द्विवचने वहुधीवर्यौ वहुधीवानौ वहुधीवे इति रूपत्रयं भवतीति भावः टावृचि पूर्वेणाप्राप्तस्य ङीपोपवादः अ
ह नत्वेन द्भाष्यादौ दृष्टं पक्षेडाविति तथाच द्विवचने वहुधीवर्यौ वहुधीवानौ वहुधीवे इति रूपत्रयं भवतीति भावः टावृचि पूर्वेणाप्राप्तस्य ङीपोपवादः अ
सिद्धत्वादिति कार्यकालपक्षेणेदं यदि तु यथोद्देशं षट्संज्ञा यदि वा उपदेशकाले घ्नातेनिव्याख्यानं तदा असिद्धत्वोपवर्णनं नोपयुज्यत इत्याहुः वस्तुतस्तु
यथोद्देशपक्षेपि असिद्धत्वमुपयुक्तमेव एकदेशविकृतस्योपसंख्यानं हि स्थानिवत्सूत्रे पठ्यते आदेशग्रहणसामर्थ्यात्सर्वे सर्वपदादेशा इत्याश्रित्य
आनुमानिकोप्यादेशः स्थानिवदिति वा व्याख्यायते उभयथापि अल्विधौ न तत्र वृत्तिः एतद्वाकरेस्य षट्वहुयज्वानाविति न संयोगादिति निषेधान्नायमु
प प्राप्तापीति नत्वन उपधालोपिन इति न प्रवर्त्तते डावुभाभ्यां ननु निषेधडापोः वचनसामर्थ्यात्पर्यायः सिद्धः सत्यं अन्यतरस्यामिति योगो विभज्यते तत्र मन
इति निवृत्तं अनो वहुव्रीहेर्डीप् वा स्यात् ङीपा सह विकल्पलाभार्थमिदं अन उपधालोपिन इति सूत्रं तु नियमार्थं अनो यो सौ विकल्पः स उपधालोपिन एवे
ति तथा च सुपर्वेत्यादावनुपधालोपिनि निषेधार्थमिदं वहुराज्ञीत्यादौ तु अन्नेभ्य इत्येव ङीप् तेन वहुधीवरी सिध्यति अन्नेभ्य इति हि ङीपमनुवर्तयंति
योगेन विधीयमानो रेफः प्रकरणांतरस्थेन ङीपि कृते न सिध्येत् ननु वनोरवेति सूत्रमेव ङीव्रौ विधत्तामिति चेन्न उभयविधौ गौरवात् किं च एवमपि ङीपि नि
विद्वेषोपि दुर्लभं संनियोगशिष्टत्वात् भाष्ये तु सूत्रभंगेन समाहितं तद्यथा अनो वहुव्रीहेरित्यस्यानंतरं उपधालोपिनो वेति सूत्रमस्तु अनउपधेत्यादिप्रदे

म·सु·
४२

ण्यांतरस्थं सूत्रे ङाप्सूत्रे ऽन्यतरस्यांग्रहणं त्वमास्त्विति अनउपधा बहुव्रीहेरूप्यमो ङीषित्यतो बहुव्रीहिग्रहणं संख्याव्ययादेर्ङीबित्यतो ङीब्वानुवर्त्तते इत्या
शयेनाह अनंतादित्यादि नियमार्थमिदमित्युक्तं नचैवं पूर्वेणैव विकल्पसिद्धौ इहान्यतरस्यांग्रहणं व्यर्थमिति वाच्यं असति हि तस्मिन्नित्यार्थो विधिरेवायं
स्यान्नतु नियमः प्रत्ययस्थात्कात्पूर्वस्य कादित्यकार उच्चारणार्थः व्यंजनमात्रं विवक्षितं विशिष्टविवक्षायां तु एतिकाश्चरंतीत्यादौ अकचि न स्यादित्याशये
नाह ककोरादिति वर्णनिर्देशो हि कार प्रत्ययो विहितः कश्चित्समुदायात्प्रयोगस्तु उच्चैस्तरांवा वषट्कार इत्यादिनिर्देशरूपप्रयत्नसाध्य इति भावः आपिपरइ
तिऽत्र त्वाकारस्य विशेषणं तत्र सामर्थ्यात् ककाराकाराभ्यां व्यवायेपि भवति न तु रथकल्येत्यादौ त्रिचतुरादिव्यवाये अतएव सर्विकादौ आद्याकारस्य न
भवति तदेतदुक्तं अकारस्यकार स्यादापिपरइति ककारविशेषणत्वे तु विवक्षिते आप्परात्ककारात्पूर्वस्यात इत्यवक्ष्यत् यत्तु प्राचः आपीतिका
कारविशेषणं सर्विकेत्यादौ तु एकादेशस्य स्थानिवद्भावादकारेण व्यवधानेपि वचनसामर्थ्याद्भविष्यतीति तन्न रथकल्यादावतिप्रसंगात् व्यवहितस्या
पिपरत्वानपायात् न च निर्दिष्टपरिभाषया निस्तारः अनुवादे परिभाषाणामनुपस्थितेरनूद्यमानस्य विशेषणं चेति हि तदर्थः अत्र च उदीचामात इति
सूत्रे स्थानेग्रहणं लिंगं फलं तु वृद्धसंज्ञायां इक्परिभाषानुपस्थानात् शालीय इत्यादिसिद्धिः यदप्याहुः आपीति विधीयमानस्यैतो विशेषणमिति त
त्स्थवीयः आपीत्यस्यांगविशेषणत्वे तु अनाशंक्यमेव रथकल्या पुत्रकाम्यत्यत्रातिप्रसंगात् शकेति पचाद्यच् स्थग्रहणं विस्पष्टार्थं ककारमात्रस्य प्र
त्ययस्याभावादेव तात्स्थ्यालाभात् पूर्वस्य किं सर्विकेत्यादौ टाबेवैकादेशं बाधित्वा कात्परस्य माभूत् तस्मादित्युत्तरस्येति परिभाषणात् यत्तु वार्णादांगमि
तिपरिभाषया एकादेशो बाध्यते इत्याहुः तन्न अपवादे परत्वस्यैव उक्तपरिभाषाया अपि निष्फलत्वात् वस्तुतस्तु प्रत्ययस्थे कि इति सप्तमीनिर्देश एवोचि
तः पूर्वग्रहणं च सुत्यजं अनइति तपरः किं कदाधारार्चिकलिम्पः कः धाका राकामामिकेति केवलमामिकेत्यादिना संज्ञाछंदसोर्वेति नियमान्नङीप्
त्यकृत्यपोरिति उदीचामात इति विकल्पस्यापवादः दाक्षिणात्यिकेति दक्षिणस्यामदूरे दक्षिणा आजंतः दक्षिणाभवेति विग्रहे यत्तु दक्षिणस्यां दिशि भवे

राम
४२

जिमावाविगृहीतं तन्न त्यक्विधौ अन्यपसाहचर्यादाजंतस्येव दक्षिणाशब्दस्य ग्रहणात् अन्यथा सर्वनाम्नो वृत्तिमात्र इति पुंवद्भावापत्तेश्च यत्तु समासे एव
पुंवदिति तन्नेति वक्ष्यते त्यकिकितिचेत्यादि हृह्रौटाप् ततोऽज्ञाताद्यर्थे कः केणः इति ह्रस्वः टाप् इहत्यिकेति अव्ययात्त्यप् न्यासयोः अत्र न्यासकारः याइत्ये
तस्योदीचामातःस्थाने इति विकल्पे प्राप्ते निषेधोऽयमिति तन्न आतः स्थाने इत्यंशस्येहाभावात् यासेति यत्तदो रूपलक्षणमित्याशयेनाह यत्तदोरिति स्वरू
पस्याविवक्षायांफलमुदाहरति यकांतकामिति यासयोरित्यपहाय यत्तदोरित्येव वक्तुमुचितं उपत्यकेति उपाधिभ्यांत्यकन्नासन्नारूढयोः क्षिपकादीनां
च नेत्यनुषज्यते क्षिपकेति क्षिपेरिगुपधलक्षणः कः ततोऽज्ञातादौ कः चटभेदने पचाद्यच् ततः कः तारकेति तरतेर्ण्वुल् ज्योतिर्नक्षत्रं नेत्रकनीनिका च
वर्णिका प्रावारविशेषः तंतूनां विकारस्तानवं ओरञ् अन्यत्र वर्णिकेति ग्रंथविशेषस्य व्याख्या स्तोत्रकर्त्री वा । वर्त्तयतीति वर्त्तका शकुनी इत्वं वा अन्यत्र ।
नित्यमेव पितरश्च ता देवताश्च पितृदेवताः तदर्थं कर्म पितृदैवत्यं दैवतांतात्तादर्थ्ये इति यत् अष्टकेति ब्राह्मणा यस्यां सा अष्टका इष्यशिभ्यां तकन् अष्टिका
न्येति अष्टौ परिमाणमस्याः संख्याया अति शदंतायाः कन् अर्थगतं स्त्रीत्वं आकारे ध्यारोप्य यकपूर्वाया इति स्त्रीलिंगनिर्देशस्तेन स्त्रीप्रत्ययो लभ्यत इ
त्याह स्त्रीप्रत्ययाकारस्येति सांकाश्यिकेति संकाशेन निर्वृत्तं नगरं सांकाश्यं वुञ्छण्कठादिसूत्रेण संकाशादिभ्यो ण्यः ततो भवार्थे धन्वयोपधाद्वुञ् आका
देशः सांकाश्ये भवा स्त्रियमाहेति न दकारस्यापि इत्वं विकल्पेत तस्मादात इत्युक्तं ननु यथायमकारो नाकारस्थानिकः एवं स्त्रीप्रत्ययस्थानिकोन
निद्युगविकलमेतत् अत्राहुः सति स्थान इत्येतस्मिन् स्त्रीलिंगनिर्देशबलात् स्त्रीवाचकः आकारः स्त्रीप्रत्यय एवेति लभ्यते असति तु तस्मिन् स्त्रीवाचा
कस्य योकार इत्येतावल्लभ्येत ततः सांकाश्यिकेत्यत्रापि प्रसज्येतेति अत्रेदं वक्तव्यं यकपूर्वायाः स्थाने इति स्थानिशब्दे जागरूके कथमवयवषष्ठीत्वं गम्या
तां न च वुञः स्थानेऽयमिति वाच्यं अकेति समुदायस्य तथात्वेपि अकाररूपावयवस्य तथात्वात् वुञो यकपूर्वत्वाभावाच्च न हि तस्यामवस्थायां यस्य
ति लोपो लभ्यते किंच प्रतिपदोक्तस्य स्त्रीप्रत्ययस्य लाभे भवार्थे विहितस्य वुञादेः प्रसंग एव नास्ति तस्मादात इति स्पष्टार्थमेव अम्बिकेति । कौमारास्तु भस्त्रा

म॰सु॰
४३

दिवाकोश्वशब्दमपिपठंतोस्यापिइत्वविकल्पंइच्छंति शुभंयातिइतिशुभंयाः विच् ततः कः केणः शुभमिति मांतोनिपातः सुष्ठुनयोयस्याः सुनयाततः कः भस्त्रै
षातदंतेति आगत्वादितिभावः एवंचेति उक्तंचहरदत्तेन अत्रातःस्थानइत्येतत्स्वशब्दस्यविशेषणंसंभवव्यभिचारोहितत्रलः काकचोः सतोः द्वेषयोः सं
भवोनास्तिनान्यत्रव्यभिचारिता सर्वनाम्नः स्वशब्दस्येतेननायंविधिर्भवेदिति इहस्वशब्दस्येत्यस्यानंतरमतइतिशेषोबोध्यः एतच्चेहमूलेपिध्वनि
तं एवंचेहसंततौसन्निहितंचरंतंमुनेर्मनोवृत्तिरिवस्विकायां इतिश्रीहर्षश्लोकेभस्त्रेषेतिवैकल्पिकमितिव्याचक्षाणाउपेक्ष्याइतिभावः आत्मीयाभ्यामि
ति आत्मज्ञातिधनेष्वितु स्त्रीत्वमेवनास्तीतिभावः यत्तुज्ञातिधनयोः स्वकास्विकेतिरूपद्वयमाकरेस्थितमित्याहुः तच्चिंत्यंतादृशस्याकरस्याप्रसिद्धेः लिंगा
नुशासनविरोधाच्च यत्तुस्वकास्विकेतिकाशिकायामुदाहृतंतत्संज्ञाविषयकंनतुज्ञातिधनविषयकं यदपिस्वार्थिकाः क्वचित्प्रकृतितोलिंगवचनान्य
तिवर्तंत इतिपरिजह्रुः तदपिचिंत्यं उक्तरीत्याकप्रत्ययांताद्दापूसंभवेपिप्रकृतेरस्त्रीलिंगतयाआतःस्थानेइत्यंशस्यदुरुपपादत्वात् प्रत्युदाहरणान्यु
क्त्वाउदाहरणान्याह निर्भस्त्रिकेत्यादि निष्क्रांताभस्त्रायाःनिर्भस्त्रा उपसर्जनह्रस्वःटाप् ततोज्ञातादौकः कृतषत्वेति सूत्रेविकृतनिर्देशोविवक्षितवि
षयोनतुनयासयोरितिवदुपलक्षणमितिभावः स्त्रीलिंगनिर्देशादजादयः स्त्रीलिंगाएवगृह्यंते तेनेहन शुभ्रोऽजोऽस्याःशुभ्राजिका जानातीतिज्ञःप्रियो
ज्ञोयस्याःप्रियज्ञिकेति अभाषितविहितविशेषणातयाव्याख्यायाः फलमाह वहुव्रीहेरिति नित्यमिति अस्यविकल्पस्याप्रवृत्तेः प्रत्ययस्थादित्युत्सर्ग
एवप्रवर्ततइत्यर्थः परविशेषणत्वेत्वयंविकल्पःस्यादितिभावः वहुव्रीहेरित्युपसर्जनोपलक्षणंतेनातिखट्विकानिः खट्विकेत्यादावपिनित्यमेवशेषि
केकपीति आपोन्यतरस्यामिति ह्रस्वपक्षेइतिभावः अभिव्याप्येति अतएवबहुयुवाशालेत्यत्रपून्स्त्रिरुपसर्जनत्वान्नेतिप्राचआहुः विद्वादृहवृत्तिकृ
तास्तुर्थेस्युनप्रक्षिप्तः औत्सीतिउत्संभवाउत्सादिभ्योऽञ् नचशार्ङ्गरवाद्यञइतिङीनासिद्धमितिवाच्यंतत्रजातेरित्यनुवृत्तेः अन्यथापुंयोगेपिस्यात् एतेन
इहअन्यग्रहणंस्पष्टार्थमितिप्राचोग्रंथःप्रत्युक्तः इहानेकंवाकांतत्रअनुपसर्जनंआणयोऽकारः तदंतादितिव्याख्यानान्नेह आपिशलमधीते आपिशला

एम
४३

शीलेणीति अत्र हि प्रोक्तार्थेऽणउपसर्जनं अथेत्र णानुलुप्तः वर्णप्राधान्यात्प्रत्ययलक्षणं अतश्चैवं भवति ताच्छीलिकेति अयं भावः शीलं छत्रादिभ्योऽण् इति
योगः तेऽस्मिन् अण् कार्यं भवति कार्मस्ताच्छील्ये इति ज्ञापकात् अनेन हि अन्निति अणि विहितं प्रकृतिभावं बाधितुं टिलोपो निपात्यते चौरीति चुरा शीलमस्याः
हलस्तद्धितस्य उपधाभूतस्येति ननु यस्येति चेति यकारलोपे कृते यकारस्य इकारपरत्वपत्स्येव किमुपधाग्रहणानुवृत्त्या न चान्तोपधस्य स्थानिवद्भावः यलो
पे तन्निषेधात् मैवं यलोपे कार्ये ऽन्तोपधस्याभीयत्वेनासिद्धत्वात् अनपत्येति यद्यपि आपत्यग्रहणं कर्तव्यमिति वार्त्तिकं तथापि अपत्याधिकारविहितपरं तत्रा
नाद्दशाश्वगर्गादियञेव न तु देवाद्यञ् तस्यापत्याधिकारात्प्रागेव पाठात् अत एव भाष्यकृता कण्वकारपोः अपत्यञश्चेति गर्गादिभ्यो यञि ञिति च अकारः प्रश्लिष्य
स्कादिभ्यो गोत्रे अयञ अञोश्चेति सूत्रेऽप्येवं प्राचां ष्फ तद्धितः तद्धितग्रहणं प्रातिपदिकसंज्ञार्थं ननु तां विनापि षित्करणसामर्थ्याद्देवङीष् भविष्यति एवं तर्हि
तद्धितग्रहणमित्थं तादृपिक्कचित् ष्फ इति ज्ञापयति यत्रंते सवर्णदीर्घेणापि रूपसिद्धौ यस्येति लोपस्यानावश्यकत्वात् तेन आसुरेरुपसंख्यानमिति वक्ष्यमा
णं सिध्यति आयनेफ कारादिष्वकार उच्चारणार्थः आयनीनोर्नकारस्य नेत्वं फिनीनित्करणसामर्थ्यात् कौरव्यं कथं तर्हि यद्यसौ कूपमांडूकीत्वेनावतिकः
समपद्भिमहिः अत्राहुः कौरव्यसाहचर्यात् अपत्यप्रत्ययान्तस्यैव मांडूकस्येह ग्रहणं इह तु मंडूकस्येयं भार्येति तस्येदमित्यण् कुमारीति प्रथमवयोवा
चीरेषशब्दः नत्वनूढ चेप्रयुक्तः वृद्धकुमारीति तु गौणः प्रयोगः त्र्यनीकेति त्रयाणामनीकानां समाहारः अत्र अजादेराकृतिगणत्वाट्टाविति त्र्यनीकाधिक
रणो मीमांसकाः पंचाश्चेति नन्वत्र द्विगोरिति ङीप् प्राप्नुत ठगंतत्वात्तु स्यादेवेति चेत् न ठकोर्योः कारः इति व्याख्यानात् द्विवि [illegible] वृत्ति विलोहमनोह्लादत्यम
रः आचितो दशभाराः स्युः द्विकं वल्येति द्वाभ्यां कंकस्याभ्यां क्रीतं नाकंवत्स्य मूर्णापलशतं कंवलाच्च संज्ञायामिति यत् क्रीता [illegible] ढ्यादकीति द्वावाढ
कौ पचतीति आढकाचित पात्रात्ष्ठन् अन्यतरस्यां द्विगोः ष्ठंश्चेति खठनष्यामुके भागवतीय ष्ठन् तस्य लुक् एतेन द्याचिता [illegible] नात् षोडशहस्तप्रमा
णो दंडः कांडं यद्यपि विशेषणे न तदंतविधिः सिद्धः तथापि अंतग्रहणे असति सेत्र इत्येन न श्रुतत्वात् कांडस्येव विशेषणं स्यात् ननदंत [illegible] ततश्चेहापि स्यात् द्वा

भ्यां कांडाभ्यां कांडप्रमिताभ्यां क्षेत्राभ्यां क्रीता द्विकांडी वडवेति इह तु न स्यात् द्विकांडा क्षेत्रभक्तिरिति अतो न ग्रहणं मात्रच इति यत्तु प्राचो कं द्वयसचो लुगिति
तन्न प्रथमश्च द्वितीयश्च ऊर्द्ध्वमाने मतौ ममेति सिद्धांतात् द्विकांडी रज्जुरिति नन्विह अपरिमाणेनादिति पूर्वेण निषेधः स्यात् कांडशब्दस्य आयामपरतया अ-
परिमाणार्थत्वात् परितः सर्वतः आरोहतः परिणाहतश्च येन मीयते तद्धि परिमाणं आढककुडवादि न तु यथा कथंचित् परिच्छेदकमात्रं यदाहुः ऊर्द्ध्वमानं कि-
लोन्मानं परिमाणं तु सर्वतः आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वत इति अत एव द्विहस्ताभित्तिरित्यत्र ङीप् न अत्राहुः नियमार्थमिदं क्षेत्र एव निषेधो।
यथा स्यात् इति अतो द्विकांडी रज्जुरित्यत्र ङीबेव सूत्रस्य फलमिति पुरुषात्प्रमाणे यद्यपि पुरुषशब्दो जातिवचनस्तथापि द्वौ पुरुषौ प्रमाणमस्या इति वाक्ये
प्रमाणे वर्तते स्वप्रमाणवद्भिः सामानाधिकरण्यात् वृत्तौ तु तत्स्वभावादेव तथा च शुल्वसूत्रे पंचारत्निः पुरुष इति द्विपुरुषीति अत्र न्यासकारः प्रमाणे लो द्विगोर्नि-
त्यमिति द्वयसचो लुगित्याह तन्न पुरुषशब्दस्य प्रमाणवाचित्वाभावेन प्रमाणे ल इति श्लोकवार्तिकस्यात्राप्रवृत्तेः ये हि शमादिवत्प्रमाणत्वेन प्रसिद्धा-
स्तत्रैव तत्प्रवर्तते ननु पुरुषशब्दो अन्यथा पुरुषद्वयसमित्यत्रापि लुक् स्यात् स्पष्टं चेदं पुरुषहस्तिभ्यामण् चेति सूत्रे पदमंजर्यां न चैवं द्वयसजभवा-
वपि नास्मात्स्यातामिति वाच्यं ऊर्द्ध्वमाने मतौ ममेति वचनात् एवं पुरुषात्प्रमाणे इत्यस्यापि सामर्थ्याद्द्वयसज्प्रवृत्तिः यत्तु तत्रैव सूत्रे द्विगोर्नित्यं लुगिति वृत्ति-
ग्रंथमुपादाय हरदत्तेनोक्तं तस्मादप्राप्त एवात्र लुग्विधीयत इति तदपि चिंत्यं मुनित्रयानुक्तस्य विधानोक्तेरयोग्यत्वात् यदपि प्राचीनप्रक्रियां व्याचक्षा-
णेनोक्तं पुरुषहस्तिभ्यामित्यत्र पठ्यमानेन वार्तिकांतरेण लुगिति तदपि रभसोक्तिमात्रं उदाहृतसूत्रस्य भाष्यवार्तिककाराभ्यामस्पृष्टत्वादित्याहुस्ताव-
त्वस्तुतस्तु पुरुषात्प्रमाण इति सूत्रे द्विगोस्तद्धितलुकीत्यनुवर्तते तत्सामर्थ्याद्द्वयसजाद्याक्षिप्यते हरदत्तोक्तिरपि कथंचिदेवं व्यक्ततयैव नेयेति सहृदयैराकल-
नीयं प्रकृते किं द्वाभ्यां पुरुषाभ्यां क्रीता द्विपुरुषा गौः न हि तद्धितलुकीत्येव समाहारे पंचपुरुषी ऊधसोऽनङ् नादेशेनैव सिद्धे ऽनङ्करणं धनुषश्चेत्येतदर्थं दाम ब-
हुव्रीहिविशेषणत्वादेव सिद्धे ऽनग्रहणं स्पष्टार्थं संख्यादेरिति स्वरितत्वबलादेकदेशस्यानुवर्तत इति भावः केवलमामक इत्यादीति अध्यस्यां मामकी तनू मित्रा

वेशाग्योर्भागधेयी अनिषयास्तन्वः संतुपापी उतापरीभ्योमघवाविजिग्ये समानीव आकूतिः आर्यकृती सुमंगली शिवारुद्रस्यभेषजी प्रत्युदाहरणं।
त्विति यत्तु प्राचा अंतर्वती पतिवतीति प्रत्युदाहृतं तदयुक्तमितिभावः व्यस्ते कथमिति यत्तु प्राचा समस्तेष्वुपचार इति वर्णितं तन्मुधेति भावः पूतक्रतोरै च ऐ
कारश्चादेशो न तु प्रत्ययः उत्तरसूत्रे उदात्त इत्युक्तेः नवेति अन्यथा वृषाकपिशब्दो लघावंते द्वयोश्च बह्वषो गुरुरिति मध्योदात्तत्वं प्रयोजयति अग्न्यादिषु
त्रिषु स्थानेंतरतम इत्येव सिद्धमिति प्राचां ग्रंथाविरुध्येरन्निति भावः उदात्तैकार इति मनुशब्दो ह्याद्युदात्तः शृस्टृस्निहित्रप्यसिमनेरुः प्रत्ययविधायकसूत्रे चान्ये
निष्विन्त्यधिकारात् समासनिर्देशेनेत्यर्थः पतिउदात्त इत्यनुवर्तमानसंबंधानुवृत्तेरैकारस्यैव संबध्यते नत्वौकारेणापीति ननश्च यदुक्तं प्राचा ऐकारौकारौ उदा
त्तौ स्त इति तदपेक्ष्यं वृत्तिपदमंजर्यादिविरोधादिति भावः मनावीति मध्योदात्तं इतरद्वयमाद्युदात्तं एताकर्बुरा वर्णा नामिति एतः शोणः शितिः पृश्निः पृषत् इत्य
[illegible] ह्येयेति अत्र उत्तरपदस्योपसर्जनत्वेपि समस्तस्य अनुपसर्जनत्वमिति भावः संज्ञात्वाण्णत्वं छांदसत्वाद्वा क्रमेके इति अत्र छंदसीति भाष्योक्तेः
लोके गतो गणस्तूर्णमसिक्किकानामित्यादिप्रयोगाः प्रामादिका इति प्राचः वस्तुतस्तु छंदस्येके इत्यन्वयात् भाषायामपीति भाष्याभिप्रेतं अन्यथाए
कग्रहणं न कुर्यात् नहि छंदसि पलिक्नीरिषुवत इत्यादिप्रयोगेषु कश्चिद्विप्रतिपद्यते विप्रुड्वाचीति दैपशो धने इति स्मरणात् अवदातः सितो
गौर इति कोशेतु विप्रुड्वित्वसाधर्म्यात् प्रयोगे उपनिबद्ध इतिभावः लघाविति अंते एकस्मिन्लघौ द्वयोश्च लघ्वोः परतो वृषा[illegible]च कस्य गुरुरुदात्तः स्यात्
अषिति अचः प्राचां संज्ञा कृत्स्नेति कृषेश्चेति नकुप्रत्यये कपेश्चेति सौत्राद्धातोरौणादिके इत्वचि चकृत्स्नकपिलावंतोदात्तौ पिशंगादिभ्यश्च श्वनशब्दे
त्र पश्यतेतेन अत्रेनोङीप् इत्यत्र यत्प्राचा शुनीत्युदाहृतं तत्प्रामादिकं यत्तु व्याचक्षते श्वानमाचष्टे श्वेवाचरतीति वार्थे णि[illegible]क्विपौ वा क्वौ उपसर्जनत्वात्
ङीषभावेनिः शुनीत्यादिवत् ङीबिति न त्वणिविसंप्रसारणटिलोपयोः उक्तरूपं मुख्यमते दुर्लभं अन्यत्र तु आशां कथंचित् ओपयन्नावेदिति ओप्यते नि
क्षिप्यते धान्यं यस्मिन् गौणान्येति यस्याम दृष्ठिकं नाम अकृत्रिमेति यथा सेषा स्थलीयत्र विचिन्वतातावामिति स्थला [illegible] कृत्रिमा पुरुषेण संस्कृता य

यास्थलयोदकं परिगृण्हति आग्रापक्वा अयोविकार इति फाल इति प्रसिद्धः कुशान्येति छंदोगास्तोत्रीयागणनार्था नौदुंबरा न शंकून् कुशा इति व्यव
हरंति अतः कृकमीति सूत्रे हानौ तूपायनेति व्याससूत्रे कुशावानस्यन्याः स्यानामायानेति श्रुतौ च प्रसिद्ध एवायं पतिंवरेति तस्य च पाणिग्रहणोत्कंठा-
भिधायित्वाद्गुणवचनोयमिति भावः वह्वादिभ्यश्च वहुशब्दस्य गुणवाचित्वात् पूर्वेण सिद्धे उत्तरार्थं ग्रहणमित्याहुः वस्तुतस्तु वहुशब्दः नित्यं छंदसीत्युत्तर
सूत्रं चेति द्वयमपि व्यर्थमेव सर्वविकल्पानां छंदसि व्यवस्थितत्वात् पुंयोगादिति तथा च गौणी वृत्तिरिति भावः यदा तु मुख्यार्थो न स्येदमित्यण् तदा गोपी
त्येव भवति योगश्चेह दंपतिभाव एवेत्येके वस्तुतस्तु संकोचे मानाभावात् जन्यजनकभावोपि गृह्यते तथा च भट्टिः कौसल्ययासावि सुखेन रामः प्रा
क्केकयीतो भरतस्ततोभूदिति केकयदुहिता हि केकयी जनपदादित्यपत्यप्रत्यये तु कैकेयीति स्यात् न च तस्य अतश्चेति लुक् न प्राच्यभर्गादी तिनि
षेधात् तथा च कालिदासः कैकेयिकामाः फलितास्तवेति एतेन देवकी व्याख्याता दृष्टोयवो यवानीति जात्यंतरमेवानेनाभिधीयते अयमेव चास्य
विषयः यद्गुतयवत्वजातेरभावेपि तदाकारानुकृतिः ङीषु वाच्य इति इदं च तृतीयेभाष्ये इङश्चेति सूत्रे स्थितं कथमिति यत्तु वदंति दीर्घोच्चारणसाम
र्थ्यात् आंश्चतुकू इति पदं विभज्यते तत्र इंद्रादीनामनुकैव सिद्धे आकार विधानसामर्थ्यात् क्वचिदन्यतोपि विधानमनुमीयते तेन ब्रह्माणीति सि
ध्यतीति तच्चिंत्यं अनुकि कृते अतो गुण इति पररूपप्रसंगात् ननकारोच्चारणसामर्थ्याद्दिर्घो भविष्यति अन्यथा हि नुकमेव कुर्यादिति चेत् न अघोपो
नइत्यस्य वाधेन चरितार्थत्वात् यत्तु नेइति वदादेशे कत्र्त्र्ये आगमलिंगककारोच्चारणसामर्थ्यादेवात्त्वोपो न भविष्यतीति चेत् न शर्वशब्दे ककारस्य चा-
रितार्थ्यात् न हि तत्र लोपोस्ति न संयोगादिति निषेधात् तस्मात्ककाराकारयोः सामर्थ्यविरहे पररूपवाधनार्थं दीर्घोच्चारणमावश्यकमिति एतेन अनुकृ-
ह्रस्वादिरेवलाघवादकर्तव्य इति हरदत्तोक्तिरपि प्रत्युक्ता यत्तु इंद्रमाचक्षाणः इन्द्र तत्करोतीति एयंतात्क्विप् तस्येंद्रः स्त्री इंद्राणीय यास्या दिति दीर्घोक्तिरितिन्यास
कारेणोक्तं तन्न इंद्रशब्दस्यात्र आचक्षाणादावुपसर्जनत्वात् इंद्रस्त्रीति वाक्यमेव तत्र भवति कर्मण्यणीति तदंतान्ङीप् पूर्वपदात्संज्ञायामिति णत्वं वस्त्र

क्रीतीति वस्त्रभिसक्रीत इत्यस्यामवस्थायाम् प्राक्सुबुत्पत्तेः समासेऽदंतत्वान्ङीष् क्वचिन्नेति कार्त्तिककारेणोक्तत्वेति सूत्रे बहुलग्रहणान् क्वचित्सुबंतेन समासः

नत्र चेत्सुपः प्रागेवांतरंगत्वाट्टाप् ततोऽदंतत्वाभावान्न ङीषिति भावः तेन वक्रीति अयं भावः बहोर्नञ्वदुत्तरपदभूम्नि नञ्सुभ्यां जातिकालसुखादिभ्यो नाच्छादनात्

क्तो कृतमितप्रतिपन्ना इति हि अंतोदात्तताविधायकानि नत्र जातिपूर्वादित्युक्तेव वक्रादिपूर्वकस्याथोद्युदास इति अस्वांगपूर्वपदाद्धिकस्यस्य वक्ष्यमाणत्वात् इह स्वांग

पूर्वपद एवोदाहरणमित्याह उरुभिन्नीति जातांतादिति वर्णादनुदात्तादिति बहुव्रीहेरुदात्तादित्येव सिद्धे ऽन्तग्रहणं नित्यत्वप्रतिपत्त्यर्थम् वाजातेः इति तु वैकल्पिकः

उदात्तो न तु नित्य इति भावः सुमुखा शालेति एवं च फलमुखीकारणमुखी चानवस्थेत्यादिप्रयोगाः प्रामादिका इति बोध्यम् उरः क्रोडेति स्वाङ्गं गोपमिति हरदा

णादयः नञोपसर्जनह्रस्वत्वे कृतेऽदंतत्वान्ङीषः प्राप्तिः अमरस्तु न ना क्रोडं भुजांतरमित्याह रत्नमतिस्तु पुंस्त्वमाह गणे च क्रोडेति प्रातिपदिकमात्रं पठ्यते न

सुट्टाव तामीति गणरत्नमहोदधिकारः एवं चाविशेषाल्लिंगत्रयेऽप्युदाहरणं बोध्यं माधवस्तु तुदादिगणे क्रुड निमज्जन इति धातावाह क्रोडः घञ् क्रोडा अथवा

नामुरः टाबन्तोऽयं स्वभावतो विशेषविषयः क्रोडादिषु टाबंतस्यैव पाठं न तु जातिमात्रवचनस्य क्रोडशब्दस्य बहुव्रीहौ स्वांगलक्षणो ङीष्विकल्पो भवत्येव कल्या

णक्रोडी कल्याणक्रोडा मषूरीति ङीषो ङीवादेश इति दिक्पूर्वपदादिति पंचम्या ङीषिति प्रथमायाः षष्ठी कल्प्यत इति भावः ओपगवीति अयं तल्लक्षणं

ङीपं परत्वाद्पं वा बाधते एवं चापत्याधिकारे ओपगवीति प्रतीकमुपादाय टिड्ढाणञिति ङीबिति व्याचक्षाणा उपेक्ष्या इति भावः ब्राह्मणीत्यत्रेति एवं च प्राचो

ङीषुदाहरणं प्रामादिकमिति भावः कुरूरिति लिंगविशिष्टपरिभाषया स्वादयः प्राचामवंत्यादिवच्चेति सूत्रमुपन्यस्यादिवद्भावान्न्यादयस्य इत्युक्तं तत्रेदं वक्त

व्यं परं प्रत्यादिवद्भावो विधीयते न तथा चेह प्रत्यय इति प्रतिषेध एव स्यान्न तु स्वादयः यत्तु व्याचख्युः आदिकुङपेक्षया पूर्वं प्रातिपदिकांतर[illegible]भावान्न दवयव

त्वेन ग्रहणान्न पूर्वांतवद्भावादिति तदपि क्लिष्टं स्वपरग्रंथविरुद्धं च उक्तरीत्या हि कांडे कुरौ इत्यादावपि एकवचनमुत्सर्गत इति [illegible] सर्वत्र तदुदाहरणाय वा प्रत्यय इ

तिप्रसज्यप्रतिषेधाभ्युपगमे प्रकृते दोषः श्वश्रूरित्यत्र एकादेशाभावाल्लिंगविशिष्टपरिभाषाया एवावश्यकत्वाच्च यत्तु तत्र श्वशुरः [illegible] चेति निर्देशात्स्वाद

म॰ सु॰
५६

न्नियोगेन च विधीयमानो लोपः सन्निहितत्वादंत्य
यइति तन्न निर्देशस्य शब्दपरत्वाद्यथा विपंराभ्यां जेः ङेर्यइतिवत् श्वशुरस्येति पुंयोगलक्षणे ङीषि प्राप्ते ऊङ् तन्न अ्रतोऽपि प्रथमाकारस्य लोपो न शंक्यः उपमानवाचिपूर्वपदस्थिति शत्रीकराभ्यां करभोप
स्यैवाकारस्य न तादेः एतच्च वचनं श्वश्रुः श्वश्र्वेति निर्देशसिद्धार्थकथनं अ्रतोऽपि प्रथमाकारस्य लोपो न शंक्यः
मोरूरित्यत्र तु न करभशब्दस्योपमानवाचित्वेपि पूर्वपदत्वाभावात् शफौ खुराविति यद्यपि शफं क्लीबे खुरः पुमानित्यमरः तथापि शफशब्दस्य पुंस्त्वमपि बहुसं
मतं शकाविव जम्भुरा णेति श्रुतौ ग्राम्यपशुसंघेष्विति सूत्रस्य व्याख्यावसरे न्यासहरदत्ताऽऽदिग्रंथेषु वाचस्पत्यादिनिवंधेषु च प्रचुरप्रयोगदर्शनात् लिंगमा
शिष्यं लोकाश्रयत्वाल्लिंगस्येति भाष्याच्च शफो भुजो गुदं घोणेति गणरत्नमहोदधौ क्रोडादिगणपाठाच्च शफः खुरे गवादीनां मूले विटपिनामपीति हेमचंद्रको
शाच्च विश्वकोशे च पुंनपुंसकता क्रावामोसुंदरौ ऊरू यस्याः इति विग्रहः इह सर्वत्रोपमानाभावादप्राप्ते विधिः कथं तर्हि पीवरोरुपिवनीववर्हिणइति कु
माराः प्रमादएवायं संज्ञापूर्वकत्वात्संवुद्धिगुणो नेत्येके हितेन सहितेति समेवाहितं न नतयोरिति व्युत्पादितः सहितशब्दस्तु नेह गृह्यते एकदेशविकृतनता
दंसंज्ञ... इणादेव सिद्धेरितिभावः अ्रत्रयो कारइति अ्रनाश्रकारविशेषणं किं शूरसेनी जनपदशब्दादित्यञोतस्येति लुकि जातिलक्षणे ङीषि शाङ्र्रवी
दिभ्योगस्य शब्दादेल्त्यार्थेऽणन्त नरपोरिति नृशब्दात् ऋन्नेभ्य इति ङीपि नरशब्दाज्जातिलक्षणे ङीषि प्राप्ते वचनं ननु नरशब्दे ऽलोऽन्त्यस्य वृद्धिः स्यात् कथाहु
अ्रन्त्यस्य यस्येति लोपेनापहारात् अ्रनंत्यस्याप्यकारस्य वृद्धिर्भवति अ्रांतरतम्यात् गुणोत्वन्याय्यकल्पनेति अ्रलोऽन्त्यपरिभाषावाधस्येवन्याय्यत्वादिति न
न प्रत्ययसंन्नियोगशिष्टायावृद्धेरंतरंगत्वेन परमपि यस्येति लोपं वाधित्वा प्रवृत्तौचित्यात् किंच अ्रस्तु कथं विस्त्रोपस्तथापि रेफस्यैव वृद्धिः स्यात् न त्वकार
स्य अ्रन्तरतम परिभाषापेक्षयाऽलोन्त्यपरिभाषायाः परत्वात् अ्रपिच अ्रंतरतमपरिभाषा अ्रसदृशमादेशं व्यावर्तयितुं न तु स्थानिनं नियच्छतीति न कथंरे
फस्य स्थानित्वव्यावृत्तिः किंच गुणोत्वन्याय्येति न्यायोपन्यसनं स्थवीयएव परिभाषयोः परस्परगुणगुणिभावायोगात् अ्रत्रेदं तत्त्वं नरइति रान्तलुप्ताकारानुकर
णं नरः अ्रः नरः ना च नरश्च तयोरिति व्याख्येयं यद्वा नरस्य अ्रः नरः कर्तं तवत्पररूपं ना च नरश्च तयोः नृनरयोः नरस्य च प्रथम एव अ्रकारो गृह्यते न तु द्वितीयः

रम
४६

श्लेषसामर्थ्यात् अधिकंशब्दकौस्तुभेबोध्यंपुत्रशब्दोऽत्रपठ्यतेशैलपुत्रीवहर्षेहृदयेननोतिकुर्वंतदर्वीपतिपुत्रिसर्वेनचपुत्रशब्दःकन्यायांनास्तीतिभ्र
मितव्यं आत्मजस्तनयःसूनुःसुतःपुत्रःस्त्रियांत्वमीआहुर्दुहितरंसर्वेइत्यमरोक्तेः अनयवप्रत्ययस्थादितीत्वप्रकरणेवासूतकापुत्रिकावृंदारकाणामिति
वार्त्तिकोक्तभाष्यादिकचसंगच्छतेयत्तुत्रहरदत्तेनोक्तंकेवलःपुत्रशब्दःस्त्रियांनवर्त्ततेइतितद्भाष्यादिविरोधादुपेक्ष्यंइत्वप्रकरणस्थस्वग्रंथविरोधाच्च इदं
तुचिंत्यंकारेसत्यापदस्येतिसूत्रेसूत्रोग्राजभोजकुलमेरुभ्योदुहितःपुत्राड्वेतिवार्तिकंकिमर्थमितियत्तुवदंतिस्वरार्थमितितन्नटित्वान्ङीपिकृतेउदात्त
निवृत्तिस्वरेणोदात्तःङीनंतेनतत्पुरुषेऽपिसमासस्वरेणांतोदात्तएवेतिस्वरभेदाभावात्यदपिशार्ङ्गरवादौपुत्रशब्दःप्रक्षिप्तःनतुसांप्रदायिकइतितद
पिन उदाहृतभाष्यविरोधात् वास्तुकेत्यादिवार्तिककैयटहरदत्तादिग्रंथाकारप्रश्लेषविरोधाच्चेत्यालंतावत् आंवष्ठ्येति वृद्धेत्कोशलेतिञ्यङ्कारीष
[illegible]गंधस्य वगंधेस्यकरीषगंधिः उपमानाच्चेतिगंधस्येदंतादेशः तस्यगोत्रापत्यंस्त्री अण् अणिञोरितिष्यङादेशःसचयद्यपिस्त्रियामेवविहि
तस्तथापिङित्करणसामर्थ्यात्तदंतादप्ययंचाप् योतिमाष्येतिपूतिमाषशब्दोगर्गादिःतद्धिताःबहुवचनमनुक्तानामुपसंख्येयानांसंग्रहार्थंमहासंज्ञा
करणमन्वर्थं[illegible]तेभ्यःप्रयोगेभ्योहितास्तद्धिताइति तेनयथाभिधानमेवस्युःस्यादेतत् टापःप्रागयमधिकारोऽस्तुष्फविधौतद्धितग्रहणंयस्येति
लोपईत्वग्रहणंचमास्त्वितिचेन्न मैवंपद्धीत्यत्रओर्गुणप्रसंगात् शार्ङ्गरवादितियोतिमिश्रीकरोतिषत्येतिव्युत्पत्तेःकेचित्तुबाहुलकात् योनेरोणादिकंका
प्रत्ययंवदंति उभयथापियुवतीनांसमूहोयौवतंयत्तातु अणिपुंवद्भावात्यौवनमित्येवभिक्षादिपाठसामर्थ्यान्नपुंवदितिवृत्तिस्तुभाष्यविरुद्धाभा
ष्येतत्पाठस्यप्रत्याख्यानादितिदिक् इतिस्त्रीप्रत्ययाः मात्रशब्दस्येति तस्यचावधारणमर्थःमात्रंकार्त्स्न्येवधारणेइत्यमरःप्रातिपदिकादीन्येवतन्मा
त्रमितिएवकारेणास्वपदविग्रहःमयूरव्यंसकादित्वात्समासःकृत्स्नइति यद्यपिनीलरूपवत्परोयमनियतलिंगस्तथाऽपि[illegible]सदेवेभगवतिनियत
पुंल्लिंगएवेतिभावःज्ञानमितिभावेल्युट्द्रोणइति नचप्रातिपदिकार्थमात्रेप्रथमेहास्त्वितिवाच्यंतथासतिपरिच्छेद्यपरिच्छेदकभावस्यसंसर्गवि

म० सु०
४७

धयाभानायोगात् नामार्थयोरभेदसंसर्गएवव्युत्पत्तेः नचाषष्ठ्यर्थबहुव्रीहौव्यभिचारः एकार्थीभावाभ्युपगमात् नापिनिपातार्थेतेषांद्योतकताभ्यु
पगमात् नचसिद्धांतेपिप्रकृतिप्रत्ययार्थयोरभेदान्वयोदुर्लभः अन्यत्रादृष्टत्वादितिवाच्यंदेवनार्थकनद्धितादेदृष्टत्वादिति[illegible]ः वचनंसंख्येतिनथैः
वप्राचांव्यवहारात् इहसूत्रेअर्थेलिंगेचप्रथमेत्येतावदेवसुवचं इतरत्सर्वत्यक्तुंशक्यंतथाहि अर्थेप्रथमेत्युक्तेकस्यार्थेइत्याकांक्षायांयस्मात्स्वादि
विधिस्तस्येतिलभ्यतएव स्वादयश्चप्रातिपदिकात्लिंगप्रत्ययविशिष्टाच्चविधीयंतेतदर्थत्वंचतत्तोनियतोपस्थितिकत्वमेवएवंचमृडानीहिमानीत्यादौ
पुंयोगमहत्वादेरपिअन्नतान्नियतभानेनप्रथमासिध्यतीत्यपरमनुकूलं यथान्यासेतुसानस्यात् यदितुअर्थेशब्दोवृत्तिविषयपरः वृत्तिस्तुशक्तिर्लक्षणा
चगौणीतुलक्षणांतर्भूतापृथग्वास्तु किंचप्रातिपदिकार्थइत्याश्रीयतेतदालिंगेइत्यपिमास्तुलक्ष्याणांविचित्रत्वेपिनक्षतिः नियमांशत्यागात् तथा
चअर्थेप्रथमेत्येवंस्तु द्रोणोव्रीहिरित्यपिद्रोणशब्दस्यतत्परिमितेउपचारात्सिद्धं गौर्वाहीकइतिवत् एकोद्वावित्याद्यपिनकेवलाप्रकृतिःप्रयोक्तव्ये
[illegible]वसिद्धं अनन्वितार्थकप्रयोगापेक्षयाअनुवादकमात्रस्यप्रयोगस्यन्याय्यत्वात् एवंमात्रग्रहणमपिव्यर्थं संबोधनेचेतिज्ञापकेनकर्मा
[illegible]धिकेप्रथमेभा[illegible]अप्रवृत्तेः यत्तुप्राचोक्तंप्रातिपदिकार्थःसत्तेति यच्चव्याख्यानंयोर्थःसन्नित्येवकेवलंभासतेनजात्यादिरूपोनलिंगसंख्याकारकयो
गीसविवक्षितोयथाव्ययार्थः अव्ययार्थोहिकेवलमस्तीतिशक्यंतेवक्तुंनपुनरीदृशस्तादृशइतीतितन्न उच्चैर्नीचैरित्यादिशब्दानांसत्वित्याकारकप्रती
तिजनकत्वस्यसर्वेतंत्रविरुद्धत्वात् अस्त्यादिसामानाधिकरण्यस्यापिअसत्वार्थकेषुदुर्लभत्वात् नलिंगसंख्याकारकयोगीतित्वदुक्तविरोधाच्च पि
ंतरोपस्थापितस्यअस्तिसामानाधिकरण्यमस्तीतिचेतन्न तस्यअव्यावर्तकत्वात् नपुनरित्यादिवाक्यशेषविरोधाच्च कृत्स्नःश्रीरित्यादावव्याप्ते
श्चनच लिंगग्रहणात्तत्सिद्धिः मात्रपदेनाधिक्यव्यवच्छेदात् यदपिप्राचांव्याख्यानं यत्रार्थोतरानपेक्षयाशब्दप्रवृत्तिःससर्वःप्रातिपदिकार्थःशब्दप्रा
वृत्तिनिमित्तमितियावत् यथाउच्चैर्नीचैरिति अलिंगसंख्यावेतोकेवलंजात्यादिनिरपेक्षंस्वार्थमाहतुरितितदपिनप्रवृत्तिनिमित्तंहिप्रकारीभूतभा

एम
४७

ते तथा च तन्मात्रबोधो संभवी यदि सोपीष्टस्तर्हि घटादिशब्देभ्योपि स्यादिति संख्याकारकाद्यनन्वय एव स्यात् यदपि द्रोणपरिमिते व्रीह्यादौ द्रोणशब्दः
तोयमित्यभिसंबंधात्प्रवर्त्तते तत्र गौणमुख्यन्यायान्न प्राप्नोतीति परिमाणग्रहणमिति तन्न पदकार्येष्वयं न्यायो न प्रातिपदिककार्येष्विति सिद्धांतात् अ
न्यथा सिंहो माणवक इत्याद्यसिद्धिप्रसंगाच्च पदप्याहुः द्रोणादयः शब्दा लोहं दारुमयं वा परिमाणमेव न व्यभिचरंति परिमेयं तु व्यभिचरंत्येव अतस्त
स्य प्रातिपदिकार्थत्वाभावादप्राप्ते परिमाणग्रहणमिति तदपि न गौणलाक्षणिकेषु सिंहो माणवकः मंचाः क्रोशंतीत्यादिष्वव्याप्त्यापत्तेः तत्र विशेष्यस्य माणव
कादेर्भेदेपि सिंहसदृश इत्यर्थो गौण्यां नियतोपस्थितिक एवेति यदि तर्हि व्रीह्यादेर्भेदेपि द्रोणपरिमितो नियत एवेति तुल्यं संबोधने च मात्रग्रहणात्सं
[illegible] नाधिको न प्राप्नोतीत्यारंभः इह संबोधनं प्रकृत्यर्थे प्रति विशेष्यं क्रियां प्रति विशेषणमिति सिद्धांतः उक्तं च संबोधनपदं यच्च तत्क्रियाया विशे
[illegible] नि देव वदन्तेति निघातोत्र तथा सतीति एवं च राम मां पाहीति वाक्यस्य रामसंबंधिसंबोधनविषयो मत्कर्मकं रक्षणमर्थः इति प्रथमा का
तेरीप्सिततमं कर्म कर्तुरिति क्तस्य च वर्तमान इति कर्तरि षष्ठी प्राप्नोतेः सन्नन्तान्मतिबुद्धिपूजार्थेभ्यश्चेति वर्तमाने क्तः मतिरिहेच्छा न तु बुद्धिः पुनर्बुद्धि
ग्रहणात् एवं च [illegible] कर्त्री आप्तुमिष्यमाणं कर्मेत्यर्थः कर्त्ता च धातूपात्तव्यापाराश्रयः स केनाप्तुमिच्छतीत्याशंकायां विशेषणीभूतेन व्यापारेणेत्यर्थो लभ्यते तदे
तदाह क्रिययेति क्तप्रत्ययेनोपस्थितं वर्तमानत्वं चेह न विवक्षितं तेन कटं कृतवान् करिष्यतीत्यादि सिध्यति कारकमिति एतच्च कारके इत्यधिकारसूत्र
त्रभ्युक्ते तत्र हि व्यत्ययेन प्रथमार्थे सप्तमी प्रतिसूत्रं च वाक्यं भित्वा कारकसंज्ञा विधीयते तद्यथा अपाये ध्रुवं कारकसंज्ञं स्यात् ततः अपादानं उक्तं का
कमपादानसंज्ञं स्यात् पुनः कारकशब्दानुवृत्तिसामर्थ्याद्विशेषसंज्ञाभिः सह समावेशः अन्वर्था चेयं संज्ञा करोतीति कारकमिति तेन क्रियानन्वयि
[illegible]न भवति ब्राह्मणस्य पुत्रं पंथानं पृच्छतीति इह हि ब्राह्मणः पुत्रविशेषणं न तु क्रियान्वयी यद्वा कारकशब्दः क्रियापरः करोति [illegible] कर्मादिव्यपदेशानि
[illegible]व्युत्पत्तेः तथा च अपादानादिसंज्ञाविधौ क्रियायामित्यस्यायस्थित्या क्रियान्वयिनामेव तत्तत्संज्ञा विधीयंते कारकाद्दत्तश्रुतयो [illegible] तेन कारकशब्दः

स्त्र्यते तेनैतदधिकारोक्तं कर्त्रादिषट्कमेव गृह्यते अस्मिन् पक्षे हन्तावपि कारकमित्यस्य क्रियान्वयीत्यर्थः आद्यपक्षे तु कारकसंज्ञं स्यात् न च कारकं कर्मसं
ज्ञं स्यादिति व्याख्येयं अनभिहितेति ननु बहुपटुरित्यादौ बहुचाउक्तार्थत्वाद्यथाकल्पबादयो न एवं क्रियते कट इत्यादावपि तिङादिभिरुक्तार्थत्वात् द्वि
तीया न भविष्यति किं च कटं करोतीत्यादौ सावकाशाद्द्वितीया कृतः कट इत्यादिषु प्रथमया बाधिष्यते निरवकाशत्वात् न च वृक्षः प्लक्ष इत्यादिरवकाशः तत्रा
पि प्रतीयमानामस्ति क्रियां प्रति कर्तृत्वेन तृतीयाप्रसंगात् अथ नीलमिदं नतु रक्तमित्यादौ विशेषणान्तरनिवृत्तितात्पर्यकेप्यस्ति क्रियायामनावश्यक
त्वात् प्रथमाया अवकाशं ब्रूषे तर्हि विप्रतिषेधात्प्रथमास्तु एवं चानभिहिताधिकारो वृथेति चेत् मैवं संख्याविभक्त्यर्थे इति पक्षे सूत्रारंभात् तथा चानभि
हिते कर्मणि यदेकत्वं तत्र द्वितीयैकवचनमम् इत्यर्थः सूत्रानारंभे च कर्मणि यदेकत्वं तत्र द्वितीयैकवचनमम् इति हि वाक्यार्थः तथा सति कृतः कट
इत्यादौ च क्तेन कर्ममात्रोक्तावपि तदेकत्वस्यानुक्ततया अमू द्वयोः परत्वात्प्रथमेत्यपि न कर्तव्यः कट इत्यादौ तेनोपि परत्वेन कृद्योगलक्षणषष्ठीप्रसं
गात् कारकं विभक्त्यर्थ इति पक्षे तु सूत्रं प्रत्याख्यातमाकरे हरिं भजतीति भजनक्रियया हरौ प्रीतेरुत्पादनात् प्रीतिविशिष्टतया क्रियाव्याप्यत्वेन हरिः क
[illegible] भजनं वाक्यार्थः हरिः सेव्यते इत्यत्राप्येवमेव क्रियाप्रधानमाख्यातमिति सिद्धान्तात् धातूपस्थिताक्रियातिङर्थं प्रति विशेष्या न तु तदर्थं
प्रतीव विशेषणमिति हि तस्यार्थः अत एव याचको व्रजतीतिवत् पचति व्रजतीति नैकं वाक्यं पाककर्तृकर्तृकं गमनं हि पाचक इत्यादेरर्थः एककर्तृका
पचिक्रियागमिक्रिया वा पचते व्रजत्यो पृथगेवार्थः एवं च प्रथमान्तविशेष्यको बोध इति नैयायिकोद्बोधो भाष्याद्यनुसारिभिर्नोदर्तव्यः यास्कोप्याह भाव
प्रधानमाख्यातं सत्त्वप्रधानानि नामानीति पश्य मृगो धावतीत्यादौ तु मृगकर्तृकं गमनं दृशिक्रियायां कर्म प्रधानं दृशिक्रियैव उक्तं च सुवन्तं हि यथाने
कं तिङन्तस्य विशेषणं तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषणमिति एवं पचति भवतीत्यस्य पचिक्रिया भवतीत्यर्थः अयं तु विशेषः तिङन्तोपस्थितायाः
क्रियायाः क्रियान्तरं प्रति विशेषणत्वेपि शब्दाध्याहारवादे कर्मत्वं संसर्ग एव न तु प्रकारः अपदार्थत्वात् अर्थाध्याहारवादे तु प्रकारत्वेपीष्टापत्तिः पचती

त्यादौ धातूपात्तफलस्यापीत्थमेवमभेदेन व्यवस्था अतएव तत्समानाधिकरणे शोभनं पचतीत्यादौ द्वितीयैकवचनोत्पत्तिः अग्निष्टोमेन यजेतेत्या
दौ तृतीयोत्पत्तिश्च संगच्छते न च दृष्टान्ते विशेष्यसमर्पकाद्दार्ष्टान्तिके विशेषणसमर्पकाच्च कर्मत्वादिवाचिकायाः सुप्विभक्तेः प्रयोगोऽस्त्विति वाच्यं धातु
तिङः तयोरप्रातिपदिकत्वात् नैयायिकानां तु स्यादेष दोषः तथा हि धावन्तं मृगं पश्येतिवत् धावति मृगमित्यपि स्यात् न च अप्रथमासामानाधिकरण्ये श
तृशानचोर्नित्यत्वात् मैवं प्रयोग इति वाच्यं एवमपि द्वितीयानुपपत्तेर्दुरुपपादत्वात् ननु तत्र वाक्यभेद एव पश्येत्यत्र तमिति कर्माध्याहारात् पचति भवतीत्या
दि तु पाको भवतीत्यादृशार्थे अनिष्टमेवेति चेत् मैवं अध्याहारे गौरवात् तस्य च मुनिवचनविरोधेनाप्रामाणिकत्वात् त्वदीयानिच्छामात्रस्याकिंचित्करत्वात् अ
पि च अपाक्षीद्देवदत्तो विहि इत्यादौ शत्रादेः प्रसंग एव नास्ति एकवाक्यत्वं च भाष्यवार्त्तिकादिसकलसंमतं न च तिङन्तस्थले क्रियाविशिष्टक्रियान्तरबोध
ने नायत एवेति वाच्यं तथैव व्युत्पन्नानां तादृशबोधस्य दुर्वारत्वात् ईदृशेऽर्थे साधुत्वं नेष्टमित्यपि न साधुत्वानुशासनार्थप्रवृत्तैरेव तत्स्वीकारात् धातु
संबंधाधिकारव्युत्पादितेन पुरीमवस्कंदेत्यादौ तस्यावश्यकत्वाच्च ननु सिद्धान्ते आख्यातवाच्यक्रियाया अपि कर्तृत्वस्वीकारे तस्या असत्वरूपत्वं भज्येत
ति चेन्न लिंगसंख्ययोः कर्त्तृकर्मेतरकारकस्य चाभावमात्रेण तथात्वोपपत्तेः कर्मत्वस्य प्रकारतयानभ्युपगमाद् इत्यन्यत्र विस्तरः अभिहितत्विति तिचे
नन्वेवं पक्वमोदनं भुंक्ते इत्यत्रापि द्वितीया न स्यादिति चेत् मैवं इह हि पचिभुजिनिरूपिते द्वे कर्मत्वशक्ती तत्र प्रधानक्रियानिरूपितां अनभिहितां शक्ति
मादाय द्वितीयोत्पत्तिः उक्तं च हरिणा प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक् शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते प्रधानविषया शक्तिः प्रत्ययेना
भिधीयते यदा गुणे न दा तद्वदनुक्तापि प्रतीयत इति अतएव पक्व ओदनो भुज्यते इत्यत्र भुजिप्रत्ययेनाभिहिते प्रथमैव प्र[illegible] प्राधान्यात् वस्तुतस्तु प
क्वाभुज्यत इत्यादौ कर्मणः पचिभुजिभ्यां न युगपत् क्त्वादौ अन्वयः किंतु अन्यतरेण शाब्दः अपरेणार्थः तत्र च प्रथमाद्वितीये [illegible] एवं तथा पक्वा
भुज्यते ओदनः किं पक्त्वा अर्थादोदनं यदा तु ओदनं पक्त्वा भुज्यते तदा भुज्यत इत्यत्र अर्थादोदन इति गम्यते एवं च विभक्तिसामानाधि[illegible]यितुं शक्यते हरि

हरिं चेत्युभयं साधु प्राप्तानंद इति आनंदकर्तृकप्राप्तिकर्मीभूत इत्यर्थः यदुक्तं प्रायेणेति तस्य फलमाह क्वचिदिति विषवृक्ष इति यदि तु वर्धिच्छिद्योरन्य-
तरेण सह कर्मतयान्वयो विवक्ष्यते तदा द्वितीया स्यादेवेत्यवधेयं तृणां स्पृशतीति यथा स्पृश्यमानस्य गंगादेरीप्सितस्य क्रियया प्राप्यमाणजन्यसंयोगादि-
फलाधारत्वात् तथैवानीप्सितस्य तृणादेरपीति भावः स्यादेतत् धातूपस्थाप्यफलशालि कर्मेत्येवास्तु किमीप्सितानीप्सितयोः पृथक्कथनेनेति चेत् मैवं अ-
ग्नेर्माणवकं वारयतीत्यत्र वारणार्थानामीप्सित इति सूत्रेण माणवकस्यापादानत्वं प्राप्तं तद्बाधाय कर्तुरीप्सिततममिति वक्तव्यमेव एवं च द्वेष्योदासीनयोः संग्रहा-
र्थं तथायुक्तमित्यस्याप्यावश्यकत्वात् अनीप्सितग्रहणं तु स्पष्टार्थमेव न त्वावश्यकं इदं त्ववधेयं ईप्सितानीप्सितयोः शाब्दबोधे एकरूपएव ईप्सितानीप्सिता-
देरधिशीङ्स्थासां इत्यादिवत् संज्ञाप्रवृत्तावुपयोगे पि द्वितीयावाच्यकोटावप्रवेशात् अनन्यलभ्यस्यैव शब्दार्थत्वात् कर्मणि द्वितीयेति सूत्रे हि तत्तत्सूत्रैर्यावतां कर्म-
संज्ञा विहिता ते सर्वेऽनेन रूपेणोपस्थिताः तेषु च विधीयमाना द्वितीया आधारवाचिका लाघवात् क्रियायां धातुना कर्तुश्च देवदत्तादिशब्देन लाभात् दृ-
ष्टत्वमत्वादेस्तु भानाभावात् प्रकृतिप्रत्ययार्थयोश्चाभेद इह संसर्गः तथा च हर्योधारिकायां प्रीतिस्तदनुकूलो व्यापारो वाक्यार्थः यद्यपि कर्मणि कर्त्तरि
ऽधिकरणे च विहितानां द्वितीयादीनामाधारोऽर्थ इति तुल्यं तथापि तन्निरूपकं फलं व्यापारः स्वाश्रयद्वारा तदुभयं चेति फलीभूते शाब्दबोधे लक्ष-
ण्यं संगच्छते न चाधारत्वेन वाच्येति मंतव्यं तन्निष्ठधर्मस्य वाच्यतावच्छेदकतापत्त्याऽतिगौरवात् कर्मणि द्वितीयेत्यादिसूत्रस्वरसभंगापत्तेश्च अत
एव भाष्यकार आह सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङामिति न च तिङ्क्ष्वापि धर्ममात्रमर्थः कर्त्तरि कृत् लः कर्मणि च तयोरेव कृत्यक्तखला-
र्था इति सूत्राणां नैरूप्यापत्तेः पाचको देवदत्तः पक्व ओदन इत्यादौ सामानाधिकरण्यानुरोधेन धर्मिवाचकतास्वीकाराच्च तस्मादिह घटादिशब्दनामि-
वविशिष्टमेव वाच्यं आकृत्यधिकरणाभ्युपगमे तु कृत्स्वपि धर्ममात्रं सर्वथापि नैयायिकमीमांसकाद्यभ्युपेतमर्द्धजरतीयं हेयमेव न हि तिङ्कृतोर्वैल-
क्षण्यं रूपपादं प्रपंचितं चेत्तच्छब्दकौस्तुभेऽस्माभिरित्यलमियता परिगणनमिति तेन नटस्य गाथां शृणोतीत्यादौ नातिप्रसंग इति भावः गां दोग्धीति गोसंबं-

धि पयः कर्मकं दोहनमर्थः स्यादेतत् कर्तुरीप्सिततमं कर्म तथायुक्तं चानीप्सितमिति सूत्राभ्यां गतार्थमेतत् तथा हि त्यजनोपसर्जनं त्याजनं दुहेरर्थः
क्षापने ऽंगीकरणं च याचेः विक्लेदनं पचेः इत्यादि एवं च धात्वर्थान्तर्व्यापारविषयीभूतं यत् त्यजनदानांगीकारादि तदाश्रयत्वं गवादीनां स्पष्टमेव अ
तएव हि [illegible] कर्तुर्णां कर्मत्वस्यान्यायसिद्धतया गत्यादिसूत्रं नियमार्थमिति प्राचां सिद्धांतः अत एव चाकडारसूत्रे अपादानमुत्तराणि गां दोग्धि पय इ
त्यत्र परत्वात्कर्मसंज्ञेति भाष्यं संगच्छते पंचकं प्रातिपदिकार्थ इति पक्षेऽवधित्वफलाश्रयत्वयोर्युगपत् विवक्षायां चेदं अवधिभूतायां गोस्तन्निष्ठो यः पयः क्षर
णानुकूलव्यापारस्तद्विशेष्यीणी गोपनिष्ठप्रेरणेत्यर्थात् तथा च अकथितं चेति सूत्रं व्यर्थमिति चेत् अत्रोच्यते कर्मणः शेषत्वेन विवक्षायां न माषा
णामश्नीयादितिवत् षष्ठीप्राप्तानां वाधितुमिदं सूत्रं तथा चेह षष्ठीवत्संवंधमात्रे द्वितीयार्थ इति स्थितं अपादानत्वमात्रविवक्षायां तु पंचम्येव गोः क्षी
रविशेषणत्वे तु षष्ठी तेन गोः पयो दोग्धीत्यपि प्रयोगः साधुरेव एवमग्रेऽप्यूह्यं यत्तु प्राचोक्तं दुह्याच्व्यर्थरुधिप्रच्छिचिब्रूशासु जिकर्मयुक् नीहृकृष्मथवह
दंडग्रहमुष्णं च कर्मभागिति अत्रेदं वक्तव्यं ग्रहेः पाठो निर्मूलः जग्राहयुत रू शक्रमित्युदाहरणमप्ययुक्तं इतरेषां तु द्विकर्मकत्वं यद्यपि प्रामाणिकं
तथापि संदर्भाशुद्धिः तथा हि दुह्यादीन् न्यादींश्च द्वैराश्येनेह पठित्वा भावकर्मप्रक्रियाशेषे लकृत्यक्तखलर्थाः किं द्विकर्मकेभ्यो मुख्ये कर्मणि स्युः गौणे वे
त्याकांक्षायां स्वयमेव पठितं न्यादयो गौणे तु निष्कर्मगत्यर्था मुख्यकर्मणि प्रत्यये यांति दुह्यादिर्गौणे न्ये तु यथारुचीति एवं च दंडिमंथिमुष्णामपि मुख्ये स्यात्
तथा च गर्गाः शतं दंड्यंतामिति भाष्यं विरुध्येत शतस्य त्र प्रधानं न गर्गाः अर्थिनश्च राजानो हिरण्येन भवंतीति वाक्यशेषात् [illegible] ग्रहणार्थो न तु
निग्रहार्थः अत एव यत्र समुदाये वाक्यसमाप्तिः गुणानुरोधेन प्रधानावृत्तेरसंभवात् तथा मंथेरपि प्रधाने स्यात् इष्यते तु [illegible] तथा च मारविः येनापविद्ध
सलिलस्फुटनागसद्मा देवासुरैरमृतमंवुनिधिर्ममंथे इति अत्रामृतं मुख्यं उद्देश्यत्वात् अंवुनिधिस्तु गौणः यदपि व्याख्यातं [illegible] द्विकर्मकेषु पचे
र प्रामाणिकः पाठ इति तद्भ्रमात् तथा हि कर्मवत्कर्मणेति सूत्रे दुहिपच्योर्वहुलं सकर्मकयोरिति वार्त्तिके न द्वाभ्यां च पचेर्द्विकर्मकता [illegible] न्यते कैय्यटहर

दत्ताभ्यांचतत्रैवस्फुटीकृतामाधवोव्याह जयतेः कर्षतेर्मथ्येर्मुषेर्दंडयतेः पचेरित्यादि उदाजहार च तंडुलानोदनं पचतीति यत्तु अकथितं चेति सूत्रे हरदत्ते
नोक्तं अकथितशब्दो यद्यप्रधानार्थो गृह्येत तदा पाणिना कांस्यपात्र्यां दोग्धि पय इत्यत्र पाणिकांस्यपात्र्योरपि स्यात् करणाधिकरणयोस्तु पचत्यादिरवका
शः नहिति तत्रास्य प्रसंगो दुहादिपरिगणनादिति तन् मतांतराभिप्रायेण अन्यथा उदाहृत स्वपरग्रंथविरोधादित्यास्तां तावत् शतं जयतीति जि अभिभवे यत्तु जि
जय इति व्याख्यानं तन्न तस्याकर्मकत्वात् यद्यपि जयत्यादयो भाष्ये न पठितास्तथापि चकारेण संगृह्यंत इति कैयटः अर्थनिबंधनेति ननु स्वरूपाश्रया अह
मपीदमकार्षं नायद्गु इति तद्राजसूत्रभाष्ये रुठिपर्यायस्य चुदेरपि द्विवमेकत्वदर्शनादिति भावः तथा च भट्टिः स्यास्तु रणे स्मेरमुखो जगाद मारीचमुच्चैर्व
चनं महार्थं कालिदासोपि शिलोच्चयोपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव भारविश्च उदारचेता गिरमित्युदारां द्वैपायनेनाभिदधे नरेंद्र इति एवं चा
नाथत्यादयो बहवो द्विकर्मका बोध्याः देश इति कुरुपंचालादिरेवेह गृह्यते तेनाधिशीङ्स्थासामित्यादेर्नैवैयर्थ्यं गोदोहमिति न चेह कालत्वासिद्धिः लोके का
लत्वेन प्रसिद्धस्य मासादेरेव ग्रहणात् तेन घटमास्त इत्यादि न भवति यत्तु प्राचोक्तं अकर्मकधातुभिर्योगे देशकालाध्वभावेभ्यो द्वितीयेति केचित् नदीमास्त
इत्यादि अत्रेदं वक्तव्यं कर्मसंज्ञाया अनुक्तत्वात्कर्मणि लादयो न स्युः आस्यते मास इति यथा केचिदित्यप्यसंगतं द्वितीयाया नाप्यसंमतत्वात् नदीमित्युदाहर
णमसंगतं ग्रामसमूहं कुर्वादिरेव देशः ननु प्रदेशमात्रं तेन ग्रामं स्वपितीति न भवतीत्याकरात् अध्वेति चन्मूनं अध्वानं स्वपितीति प्रसंगात् अत एवाकरे
अध्वा गंतव्यत्वेन विवक्षितः गंतव्यत्वेन प्रसिद्धो नियतपरिमाणः क्रोशादिरिति च व्याख्यानं गतिबुद्धिप्रत्यवसानं भक्षणं शब्दकर्मकाणामिति शब्दः कर्म
कारकं येषां तेषामित्यर्थः न त्विह कर्तरि कर्मव्यतिहार इतिवत् कर्मशब्दः क्रियापरः कृत्रिमे कार्यसंप्रत्ययात् कर्मग्रहणसामर्थ्याच्च अन्यथा हि गतिबु
द्धिप्रत्यवसानशब्दार्थाकर्मकाणामित्येवावक्ष्यत् नियमार्थं चैतत्सूत्रमिति प्राचः णिजर्थेनाप्यमानस्य यदि भवति तर्हि गत्यर्थादीनामेव कर्तुरिति तेन पा
चयति देवदत्तो यज्ञदत्तेनेत्यत्र प्रयोज्ये प्रकृत्यर्थं प्रति कर्तृत्वस्यैव निरपवादत्वेनावस्थानात् तृतीया सिध्यतीति उक्तं च गुणक्रियायां स्वातंत्र्यात् प्रेषणे कर्म

त्रां गतः नियमात्कर्मसंज्ञायास्स्वधर्मेणाभिधीयते इति कर्तुः स्वधर्मेणानृतीयये त्यर्थः ननु णिजर्थं प्रतिकर्मत्वं बाधित्वा प्रकृत्यर्थं प्रतिकर्तृत्वं परत्वात्स्वस्मि
न्नन्तरंगत्वाच्च स्वकारकविशिष्टा हि क्रिया णिजर्थेन संबध्यते हेतुमति णिज्विधानात् कर्तृप्रयोजकस्य हेतुत्वात् अतएवोपजीव्यापि कर्तृसंज्ञा एवं च परत्वा
दंतरंगत्वादुपजीव्यतयापि च प्रयोज्यस्यास्तु कर्तृत्वं गत्यादेर्विधितो वितेति चेत् अस्त्वेवं लक्ष्यस्य निर्बाधत्वात् नियमसूत्रमिदमिति ग्रंथानां का गतिरि
ति चेत् शृणु णिजर्थस्य शाब्दं प्राधान्यं पुरस्कृत्य प्रधानानुरोधिन्यां कर्मसंज्ञायाः प्राबल्यात् विप्रतिषेध एव नास्ति अंतरंगोपजीव्यत्वे अपि प्रधानं प्रति न प्राबल्यं
प्रयोजयतः इत्याशयेन ग्रंथानामुक्ति संभवः अर्थप्राधान्यपुरस्कारे तु विधायकत्वमेवोचितमिति ध्येयं शत्रूनिति स्वर्गकर्मकं शत्रुनिष्ठं यद्गमनं तदनुकू
लो यन्निष्ठो व्यापारः स श्रीहरिर्गमितिरित्यर्थः नन्विह कथं स्वर्गस्य कर्मत्वं कर्तुरीप्सिततमं हि कर्म न च शत्रवः कर्तारः तेषां गत्यादिसूत्रेण कर्मत्वादिति चे
न्नैवं कर्मसंज्ञायां हि कर्तृग्रहणं स्वतंत्रस्योपलक्षणं स्वातंत्र्यं च धातूपात्तव्यापाराश्रयत्वमेव तच्च प्रयोजकसंनिधानेपि प्रयोज्यस्यास्त्येव न चोपलक्ष
णत्वे प्रमाणाभावः प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणां अप्रधाने दुहादीनां इत्युक्ताण्यंते कर्तुश्च कर्मण इति वदतो भाष्यकृत एव तत्र प्रमाण
त्वात् न हि लक्षणां विना णिजंतानां द्विकर्मकता लभ्यते येन ण्यंते कर्तुरिति वचनं सावकाशं स्यात् ननु स्वतंत्रे संकेतितस्य तत्रैव लक्षणा कथमिति चेत्सं
ज्ञांतरमनुपदिश्य संकेतितस्य तु स हि तत्साधारणे स्वतंत्रमात्रे सेत्यवधेहि नीवह्योरिति यद्यप्यनयोः प्रापणमर्थो न गतिस्तथापि गतिरपि विशेषणीभूय प्रा
पणमध्ये प्रविष्टेत्येतावन्मात्रेण प्राप्तिं मत्वा प्रतिषेध उक्तः नियंत्रिति नियंता पशुप्रेरकः ननु सारथिरेव तेन वाहयति [illegible] न्यवान् इति सिध्यति अप्र
तिषेध इति प्रयोज्यः कर्मेति वक्तव्यमिति फलितोर्थः सूत इति नियंता प्राजिता यंता सूतः क्षत्ता च सारथिः आदयतीति अकर्त्रभिप्रायफले शेषात्कर्तरी
ति परस्मैपदं कर्त्रभिप्राये तु णिचश्चेत्यात्मनेपदमेव तदपवादस्य निगरणचलनार्थेभ्यश्चेत्यस्य अदेः प्रतिषेध इ[illegible] स्यमिति क्षेत्रस्थानां
यवानां भक्ष्यमाणानां हि सा दृष्टव्या तस्यामवस्थायां तेषां चेतनत्वात् स्मारयतीति यत्नुणोरणाविति सूत्रे स्मरयत्येनं वनगुल्मः स्मरयमे[illegible]दाह्रियते तत्र भाष्य

म·सु· ५१

यद्यपि धनुकर्तृकं जायानिष्ठप्रेरणाविषयीभूतं यत्प्रतिग्रहणं तत्कर्मीभूते गंधमाल्ये इति विग्रहार्थः तथापि ७
प्रयोगादेवकर्मत्वं बोध्यं शब्दायते रिति शब्दं करोतीत्यर्थे शब्दवैरेत्यादिना क्यङ् ततो हेतुमति णिच् धात्वर्थेति एतेन शब्दाययति सैनिके रिपूनिति कर्मप्र
युंजानाः पराक्षाः यत्तु प्राचा अयत्र्कोदशब्दायस्त्वेगोनेत्युक्तं तत्र अयते रूक्तिस्तावन्निर्मूलैव क्रोदद्वेगो स्तु शब्दक्रियात्वमात्रेणाप्राप्तिसंभावना वस्तुतस्तु
नासौ सूत्रार्थः इत्युक्तं यदपि श्रुग्रहदृशामिति कर्मत्वमुक्तं तत्र दृशिग्रहणं प्रामाणिकमेव शृणोतेस्तु शब्दकर्मकत्वात्सिद्धं ग्राहेस्तु द्विकर्मकत्वं यद्यपि सु
धाकराद्रीनां संमतं तथापि बहूनामसंमतं अत एव अजिग्रहत्तं जनको धनुस्तत् इति भट्टिप्रयोगं अजिग्रहत् बोधितवान् इति व्याचख्युः तथा अयाचितारं
नहि देवदत्तं मद्भिः सुतां ग्राहयितुं शशाक इत्यत्र ग्राहयितुं उद्वाहत्वेन बोधयितुमिति युक्तं चैतत् ग्राहेर्द्विकर्मकत्वे हि जायाप्रतिग्राहितं गंधमाल्यामित्या
त्रक्तेन प्रयोज्यायां धेनोरभिधानं स्यात् एवं तेकर्तृश्च कर्मण इत्युक्तेः ततश्च जायया गंधमाल्ये प्रतिग्राहितामिति स्यात् सिद्धांते तु प्रतिग्राहिते गंधमाल्ये
ययेति विग्रहः जायानिष्ठप्रेरणाविषयीभूतं गंधमाल्यकर्मकं यत्प्रतिग्रहणं तत्कर्त्रीमित्यर्थः अन्यपदार्थो नभोवेणोवविशेषणविशेष्यभाववैपरीत्येनैवै
कार्थीभावकल्पनात् अभिवादिदृशोरिति अभिवादयतेरप्राप्ते दृशेस्तु प्राप्ते विभाषेयं अभिनिनेरत्वात् तरत्वेन पूर्वनिपाते कर्तव्ये विपरीतोच्चारणं ईदृ
शसमुदायविवक्षार्थमित्याह संघातपूर्वस्येति नेनेहन निविशते यदि शू कशिखापद इति क्वचिन्नेति एष्वर्थेष्वभिनिविष्टानामिति भाष्यप्रयोगश्चेहं
प्रमाणं उपपदविभक्तिमाह उभसर्वतसोरित्यादिना उभसर्वयोस्तसौ उभसर्वतसौ तदंतयोर्योगे द्वितीया कार्येत्यर्थः अत्र प्राचः उभशब्देनोभयशब्दो लक्ष्य
ते अन्यथा तसोऽसंभवात् इत्याहुः वस्तुतस्तु वृत्तिविषयेऽयच्प्रवृत्तावपि उभशब्दाद्विहितो यस्तस्तदंतमस्त्येवेति यथाश्रुतं साधु धिगित्यविभक्तिको निर्दे
शः गवित्ययमाह्नेतिवदिति प्राचः तन्न तथा सति अपदांततया दृष्टांते लोपः शाकल्यस्येत्यस्यैव दार्ष्टांतिके जत्वस्यापि अप्रवृत्तिप्रसंगात् न्वायंगाका
रांत एवेति भ्रमितव्यं कस्य च द इति सूत्रे धिक्कि दित्युदाहरणस्य असंगतिप्रसंगात् तस्मात् धिगिति विभक्त्यंतमेव प्रकृतिवदनुकरणमित्यतिदेशात् सुपो
लुक् उभयतः कृष्णमिति कृष्णस्य पार्श्वद्वयेपीत्यर्थः आद्यादित्वात् तसिः षष्ठ्यर्थे द्वितीया एवमुपपदविभक्तौ सर्वत्र बोध्यं नाम्नो द्वितीयेव संबंधः सर्ववाक्ये

व्यवस्थितः सामानाधिकरण्येन षष्ठ्या वापि क्वचिद्भवेत् इति वृद्धोक्तौ षष्ठीग्रहणं तदपवादविभक्तेरप्युपलक्षणं हि द्विधेत्युक्तिः सामानाधिकरण्यवैयधि
करण्याभ्यां निर्वोढ्वा षष्ठी तदपवादयोरेककोटितया वा धिकृत्वा भक्तमिति तस्य नियतेत्यर्थः कथं पिङ्गमूर्खेति संबोधनपदस्य क्रियान्वय इति प्रागेवो
क्तनया [struck] शब्दयोगाभावात्क्रियापदं च क्वचिच्छ्रुतं क्वचिदाक्षिप्तमित्यन्यदेतत् तथा च मूर्खसंबोध्यकं निषिद्धाचरणादि निंद्यमिति वाक्यार्थः एतेन हाता
नहादेवि धीरा भवेत्यादि व्याख्यातं यत्त्वाहुः उपपदविभक्तेः कारकविभक्तिर्बलीयसीति संबोधने प्रथमैव भवति संबोधनपदस्य कर्तृकारकवाचित्वादि
तितन्मंदं संबोधनस्य कर्त्रेकारकत्वेउक्तिसंभवाभावात् देव प्रसीदेत्यादौ वस्तुगत्या देव एव कर्त्तेति चेत् नैतावता कारकविभक्तित्वं लभ्यते किंच देव त्वां भ
जे त्वां भजंतीत्यादौ संबोध्यनस्य वास्तवमपि न कर्तृत्वमित्यास्तां तावत् उपर्युपरीति कथं तर्हि उपर्युपरि बुद्धीनां चरंतीश्वरबुद्धयः उच्यते उपरिबुद्धीनां उ
त्तानबुद्धीनां उपरि चरंतीत्यर्थः एवं चाम्रेडितत्वाभावान्न द्वितीया यद्वा प्रतिपदोक्तस्योपर्यध्यधसः सामीप्य इति कृतद्वित्वस्यात्र ग्रहणं तेन वीप्सा
द्विर्वचने सति नास्य प्रवृत्तिः अन्यत्रापि दृश्यत इत्युक्तं तद्दर्शयति अभितः परित इति प्रति भातीति एष प्रतिशब्दः क्रियाविशेषकत्वादुपसर्गः न तु क
र्मप्रवचनीयः अंतरा त्वां मामिति तव मम च मध्ये इत्यर्थः सामर्थ्यादिति अत एव हेतुत्वपर्यंतमपि शाब्दबोधविषय इति स्वीक्रियत इति भावः नदीम
न्विति द्वितीयाया [struck] संबंधोऽर्थः स चेह साहित्यरूप इति अनुना द्योत्यते लक्षणेत्थं वृक्षं प्रतीति वृक्षसंबंधि द्योतनमर्थः संबं[illegible]स्य लक्षणाभाव इति प्र
त्यादयो द्योतयंति भक्तो विष्णुं प्रतीति विष्णोर्भक्तेश्च विषयविषयिभावः प्रत्यादिद्योत्यः लक्ष्मीरिति लक्ष्मीरूपस्य भागस्य हरिणा सह स्वस्वामिभावः वृक्षं वृ
क्षमिति इह वीप्सा द्विर्वचनेनैव द्योत्यते परिशब्दस्तु क्रियया संबध्यते कर्मणि द्वितीया कर्मप्रवचनीयसंज्ञया उपसर्गसंज्ञा[illegible]बाधात् [illegible]त्वं न एतदर्थमेव
लक्षणादयो विषयतयोपात्ता इति व्याख्यातमा[illegible] म्यपाङ्‌ परिभिरिति तु न भवति वर्जनार्थेनापेत्यनेन साहचर्यात [illegible]निष्यादिति मम भागः ।
स्यादित्यर्थः मामभिष्यादित्यपि प्राचः प्रत्युदाहरंति तत्र मां प्राप्नुयादित्यर्थः उपसर्गवशेन अस्तेः सकर्मकत्वान्मामिति द्वितीया अत्र मम भाग इत्यर्थेतः

पर्यवसानात् अभागे इति कर्मप्रवचनीयत्वेन निषिद्धे उपसर्गप्रादुर्भ्यामिति षत्वं पूजायां चेति सुः पूजायामिति पूर्वसूत्रात् पूजाग्रहणमनुकृष्यते कालाध्वा
नोः अंतविषमम् अतिक्रांतो अत्यंतः सवासो संयोगः निरंतरसंनिकर्ष इत्यर्थः द्वितीयास्यादिति श्रुतत्वात् कालाध्ववृत्तिभ्यामेव समासः सेति कृत्वोऽर्थप्रयोगे
कालेऽधिकरणात् इति षष्ठीत्याहुः तन्न तत्र शेषग्रहणानुवृत्त्या द्विरन्हो भोजनमिति कृदंतेन सह समासनिवृत्तेरेव फलत्वात् तस्मादिह षष्ठी शेष इति सू
त्रेणैव षष्ठीति तत्वं ॥ इति द्वितीया ॥ स्वतंत्रः कर्ता ॥ प्रधानीभूतधात्वर्थं प्रति आश्रयत्वं स्वातंत्र्यं आह च धातुनोक्तक्रिये नित्यं कारके कर्तृतेष्यत इति सा
धकतमं [illegible] प्रकृष्टेति यद्व्यापारानंतरं क्रियानिष्पत्तिस्तत्प्रकर्षः उक्तं च क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनंतरं विवक्ष्यते यदा यत्र करणं तत्तदा स्मृत
मिति विवक्ष्यत इत्यनेन स्थाल्यादीनामपि वैवक्षिकं करणत्वमस्तीति ध्वनयति आह च वस्तुतस्तदनिर्देश्यं नहि वस्तु व्यवस्थितं स्थाल्या पच्यत इ
त्येषा विवक्षा दृश्यते यत इति अयं भावः कारकत्वं तद्व्याप्यकर्तृत्वादिषट्कं च वस्तु विशेषे विशेषणविशेष्यभाववत् व्यवतिष्ठते नहि गौः सर्वं प्रति गो
रेव ननु कं चित्प्रत्यगौरिति वत् विशेषणं विशेष्यमेवेति सुवचं तथा चक्कयाचित् धातुव्यक्त्या उपस्थापितेऽर्थे किं कर्त्रादिकमिति प्रश्ने प्रकृतव्युत्
पत्तव्यापाराश्रयतया विवक्षितः कर्ता व्यापारव्यधिकरणफलाश्रयः कर्म कर्तृकर्मद्वारकसंबंधेनाश्रयोऽधिकरणं पच्यर्थो व्यापारस्त्वनेकधा ए
वं च पचेरधिश्रयणं तंडुलावपनं एधोपकर्षणादि तात्पर्यकत्वे तदाश्रयो देवदत्तः कर्ता ज्वलनतात्पर्यकत्वे एधाः कर्तारः तंडुलधारणादिपरत्वे स्था
ली कर्त्री अवयवविभागादिपरत्वे तंडुलाः कर्तारः स्थाल्या पचतीत्यत्र तृतीयोपात्तव्यापाराश्रयोऽपि स्थालीकरणमेव ननु कर्त्रादिवत् स्तंभादि व्यापार
स्यैव तद्वाच्यत्वात् तथा आदिखादिभ्यामुपात्तेऽर्थे प्रयोज्यः कर्ता तस्मिन्नेवार्थे भक्षयतिनोपात्ते कर्म अधिपूर्वैः शीङादिभिरुपात्तेऽर्थे आधारः क
र्मे केवलैरुपात्ते अधिकरणमित्यादि एतेन ज्ञानस्य स्वप्रकाशकत्वे कर्तृकर्मविरोध इत्यादि परास्तं शब्दविशेषोपाधिकस्य कर्तृत्वादेः प्रत्यक्षादौ उक्ति
संभवाभावात् एतेन परस्मैपदे नक्रियाजन्यफलशालि कर्मत्वं चेत् अपादानेऽतिव्याप्तिरिति आशंक्य धात्वर्थतावच्छेदकफलशालित्वं तदिति परिष्कुर्व

तेति [illegible] कां ग्रामंगमयतिदेवदत्तमित्यादौगंतरिअव्याप्तेःतन्मतेगमनस्यप्रकृत्यर्थत्वेपितथात्वानवच्छेदकत्वात् तत्रणिचोव्यापारार्थत्वंननुप्रा
[illegible] वापाचयत्यादिप्रयोज्यकर्तर्येतिव्याप्तेःतत्रपारिभाषिकमनुशासनोपयोगिकर्मत्वंवचनबलाद्व्यवस्थितमितिचेत् अपादानेपितर्हितन्ना
स्तीत्यवधेहिएकसंज्ञाधिकारेअनवकाशयासावकाशायाबाधात् अतएवात्मानमात्माहंतीत्यादौपरयाकर्तृसंज्ञयाकर्मसंज्ञाबाधमाशंक्याहंकर्मादि
विशिष्टात्मभेदमाश्रित्यसमाहितंभाष्ये रामेणेति इहयद्यपिविभक्त्युपस्थितानांकारकाणांक्रियांप्रतिविशेषणत्वेनतथापिकृदुपस्थितानांविशेष्यत्वेन
सत्वप्रधानानिनामानीत्युक्तेः धातूपस्थाप्ययोःफलव्यापारयोरपिकर्मकृत्समभिव्याहारेविशेषणविशेष्यभावव्यत्यासःतथाचरामनिष्ठोयोव्यापार
स्तद्विषयीभूतबाणव्यापारसाध्यप्राणवियोगाश्रयोवालीतिवाक्यार्थःयत्तुवाजपेयाधिकरणेमीमांसकैःकृत्तंकाष्ठैःपाकइत्यपिस्यादितितदिष्टापत्ति
ग्रस्तंकर्तृकरणेकृताबहुलंकर्तृकर्मणोःकृतीत्यादिसूत्राणांकृत्प्रकृत्यर्थेनकारकान्वयंविनाउक्तिसंभवस्यैवाभावादितिसुधीभिराकलनीयंअना
भिहितेकिंहरिःकरोतिजीवंयनेनजीवनःशाब्दिकःशब्दंदर्दुरंकरोतीतिठक्कृतंविश्वंयेनकृतविश्वःविश्वकर्मकृत्याश्रयइत्यर्थः अषष्ठ्यर्थबहुव्री
हौलुक् अन्यपदार्थंनरस्वीकारात् यथाचैतत्तथावक्ष्यते प्रकृत्यादिभ्यइति आकृतिगणोयंतेननाम्नासुतीक्ष्णश्चरितेनदीनइत्यादिबोध्यं द्वयोर्द्रोणयोःसमाहारः
द्विद्रोणंपात्रादित्वात् स्त्रीत्वाभावः द्रोणद्वयसंबंधिधान्यमित्यर्थःचादितिकरणशब्दानुवृत्त्यापरिक्रयणेसंप्रदानमित्युत्तरसूत्रस्यान्यतरस्यांग्रहणा
पकर्षणेनप्रसिद्धयोःपर्यायेलब्धेसमावेशार्थश्चकारःतेनमनसादीव्यतीतिमनसादेवइत्यत्रकर्मण्यण् करणेतृतीयाचेत्युभयंसिध्यतिमनसःसंज्ञा
यामित्यलुक् किंच अक्षैर्देवयतेयज्ञदत्तेनेत्यत्रसकर्मकत्वाद्गतिकर्तुर्णौकर्मत्वंनअणावकर्मकादितिपरस्मैपदंचनेतिसिद्धांतःयत्तुप्राचाकर्मसंज्ञावा।
स्यादितिव्याख्यातंतदाकरविरोधादुपेक्ष्यंस्यादेतत् करणसंज्ञायाअवकाशःदेवनाअक्षाःकरणेल्युट् कर्मसंज्ञायास्तुदीव्यंतेअक्षाःकर्मणिलट् अक्षैर्दी
व्यतीत्यत्रतुसंज्ञाद्वयप्रयुक्तकार्यद्वयप्रसंगेपरत्वात्तृतीयैवस्यात् ननुद्वितीयेतिचेत् अत्राहुःकार्यकालपक्षेकर्मणिद्वितीयेत्यत्रपदस्योपस्थानंतस्यान

वकाशत्वात् द्वितीयेति ननु दीव्यंतेऽक्षा इत्यत्र कर्मण्यभिहितेपि करणत्वस्यानभिधानात् तृतीया स्यात् तथा देवना अक्षा इत्यत्र स्युटा करणस्याभिधाने
पि कर्मणोनभिधानात् द्वितीया स्यात् मैवं एकैव ह्यत्र शक्तिः संज्ञाद्वयोपगिनी तथा च उभयत्राप्यभिधानमेव न त्वनभिहितत्वं सहयुक्ते पुत्रेणेति पितुर
त्र क्रियासंबंधः शाब्दः पुत्रस्य तु आर्थ इति तस्याप्राधान्यं अप्रधानग्रहणं शाक्यमकर्तुं न चैवं पितुरपि तृतीयापत्तिः तत्र प्रातिपदिकार्थमात्रेऽन रंगत्वा
त्प्रथमोपपत्तेः पितुरागमनमित्यादौ कारकविभक्तेः प्राबल्याच्च येनांगविकारः अंगशब्दः अर्शआद्यजंतः तदाह अंगिन इति येनेति सर्वनाम्ना प्रकृत्यर्थ
भूतोऽवयव उपलक्ष्यते संनिधानात् स्वार्थो हि कृत एव गृह्यते न ह्यविकृतेनावयवेन शरीरस्य विकारः संभवति तदेतदाह येनांगेन विकृतेनेति संजानीत इ
ति संप्रतिभ्यामनाध्यान इति तङ् कृद्योगे परत्वात् षष्ठी पितुः संज्ञानाय तु हरदत्तेनोक्तं आध्याने परत्वात् अधीगर्थेति षष्ठी मातुः संजानातीति तन्न तत्र शे
षाधिकारात् द्रव्यादीति उक्तं च द्रव्यादिविषयो हेतुः कारकं नियतक्रियमिति अनाश्रिते तु व्यापारे निमित्तं हेतुरिष्यत इति च फलमपीति एतच्च प्रत्या
य इति सूत्रे कैयटे स्पष्टं एवं च नारथ्ये चतुर्थ्याः सहे यं तृतीया विकल्प्यते अध्ययनाय वसति अयं तु विशेषः अध्ययनस्य फलेनेहाभेदः संसर्गः उप
कारकत्वेन सह तु निरूपकतेति गम्यमानेति ननु श्रूयमाणेवेत्याग्रह इति भावः साधनेति साध्यमित्यत्र प्रकृतिभागस्यार्थे प्रतीतिभावः मा चापलायेति ग
णान्ब्य नैषीदित्यत्र तु यतध्वमिति शेषः अशिष्टेति एतच्च दाणश्च सा चेच्चतुर्थ्यर्थे इत्यनेन ज्ञाप्यते इति तृतीया अन्वर्थसंज्ञाबलेनाह दानस्येति ते
न अजां नयति ग्रामं हृत्कं निदधाति वृक्षे इत्यादौ नातिप्रसंग इति भावः दानं च अपुनर्ग्रहणाय स्वत्वनिवृत्तिपूर्वकं परस्वत्वोपादनं अत एव रजका
य वस्त्रं ददातीत्यादौ न भवति तत्र हि ददातिर्भाक्तः एतच्च वृत्तिसूत्रं भाष्यमते तु नान्वर्थतायामाग्रहः खंडिकोपाध्यायस्तस्मै चपेटां ददातीति प्रयोगात्
रजकस्य ददातीति तु शेषत्वविवक्षायां बोध्यं न चैवमजां नयति ग्राममित्यत्रापि प्रसंगः यमभिप्रैतीत्युक्त्याहियमिति निर्दिष्टस्य शेषित्वं कर्मणश्च
[illegible]प्यते ग्रामस्य च अजां प्रति शेषित्वं नास्ति दानीय इति बाहुलकात् संप्रदानेऽनीयर् रुच्यर्थानां प्रीयमाणः प्रीञ् तर्पणे अस्मात्कर्मणि लड् हरे

[illegible] तेइति हरिंप्रीणयतीत्यर्थः कर्मसंज्ञायांप्राप्तायांवचनं प्रीयमाणः किंदेवदत्तायरोचतेमोदकः पथि अत्रपथोमाभूत् श्लाघन्हुङ्श्लाघामु
त॰ [illegible] श्लायश्लाघतेकृष्णंस्तौतीत्यर्थः अन्येत्वाहुः कृष्णायात्मानंपरंवाश्लाघ्यंकथयतीत्यर्थइति तत्राद्येपक्षेकर्मत्वप्राप्तेद्वितीयेनुकारकशेषत्वा
त्षष्ठ्यांप्राप्तायांवचनंह्नुतइति सपत्नीभ्यःकृष्णंह्नुवानातयान्हुत्यातमेवार्थंकृष्णंबोधयंतीत्यर्थः यस्यकस्यचित्न्हुतमितिवा तिष्ठतइति स्थित्या
स्वाभिप्रायंबोधयतीत्यर्थः प्रकाशनस्थेयाख्ययोरितितङ् धारेरुत्तमर्णः षष्ठ्यांप्राप्तायांवचनं स्पृहेरीप्सितः परत्वादिति तेनपरस्परेणास्पृहणीयशो
भंस्पृहणीयगुणैर्महात्मभिः इत्यादिसिद्धंयदातुशेषत्वविवक्षातदाषष्ठी तेनकुमार्यइवकांतस्यत्रस्यंतिस्पृहयंतिचेतिसिद्धं एतच्चसर्वंहरदत्तादिरी।
त्योक्तंवाक्यपदीयहेलाराजग्रंथयोःस्पृहयतियोगेकर्मसंज्ञायाःशेषषष्ठ्याश्चबाधिकेयंसंप्रदानसंज्ञेतिस्थितं तन्मतेस्पृहणीयमित्यत्रदानीयइतिव
त्संप्रदानेकृत्यः कुमार्यइत्यत्रतुविभक्तिविपरिणामेनकांतायस्पृहयंतीतिव्याख्येयंक्रुधद्रुहक्रुधकोपेद्रुहद्रोहे ईर्ष्यईर्ष्यायां असूयतिकंड्वादिय
गंतएषामर्थइवार्थोयेषांधातूनामित्यर्थः तत्रक्रोधोऽमर्षः द्रोहोपकारः इर्ष्या असहनं असूयागुणेषुदोषारोपः क्रुधद्रुहोरकर्मकत्वात्तद्योगेष
ष्ठीप्राप्ताश्रत्ययोः सकर्मकत्वाद्द्वितीयाप्राप्ताराधीक्ष्योःकारकमितिकर्मकारकमितितुप्राचःप्रमादःएकसंज्ञाधिकारात् नचप्राथमिकप्राप्तिमात्राभि
प्रायेणकर्मैकदेशः कृष्णसंबंधिशुभाशुभंपर्यालोचयतीत्यर्थाभ्युपगमेनषष्ठ्याएवप्राप्तेः अनुप्रतिगृणइतिश्रांतस्यानुकरणात्षष्ठीहोत्रेइतिका
र्मत्वेप्राप्ते परिक्रयणेक्रयोधनाद्यर्पणेनात्यंतिकस्वीकरणं तस्यसमीपंपरिशब्दआचष्टेतच्चनियतकालं ततोन्यूनत्वादितिव्याचष्टेनियतेतिभृत्या
वेतनादिना तादर्थ्यइति तस्मैकार्यायेदंतदर्थंकारणं तस्यभावस्तादर्थ्यंषष्ठ्यंताउपकारकत्वरूपःसंबंधोभिधीयतेकृत्तद्धितसमासेभ्यःसंबंधाभिधानं
भावप्रत्ययेनेतिसिद्धांतात् उपकारकत्वंचअनेकधा तेनब्राह्मणायदधीत्यादावपिभवतिभक्तिर्ज्ञानायेति ज्ञानात्मनापरिणमतइत्यर्थः प्रकृतिविकृत्यो
र्भेदविवक्षायांविकृतिवाचकाच्चतुर्थी अभेदविवक्षायांतुपरत्वात्प्रथमैवभक्तिर्ज्ञानंकल्पतइति यदातुजनिकर्तुरितिभक्तेरपादानत्वंविवक्ष्यतेतदाज्ञा

नस्याभिहितकर्तृत्वात्प्रथमैव भक्तेर्ज्ञानंकल्पते क्लृपीत्यर्थग्रहणमित्याशयेनाह संपद्यतइत्यादि उत्पातेनेति प्राणिनांशुभाशुभसूचकोभूतविका
र उत्पातः तेनज्ञापितेऽर्थेवर्तमानाचतुर्थीत्यर्थः वातायेति वातस्यज्ञापि[illegible]र्गः हितेति समासविधानात् ज्ञापकादितिभावः एवंसुखयोगेपिबोध्यंतु
मुन्ण्वुलौक्रियायामितिसूत्रमक्लिष्टक्रियार्थकमुपपदंक्रियावाच्येवफलतीत्याशयेनाह क्रियेति क्रियाफलकंक्रियावाचकप्रकृतिकमित्यर्थः तुमुन्
इति ण्वुलोप्युपलक्षणं फलेभ्योयातीत्यस्यफलान्याहरकइत्यपिविवरणेबाधकाभावात् कर्मणीति तथाचद्वितीया— पवादोयमितिभावः यत्तुप्राचा
व्याख्यातंअप्रयुज्यमानस्यैवकर्मणियथास्यात्प्रयुज्यमानस्यमाभूदितिनियमार्थंसूत्रमिति तन्न अप्राप्तस्यनियमायोगात् नच तादर्थ्येइतिप्राप्तिःनहि
फलार्थोयानक्रिया किंत्वाहरणार्थो आहरणंतुफलकर्मकमित्यन्यदेतत् तुमुनोभावएवविधानात्तदर्थस्यभाववचनत्वेसिद्धेपुनर्भाववचनग्रहणं।
सूत्रविशेषपरिग्रहार्थमित्याह इतिसूत्रेणेति नचतादर्थ्येइत्येवगतार्थताशंक्याभाववचनेनैवतुमुनेवतादर्थ्यस्यद्योतितत्वात्प्रातिपदिकार्थमात्रेप्र
थमाप्रसंगात् यत्तुप्राचोक्तंभाववचनादेवयथास्यात् पाचकोव्रजतीतिण्वुलंतान्माभूत् इतिनियमार्थमिदंसूत्रमिति तन्नण्वुलंतेकर्तुःप्राधान्यात्क
र्तारंप्रतिचतादर्थ्याभावात् गुणीभूतपाकस्यचविभक्त्यर्थानन्वयात् ननुषष्ठ्यपीतिकुतः षष्ठ्येवास्तु अलंशब्दस्तुपर्याप्तिनिरार्थकएवगृह्यतामि।
त्याशंक्याह तस्मैप्रभवतीति दत्वातृणमित्यादि नतुतृणादिवत्युष्मच्छब्दादपिपक्षेचतादर्थ्याभाव्यमेवं अनादरइतिकर्मणोविशेषणंअनादरद्योत।
कंयत्कर्मेति तादृशंचतृणमेवनतुयुष्मदर्थः इतिचतुर्थी ध्रुवमिति ध्रुगतिस्थैर्ययोः अस्मात्कुटादेःपचाद्यच्ध्रुवस्थैर्ये इतिपाठेतु इगुपधलक्षणः कः ध्रु
वंस्थिरंप्रकृतधातूपात्तगत्यनाविष्टत्वेसतितज्जन्यविभागाश्रयः तच्चार्थादवधिरेवेत्याह अवधिभूतमिति धावतइति इहक्रियाविशिष्टस्याप्यश्वस्य
प्रकृतधातूपात्तक्रियायांप्रत्यवधित्वंनविरुध्यते परस्परस्मान्मेषावपसरतइत्यत्रतुसृधातुनागतिद्वयस्याप्युपादानात् एकनिष्ठांगतिंप्रतिइतरस्याप
[illegible]ध्यते उक्तंच अपायेयदुदासीनंचलंवायदिवाचलंध्रुवमेवातदावेशात्तदपादानमुच्यते पततोध्रुवएवाश्वोयस्मादश्वात्पतत्यसौतस्याप्य

श्वस्य पतने कुड्यादि ध्रुवमिष्यते मेषांतरक्रियापेक्षमवधित्वं पृथक् पृथक् मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथगिति पर्वतात्पततोऽश्वात्प
ततीत्यत्र तु पर्वतावधिकपतनाश्रयो योऽश्वस्तदवधिकं देवदत्तादिनिष्ठं पतनमित्यर्थः पंचम्यर्थेऽवधौ अभेदेन संसर्गेण प्रकृत्यर्थो विशेषणं प्रत्ययार्थस्तु।
क्रियायास्तत्व धात्वर्थमान तु धर्ममात्रं विभक्त्यर्थे विहितस्य बहुव्रीहेर्धर्मिपरताया निर्विवादत्वात् उद्धृतौदनास्थालीत्यत्र हि ओदनकर्मकोद्धरणावधिभूत
त्यर्थः जुगुप्सेति भाष्यकारास्तु जुगुप्सादीनां तत्पूर्वकनिवृत्तिलक्षकतामाश्रित्य सूत्रेणासिद्धिमाहुः एवमुत्तरसूत्रेष्वपि भीत्रा कथं तर्हि कस्य विभ्यति देवा
अजातरोषस्य संयुगे इति रामायणं अत्राहुः कस्य संयुगे इति न चैवं संयुगस्यैवापादानसंज्ञापत्तिः परयाधिकरणसंज्ञया बाधात् अधिकरणत्वावि
वक्षायां त्विष्टापत्तिः अध्ययनादिति अध्ययनसंबंधिनो म्लानिरित्यर्थः जनिकर्तुः जननं जनिः उत्पत्तिः इनजादिभ्य इति जनेर्भावे इन् जनिघसिभ्यामि
ण् इत्युणादिसूत्रेण इण् वा जनिवध्योश्चेति वृद्धिप्रतिषेधः तस्याः कर्त्रेति शेषषष्ठ्या समासः तथा च धात्वंतरयोगेऽपि भवति अंगादंगात्संभवसीति यथा
तदेतदाह जायमानस्येति एतेन इक्श्तिपौ धातुनिर्देशे इति इकानिर्देशोऽयमित्याश्रित्य गमहनेत्युपधालोपप्रसंगमर्थात्[illegible]ति समासानुपपत्तिं चोद्भा
वयंतो मीमांसावार्त्तिककाराः समाहिता इति भावः इह सूत्रे प्रकृतिग्रहणं हेतुमात्रपरमिति हनिकन्मतं पुत्रात्प्रमोदो जायत इत्युदाहरणात् उपादा
नमात्रपरमिति तु भाष्यकैयटमतं तदुभयसाधारणमुदाहरणमाह ब्रह्मण इति ब्रह्मा हिरण्यगर्भः स च हेतुरेव न तूपादानं किं च ब्रह्म मायाशबलं ता
द्धि सर्वकार्योपादानमिति वेदांतसिद्धांतः भुवः भवनं भूरिति संपदादित्वाद्भावे क्विप् पूर्वसूत्रे समासनिर्दिष्टमपि कर्तृग्रहणमनुवर्तते स्वरितत्वादित्या
ह भूकर्तुरिति प्रभवत्यस्मादिति प्रभवः ल्यब्लोपे इति ल्यबंतस्य गम्यमानार्थत्वादप्रयोग इत्यर्थः यतश्चेति यदवधित्वेनाश्रित्याध्वनः कालस्य वा निर्मा
णं परिच्छेदः प्रतिपाद्यते तस्मादित्यर्थः तेन पंचम्यंतार्थेनार्थद्वारा युक्तान्निर्दिश्यमाणाध्ववाचिनः प्रथमासप्तम्यौ स्तः कालादिति तद्युक्तादित्यपेक्ष्य तेन प्र
पंचार्थमिति न च इतरस्त्वन्यनीचयोरित्यमरोक्तेर्नीचार्थकस्येदं ग्रहणमिति वाच्यं अस्मान्नारामं दैवेत्यादाविव पंचमी विभक्ते इत्यनेनैव सिद्धत्वात् य

नुइतरइति निर्दिश्यमानप्रतियोगिक एव प्रयुज्यते तद्यथा चैत्रः शूरः इतरः कातरइति अतो नायमन्यार्थइति तन्मंदं प्रतियोग्याकांक्षायाः उभयत्रा
तुल्यत्वात् उदाहृतकोशविरोधाच्च ऋतेकृष्णादिति कथं तर्हि पुरुषाराधनमृतेइति प्रमादोयमित्येके अन्ये तु उभसर्वतसोरित्यत्र दर्शिग्रहणानुवै
त्रं यावद्बलीतमित्यादाविव ऋतेयोगे द्वितीयापि साधुरित्याहुः युक्तं चैतत् ऋते द्वितीया चेति चांद्रसूत्रात् प्रभृतियोग इति प्रभृत्यर्थयोग इत्यर्थः तथा च
वार्तिकं प्रभृतीति भाष्यं विवृण्वन् कैयटः प्रायुक्तं ततः आरभ्येत्यर्थे इति वचनग्रहणादिति वचनग्रहणसामर्थ्यादवधिमात्रे विवक्ष्यते तेन विनेति वि
शेषणाशास्तुर्नेति भावः यद्वा मर्यादेति शब्द उच्यते यस्मिन् तत् मर्यादावचनं आङ् मर्यादाभिविध्योरिति सूत्रं तत्रत्यः आङ् दृष्टः स उक्तसंज्ञक इत्यर्थः परि
हरेरिति परेर्वर्जने वा वचनमिति वार्त्तिकात् पक्षे द्विर्वचनाभावः परित्रेति अत्र पंचमीविधौ वर्जनार्थेन अपेन साहचर्यादिति भावः प्रतिनिधिप्रतिदा
ने च अस्मादेव निर्देशादाभ्यां योगे पंचमीत्याहुः मुख्यस्याभावेन तत्सदृश उपादीयते स प्रतिनिधिः दत्तस्य प्रतिनिर्यातनं प्रतिदानं अकर्तरि पंचमी स्या
दिति तृतीयापवादोयं शतेनेति शतमिह उत्तमर्णापधार्यमाणत्वात् ऋणं तत्प्रयोजको हेतुश्चेति चकारेण कर्तृसंज्ञं च योगविभागादिति एतच्च हेतुमनुष्येभ्य
इति सूत्रे हरदत्तग्रंथे स्पष्टं स्त्रियां चेति बाहुलकं प्रकृतेस्तनुदृष्टेरिति वार्त्तिकनिर्देशोपीह ज्ञापकः पृथग्विना समुच्चयार्थमिति निपातानामनेकार्थत्वा
दिति भावः पंचमीति तत्र मंडूकप्लुत्या पंचमी द्वितीया तु सन्निहितैव दूरं दूराद् दूरेणैवेति इह सप्तम्यपि वक्ष्यते किं च दूरांतिका
र्थेभ्य इति सूत्रस्योत्तरत्राप्यनुवर्त्तनादधिकर
णेप्येभ्यो विभक्तिचतुष्टयं बोध्यं तथा च प्रयुज्यते दूरादावसथान्मूत्रमिति आवसथस्य दूर इत्यर्थः असत्त्वेति सत्त्ववचनत्वं च तद्विशेषकत्वं एवं च सा
मानाधिकरण्येन प्रातिपदिकार्थविशेषकं व्युदस्यते तेन तदाह दूरः पंथा इति एतेन करणे च स्तोकेति सूत्रे करणे किं क्रियाविशेषणे कर्मणि मा भूत् स्तोकं च
लति क्रिया न द्रव्यमिति प्राचां ग्रंथोपि व्याख्यातः यत्तु तमनूद्य क्रियाया विशेष्यत्वेन द्रव्यत्वावश्यंभावाच्चिंत्यमित्यूचुस्तदेव चिंत्यं धातुवाच्यायाः क्रियायाः

असत्वरूपत्वस्याकरे प्रसिद्धत्वात् न च विशेष्यत्वेन तदनुपपत्तिः कृदभिहितभाववल्लिंगसंख्याद्ययोगित्वमात्रेणातदुपपत्तेः यद्यपि हन्तशायिकाः श्रा-
य्यन्त इत्यादौ भाव्ये संख्यान्वयः स्वीकृतः पचति भवतीत्यादौ कर्तृकर्मत्वान्वयश्च तथापि लिंगस्य कारकांतरस्य चाभावो निर्बाध एव उक्तं च क्रियानयुज्य-
ते लिंगक्रियोर्नाधारकारकैः असत्वरूपतात स्यादयमेवावधार्यतां ॥ इति पंचमी राज्ञः पुरुष इति प्रत्ययार्थस्य प्रकृत्यर्थे प्रति प्राधान्यादप्रधानादेव ष-
ष्ठी तदर्थश्च पुरुषे विशेषणं प्रधानात्तु न षष्ठी उक्तन्यायविरोधात् शेषत्वाभावाच्च पुरुषशब्दो हि यथायथं प्रातिपदिकार्थमात्रवृत्तिः कारकार्थको वा यदा
तु मैवं तदा पुरुषशब्दादपि षष्ठी भवत्येव यत्तु अप्रधानं शेष इति तन्न प्रातिपदिकार्थमात्रे शुक्लो घट इत्यादौ विशेषणे षष्ठीप्रसंगात् न च प्रथमया बाधः
तस्याः प्राधान्ये च रितार्थत्वात् कर्मादीनामपीति यथाविशेषाविवक्षायां रूपवानिति तद्विवक्षायां तु नीलः पीत इत्यादि प्रयुज्यते तथेदमपि न्यायसिद्धमिति
भावः सतामिति एवं च नपुंसके भावे क्तस्य योगे शेषत्वविवक्षायां चेति तृप्त्यर्थानां करणे षष्ठी चेति च प्राचां ग्रंथे पठ्यमानं नापूर्ववचनमिति भावः सर्पिष इति
ज्ञो विदर्थस्य करणे अधीगर्थदयेशां कर्मणि कृञः प्रतियत्ने रुजार्थानां भाववचनानामज्वरेः आशिषि नाथः जासिनिप्रहणनाटक्राथपिषां हिंसायां।
व्यवहृपणोः समर्थयोः कृत्वोर्थप्रयोगे कालेधिकरणे इत्यष्टसूत्री तु नेह व्याख्याता तस्याः समासनिवृत्तिफलकत्वात् तथाहि तत्र शेष इत्यनुवर्त्तनेन शेषत्वेन।
विवक्षिते च कारकादौ षष्ठी सिद्धैव न तदयमर्थः इह षष्ठ्येव न तु तल्लुक् तथा च लुकः प्रयोजकीभूतः समासस्तु नेति तथा च वार्त्तिकं प्रतिपदविधाना चेत्यादि
हरिश्चाह कारकैर्व्यपदिष्टे च श्रूयमाणक्रियेपुनः प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये इति तेन शेषत्वविवक्षायां सर्पिषो ज्ञानं मातुः स्मरणमित्यादीन्य-
समस्तान्येव साधूनि हरिस्मरणमित्यादीनि तु शेषत्वाविवक्षायां कृद्योगषष्ठ्या समासे बोध्यानि न त्र च कारकपूर्वकत्वात् कृदुत्तरपदप्रकृतिस्वरः शेषष-
ष्ठ्या समासे त्वंतोदात्तत्वं स्यात् स चानिष्टं तथा च स्वरार्थमयमष्टसूत्रीति परमनिष्कर्षः किं च मातुः स्मृतमित्यादौ समासाभावोपि फलं न हि तत्र कारकषष्ठी
लभ्यते न लोकेति निषेधात् आह च निष्ठापाकर्मविषया षष्ठी च प्रतिषिध्यते शेषलक्षणया षष्ठ्या समासस्तत्र नेष्यत इति एवं स्थिते नैत्यादि व हु ग्रंथे षुद्र

हप्रकरणे उदाहरणं प्रत्युदाहरणं च यच्च तिङंतं दृश्यते तत्सर्वमुपलक्षणं तया नेयमिति हरदत्तादयः सर्वनाम्नस्तृतीया च इह सर्वनाम्न इति षष्ठीत
दाह सर्वनाम्नः प्रयोगे इति पंचम्यां तु हेतुशब्दात् षष्ठीतृतीयेन स्यातामिति भावः निमित्तपर्यायेति पर्यायग्रहणस्य फलमुदाहरति एवमित्यादिना प्राचां तु
क्किमर्थमित्युदाह तत्र किमः क्लीबत्वं दुर्लभं सामान्येन नपुंसकतां समासं वा आश्रित्य कथंचिद्यनेयं असर्वनाम्न इति निमित्तकारणहेतुषु सर्वासां प्रायदर्श
नमिति वार्त्तिकं हि वृत्तिकारेण यद्यपीहोक्तं तथापि भाष्यकृता हेतौ वित्यत्र पठितं तेन सर्वनाम्ना प्रयोगेपि प्रवर्त्तते किंतु प्रायग्रहणात्तत्र तृतीयादय एवेत्यर्थः।
वर्द्धमानस्तु अस्य मामपीच्छति षष्ठ्यतसर्थप्रत्ययेन पंचम्या इति कथं तर्हि ततः पश्चादिति ततः पश्चात्स्रंस्यते ध्वंस्यते चेति भाष्यप्रयोगात् पश्चाद्योगे पंच।
म्यपि प्रत्ययग्रहणं चिंत्यप्रयोजनं एनपा कथं तर्हि तत्रागारं धनपतिगृहादुत्तरेणास्मदीयमिति उत्तरेणेति तृतीयांतं तोरणेनेत्यनेन समानाधिकरणं वा
ध्यं दूरांतिकार्थैः अन्यतरस्यांग्रहणं समुच्चयार्थमिति तेन च विप्रकृष्टापि पंचमी समुच्चीयते व्याख्यानात् न तु षष्ठी द्वितीया तृतीयाः तदेतदाह पंचमी चे
ति दिवस्तदर्थस्य तच्छब्देन व्यवहपणौ परामृश्येते तौ च द्यूते क्रयविक्रयव्यवहारं च तुल्यार्थौ पूर्वसूत्रे गृहीतौ इत्याशयेनाह द्यूते तत्कर्मणीति इह शेष इ
ति न संबध्यते उत्तरसूत्रद्वयारंभादिति भावः अत एव द्वित्रिसूत्र्यां तिङंतमुदाहरति शतस्य दीव्यतीति प्रेष्यब्रुवोः इष्यते दैवादिकस्य गत्यर्थस्य लोट् मध्य।
मपुरुषैकवचनं प्रेष्येति तत्साहचर्यात् ब्रुविरपि तथाभूत एव गृह्यते अत एवेह शेषग्रहणं न संबध्यते तिङं तेन सह समासस्याप्रसक्तत्वात् कर्तृकर्मणो
कृति गुणेति तदुक्तं प्रधाने नियता षष्ठी गुणे तूभयथा भवेदिति कृतपूर्वीति पूर्वं कृतमनेनेति विग्रहः पूर्वं कृतवानित्यर्थः अविवक्षितकर्मकतया भावक्तः
सुप्सुपेति समासः पूर्वादिनिः सपूर्वाच्चेति कर्त्तरि इनिः तद्धितोश्चाद्गमनेनेति सूत्रादनेनेत्यनुवृत्तेः अथ कथं धायेरामोदमुत्तममिति मल्लिः अत्राहुः शैषिकत्व
मिदं तदर्हमिति निर्देशात् स्त्रीप्रत्यययोरिति कथं तर्हि सुब्लिङ्योरिति सूत्रे सुदासीपुत्रो वा धोनेति वृत्तिः करणत्वविवक्षायां तृतीयेति गृहाण तलोकाव्ययनिष्ठा
उश्च उकश्च ऊकौ लश्च ऊकौ चेति विग्रहः उकारेण कृतो विशेषणात्तदंतविधिस्तदाह हरिं दिदृक्षुरलंकरिष्णुर्वेति शेषषष्ठीत्विति एतेनेदं इक्ष्वाकूणां दर्शय

र्थे त्वदधीना हि सिद्धयः अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयमित्यादि व्याख्याने यद्वा इक्ष्वाकूणां सिद्धय इत्यन्वयः ननु इक्ष्वाकूणां दुरा
प इति तथा वागधिपस्य विस्मयमित्यन्वयः ननु वागधिपस्य दुर्वचमिति तुल्यार्थैः कथं तर्हि तुलां यदारोहति दंतवाससा इति कालिदासः स्फुटोपमं
भूतिसितेन शंभुना त्रिमाघश्च उच्यते सहं युक्ते प्रधाने इति तृतीया खवालभारस्य तदुन्नमांगजैः समं चमर्यैव तुलाभिलाषिणः इत्यत्र यथा उक्तं।
हि विनापि तद्योगं तृतीयेति व्याख्यानादिति सूत्रेऽर्थशब्दोपि पृथग् द्वि मित्तं तथा च वृद्धो युव एवायं ननु अर्थशब्देन बहुव्रीहिरिति भावः इति षष्ठी आ
धारस्त्रिधेति एतच्च संहितायामित्यधिकारसूत्रे भाष्ये स्पष्टं चन लइति प्रातिपदिकार्थमात्रे इति भावः किंच दूरांतिकेति सूत्रस्य इहाप्यनुवर्तनेनाद
धिकरणे व्यतावोध्याः क्तस्येति इनइन्नंतः शब्दो विषयो वृत्तिभूमिर्यस्य क्तान्तस्येत्यर्थः हेतुतृतीयेति तादर्थ्ये चतुर्थीत्यपि वोध्यं सीमेत्यादि एतच्च
गवाक्यप्रवोधे कुलचंद्रेणोक्तं मेदिनीकारोप्याह सीमा घाटस्थितिक्षेत्रेष्वंडकोशेषु च स्त्रियामिति अथ पुष्कलकोगंधमृगे क्षपणकीलयोरि
ति च हरदत्तादयस्तु पुष्कलकः शंकुः सी म्नि सीमज्ञानार्थं हतो निहतः निखात इत्याहुः यस्य च निर्ज्ञातकालात्क्रियां अनिर्ज्ञातकालायाः क्रिया
[illegible]ः कालपरिच्छेदकत्वाल्लक्षणं तदाश्रययोः कर्तृकर्मणोर्वोधकादियं सप्तमी तत्र ब्राह्मणेष्वधीयमानेषु गत इति कर्त्रुदाहरणं कर्मण्याह गोषु
[illegible] ह्वस्वधीयानानां ब्राह्मणानां दुह्यमानानां गवां च प्रतीयमानं लक्षकत्वं विशेषणीभूतयोरध्ययनदोहनक्रिययोर्विश्राम्यति भेद एवेति ननु श
[illegible] रीर्यात्तसामान्यरूपाक्रांतनेति भावः माथुरा इति नक्षत्रगवां क्रमेणात्पादावेवसामान्यविशेषभावः किंतु शब्दोपात्तयोर्धर्मयोर्विरोध एव निपुणो।
[illegible] इति साधुशब्दप्रयोगे अर्चा विनापि सप्तमी भवत्येव साध्वसाधुप्रयोगे चेति वार्त्तिकात् प्रसित इति तत्परे प्रसिता सक्ता नित्यमरः सूत्वेनेति नक्षत्रेणायु
[illegible] काल इत्यणो लुब्विशेष इति लुप् पर्यायेणेति ईश्वरशब्दो भावसाधनः यस्य स्वामिनः ईश्वरत्वमुच्यते इत्येकं व्याख्यानं यस्येति स्वं निर्दिश्यते यस्
स्वस्य ईश्वर उच्यते इत्यपरं एवं च व्याख्याभेदात्पर्यायेण विभक्तिः सा च विशेषणात्षष्ठीवत् इति भावः इति सप्तमी॥ इति विभक्त्यर्थाः समर्थश्चिन इति सूत्रे समर्थश

लाक्षणिक इति भावः कतिपयेति यद्यपि उदात्तवता गतिमता च तिङा गतेः समासो नित्याऽधिकारे वार्त्तिककृतोक्तः तथापि नासौ नियतः यस्मान्नयत
अभिप्रभरधृषतेत्यादौ समासादर्शनात् अत एव भाष्यकृता सहेति योगविभागेनायं साधितः यथोत्तरं मुनीनां प्रामाण्यमिति भावः सचेति एतदपि
योगविभागस्येष्टसिद्ध्यर्थत्वादेव लभ्यतेत्थं दर्शयन्नेवेति एतच्च संप्रदानसंज्ञासूत्रे पदमञ्जर्यां स्पष्टं यदि हि लोकेपि स्यात्तर्हि अभिप्रैणीत्यादौ समासात् स्वादयः
सुः पर्वातिकल्पमित्यादौ तद्धितानां नाद्यथा न च लिंगसर्वनामनपुंसकताभ्युपगमेन निर्वाहः यत्प्रकृते इत्यादौ ह्रस्वापत्तेः प्रकुर्वीरन्नित्यत्र च न लोपापत्तेश्च
निर्देशादिति अन्यथा हि प्रथमानिर्दिष्टत्वाविशेषेपि उपसर्जनसंज्ञाया अन्वर्थत्वेन पूर्वशब्दस्यैव पूर्वनिपातः स्यादिति भावः इत्वेनेति अयमपि समा
सः पूर्ववत् क्वाचित्क एव तेन जीमूतस्येवेत्यादौ तैत्तिरीयाणां पृथक्पदत्वेन पाठः उद्बाहुरिव वामन इत्यादौ व्यस्तप्रयोगश्च संगच्छते गोस्त्रियोः उपसर्जनं
स्य इति यत्तु प्राचा गोन्तस्त्रीप्रत्ययान्तयोरिति उक्तं तन्न चित्रगुरित्यादौ गोशब्दस्योपसर्जनत्वेपि तदन्तस्यातथात्वात् गौरीपतिरित्यादावतिप्रसंगाच्च कथं
गोकुलं राजकुमारीपुत्र इति चेत् शृणु उपसर्जनत्वस्य समाससंबंधिकतया यस्य प्रातिपदिकस्य ह्रस्वो विधीयते तदर्थं प्रति यत्तु उत्तरपदभूतयोर्गोस्त्रियोर्गुणीभाव
स्तस्यैव ह्रस्वत्वं न चेह तदस्ति गोः कुलं प्रति गुणीभावेपि स्वं प्रत्यतथात्वात् कुमार्याः पुत्रं प्रति गुणीभावेपि स्वं प्रत्यतथात्वात् दिशस्येति दिशोरिति हलन्तेन
विग्रहेप्येतदेव रूपं दिशशब्दस्य शरदादिषु पाठात् इच्चुक्त्वनसामर्थ्यादिति विभक्तीत्यनेन नहि येन सुबन्तेन सह समासस्तद्घटकीभूतैव विभक्तिर्गृह्यते
संनिधानात् तदर्थद्योतकश्चाधिरिति भावः परिशिष्टेतु प्रथमान्तेनायं समासः षष्ठ्यन्तेन चेत्यपि पक्षद्वयमपि स्थितं यत्तु प्राचोक्तं हरौ अधिकृत्येति वि
ग्रहे हरावधिस्थित इति तन्न नित्यसमासत्वेन विग्रहायोगात् यदाहुः अविग्रहो नित्यसमास इति ननु अस्वपदविग्रहोपि स्वीक्रियते कुंभकारोतीतियथा
यमपि तथास्तु अधिकृत्येति ल्यबन्तस्य समासार्थविवृत्त्वादिति चेत् न समासार्थलेशमप्यबोधयतस्तस्य विग्रहे प्रवेशस्यैवासंभवात् यत्तु व्याचख्युः
विग्रह इव विग्रहोऽर्थकथनमात्रं तेनाविग्रहत्वान्नित्यसमासत्वं न विरुद्धं अत एव समासप्रकृतिभूतमलौकिकवाक्यांतरं दर्शयति हरौ अधीतिस्थि

नइतीति अत्रेदं वक्तव्यं विग्रह इवेत्येवासंगतं अर्थकथनवाक्यस्यैव विग्रहत्वेन ततो भेदाभावात् अर्थकथनमात्रमित्यपि नत्स्य एवं तेन समासार्था
संस्पर्शात् हरौ अधि इ ति अलौकिकस्त्वित्युक्तं तदपि न तत्र हरि ङि इत्यस्यैव प्रवेशात् अंतरंगानपीति न्यायात् अन्यथा समासे हरिशब्दे कारस्य दुर्लं
भत्वापत्तेश्च यदपि व्याचख्युः अलौकिकत्वादेव अधिशब्देनाभिहितेपि सप्तमी अन्यथा सा न स्यात् अनभिहिताधिकारादिति तदप्यापाततः अलौ
किकत्वं हि नित्यविधं तर प्राप्तिविषयत्वेनापरिनिष्ठितत्वं न त्वेतावन्मात्रेण ननु शिष्टायाः सप्तम्यास्तत्र प्रवेशः सूपपादः अतिप्रसंगात् यत्तु तत्रैवाख्या
ख्यातं तिङ्कृत्तद्धितसमासैरिति परिगणनादधिनाभिहितेपि सप्तमीति तन्न परिगणनस्याकरे प्रत्याख्यानत्वात् कर्मणि द्वितीयेति सूत्रे स्वयमपि न
श्चैवोक्तत्वात् क्रमादमुं नारद इत्यबोधि तद्इत्यादिप्रयोगविरोधाच्च द्वितीयापंचम्योरिति एतच्च रक्षितग्रंथे स्पष्टं यत्तु वदंति चैत्रस्य वनादागदित्या
दौ सापेक्षत्वादसमासे च रितार्थत्वाद्विधानसामर्थ्यं नास्तीति न चिंत्यं नित्यसमासस्य न्याय्यत्वे सति चैत्रस्येत्यादिविशेषणप्रयोगस्यैवासंभवात् उक्तं
हि भाष्ये वृत्तस्य विशेषणयोगो नेति ननु सविशेषणानां वृत्तिर्नेत्यपि भाष्ये उक्तमिति चेत् सत्यं अनित्यसमासविषयं तत् नित्यसमासस्यापि सविशेषणे
ष्वप्रवृत्तेः महतः कुंभस्य उपकुंभमित्यासाम्पत्तेन यत्तु प्राचा कृष्णस्य उपेत्युक्तं यत्तु व्याचख्युः ईदृशे प्रक्रियावाक्ये स्थिते इति तदुभयमपि प्रागुक्तरीत्या प्रामादि
कमेव संप्रतिनेति संप्रतीत्यव्ययमिदानीमित्यर्थे वर्तते एतर्हि संप्रतीदानीमधुनासांप्रतं तथेत्यमरः तच्चाधिकरणशक्तिप्रधानत्वात् क्रियापदेनै
वान्वयार्हमिति निषेधोपि क्रियाया एव तदेतदाह युज्यत इति असंप्रतीति वृत्तौ तु युजिक्रिया न भवतीदध्योदन इत्यत्र उपसेचनक्रिया यथा यत्तु प्राचोक्तं
असंप्रतीति संप्रत्यभाव इत्यर्थः अनेनोपभोग्यत्व वस्तुनो यो वर्तमानः कालः तस्यैव निषेधः क्रियत इति तन्न अधिकरणस्य निषेधं प्रति प्रतियोगित्वे
नान्वयस्य सर्वतंत्रविरुद्धत्वात् नहि भूतले घटो नास्तीत्यनेन भूतलं निषिध्यत इति कश्चिदभ्युपैति न वायुक्तिः सहमित्यास्तां तावत् इति हरीति स्वरूप
रणा षष्ठ्यंतेन हरिशब्देन सह प्रकाशार्थे सेति शब्दस्य समासः प्रतिशब्दस्येति यत्त्वाहुः ग्रामस्य वृक्षं वृक्षं प्रतीत्यत्र सापेक्षत्वेन समासाभावे द्वितीया

विधानंसावकाशमितिर्नस्मागेवदूषितं हरदत्तस्त्वाह अर्थमर्थप्रतीतिभाष्यकारप्रयोगात् वाक्यमपि साधु यद्वा नात्राव्ययं वीप्सा इति किं तर्हि कर्मप्रवच
नीयत्वात्संबंधमवच्छिनत्ति वीप्सा तु द्विर्वचनद्योत्येति सह पूर्वाह्णमिति साकल्येऽव्ययीभावः गुणभूतेपीति यदि सादृश्य इति नोच्येत ततो यत्र सादृश्यं प्रधा
नंतत्रैवस्यात् अव्ययार्थप्राधान्यस्याव्ययीभावे औत्सर्गिकत्वादिति भावः अंतेति इदानीमेतावान्प्रदेशोऽध्येतव्य इति यावतः प्रदेशस्य परिग्रहः कृतः
नदपेक्षात् माप्रिरिहांतो विवक्षितः स चासकलेप्यध्ययने भवतीति साकल्यात्पृथगुच्यते साग्नीति अग्निशब्दस्तदर्थे ग्रंथे वर्तते सतृतीयांतः समस्यते
यद्यप्यग्निना सहेति प्रयोगार्हमेव तथापि साहित्यमात्रे तथा अंतत्वविवक्षायां तु समासो नित्यः अत एवाग्निग्रंथपर्यंतमिति अस्वपदविग्रहो दर्शितः य
तु अग्निरंतोस्येति प्रथमांतेनाग्नेरंतत्वमिति षष्ठ्यंतेन वा विग्रह इति प्रथमांतेन षष्ठ्यंतेन वा समास इति तन्न सहशब्दस्यांतवाचकत्वाभावात् अंतभ
त्वस्य तु सुतरामलाभात् तस्याध्ययनेऽनन्वयाच्च सह युक्ते तृतीयायान्याप्यत्वाच्च सतृणमत्तीत्यत्र साकल्यस्येव साग्नीत्यत्र अंतत्वस्यापि साहित्यघो
त्यतया तत्र तृतीयांतेन समासं स्वीकृत्य इह तत्परित्यागस्य निर्मूलत्वाच्च यावच्छ्लोकमिति यावदित्यव्ययं समस्यते विग्रहस्तु तद्धितेनेति अस्वपदत्वं वो
ध्यं विभाषा एतदिति न्यायसिद्धेर्थे लिंगदर्शनमिदं टिड्ढुभादिसंज्ञानामिव समासस्य संज्ञाया अपि नित्यं प्राप्तत्वात् वचनं विनोवि ध्यं न राणामिव संज्ञाना
मपि विकल्पालाभात् स्यादेतत् सुप्सुपेत्यपि तर्हि नित्यं स्यात् न चेष्टापत्तिः अपसिद्धांतात् तथाहि चरटसूत्रे वृत्तिकृतोक्तं पूर्वंभूतो भूतपूर्वः सुप्सुपेति स
मास इति तथा शाकलसूत्रेसिन्नित्यसमासयोः शाकलप्रतिषेधः इत्यत्र नित्यग्रहणेननार्थः इदमपि सिद्धं भवति वाप्याम् अश्वो वाप्यश्व इति भाष्ये कैयटो
व्याख्यत् वाप्यश्व इति सुप्सुपेति समासः संज्ञायामिति समासस्य नित्यत्वात् सिद्धः प्रतिषेध इति तथा अनुदात्तं पदमेकवर्जं असिद्धवदत्रेत्यादिसूत्रेष्वपि कै
यटस्यैषमिदं अत आह सुप्सुपेत्विति समासेति योगविभागेनैव सिद्धे समासे उत्तरसूत्रैः पुनर्विधानं प्राचीनस्य क्वाचित्कतां ज्ञापयति एवं च इवेन समास
स्यापि क्वाचित्कत्वादुद्वाहुरिव वामन इत्यादि सिद्धं इवेनेति वार्त्तिकं तु यद्यपि कुगतीत्यत्र पठ्यते तथापि सुप्सुपेत्यत्रत्यमेव नित्याधिकारे स्मारितमिति कैयटः ॥

एवंस्थितेद्वंद्वेनसमासस्यछांदसत्वंकल्पयंतः प्रत्युक्ताः जीमूतस्येवेत्यत्रबहूच्चैःसमासाभ्युपगमेपितैत्तिरीयैर्व्यस्तस्यैवपाठादितिदिक् अपपरिबहिरंचवः
पंचम्या अतएवज्ञापकाद्बहिर्योगेपंचमी ज्ञापकसिद्धंनसर्वत्रतेनकरस्यकरभोबहिरितिसिद्धं आबालमिति यत्तु आपरमाणोराचभूगोलकमितिकिर
णावल्यांप्रयुक्तंतत्ग्रामादिकंसमासमध्येचशब्दप्रयोगासंभवात् आभूगोलकादितितुपाठ्यं यंपदार्थमितिसूत्रेतुयदितिसामान्येनपुंस्त्वं अव्ययंविभ
क्तीत्यनेनसिद्धेविभाषार्थंसूत्रंतेनपक्षेवनस्यानुद्गत्युदाहार्ये अनुगंगमिति इहायामोपलक्षणत्वंचानुनाद्योत्यते लक्ष्यंतुसमासार्थः अतएववाराणस्याः
सामानाधिकरण्यं एवंस्थितेफलितमाह गंगादैर्घ्यमितिवाराणसीतिवस्तुतस्तु अनश्ववरानः श्रेष्ठोदकंतस्यादूरभवा अदुरभवश्चेत्यरा आदिवृद्धिः पूर्वप
दात्संज्ञायामितिणत्वं नदीभिश्चस्वरूपस्यसंज्ञानद्याश्चनेहग्रहणंबहुवचननिर्देशात् किंत्वर्थस्यनचतस्यसमासःसंभवति अतस्तद्वाचिनामयंस
मासः तेचनकेवलंविशेषशब्दाएवकिंतुसामान्यशब्दोपिनित्यसमासइति एतच्चहगौस्पष्टंशाकलसूत्रेकैयटस्वरसोप्येवं नन्वेवंन्यायसाम्याद्बहुव्री
हेरपिनित्यसमासत्वंस्यादितिचेन्नैवंयस्येत्यादिपदांतरसमभिव्याहारेणान्यपदार्थप्रतीतेः अतएवेहसंज्ञानवगमादित्युक्तं नत्वन्यपदार्थानवगमादिति
[illegible]न्यायांकिंशीघ्रगंगोदेशः अथाव्ययीभावेसाधारणान्समासांतानाह अव्ययीभावइतिसमासांतइति समासस्यसमासार्थोत्तरपदस्यवाचरमावयवइ
[illegible]थाः तेनोपशरदमित्यत्रनाव्ययीभावादित्यम् द्विपुरीत्यादौद्विगोरितिङीश्चसिध्यतिजरायाइतिगणसूत्रं प्रतिपरेतिच अक्ष्णः परमिति अविषयइत्यर्थः
[illegible]। विषयेत्रअक्षिशब्दः इंद्रियमात्रपरः समक्षमिति अक्ष्णोयोग्यंनदी इहस्वरूपस्यैवग्रहणंनसंज्ञायाःपौर्णमास्याग्रहायण्योःपृथग्ग्रहणात् उपन
[illegible]मित टजभावेनपुंसकह्रस्वः इदंत्ववधेयं नदीभिश्चेतिसूत्रेविशेषाणामिवस्वरूपस्यापिग्रहणंविशेषाणामेवेत्यत्रमानाभावादित्युक्तंतेनपंचनदमि
[illegible]सिध्यति अत्रचनित्योचतदुक्तं गोदावर्योश्चनद्याश्चसंख्यायाउत्तरेयदीति एतच्च अव्ययन्त्वेवेत्यत्र आजितियोगविभागात्सिद्धं पूजार्थमिति अन्यतरस्यांग्र
[illegible]स्यप्रकृतत्वादितिभावः इत्यव्ययीभावः द्विगोस्तत्पुरुषत्वेफलमाह समासांतइतिपंचराजमितिराजाहःसखिभ्यष्टच् उत्तरपदस्यानकारांतत्वात्स्त्रीत्वाभावः

समासार्थोत्तरपदांताः समासांतादिति पसेनुपात्रादित्वं बोध्यं काशिकायां तु पंचराजीति क्वाचित्कः पाठः अपपाठः स इति हरदत्तः श्रितादीति श्रितादीनां यद्या-
पि संबोधने सुबंतत्वं संभवति तथापि अन्यत्रापि समासस्येष्टत्वात् श्रितादयस्तद्घटितसमुदायेलाक्षणिकाः प्रायेण समासतद्धितप्रकरणे एवमेव खट्वा-
सेपि गर्गादिभ्यो यञ् इत्यादि सामान्यापेक्षज्ञापकत्वात् नहि खट्वे यस्य द्वितीयांतत्वं गर्गादीनां षष्ठ्यंतत्वं वा संभवति येन विधिरिति सूत्रस्थभाष्यवृत्तिग्रंथोपी-
हमानं तत्रैकीयटहरदत्तादीनां तु महान् प्रमाद इति शब्दकौस्तुभे प्रपंचितमिति भावः यत्तु वदंति श्रितादीनां कृदंतत्वेन गतिकारकोपपदानामिति सुबुत्पत्तेः प्रा-
गेव समासइष्टः अन्यथा काष्ठश्रितेयो न सिध्येदत एव किल प्राचा श्रितादिभिरित्येकव्याख्यानं न तु सुबं तैरिति तन्न प्रधानस्त्रीप्रत्ययेतदादिनियमाभावेन
काष्ठश्रितेयस्यनिर्बाधत्वात् यदपि श्रिताशब्दादपि कदाचित्स्यादिति तदपि न सापेक्षत्वेनासामर्थ्यात् गतिकारकेत्यादेस्तु नायं विषयः कर्तृकरणे कृता ब-
हुलं साधनं कृतेति वत् द्वितीया श्रितेति सूत्रे कारकतद्विशेषयोरनुपादानादिति दिक् कृत्स्नमिति इह श्रितादिषु गत्यर्थत्वात्कर्तरि क्तः अयं णौ प्राप्तिरापत्तिश्चेह
गतिरेवं न तु फलं अत्यासत्तिस्तु व्यतिक्रमः सोपि गतिविशेष एवेति प्रांचः यद्वा श्रित इत्यादौ आदिकर्मणि क्तः ग्रामं गमीति गमेरिनिरित्यौणादिक इनिः स च
भविष्यत्काले भविष्यति गम्यादय इत्युक्तेः अकेनोरिति कृद्योगलक्षणषष्ठीनिषेधात्कर्मणि द्वितीया यत्तु गत्यर्थकर्मणि द्वितीयेति सूत्रे द्वितीयाग्रहणस्य
कृद्योगषष्ठीबाधनार्थतामाहुस्तद्भाष्यविरुद्धं भाष्ये तत्सूत्रं प्रत्याख्याय कृद्योगे षष्ठ्या एव स्वीकारादित्यन्यत्र विस्तरः खट्वारूढ इति जाल्मोऽसमीक्ष्या-
कारी स्यात् इत्यमरः वेदं व्रतानि च समाप्य समावृत्तेन हि खट्वारोढव्या ब्रह्मचर्ये तु भूमिशयनार्होपि यः खट्वामारोहति स जाल्मः रूढश्चायं तेन खट्वा-
मारोहन् भावानिषिद्धानुष्ठानपरः स सर्वोपि खट्वारूढ उच्यते अत एवानित्येति मासप्रमित इति माङ् माने आदिकर्मणि कर्तरि क्तः इह प्रतिपच्चंद्रेण नात्य-
त्यंतसंयोगः मुहूर्तमिति मुहूर्तं व्याप्येत्यर्थः कालाध्वनोरत्यंतसंयोगे इति कर्मणि द्वितीया तृतीया तत्कृतार्थेन गुणवचनेन तच्छब्देन तृतीयांतपरामर्शि-
नातदर्थो लक्ष्यते तदर्थकृतत्वं च गुणवचनस्यार्थद्वारकं विशेषणं एवं स्थिते फलितमर्थमाह तृतीयांतार्थेत्यादि कृतो यो गुणस्तद्वचनेनेत्यर्थः धान्येनेति

करणे तृतीया अर्थ्यत इत्यर्थः प्रयोजनं अर्थनमर्थः अभिलाषो वा अर्थशब्दस्य रूढत्वे तु धान्येनेति हेतौ तृतीया पूर्वसदृश इह समसदृशाभ्यां योगे तुल्या
र्थैरिति तृतीया अन्येयोगे तु हेताविति अत एव वचनाद्वा इह सदृशग्रहणं व्यर्थं षष्ठीसमासेन गतार्थत्वात् न च तत्पुरुषे तुल्यार्थतृतीयेति पूर्वपदप्रकृति
स्वरार्थमिदमिति वाच्यं सदृशप्रतिरूपयोः सादृश्ये इति सूत्रेण तत्सिद्धेः ऊनार्थेति पूर्वसूत्रे अर्थशब्देन समासस्य साधितत्वादिहार्थग्रहणमभिधेयप
रं तच्च ऊनशब्देनैव संबध्यते न तु पूर्वादिभिः समसदृशयोः पृथगुपादानादिति भावः भक्ष्येण मिश्रीकरणं खरं विशदमभ्यवहार्यं भक्ष्यं खरं कठिनं विशदं
विविक्तावयवं यत्प्रयां तस्य एरजे तस्य च भक्ष्यते तत्रैव प्रयोगात् गुणात्तरेणेति एतच्च वार्त्तिकं सर्वगुणकार्त्स्न्ये इति सूत्रे पठितं तृणामिति अत्र द्विजशा
ब्देन समासप्रसंगः तदपेक्षा हि षष्ठी श्रेष्ठत्वं च द्विजेतरमनुष्येभ्यः तेषां सामान्यशब्देनोपस्थितत्तयानान्विहायानुपस्थितकल्पनायाः अन्याय्यत्वात्
अथ कथं पुरुषोत्तम इति यस्मान्निर्धार्यते यश्चैकदेशो निर्धार्यते यश्च निर्धारणहेतुः एतत्त्रितयसंनिधाने सत्येवायं निषेध इति हि वचनविभज्योपपदे
सूत्रे कैयटः यद्वा पुरुषेषूत्तम इति संज्ञायामिति निर्धारणसप्तम्याः समासः नन्वेवं न निर्धारणा इति व्यर्थं स्वरभेदात् सप्तमीसमासे हि पूर्वपदप्रकृति
[illegible]रः षष्ठीसमासे त्वंतोदात्तत्वं स्यात् पूरणगुण अत्र प्राचोक्तं एतदर्थैः षष्ठी न समस्यत इति तन्न्यूनं एवं हि सुहितानामेव ग्रहणं स्यात् तावतामेवार्थश
[illegible]नसमस्तत्वात् इति ध्वनयन्नाह सदादिभिश्चेति अत्र व्याचख्युः पूरणार्थशब्दः प्रत्यय एव गृह्यते कृत्रिमकार्य्यसंप्रत्ययादिति तन्मंदं न हि प्रत्ययविभ
[illegible]ज्ञाणां पूरणार्थत्वं टिघुभादिवत्संज्ञासूत्रैर्लब्धमस्ति येनोक्तपरिभाषावकाशमासादयेत् कुतस्तर्हि पूरणप्रत्ययांताः षष्ठ्यादय एव गृह्यंते न तु पूरणोंम
[illegible]णादिशब्दादिति चेत् लोपे चेत्यादपूरणमिति निर्देशादित्यवेहि तेन कुंभपूरणं भवः पटुरुच्चैरित्यादि सिद्धं कथं तर्हि नान्तमुख षष्ठाकितसेकतानीति प्रमादस्य
[illegible]ायमित्येके वस्तुतस्तु उक्थेषु षष्ठः उक्थात्मकः षष्ठ इति वा व्याख्येयं यत्तु पूरणेति स्वर्यते तेनाधिकारगतिः अयं तु भागार्थकान्प्रत्यय इति तन्न अन्यप्रत्ययांतेना
[illegible]निषेधस्य द्वितीयतृतीयेति सूत्रे भाष्य एव स्पष्टत्वात् अत एव भिक्षाद्वितीयमित्यादावन्यतरस्यांग्रहणसामर्थ्यात् षष्ठीसमास इति तत्रोक्तं न तु ब्राह्मण

स्य शुक्लादेरत्र समासप्रसंग एव नास्ति ब्राह्मणशब्दस्य दंतैरेवान्वयात् ब्राह्मणस्य ये दंतास्ते शुक्ला इत्यर्थादत आह यदेति शुक्लशब्द एवेह विशेष्यस
मर्प्पक इति भावः यत्तु भावप्रत्ययांतो गुणवाच्यत्र निषिध्यत इति प्राचोक्तं तन्न उक्तोदाहरणस्य भाष्यारूढस्यासंगतिप्रसंगात् यदपि सदा गुणवाचिनो न नि
षेध इति तदपि न भावप्रत्ययांतस्य सदा गुणवाचितया पूर्वग्रंथविरोधात् यत्तु व्याचक्षते भावेत्यादेर्भावप्रत्ययांत एव निषिध्यत इति नार्थः किंतु भावप्रत्य
यांते एव सति यो गुणमाह तदभावे तु गुणं गुणिनं च स शुक्लादिरेव निषिध्यते सदेति अंतरेणापि भावप्रत्ययं यो गुणमेव वक्ति गंधादिशब्दस्तस्य न निषेध इ
त्यर्थ इति तदपि क्लिष्टं पुनरुक्तिग्रस्तं च काकस्य कार्ष्ण्यमित्यादावव्याप्तं च उक्तव्याख्यया हि शुक्लादीनामेव निषेधो लभ्यते न तु शौक्ल्यादीनां न हि शौक्ल्या
दिशब्दाः भावप्रत्ययं लब्ध्वा निष्कृष्टं गुणमाहुः न वा तदभावे गुणं गुणिनं च किंत्वं तरेणापि भावप्रत्ययं गुणमात्रपरत्वाद्रूपरसगंधस्पर्शादिशब्दतुल्या
एव न च शौक्ल्यमिति कार्ष्ण्यमिति भावप्रत्ययोऽस्त्येवेति वाच्यं तस्य शुक्लकृष्णादिशब्दैर्लब्धत्वे पि शौक्ल्यादिशब्दैरलब्धत्वादन्यथा तदभावे त्वित्यादि स्वग्रं
थेनैव सह विरोधापत्तेरित्यवहितैराकलनीयं यदि तु प्राचां ग्रंथो पि योज्य इत्याग्रहः स्तर्हि इत्थं योज्यतां सदेत्यादिनावघथास्तु चंदनगंध इत्युदाहरणं च।
अस्यापवादं प्रथममाह भावेति नन्वस्तु नामेयं योजना आकरग्रंथानुकथमेतावान् सिद्धांतो लब्ध इति चेच्छृणु सूत्रे गुणार्थे इत्यस्मिन् केवलगुणस्य गुणोप
सर्जनद्रव्यस्य च प्रतिपादको गृह्यते व्याप्तिन्यायात् काकस्य कार्ष्ण्यं ब्राह्मणस्य शुक्ला इति द्वेधा भाष्ये उदाहरणाच्च चंदनगंध इत्यादौ तु निषेधे प्राप्तेन
त्स्थैश्च गुणैरिति वचनेन समासः प्रतिप्रसूयते गंधत्वेन प्रतीयमानो हि गंधो न कदापि गुणिसमानाधिकरणः किंतु स्वप्रधानः इदमेव तात्पर्य्यं ननु व
हति जलमियं पिनष्टि गंधानिति प्रयोगदर्शनादयुक्तमिदमिति चेन्न तत्र हि गंधानिति न गुणशब्दः मालतीकुसुमादिष्वदर्शनात् किंतु चंदनत्वादिना
तिनिमित्तकोऽन्य एव सः तस्माच्चंदनगंध इत्यत्र तत्स्थत्वं सुस्थमेव एवं घटरूपमित्यादावपि सुरभिशुक्लादयः शब्दास्तु न तत्स्थगुणप्रतिपादकाः एवम
पि शौक्ल्यसौरभ्यादिशब्दैः सह समासो दुर्वार इति चेन्मैवं तेहि शुक्लत्वादिप्रकारक एव गुणबोधः तद्रूपापन्नानां च द्रव्यसामानाधिकरण्यमस्त्येव शक्ल

सुरभिरित्यादावितिदिक् फलानामिति करणस्य शेषत्वविवक्षायां षष्ठी ब्राह्मणस्य कृत्वेति तादर्थ्यरूपसंबंधस्य सामान्यरूपेण विवक्षायां षष्ठी ब्राह्मण
संबंधिनीया क्रियातदनंतरमित्यर्थः इत्यादीति तथा च भट्टिः यत्कृते रीत्रिएद्धीमः आदेयाः किंकृते भोगाः कुंभकर्णत्वया विनेत्यादि अनेकमन्यपदार्थे इ
तिसूत्रे सर्वपश्चादिति भाष्यप्रयोगोपीहानुकूलः रक्षित इति कैयटहरदत्तौ तु अव्ययप्रतिषेधे वृक्षस्योपरीत्युदाहरंतौ अकृदव्ययेनापि निषेधं मन्येते
स्वरे भेद इति कृदुत्तरपदप्रकृतिस्वरेणेति स्वरस्यैवावस्थानात् अंतःस्वरितः इष्टः तव्येन तु मध्योदात्तत्वं स्यादिति भावः तक्षकस्येत्यादि यत्तु प्राच्यामुदाहरणं।
राज्ञो नलस्येत्यादि यच्च समर्थं नेसति समासे पूर्वनिपातानियमः स्याद्विशेषणसमासस्तु स्यादेवेति अत्रेदं वक्तव्यं विशेषणविशेष्यभावे कामचाराद्व्यव
स्थायां प्राप्तायां अप्रधानमुपसर्जनमित्यन्वर्थतामाश्रित्य द्रव्याश्रितत्वे न गुणादीनामप्राधान्यात् द्रव्यापेक्षया गुणादीनां विशेषणतेति व्यवस्थेष्यते न
च षष्ठीसमासेपि सुवचमिति किं तन्निषेधेन क्तेन च पूजायां पूजाग्रहणमुपलक्षणमिति व्याचष्टे मतिबुद्धीति भूत इति न च तक्तौ कौंडिन्यन्यायेन नमस्या।
दिभ्यः क्तस्य वर्तमानकालो भूतकालतां बाधत इति वाच्यं तेनेत्यधिकारे उपज्ञातमिति निर्देशेनाबाधज्ञापनात् न च ज्ञानार्थं ष्वेव ज्ञापकं पूजितो यः सुरासुरै
यादि प्रयोगानुरोधेन सामान्यविषयकत्वस्यैव न्याय्यत्वादित्यनुन्यासकारः अन्ये तु कारकषष्ठ्या एव समासनिषेधोयं शेषषष्ठ्या तु समास इत्याहुः एते
कलत्रं सुराममहितः कृतवान् इति भट्टिप्रयोगो व्याख्यातः इदमेषामिति क्तोधिकरणे चेति क्तः अधिकरणवाचिनश्चेति कर्तरि षष्ठी अधिकरणे चेत्ये
सिद्धे सूत्रद्वयेपि वाक्यविग्रहणं स्पष्टार्थं कथं तर्हि किं दत्तं यद्दत्तमिति नायमधिकरणे क्तः किं तु कर्तरि किमावृत्तं निष्पन्नमित्यर्थः कर्मणि च यद्यत्रया
चन कर्मणि षष्ठी गृह्येत न तर्हि तृजकाभ्यां निषेधो व्यर्थः स्यात् तस्माद्व्ययानामनेकार्थत्वादितीत्यर्थे चशब्दोयं तदाह कर्मणीति या षष्ठीति सप्तम्या।
वचनात् तं पदं समुच्चार्य या षष्ठी विहिता परिशेषिता वेत्यर्थः नियमसूत्राणां विधिरूपेण निषेधरूपेण वेति द्विधाप्रवृत्तेः स्त्री कृतत्वात् तृजकाभ्यां।
हकर्तरीत्यकस्यैव विशेषणं न तु तृचः अव्यभिचारात् तथाप्युपरंजकत्वमात्रमभिप्रेत्याह कर्त्रर्थेति जयादित्यस्तु कर्तृषष्ठ्या इति व्याचष्टे नन्वेते

नुत्तरत्नुत्तरार्थ इति कल्प्यं स्यात् किंच कर्तृग्रहणं तृजकयोरेव विशेषणमिति युक्तं तयोः श्रुतत्वात् ननु षष्ठ्या इति भावः शेषषष्ठ्येति केचित्तु जनिकर्तुः
प्रकृतिरित्यत्र प्रयोजको हेतुश्चेति निर्देशादनित्योऽयं निषेध इत्याहुः न्यासकारस्त्वाह तत्त्वेनैतमेव तत् नलोके इति षष्ठीनिषेधस्त्वनित्यः त्रकाभ्यामिति वक्तव्ये
तन्नः सानुबंधस्य ग्रहणाज्ज्ञापकादिति पूर्वापर एकदेशशब्दोवयवे रूढः अत एव तस्य कर्मधारयत्वेपि ततो मत्वर्थीयः कृष्णसर्पवान् वल्मीक इति
वत् यद्यपि इह एकगो पूर्वादिति ठञ् प्राप्तस्तथापि अत एव निर्देशादिति स्पष्टेनदाह अवयविनेति ननु किमनेन सूत्रेण कर्मधारयेणैव पूर्वकाय इत्या
दिप्रयोगाः सेत्स्यंति ऊर्ध्वकाय इतिवत् समुदाये हि वृत्ताः शब्दाः अवयवेष्वपि वर्तंत इति न्यायात् अत आह षष्ठीत्यादि तथा च काय पूर्व इत्यादि प्र
योगव्यावृत्तये सूत्रमिति भावः नन्विह षष्ठी दुर्लभा अन्यारादिति पंचमीप्रसंगात् तत्र हि दिशि दृष्टः शब्दो दिक्शब्द इति व्याख्यानेन संप्रत्य दिग्वृत्ति
नामपि योगे पंचमी स्वीकृतेति चेत् सत्यं अवयववृत्तिभिर्योगे षष्ठ्येव ध्यते तस्य परमाम्रेडितमिति लिंगात् पूर्वं नाभेरिति नाभेर्यः पूर्वो भागः स कायस्यावय
व इत्यर्थः नाभेरिति दिग्योगलक्षणा पंचमी अत्र पूर्वस्य भागस्य नाभेरवधिः न त्वेकदेशिनी अतो नाभ्या सह समासो नेत्यर्थः कायेन तु स्यादेव पूर्वका।
यो नाभेरिति पूर्वशब्दस्य नित्यसापेक्षत्वात् प्राधान्याच्च पूर्वं छात्राणामिति समुदायसमुदायिसंबंधे षष्ठी बहुवचनं तु उद्भूतावयवभेदसमुदायवि
वक्षया यथा छात्राणां पंचम इति ततश्च छात्राणामेकदेशित्वे सत्यपि एकत्वसंख्यावैशिष्ट्याभावान्न समासः सर्वोपीति पूर्वादिभिन्नोपीत्यर्थः ज्ञापका
दिति नह्यन्यथा सायपूर्वत्वमह्नस्योपपद्यते नचाह्नकायवत्सामानाधिकरण्येन निर्वाह्यः शंकाः अहः सर्वैकदेशेत्यादिना विहितस्य समासांतस्य अह्नोन्हू
ए नेभ्य इत्यन्हादेशस्य चैकदेशिसमासं विना नुपपत्तेरिति भावः इत्याहुरिति नचैवं दिनमध्यो रात्रिमध्य इत्यादि न सिध्येदिति वाच्यं ज्ञापकसिद्धस्यासार्व
त्रिकत्वात् यत्तु प्राचोक्तं सर्वेणैकदेशेनान्हः समास इति तन्न एकदेशस्य तृतीयानिर्दिष्टतया परनिपातापत्तौ धर्मिग्राहकमानविरोधात् यदपि पाठांतरं सा
र्वेणैकदेशिना ह्न इति तदपि न अह्न एव ग्रहे एकदेशिना चानेनैव तस्य समास इति संभवति अह्नः नपुंसकं नित्यं क्लीब इति अर्द्धमिति निर्देशादेव क्लीबत्वे लब्धे न

पुंसकग्रहणंनित्यनपुंसकार्थमित्यर्थः खंडमात्रवाचीतुत्रिलिंगः भिन्नंशकलखंडेवापुंस्यर्द्धोर्द्धसमेंऽशकेइत्यमरः अत्रषापुंसीतिपूर्वोत्तराभ्यांसंब
ध्यतेतत्रशकलखंडइतिरूपभेदात् क्लीबत्वेनिर्णीतेवचनात्पुंस्त्वविकल्पेऽस्त्रियामितिफलितं नचखंडेइतस्त्रीलिंगमेवकिंनस्यादितिवाच्यंभिन्नलिंगा।
नांनद्वंद्वइतितेनपरिभाषितत्वात् शकलखंडास्त्रीतिनिर्देशेनैवनिर्णयात् अर्द्धइत्यत्रतुरूपभेदात् पुंस्त्वावगतौसत्यामपिवापुंसीतितद्विकल्पेनाविशेषात्
स्त्रीनपुंसकेलभ्येते प्राप्तवदिति अवयविनासहसमस्यते इत्यादीत्यर्थः अर्द्धंपिप्पलीनामिति इहअर्द्धपिप्पलीतिप्राप्ते परवल्लिंगातिदेशेपिवचनातिदेशा
भावात्विशेष्यैकत्वाच्चेतिभावः कथंतर्हिअर्द्धपिप्पल्यइति अर्द्धानिपिप्पलीनामितिविग्रहेमाभूत्खंडसमुच्चयेतुभविष्यतिअर्द्धपिप्पलीवार्द्धपिप्पलीवार्द्धपिप्पली
चेत्यादिविग्रहात् एकदेशिनेतिकिं अर्द्धंपशोर्देवदत्तस्य अत्रदेवदत्तस्वामीनत्ववयवीतिनतेनसमासः एतत्सूत्रंपरवल्लिंगमित्यत्रभाष्येप्रत्याख्यातंन
थाहि अर्द्धपिप्पलीतिकर्मधारयेणसिद्धं समुदायेदृष्टाःशब्दाः अवयवेपिवर्त्तंतइतिन्यायात् समप्रविभागादन्यत्रहितवाप्येषैवगतिः अर्द्धोहारः अर्द्धज
रतीयं अर्द्धवैशसं अर्द्धोक्तमर्द्धविलोकितमित्यादिदर्शनात् नचसमप्रविभागेषष्ठीसमासंबाधितुमिदंसूत्रमितिवाच्यं षष्ठीसमासस्यापीष्टत्वादिति तथा
चकालिदासः मायुद्ध प्रेम्णाशरीरार्द्धहरांहरस्येति द्वितीयतृतीयेतिनिषेधंबाधितुंचेति भाष्यकारास्तुपरवल्लिंगमितिसूत्रेतत्पुरुषग्रहणं द्विगुप्राप्तेत्यादि
वार्त्तिकंपूर्वापरेत्यादित्रिसूत्रींचप्रत्याचख्युः तन्मतेभिक्षाद्वितीयादिसिद्धयेपूरणेत्यादिनिषेधस्यानित्यत्वमाश्रयणीयंसंज्ञाप्रमाणत्वादित्यादिनि ईशानांस
मान्यापेक्षाभावाज्ज्ञापकताचएवंचसतितत्पुरुषत्वेपिसिद्धं प्राप्तापन्ने अत्र चकारेणाविधेयसमुच्चयार्थेन अकारप्रश्लेषानुमानात्प्राप्तापन्नेसमस्येते।
अत्रअत्वंचतयोःस्यादितिभाष्येस्थितं तत्रचकारात्पूर्वमेवअकारंछित्वासौत्रत्वात्प्रकृतिभावोनेतिप्राञ्चः इमंक्लेशंपरिहरन्नाहद्वितीययाअइति प्राप्ता
स्त्रीति एकादेशस्यपूर्वांतत्वेनग्रहणात् लिंगविशिष्टपरिभाषयाप्राप्तापन्नयोश्चैवंतयोरपिसमासः कालाःपरिमाणिनापरिमीयतेपरिच्छिद्यतेयेनतत्परि
माणंपरिच्छेदकंतद्वान्परिमाणीतदाहपरिच्छेद्यवाचिनेतिकालाइतिकालविशेषवाचकादित्यर्थः कालसामान्यस्यअपरिच्छेदकत्वात् मासोजातस्येति षष्ठीस

॥

मासेप्राप्ते वचनं ननु जातः पुरुषः तस्य च हस्तवितस्त्यादिकं परिच्छेदकं न तु कालः तस्य क्रियामात्रपरिच्छेदकत्वादिति चेत्सत्यं साक्षात्क्रियां परिच्छिदन्नपि
कालः तत् द्वारादेव दत्तं परिच्छिनत्ति यस्य हि जननादूर्ध्वं मासो गतः स मासजात इति व्यवह्रियते तत्र व्यवहारकालजननक्षणयोरंतरालभावी मासो जननन
द्वाराज्जातमपि परिच्छिनत्त्येव इह विग्रहे षष्ठी निर्दिष्टस्यापि हि तत्प्राधान्यं द्योतयितुं यस्य स इत्युक्तं अलौकिके तु प्रक्रियावाक्ये नास्य प्रवेशः एवं बहुव्रीहाव
पि एतौ वान्यतरो विशेषः इह जातशब्दात् षष्ठी चित्रगुरित्यादौ तु द्वाभ्यामपि भाभ्यां प्रथमैव समानाधिकरणानां बहुव्रीहिरिति वक्ष्यमाणत्वात् विशेषण
विशेष्यभावव्यत्यासेनैकार्थीभाव इति तुल्यं यत्तु मीमांसकाः चित्राणां गवामयं इति विगृह्णन्ति तत्रेदं वक्तव्यं उक्तरीत्या वृत्तिवाक्ययोः क्वचित्प्रधानार्थसा
म्यलाभेपि अषष्ठ्यर्थबहुव्रीहौ पंचविधेपि कर्मकरणादिप्राधान्यस्याभिमतस्योक्तविग्रहादलाभात् वृत्तिवाक्ययोर्महान्विप्रकर्षः स्यात् कृतविघ्नः प्राप्तोद ॥
कीग्राम इत्यादौ कर्तृकर्मणोः समासेनाभिहितत्वान्न कारकविभक्तिरित्यादिसिद्धांतस्य निर्विवादत्वात् किंचालौकिके प्रविष्टा ॥
नामेव पश्चात्तरेपि परिनिष्ठितानां लौकिकेपि प्रवेशसंभवे उपस्थितपरित्यागेनानुपस्थितकल्पनं अन्याय्यमसांप्रदायिकं च तदनुगुणतयैव पदांतरा
प्रक्षेपगौरवं तु फलमुखत्वान्न दोषावहं अत एव वाक्यार्थे तत्पदं दातुं प्राच्येन विषये अर्पिते लौकिको वाक्यभेदेन विग्रहो वृद्धसंमतः अथ वा मास्तु तच्छ
ब्दः प्रधानार्थसाम्यमपि औत्सर्गिकमिह त्यज्यतां तथोक्तं च हरिणा क्वचिद्गुणप्रधानत्वमर्थानाम विवक्षितमित्युपक्रमस्य आख्यातं तद्धितार्थस्य यत्किं
चिदुपदर्शकं गुणप्रधानभावस्य तत्र दृष्टो विपर्यय इत्युक्तं तद्धितग्रहणं कृतामप्युपलक्षणं तेन आक्षिकः वैयाकरणः पाचकः इध्मप्रव्रश्चन इत्यादीनां
विग्रहवाक्यादीनीहोदाहरणं स्यादेतत् चित्रगुर्दंडीति समासतद्धितवृत्त्योरलौकिके प्रक्रियावाक्येपि चित्रा गो दंड एते शब्दाः षष्ठ्यंता एवेति मीमांसका
शय इति चेन्मैवं शेषो बहुव्रीहिः त्रिकांतः शेषः अस्ति सामानाधिकरण्ये मतुप् समर्थानां प्रथमादित्यादिसूत्रभाष्यविरोधेन वृत्तेरेव तत्र दुर्लभत्वादिति
दिक् प्रकृतमनुसरामः उत्तरपदेनेति परिमाणपुत्तरपद इत्युक्तं द्विगुसिद्ध्यै बहूनां तत्पुरुषस्योपसंख्यानमित्यर्थः सुप्सुपेत्येकत्वस्याविवक्षितत्वादप्री
ते वचनं अन्हादेश इति त्रिपदतत्पुरुषाणां।।रं उत्तरपदे परतोऽवांतरद्विगोसतीति भावः सप्तमी शौंडैः बहुवचननिर्देशाद्गणपाठसामर्थ्याच्चाद्यर्थो वग

तिरित्यभिप्रेत्याह शौंडादिभिरिति शौंडः प्रवीणः इह आसत्तिरूपा क्रिया वृत्तावंतर्भवति तत् द्वारकं च सामर्थ्यं यथा दध्योदनगुडधानादौ तेन कारका
णां क्रिययैव संबंध इति नियमस्य भंगो नेति बोध्यं अधिशब्द इति आधेयप्रधान इति शेषः अधिकरणप्रधानस्य त्वव्ययीभाव एव अधिहरीति यथा
अंतःशब्दोप्यत्र पठ्यते स चाधिकरणप्रधानः मध्ये इत्यर्थो न त्ववयविनः आधारत्वविवक्षायां सप्तमी यथा वृक्षे शाखेति वनेंतः वनांतर्वसति य
त्वधिकरणमात्रवृत्तिरंतःशब्दस्तस्य विभक्त्यर्थे इत्यव्ययीभावो नित्यसमासः प्रनिरंतरिति णत्वं अंतर्वणं यत्तु हरदत्तेनोक्तं तत्पुरुषस्य वैकल्पिकत्वात्प
क्षेऽव्ययीभाव इति तच्चिंत्यं तत्पुरुषस्य वैकल्पिकत्वेपि अव्ययीभावस्य नित्यत्वात् इत्यंतरिति त्वदुक्तविग्रहस्यैवासंगतेः किंच विभक्त्यर्थमात्रवृत्तेरव्ययी
भावः वचनग्रहणसामर्थ्यात् अन्यथा वृक्षस्योपरीत्यादावपि प्रसंगाच्च तत्कथं मध्यवाचिनः प्रसंगः किंच अत्र प्रक्रियावाक्यांतर्गतविभक्त्यर्थं वृत्तेरेवा
व्ययस्य समासः संनिधानात् सामर्थ्यादेव निपातेनाभिहितेप्यधिकरणे वचनसामर्थ्यात् सप्तमीति स्थितं न चैतदिहास्ति अवयविन आधारत्वविव
क्षायां सप्तमीति त्वयैवोक्तत्वादिति दिक् यदप्याहुः अंतःशब्दोऽधिकरणे शक्तिप्रधानः तत्सामानाधिकरण्यादिना सप्तमी वनरूपे मध्ये इत्यर्थात् वने
ऽन्तर्वनेंतर्वसति पूर्वपदार्थप्राधान्येतु अव्ययीभावः वनस्यांतः अंतर्वणमिति अत्रेदं वक्तव्यं सामानाधिकरण्ये सप्तमीत्यसंगतं व्यधिकरणसमासप्र
करणात् विशेषणं विशेष्येणेत्यनेनैव गतार्थत्वात् किंच मध्यवाचिनाव्ययीभावो दुर्लभः लक्षणाभावात् अथ अव्ययमिति योगविभागेन कथंचि
दुपपत्तिं ब्रूषे अपदिशमिति यथा तर्हि तत्रैवेहापि नित्यसमासत्वादविग्रहत्वं स्यात् तथा च वनस्यांतरिति त्वदुक्तिर्विरुध्येत दिक् तस्येयं संज्ञायां नि
त्यसमार्थमिति कथं तर्हि त्रिलोकनाथेन सतां मखद्विष इति कालिदासः त्रिलोकेशब्दस्यासंज्ञात्वात् न च समाहारे द्विगुः द्विगोरिति ङीप्प्रसंगात् न च पा
त्रादित्वं कल्प्यं यदि त्रिलोकीगणनापरास्यादित्यादि प्रयोगविरोधात् न चोत्तरपद इति समासः त्रिपदतत्पुरुषस्येह दुर्लभत्वात् अत्रोच्यते लोकशब्दो
त्र लोकसमुदायपरः अवयवो लोकस्त्रिलोकः शाकपार्थिवादिः एतच्च द्विगोर्लुगनपत्ये इति सूत्रे भाष्य एव स्पष्टं एतेन नवरसरुचिरामित्यादि व्याख्या

तं तद्धितार्थो एकापि सप्तमीविषयभेदाद्विधा इत्याशयेनाह तद्धितार्थे विषय इत्यादि सर्वनाम्न इति एतच्च पूर्वापरोदाहरणान्वयि यद्यपि स्त्रियाः पुं
वद्भित्यनेनापि प्रकृतनिर्वाहः सिद्धः तथापि दक्षिणापूर्वस्यादिसिद्ध्यर्थं सर्वनाम्न इत्यावश्यकं प्रतिपदोक्तत्वादिहापि न्याय्यमिति भावः षाण्मातुर इतिमा
तृ संख्येत्युत् अनपत्य इत्युक्ते द्विगोर्लुगिति लुङ् विकल्पे प्राप्ते इति प्राञ्चः। प्रथमं तु स्त्र्योक्तं वस्तुतस्तु त्रयाणां समासे कृते अन्यपदार्थोपसंक्रमे ए
परस्परसंबन्धाभावात् द्वन्द्व तत्पुरुषयोरप्राप्तौ सत्यां वचनमिदमिति बोध्यं तत्र तद्धितार्थेति सूत्रेणोत्तरपदे परे तत्पुरुषो वचनसामर्थ्यात्सिद्धः एकार्थी
भावसत्त्वादेव तन्नित्यतापि सिद्धा न हि महाविभाषापि सत्येकार्थीभावे संज्ञाया विकल्पिका न च संज्ञायाभावाभावाविष्येते इति भाष्यविरोधात् किंतु वैकल्पिकैका
र्थीभावविषये नित्येयं तत्संज्ञा इह तु वैकल्पिकांशो बाधितः एवं च कात्तिके तत्पुरुषद्वयंशो ज्ञापकसिद्धार्थानुवादमात्रं अत एव स्वादिरेतरप्रास्प्रमिति क
र्मधारयोत्तरपदो बहुव्रीहिः ननु त्रिपद इति समर्थसूत्रशेषे कैयटोक्तं संगच्छते पुंवद्भावपूर्वनिपातयोः सिद्धये हि तथोक्तं अत एव चित्राजरद्गुरिति संग
च्छते पूर्वकालैकेत्यादेर्जरद्गवादौ कृतार्थे तया … भूतपूर्वगत्या प्रवृत्तेरयोगात् इति दिक् द्वंद्वस्योदाहरणं तु वाक्कदृषच्चप्रिये अस्य वाग्दृषद्प्रियः।
छत्रोपानहप्रियः इह त्रिपदे बहुव्रीहौ कृते पूर्वयोर्नित्यं द्वंद्वः तेन समासांतष्टजपि नित्यमेव यत्तु पूर्वं तत्रैवाधलक्षणे पृष्ठस्य युगपद्विधेरेकाहवत्तद्वि
सामत्वमित्यधिकरणोपृष्ठ्यः षडहो बृहद्रथंतरसामा काय्य इत्युदाहृत्य द्वंद्वं कृत्वा बहुव्रीहिरिति पूर्वपक्षं रचयित्वा तत्रोपष्टंभकतया कात्यायनवचनमि
दमुपन्यस्तं यच्चनेह द्वंद्व इति सिद्धांतयित्वा कात्यायनवचनं तु समासांतकृतविशेषमात्रविषयमित्युक्तं तदुभयमपि चिंत्यं उत्तरपदे इत्युक्ते द्वंद्वं कृत्वेत्यस्या
संगतेः स्वरविशेषस्य स्पष्टतया समासांतपर्यंतमाग्रहे बीजाभावाच्च नित्यसमासवचनमिति वार्तिकस्य संकोचे प्रमाणाभावाच्च संख्यापूर्वो द्विगुः ७ ।
त्रोक्त इति अयं भावः पूर्वसूत्रविषय एवेयं संज्ञा ननु रस्येति न्यायात् एतदर्थमेव हि तत्र योगविभागः कृतः अन्यथा दिक्संख्ये संज्ञा तद्धितार्थोत्तरपदस
माहारे इत्येव ब्रूयात् तेन सप्तऋषय इत्यत्र संज्ञान कालेति पूर्वपदप्रकृतिस्वरो न भवति किंतु समासान्तोदात्त एव तथा च लक्ष्यं सप्तऋषयस्तपसे येनिषेदुः स

मृकर्षाणां सुकृतं यत्र लोक इत्यादि सनपुंसकमिति एतच्च मूल एव व्याख्यास्यते कुत्सितानि कुत्सनैः कुत्सने अवक्षेपणे मन्यादि सूत्रे चकारस्यानुक्तस
मुच्चयार्थत्वात् वर्तमाने क्त इत्याशयेनाह कुत्स्यमानानीति तदर्थकानीत्यर्थः वैयाकरणखसूचिरिति सूचयतेरच् इः यः पृष्टः सन् प्रश्नं विस्मारयितुं खं
सूचयति अहो निर्मलं गगनमिति स एवमुच्यते इर्इरूढ इति इलऊत्क्षेपे दुःपूर्वः औणादिकः कूटप्रत्ययः बहुलमन्यत्रापीति णिलुंकू रलयोरेकवि-
षयत्वस्मरणाद्रः विशेष्यस्य पूर्वनिपातार्थं सूत्रं प्रायेणाग्रेप्येवमेव शब्दप्रवृत्तिनिमित्तं कुत्सायामेवायं सन्निधानात् तेनेह न मीमांसको वररिद्रः पूर्वे-
सूत्रेति पापाणकशब्दौ कुत्सनाभिधायिनौ तयोः पूर्वसूत्रेण समासे परनिपातः स्यात्तत्स्मात्पूर्वनिपातार्थमिदं सूत्रमिति भावः लाक्षणिकमिति अत एव-
सामानाधिकरण्यात् मृगीव चपला मृगचपलेत्यादौ पुंवद्भावः उत्तरपदोपस्थितस्यामत्वचापलादिद्वारकमेवेह सादृश्यं च गृह्यते सन्निधानात् वाग
र्थाविवेत्यादावपि हि संनिहितसंपर्क्तादिद्वारकमेव सादृश्यं च प्रतीयते कथं तर्हि उपमानपरतेति चेत् भूतपूर्वगत्याशक्यार्थमादायेत्यवेहि सामान्यव
चनत्वं चोपमानोपमेयसाधारणधर्मविशिष्टोपमेयपरत्वं वोध्यं उपमितं कथं भाष्याब्धिः क्वातिगंभीर इति कैयटः सामान्यप्रयोगसत्वे नास्याप्राप्तेः उ
च्यते इह गांभीर्येण सादृश्यं न विवक्षितं किं तु वितनदूरवगाहत्वादिना तस्य चाप्रयोगोस्त्येवेति निर्बाधः समासः विशेषणं ननु विशेषणविशेष्यभावे का
मचारात् पाचकपाठकोदाविव नीलोत्पलादावपि अव्यवस्थितः पूर्वनिपातः स्यादिति चेत् अत्राहुः जातिशब्दस्य गुणक्रियाशब्दयोः समभिव्याहारे
विशेष्यसमर्पकत्वेव तेन नीलोत्पलपाचकब्राह्मणादिति व्यवस्थित एव प्रयोगः गुणशब्दयोः क्रियाशब्दयोः गुणक्रियाशब्दयोश्चानियम एव खंजकु
ब्जः कुब्जखंजः पाचकपाठकः पाठकपाचकः खंजपाचकः पाचकखंज इति अत्र च मूलमुपसर्जनमिति महासंज्ञा अप्रधानं ह्युपसर्जनं गुणक्रिय
योश्च द्रव्यं प्रत्यप्राधान्यं स्पष्टमेवेति यद्वा विशेषणविशेष्ययोः ससंबंधिकतया अन्यतरोपादानमात्रेणेतराक्षेपसंभवे उभयोपादानं निरूढविशे
षणपरिग्रहार्थं निरूढिश्च प्रागुक्ता भाष्यकारादिव्यवहारादवसीयते पूर्वापरा अपरस्येति एतच्च पश्चादिति सूत्रे भाष्ये स्थितं बाहुलकादिति एके

म॰ सु॰
६४

षु मुख्येषु वीरयत्ते पराक्रमते निवातो ऽर्थं श्रेणिकृता इति एकेन शिल्पेन पण्येन वा ये जीवंति तेषां समूहः श्रेणिः कृताकृतमिति एकदेशकरणा ।
त्कृतं एकदेशांतरस्याकरणादेवाकृतं सन्महत् गुणक्रियाशब्दैः सह समासे सदादीनां पूर्वनिपातनियमार्थं सूत्रं तत्पुरुषः समानाधिकरण इत्य
र्थस्याद्यजंतः औपचारिकं वा समानाधिकरणपद इत्यर्थः भाषितपुंस्कादित्यादि एतच्च स्त्रियाः पुंवदिति सूत्रे स्फुटीकरिष्यते ननु तेनैव कर्मधार ।
यसिद्धं जातीयदेशीययोस्तु तसिलादिष्विति सिद्धं तत्किमनेन सूत्रेणेत्याह पूरणीत्यादि तथेत्यादि च स्त्रीपुंसलक्षणेति स्तनश्मश्र्वादियुक्ता स्त्रीपोटे
त्यमरव्याख्यातारः हरदत्तस्तु नपुंसकं पोटमित्याह तत्र मूलं मृग्यं अमरेण नपुंसकपर्यायेभ्यः पृथगेवास्य पाठात् कठधूर्त इति नात्र कठत्वं कुत्स्यते ऽ
तः कुत्सितानि कुत्सनैरिति गतार्थता न शंक्या प्रवृत्तिनिमित्तकुत्सायामेव तस्य प्रवृत्तेः कथं तर्हि जनयति कुमुदभ्रांतिं धूर्तवको बालमत्स्यानामिति
वकधूर्त इति युक्तं सत्यं प्रमाद एवायमिति प्रामाणिकाः प्रशंसावचनैश्च वचनग्रहणं रूढिशब्दपरिग्रहार्थं ये तु यौगिकाः प्रशस्तशोभनरमणीया ।
दयः ये च विशेषवचनाः शुचिमृद्वादयः ये च गौण्या वृत्त्या प्रशंसां गमयंति सिंहो माणवक इत्यादयस्ते सर्वे व्युदस्यंते कुमारः एतदेवेति एवकारः स्फु
टसिद्धत्वद्योतनार्थः ज्ञापकांतरस्यापि संभवात् तथा हि युवा खलतीति सूत्रे जरतीग्रहणं लिंगं नहि युवशब्दस्य पुंस्त्वे जरत्या सामानाधिकरण्यं न्याय्यं य
तु अश्वादिभ्यः फञ् विधौ पुंसि जात इति गणसूत्रे पुंसीत्युक्तिरपीह ज्ञापिकेति तन्न एकदेशस्य पूर्वोत्तरवद्ग्रहणे तज्ज्ञापकस्य मूलशैथिल्यात् चतुष्पादो ।
गर्भिण्या मंडूकप्लुत्या जातिरित्यनुवर्त्तते तेनेह न कालाक्षी गर्भिणी चतुष्पात्किं ब्राह्मणी गर्भिणी प्रत्युदाहरणे तु विशेषणमिति समासः स्यादेव पूर्वनि
पाते विशेषः मयूरव्यंसकादयश्च चकारो ऽवधारणार्थः समासांतरं व्यावर्त्तयति धूर्त इति तथा च गुणवचनत्वात्पूर्वनिपाते प्राप्ते इदं वचनमिति भा ।
वः अन्ये त्वाहुः मयूर इव व्यंसकः उपमानानि सामान्यवचनैरिति सिद्धे पुनर्विधानं तत्पुरुषे तुल्यार्थेति स्वरो माभूदिति सत्युपमानसंशब्दनेनार्षिहि
ते समासे प्रवर्त्तंते अश्नीतपिबतेति इह क्रियारूपस्यान्यपदार्थस्य प्राधान्यात्स्त्रीत्वाट्टाप् एवमग्रेऽपि राजांतरमिति अंतरशब्दो भिन्नवाची मात्रं कार्त्स्न्ये

राम
६४

वधारणोऽन्तरमात्रशव्दाभ्यांसहनित्यसमासइति नञ् उत्तरपदार्थप्रधानोयंसमासःतथाहि आरोपितत्वंनञाद्योत्यते आरोपमात्रंवाविषयत्वं।
तुसंसर्गःतथाचाब्राह्मणशव्दादारोपितोब्राह्मणइतिवोधेअर्थोब्राह्मणभिन्नइतिपर्यवस्यति अतएवानुपसर्जनत्वादेतस्मिन्नित्यादौसर्वनामकाः।
र्यंसिध्यतितत्पुरुषस्यऔत्सर्गिकमुत्तरपदार्थप्राधान्यमप्येवंसतिनिर्वाधं एतत्तदोरितिसूत्रेऽनञ्समासग्रहणंचेहलिंगमीमांसकादयस्तुब्राह्मण
भिन्नइत्यादिरेवशाब्दवोधइत्याहुः तन्मतेऽसइत्यादेः अतिसर्वइत्यादिसमकक्षत्वात्सर्वनामसंज्ञाकार्यमंतर्गणकार्यंचनस्यात् यत्तुतत्सादृश्यमभावं।
श्चतदन्यत्वंतदल्पता अप्राशस्त्यंविरोधश्चनञर्थाः षट्प्रकीर्तिताइतिपठित्वा अब्राह्मणः अपापं अनश्वः अनुदराकन्या अपशवोवाऽन्येगोअश्वेभ्यः
अधर्मइत्युदाहरंति तत्तुयथायथंआर्थिकार्थमभिप्रेत्यकथंचिन्नेयं सर्वथापिनञ्समासस्योत्तरपदार्थप्राधान्यस्यभाष्योक्तंनान्यथयितव्यं अतएवाने
धामन्यपदार्थेइत्यत्रानेकशव्दादेकवचनप्रयुक्तमाद्येपिसेव्यतेनेकयासन्नतापांगयेतिकथंतर्हिपतंत्यनेकेजल धेरिवोर्मयइति उच्यते अध्यारोपि
तेकत्वानांप्रकृत्यर्थेन्तपातत्रवास्तववहुत्वाभिप्रायंवहुवचनं यद्वासमुदायवहुत्ववहुवचनं रथोश्वोगजश्चप्रत्येकमनेकस्ततः अनेकश्चानेकश्चेत्ये।
कशेषात् यत्तुप्राचीनप्रक्रियांव्याचक्षाणाआहुः नञ्विशिष्टेनोत्तरपदेनसादृश्यादयोलक्ष्यंतेइतितन्नस्वकीयग्रंथसंदर्भविरुद्धं आकरविरुद्धंचप
दपिविचारचिंतामणावुक्तं समासेतूत्तरपदप्राधान्यंमासजातवत् नञर्थेमिलितंतच्चसदृशादौनिलक्षयेदिति तदप्युक्तरीत्याभाष्यवार्तिकविरु।
द्धमितिस्पष्टमेवयदितुस्वातंत्र्यमेवावलंव्यते तर्हिकथंचित्समर्थयितुंशक्यं तथाहिअस्तुलक्षणैव तथापिनञ्समासेउत्तरपदप्राधान्यप्रयुक्तका
र्याणिलभ्यंते अनञ्समासइतिज्ञापकात् उपेयप्रतिपत्त्यर्थाउपायाअव्यवस्थिताः इतिन्यायात्समासेत्वितिवदन्वाक्येनञोऽसमस्तत्वात्क्रिय।
येवा वान्वयइतिध्वनत्यनियतः संवोधनांतेनक्त्वोर्थाः कारकंप्रथमोवतिः धातुसंवंधाधिकारेनिष्पन्नमसमस्तनञ्तथायस्यचभावेनषष्ठीचेत्युदि
तंद्वयंसाधुत्वमष्टकस्यास्यक्रिययैवान्वयावितंयुक्तंचैतत् त्वंपचसियुवांपचथइत्यादौनञ्समभिव्याहारेक्रियायाएवनिषेधप्रतीतेरनुभवसि।

॥

म॰मु॰ ६१

हृत्वान्भवति प्रयोगेपि तथैव व्याप्यत्वात् घटो नास्ति पटो न सन्तः अहं तत्र नास्मीत्यादौ वचनपुरुषव्यवस्थादर्शनाच्च अन्यथा अर्थाभावेऽव्ययीभावस्य दु
र्बोधत्वाच्च यत्तु भूतलाधेयत्वाभाववान् घट इत्यर्थवर्णनं तन्न क्रियानन्वये कारकविभक्तेर्दुर्लभत्वात् तस्मात्कारकविशिष्टक्रियायां नञर्थेऽन्वयः शाब्द इ
त्येवतत्त्वं भाष्यवार्त्तिकेत्युपलक्षणं सांप्रदायिकरीत्या पूर्वपदार्थप्राधान्येऽव्ययीभावः उत्तरपदार्थप्राधान्ये तत्पुरुष इति विषयविवेकस्य सुलभत्वा
त् यत्तु वदंति यदा अभावसामान्येन नञ् वर्त्तते तदाऽव्ययीभावः अभावाविशेषविवक्षायां तु तत्पुरुष एव तस्य नञर्थत्वाभावेन पूर्वपदार्थप्राधान्यासंभ
वादिति तन्न पापाभावो अपापमिति स्वोक्ततत्पुरुषोदाहरणेपि अभावत्वेनैवाभावभानेनाव्ययीभावस्य दुर्वारत्वात् यदपि विशेषस्य नञर्थत्वं नास्तीति
तदपि न निर्विशेष्यस्य सामान्यस्याभावात् विशेषरूपेणावाच्यत्वं नास्तीति चेत् तर्हि अविघ्नमित्यादिरव्ययीभावो दत्तजलांजलिरेव स्यादिति न किंचि
देतत् नञो नलोप इति तिङंतेन समासाभावादप्राप्तेर्वचनं अपचसी ति कुत्सितं पचसीत्यर्थः नशब्देनेति नञ्समासेत्वनेकधेत्येव भवतीति भावः ऊ
र्यादिच्विडाचश्च च्विडाचौ कृभ्वस्तियोगे विहितौ ऊर्यादयोपि स्वभावात्तत्रैव प्रयुज्यंते तेनात्रापि आविः प्रादुः शब्दौ मुक्त्वाऽन्यथा करोति नैव योग इति माधवा
दिग्रंथस्थितं तथैवोदाहरति ऊरीकृत्येति आविः शब्दस्य तु साक्षात्प्रभृतिषु पाठात्कृञो योगे गतिसंज्ञाविकल्पः भ्वस्तियोगे तु अनेन नित्यमिति विशेषः
कथं तर्हि वारुणीमदविशंकमथाविश्चक्षुषोभवदसाविव राग इति माघः अभवद्युगपद्विलोलजिह्वायुगलीढोभयसृक्विभागमाविरिति च निरंकु
शाः कवयः इति हरदत्तः वस्तुतस्तु ते प्राग्धातोरिति सूत्रस्य प्रयोगनियमार्थत्वेऽङ्गीकृतेनुपपत्तावपि संज्ञानियमार्थत्वपक्षे दोषलेशोपि नास्तीति प्रपंचितं श
ब्दकौस्तुभे एतेन पुरो रामस्य जुहवां चकार ज्वलनेव पुरिति भट्टिर्व्याख्यातः हतं परिगृह्येति हत्वागमनं द्विधा हतं त्यक्त्वा परिगृह्य वेति आद्यमुदाहरणं द्विती
यं प्रत्युदाहरणं अपरिग्रहे इति च प्रयोगोपाधिर्न तु वाच्यकोटिनिविष्टमिति भावः कणेहत्येति अतिशयेनाभिलष्य तन्निवृत्तिपर्यंतं पिबतीत्यर्थः ततश्च
श्रद्धाया अपगमात्प्रतिघातो गम्यते प्रत्युदाहरणं तु कणेहत्वा गतः सूक्ष्मः तंडुलावयवः कणः तस्मिन् हत्वेत्यर्थः पुरस्कृत्येति नमस्पुरसोरिति सत्त्वं कथा

रम
६५

तर्हिअमुंपुरःपश्यसिदेवदारुम्मिति स्थितमित्यध्याहारेणादर्शि प्रत्यगतित्वात् एतेन न तस्य स्थित्वा कथमपि परः कौतुकाधानहेतोरितिव्याख्यातं अलं
च अव्ययमितिकिं अलंकाण्डक्षिप्तमित्यर्थः अदःकृत्येति यदा स्वयमेव पर्यालोचयति तदेदमुदाहरणं तिरोंतर्द्धौ अंतर्द्धौ किं तिरोभूत्वा स्थितः पार्श्वतो भू
त्वेत्यर्थः विभाषा कृञि तिरःकृत्वेति गतित्वाभावपक्षे सत्वमपि न तिरसोन्यतरस्यामिति सत्वविधौ गतिग्रहणानुवृत्तेः केचित्तु पराभवे तिरस्कारशब्दप्रयो
गमनुरुंधानाः सत्वविधौ गतिग्रहणं निवर्तयंतीति माधवः वाचंनियम्येति निवचनं हि वचनाभावः अर्थाभावे ऽव्ययीभावः इह अविशेषेण एदंततया
निपात्यते न तु संज्ञासंनियोगेन प्रगत आचार्य इति अनेन गतार्थैवृत्तिमस्वपदविग्रहेण नित्यसमासतां च दर्शयति अतिमाल इति एवमभिगतो मुखं अ
भिमुखः उद्गतो वेलामुद्वेलः प्रतिगतोक्षं प्रत्यक्षः उपपदमतिङ् अतिङिति नोपपदस्य विशेषणं किंतु समासस्य एतच्च अनवक्लृप्त्यमर्षयोरिति सूत्रेमा
थस्यकस्यार्थेन त्र हि किं वृत्तस्यानधिकारादकिं वृत्तग्रहणानर्थक्यमित्युक्त्वा उपपदसंज्ञार्थं तर्हीत्याशंक्यातिङिति समासप्रतिषेधात्संज्ञानर्थक्यामिति
सिद्धांतितं तदेतदभिप्रेत्याह अतिङंतश्चेति ननु सुपेत्यधिकारात्तिङ् तेन न भविष्यति तत्राह अतिङ्ग्रहणमिति पूर्वसूत्र इति कुप्रादयः कुप्रादयः सुबं
ताः सुबंतेन समस्यंते ततः गतिः गतिः सुबंतो ऽतिङंतेन समस्यत इति व्याख्येयमित्यर्थः तथा चेति यद्यप्युक्तरीत्या गत्युपपदयोरेवं लाभस्तथापि त्रितयवि
षयिणीं प्राचां परिभाषां एकदेशानुमितिद्वारा इहापि ज्ञाप्यत इति भावः यद्वा कारकांशे कर्तृकरणे कृतेति सूत्रस्थं बहुलग्रहणमुक्तार्थसाधकं बोध्यं प्रा
गिति कृदंतादत्र रपदात्सुबुत्पत्तेः प्रागित्यर्थः प्रथमांतं तु सुब्ग्रहणमिहानुवर्तत एव अत एव राजदर्शीत्यादौ पूर्वपदेन लोपादि पदकार्यं सिध्यति परि
भाषायाः फलं दर्शयन् गतिमुदाहरति व्याघ्रीति व्याजिघ्रतीति व्याघ्री आतश्चोपसर्ग इति कः पाघ्राध्मेति शप्रत्ययस्तु संज्ञायां नेति वक्ष्यते व्याङोर्घ्रश
ब्देन गतिसमासः स यदि घ्रशब्दस्य सुबंततामपेक्ष्येत तर्हि सुबुत्पत्तये संख्यां चापेक्ष्यं ततः प्रागेव लिंगयोगः लिंगनिमित्तश्च प्रत्ययष्टावेव स्यात् तु ङी
ष् घ्रशब्दमात्रस्य जातिवाचित्वाभावात् ततो घ्राशब्देन समासे सति अदंतत्वाभावात् जातिलक्षणो ङीष् न स्यादिति भावः उपपदमुदाहरति कच्छपी

तिकल्केन पिवतीति कल्कपी व्याघ्रीवत् सुपीति योगविभागात्कः यत्तु प्राचा उपपदमतिङ् तमिति व्याख्यातं तन्न तथासति प्रथमांतसुवग्रहणनिवृत्त्या
वहुविप्लवापत्तेः तथाह्लिनिर्गतइत्यत्र निसोरूत्वं संयंतेत्यत्र मोनुस्वारः राजदर्शीत्यादीनलोपश्च न स्यात् प्राटितेत्यादावतो गुण इति पररूपं च स्यादेतेना
तिङि किं एधानाहारकोव्रजतीति प्रत्युदाहरणमपि प्रत्युक्तं यदपि कुगतीति सूत्रे उक्तं अत्र सुप्सुपेत्यननुवृत्ते तिङापि समासः ऊरीकरोतीत्यादि तदप्य
सत् तत्र शेषीकृतेनातिङ्ग्रहणेनैव विरोधात् तिङ् समासस्तु सहेति योगविभागवललभ्यश्छांदसश्चेति प्रागेवोक्तं लोके तु प्रभवतीत्यादावुपसर्गः प
थक्पदमेव काव्यादिष्वपाठिनामेकपद्यमपि तु धातूपसर्गयोः संहितायां नित्यत्वं मूलं कथं तर्हि अग्न आयाहीत्यादौ पदपाठे उपसर्गे व्यवसानमिति चेत्।
पदपाठस्यापि व्याख्याविशेषतया तत्रानुकरणशब्दत्वेनोपसर्गत्वाभावात्प्रकृतिवदनुकरणमित्यतिदेशस्य वैकल्पिकत्वात् [illegible]देतेभ्य इति सूत्रेण
दाघत्वं कुर्वता एकशेषं चाकुर्वता सूत्रकृतैव तथा ज्ञापितत्वादिति दिक् अमैवाव्ययेन तुल्यविधानमिति एतच्चाध्याहारेण लभ्यं तदेवेति नियमस्वभा
वत्स्वार्थं कथं न परोयमेवकारः ननु सूत्रस्थः अव्ययेनेति किं कुंभकारः असति ह्यव्ययग्रहणे अमैव यत्तुल्यविधानं तदेव समस्येत पूर्वसूत्रारंभसाम
र्थ्यादव्ययविषयक एव नियम इति चेत् तर्हि अमंतविषयक एव किं न स्यात् अमंतेन यः समासः सोऽमैव तुल्यविधानस्येति तथा च अग्रेभोजमित्यत्र
मामूत् अग्रेभुक्त्वा कालो भोक्तुमित्यत्र तु स्यादेवेति भावः तृतीयाप्रभृतीन्यन्यतरस्यां उभयत्र विभाषेयं अमैव तुल्यविधानस्य प्राप्ते यथा उपदंशस्तृती
यायामिति यत्तु अमा चान्येन च तुल्यविधानं तस्य प्राप्तेर्यथा अव्यये यथाभिप्रेताख्यान इति उच्चैःकारमाचष्टे इह समासपक्षे कृदुत्तरपदप्रकृतिस्वरः
आदिर्णमुल्यन्यतरस्यामित्याद्युदात्तत्वं असमासे तु उच्चैरित्यंतोदात्तत्वं स्वरादिषु तथा पाठात् अमैवेत्यनुवृत्तिमभिप्रेत्याह अमैवेति तेनेह न पर्याप्तो भोक्तुं।
तत्पुरुषस्यांगुलेः संख्याव्ययादेः समासांतापेक्षया अवयवषष्ठी द्व्यंगुलमिति द्विगोर्नित्यमिति द्वयस चोलुक् द्वंद्वार्थमिति तत्पुरुषस्यासंभवादितिभा
वः ननु अहश्चासौ रात्रिश्चेति कर्मधारयोस्तु पूर्वोत्तरपदयोरन्यतरस्य गौणत्वसंभवादिति चेन्न मुख्यसंभवे गौणग्रहणायोगात् हेमंतशिशिरावहोरा

त्रेचद्वंद्वसीतिसूत्रेद्वंद्वेसमासांतदर्शनाच्च अहोरात्रइतिजातिरप्राणिनामितिसमाहारद्वंद्वः रात्रान्हाहाइतिपुंस्त्वं यत्तुप्राचोक्तं एकवद्भावान्क्लीवतेति
तन्नसनपुंसकइत्यस्यरात्रान्हाहाइतिपुंस्त्वेनपरत्वाद्बाधइतिवक्ष्यमाणत्वात् आकरविरोधाच्चद्विरात्रमितिसंख्यापूर्वंरात्रंक्लीवमितिवक्ष्यते अ
न्हष्टखोरेवनस्तद्धितइत्येवसिद्धेनियमार्थमिदंएवकारस्यष्टार्थः अन्हस्वटखयोरितिविपरीतनियमस्तुनभवति आत्माध्वानौखइतिप्रकृतिभा
वविधानाद्विंगात् अनित्यत्वादिति अत्रचलिंगशक्तिलांगलांकुशेत्यत्रघटीग्रहणं अह्नोन्हएतेभ्यः अहःसर्वेतिसूत्रेअहरादयोनिर्दिष्टाः चकारे
णाचसंख्याव्ययेअनुकृष्टेतत्रसर्वेषांवृद्धिस्यनाविशेषेपिअहःशब्दइहनगृह्यते संभवादित्याशयेनाह सर्वादिभ्यइतिसमासांतेपरइति प्रकरण
बललभ्यमेतत् प्राचात्तुटचिपरतइतिव्याख्यानंतदपिसामर्थ्यलभ्यमितिकथंविज्ञेयंभाष्येत्वन्हादेशः प्रत्याख्यातः अन्हएभ्यअचूस्याद्वेप
न्हः अह्नष्टखोरेवेतिनियमाद्दिलोपोन अह्नोपोनइतिव्युत्पादनात् अन्होदंतात्रेफादितियदिलक्षणाह्नःइत्यपिप्रयोगोस्तिनर्हिषादित्यपिवोध्यर
ाम्योमित्यधिकारात् अत्रप्राचः अन्हइतिषष्ठ्यास्थानेव्यत्ययेनप्रथमाअदंतनिर्देशान्नेहदीर्घान्हीप्रावृडितिवदंतितन्नतत्रव्यत्ययादिवर्णनक्ले
शोव्यर्थः दीर्घान्हीत्यत्रप्रातिपदिकांतेतिणत्वंव्यावर्त्तयितुंक्षुभ्नादित्वस्यैववक्तव्यत्वादाकरएवतथोक्तत्वाच्चेत्याशयेनाह अन्होनस्येतिप्राचस्तुअ
न्होनस्येत्युक्त्वा अदंतनिर्देशादितिवदतोव्याघातःस्पष्टएवकालाट्ठञितिएतच्चसंख्याविसायेतिसूत्रेन्यासपदमंजर्य्योः ओहाङ् धातोमाधवग्रं
थेचस्पष्टं यत्तुनसंख्यादिःसमाहारइतिसूत्रेद्व्यन्हइत्यत्राणोलुगितिवृत्तिकारादिभिरुक्तंतदयुक्तमितिभावः प्रसंगाद्वाहस्त्रियामितिटाविति यत्तुप्र
चाक्कालनिर्णयदीपिकायां पूर्वास्यान्नवमीशाभाथदशमीकालासृगाघाथसाद्व्यन्हीकालयुगादिमोन्नरयुनाचायोन्नरैकादशीतिश्लोकेद्व्यन्हीतिप्र
युक्तंमादशमीद्वयोरन्होर्भवाद्व्यन्हीत्याद्विचतद्विवरणेव्याख्यातंतत्सर्वंप्रामादिकमितिभावः तथाहि इहटि तिङीपद्विमोरितिवा आधे अंशं तत्वाट्ठञ्नतत्वा
द्जंतत्वाद्वा नाद्यः वृत्तिकाराद्युक्तस्याणइहप्रामादिकत्वाद्धुकालुप्तत्वाच्चनच प्रत्ययलक्षणं अणोयोक्ताइतिव्याख्यानात् नापिद्वितीयःठञोयोका

म॰सु॰
६६

रस्तदंतादिति व्याख्यातं ॥ अत एव द्विद्विनिष्केत्यत्र क्रीतार्थे प्राग्वतीयस्य ठञो लुकि टाबेवाकारे उदाहृतः द्विविस्तेत्यादावप्येवं नापि तृतीयः टचः सभा
संततत्र्यातदंतस्य तद्धितार्थं प्रति उपसर्जनत्वात् अत एव हि आपिशलिना प्रोक्तमधीयाना ब्राह्मणी आपिशलेत्युदाहृतं भाष्यमते चाटचो बाधनाच्चतु
पि चतुर्थः अपरिमाणबिस्तादिना ङीपो निषेधात् तस्माट्टाबेव युक्तः स्यादेतत् टाबप्ययुक्तः स्त्रीत्वस्यैव दुर्लभत्वात् तथा चान्होन्ह एतेभ्य इति सूत्रे कैयट
हरदत्तावाहतुः रात्रान्हाहाः पुंसीति वचनात् स्त्रियां वृत्त्यभावाट्टजचोर्नास्ती ह विशेष इति मैवं भावानवबोधात् इत्थं हि कैयटाद्याशयः सर्वादिषु द्वन्द्वपूर्वो द्वन्द्व
वृजपवादोञ्विहितः तत्र संख्यापूर्वस्य तद्धितार्थे द्विगोर्विशेष्यनिघ्नत्वेन स्त्रीत्वसंभवेपि टजंतस्य तद्धितं प्रत्युपसर्जनत्वादनुपसर्जनाधिकारोक्तस्य टि
ड्डितिङीपः प्राप्तिरेव नास्तीति तत्र टजचोर्विशेषः स्यथ एव पुण्याहमित्यत्र तु उत्तमैकाभ्यां चेत्यचो निषेधः अन्हादेशस्य चेति मतभेदेन व्यवस्थितं इतरे
षां चतुर्णां तु रात्रान्हाहाः इति वचनात् स्त्रियां वृत्तिर्नास्तीति स्यादेतत् भवेदयं वृद्धानामाशयः यद्युक्तं द्विगोर्विशेष्यनिघ्नत्वे प्रमाणं स्यात् तदेव किमिति चेत्
उच्यते अमरसिंहेन पुंस्त्वे सभेदानुचराः सपर्यायाः सुरासुरा इति पुंस्त्वाधिकारे अन्हाहांताः क्लीबे ड भेदा रात्रांताः प्रागसंख्यकाः इत्युक्ते अर्धांताः प्राघल
प्राप्तापन्नपूर्वाः परोपगाः तद्धितार्थे द्विगुः संख्याः सर्वनामतदंतकाः इति च ततः परमुक्तं एवं चेह अन्हाहांता इत्यनेन पुंस्त्वं प्राप्तं तद्धितार्थे द्विगुरिति परोप
गत्वेन परत्वादेव बाध्यते तथा च तेनैव परिभाषितं परं विरोधे शेषं तु ज्ञेयं शिष्टप्रयोगत इति तस्मादमरग्रंथ उक्तार्थे प्रमाणं किंच परवल्लिंगमित्यस्य
रात्रान्हाहा इत्यपवादः यत्र तु द्विगुप्राप्तेत्यादिना तत्संगो निषिद्धस्तत्र तदपवादस्याप्रवृत्तिः स्यथैव एतच्च माधवेनापि ध्वनितं इत्यनुपदमेव वक्ष्यामः किं।
च भवाद्यर्थे तद्धितांतं परोपगमिति निर्विवादं तद्धितलोपे तु यः शिष्यते स लुप्यमानार्थाभिधायीति न्यायेन भवाद्यर्थवत् स्त्रीत्वादेरप्यभिधानं न्याय्य।
मेव प्रकृते लिंगानुशासनस्य केवलायां प्रकृतावुपक्षीणस्य लुप्ततद्धितायामप्रवृत्तेः लुपि युक्तवदिति लिंगातिदेशोप्यत्र प्रमाणं प्रकृतलिंगानुशासना
नां लुप्तप्रत्ययेषु प्रवृत्तौ न तद्वैयर्थ्यापत्तेः अत एव लवणः सूपः लवणा यवागूरित्यादौ न क्लीबत्वं अत एव च कुमारी ब्राह्मण इत्यादिष्वाचारक्विबंतप्रकृति

राम
६०

ककर्तृद्वित्वं तेष्वपि विशेष्यनिघ्नतैवाकरे स्पष्टा अन्हीतिङीपं वदता प्राचापि स्त्रीत्वं स्वीकृतमेवेत्यलं बहुना यदि समर्थनीयमित्याग्रहस्तर्हि आधाराधेयभावव्यवसा।
सेन समर्थ्यतां द्व्यहनी अस्यामिति दिनद्वयाधारभूतेत्यर्थलाभात् उपांत्यस्यापीति यथा प्रथमयोरिति प्रथमाद्वितीययोर्ग्रहणं द्विवचननिर्देशात्तथेहा
प्युत्तमग्रहणसामर्थ्यादंत्ययोर्द्वयोर्ग्रहणं उत्तमौ च एकश्चेति विग्रहे सौत्रं द्विवचनमिति तेषामाशयः खार्याः प्राचां द्विगोरिति खारीशब्दांताद्द्विगोरित्य
र्थः द्व्यंजलमिति समाहारे द्विगुः आन्महतः पदाधिकारे तदंतस्यापि ग्रहणान्महच्छब्दांतस्यापि कथं तर्हि परममहत्परिमाणमिति परममहतो द्रव्यस्य परि
माणमिति षष्ठीतत्पुरुष इति वृद्धाः यत्तु वर्द्धमानेनोक्तं इष्टकेषीकामालानामित्यत्र तदंतविध्युपसंख्यानसामर्थ्यादुत्तरपदाधिकारे तदंतविधिर्नास्तीति तत्।
भाष्यकैयटविरुद्धं तथाहि पदाधिकारे प्रयोजनं इष्टकचितं पक्वेष्टकचितमित्यादि भाष्ये उदाहृतं कैयटेन च पदशब्देनोत्तरपदं गृह्यत इति व्याख्यातं ए
तेनेष्टार्थतः काशिकायामुपनिबद्धं न तु इष्टकेषीकेत्यत्र स्वतंत्रमुपसंख्यानमस्ति महतीशब्दस्येति यत्तु प्राचोक्तं जातीयघासादौ तीशब्दस्याप्यात्वं वक्तव्यमि
ति तत्र जातीयेति व्यर्थं पुंवत्कर्मधारयेति आन्महत इति च सूत्राभ्यामेव रूपसिद्धेः तीशब्दस्येत्यप्यपाणिनीयत्वादुपेक्ष्यं अष्टन इति कपाले उत्तरपदे ह
विषि वाच्ये अष्टन आत्वं वक्तव्यमित्यर्थः अष्टाकपाल इति संस्कृतं भक्ष्या इत्यण् अध्यर्धपूर्वेति लुगिति व्याचख्युस्तद्भ्रमात् द्विगोर्लुगनपत्ये इति तु बोध्यं।
द्व्यधिका इति एतच्च वार्त्तिकारूढमित्युक्तं यत्त्विह पूर्वपदप्रकृतिस्वरसिद्धये विस्पष्टादेराकृतिगणत्वं शरणीचक्रुस्तच्चिंत्यं उपलभ्यमानस्य तादृशस्वरस्य
द्वंद्वेऽनिर्वाहात् स्वरांतरेपीष्टापत्तौ बाधकाभावादिति दिक् एकादिः अदुक्प्रकारोच्चारणसामर्थ्यात्स्वरूपं न केचित्तु स्पष्टार्थमादुकं दीर्घादिमाहुः रात्रा
ह्नाहाः पुंसि परत्वादिति प्राचा एकवद्भावात्क्लीवत्वे सुत्वाहोरात्रमित्युदाहृतं तन्नेत्यवोचाम यत्तु वदंति रात्रादीनामेवानेन पुंस्त्वं विधीयते तदंते।
ष्वतु परवल्लिंगमित्येव सिध्यति अत एव भिन्नविषयत्वान्न विप्रतिषेधशंका एवं च समाहारे सनपुंसकमित्येव भवति परवल्लिंगापवादत्वादिति तन्न।
उक्तरीत्या द्व्यहत्र्यहरात्रे क्लीवत्वं स्यात् न चेष्टापत्तिः प्राचापि द्व्यहत्र्यहरित्युदाहृतत्वादाकरविरोधाच्च अमरोप्याह तेतु त्रिंशदहोरात्र इति मासेनस्यादहोरा

त्रइतिच तस्मात्तदंतस्यैवायंपुंस्त्वविधिः दंहृतत्पुरुषयोरितिप्रक्रमणादिति स्थितेसंख्यापूर्वमिति तथाचलिंगानुशासनसूत्रं अपथपुण्याहौनपुंसकौसंख्या।
पूर्वासत्रिरिति अमरोप्याह रात्रंप्राक्संख्यान्वितमिति गणरात्रंनिशाबह्व्यइतिच पुंस्त्वाधिकारेपिसएवाह रात्रांताः प्राक्संख्यकाइति एवंस्थितेद्विरात्रत्रि
रात्रइतिवृत्तिकारहरदत्तादिभिरुक्तंपुंस्त्वंप्रामादिकमेवेसवधेयं अर्द्धर्चाः पुंसिचइहकेषांचिदर्थभेदेनव्यवस्था तथाचशाश्वतः मकरंदस्यमद्यस्यमाक्षिक
स्यापिवाचकः अर्द्धर्चादिगणेपाठात्तुनपुंसकयोर्मधुरिति अमरस्तुमाध्वीकंमधुनद्वयोरित्याह पात्रावंतस्यनेतिस्त्रीत्वमितिशेषः सुदिनाहमिति सुदिनश
ब्दः प्रशस्तपर्यायः तत्रचप्रयोगः सुदिनासुसभासुकार्यमेतत्प्रविविचिन्वीतविशेषतः स्वयंचेति पथः कथंतर्हिव्यध्वोदुरध्वोविपथः कदध्वाकापथः समा
इत्यमरः व्यध्वोविपथकापथाविति भसकोशाच्च अत्राहुः प्रमादएवायमितिवक्तुतत्पथेगताविसस्मात्पचाद्यचिविपथतेव्याप्नोतीतिपथः अकारांतोयं।
तथाचत्रिकांडशेषः वारः पथश्चमार्गःस्यादितितेनसमासेपुंस्त्वंनचैवंविपथसिद्धावपिकापथोनस्यात्कादेशस्यदुर्लभत्वादितिवाच्यंईषदर्थेचेतितत्संभ
वात्कुत्सायामर्थतः पर्यवसानात्इदंत्ववधेयंपरवल्लिंगतापवादरूपत्वात्तत्पुरुषेएवेदंक्लीबत्वंप्रवर्ततेनान्यत्र विपथानगरीबहुव्रीहिरयं पंथानम।
तिक्रांताअतिपथाइहापिनद्विगुप्राप्तेत्यादिनापरवल्लिंगतायाःप्रतिषेधादितिमाधवः एवंचन्यायसाम्येनद्व्यन्हेत्यत्रापिरात्रान्हाहाइत्यस्यप्रवृत्तिर्नेति
माधवेनोक्तप्रायंमृदुपचतीतिक्रियाविशेषणत्वात् द्वितीयांतंधातूपात्तभावनांप्रतिहिफलांशःकर्मीभूतः तथाचफलसामानाधिकरण्येद्वितीया अ
तएवक्लघ्वाविस्त्यादौकारकपूर्वकत्वाघण् यत्रतुभावनांप्रतिकरणतयाधात्वर्थविशेषोन्वेतितत्रतद्विशेषणानांतृतीयांततैव ज्योतिष्टोमेनयजेतेतिय
थाएतच्चकरणेयजइतिसूत्रेवृत्तिपदमंजर्योःस्पष्टंनचैवंज्योतिष्टोमेनभक्तिपूर्वंयजेतेतिनसिध्येदितिवाच्यंभावनाविशेषणत्वेतदुपपत्तेः तत्रापिसं।
दर्शनप्रार्थनादिभिर्व्याप्यमानत्वात्क्रियायाकृत्रिमकर्मत्वविवक्षायांतद्विशेषणत्वाद्द्वितीयाअन्यथातुप्रथमैवेतिविवेकः सामान्येनपुंसकमिति
चअनियतलिंगविषयकंतेनअादिःपचतिप्रातरादिरितिपुंस्त्वमेव विस्तरस्तुशब्दकौस्तुभेबोध्यः पर्यायस्तैवेति कथंतर्हिनृपतिसभामगमन्नवेपमा

नाइतिकीचकवधेगजपतिवत्राजविशेषत्वादितिरक्षितःविभाषासेनाश्वनिशामितिकृष्णचतुर्दशीत्याहुःतस्यांकिलकेचिद्स्नानउपवसंति तथाचतिर्यगधि
करणेशावरभाष्यं शुनश्चचतुर्दश्यामुपवसतःपश्यामइति इतितत्पुरुषःयस्यत्रिकस्येति यद्यपिप्रादयोगताद्यर्थेप्रथमयेत्युक्तं तथापिद्वितीयाश्रितादिभि
रितिवत्प्रथमाकेनचित्सहसमस्यतेइतिनोक्तमित्यर्थःवार्तिककृताप्रथमयेत्युक्तावपिसूत्रकृतानोक्तमितिवा अन्यस्यपदस्येतिपदेनहिप्रकृत्यर्थोप
सर्जनःप्रत्ययार्थोभिधीयतेतथाचद्वितीयाद्यर्थेइतिफलितःतदाह अप्रथमेति समानेतिएतच्चशेषपदात्त्रय्यंप्राप्तमित्यादिग्रामकर्मकं प्राप्तिकर्तृउद
कंविग्रहार्थःउदककर्तृकप्राप्तिकर्मेतिसमासार्थःविग्रहेसइतिप्रयोगेतुतस्याप्ययमे वार्थःयद्यपिक्तप्रत्ययार्थस्यकर्तुर्धात्वर्थंप्रतिविशेष्यतोचि।
तात्तथापिव्यपेक्षावादिभिरगत्यासमासेभिन्नैवव्युत्पत्तिःस्वीकार्या किंच कर्तृविशिष्टप्राप्तेःपदार्थत्वेतस्यैवनामार्थेनयोदकस्यतद्भेदोवाच्यःसच
वाधितःनहिकर्तृविशिष्टाप्राप्तिरुदकमितिसंभवतिअपिचव्यस्तेसमीचीनमुदकमितिवत्समस्तेपिउदकविशेषणप्रयोगःप्राप्तःसचवृत्तस्यविशेष
णयोगोनेतिवचनेनैववारणीयःसिद्धांतेतुवहूनांवृत्तिधर्माणांवचनैरेवसाधनेस्यान्महद्गौरवंतस्मादेकार्थीभावपक्षएवस्थितःचकारादिनिषेधोथवहुव्यु
त्पत्तिभंजनंकर्त्तव्यंतेनन्यायसिद्धत्वस्माकंतदितिस्थितं ऊढरथादिः अनडुत्कर्तृकोह्वहनकर्मीभूतःरथःरथकर्मकोह्वहनकर्त्तात्तुसमासार्थःहृद्रसंप्रदा
नकोपहरणाकुम्भपशुःपशुकर्मकोपहरणसंप्रदानंरुद्रःस्थाल्यवधिकोद्धरणकर्मओदनःओदनकर्मकोद्धरणावधिस्थाल्यादिरर्थः इहकर्मा
दीनांसमासेनाभिहितत्वात्प्रथमा प्रथमार्थेत्विति दृष्टेदेवेअनयोर्नसमासोऽशेषत्वात्इत्यत्रतात्पर्यं व्यधिकरणानामिति अत्राप्युक्तएवहेतुःइ
त्यंशेषग्रहणफलमुपधनिवद्धंनचोन्मत्तगंगमित्यादिव्यावृत्तिरेवतत्फलंएकसंज्ञाधिकारेणैवतत्सिद्धेरितिभावः अनेकं किंवहूनामपियथास्या
त् तदुदाहरणंतुमूलेएवस्फुटीभविष्यति एवंचात्रसुविसर्गेनानुवर्त्ततेनतुसुपेति यत्तुसुप्सुपेत्यनुवर्त्यानेकंसुवंतंसुपासहेतिव्याख्यातं तन्न द्विपदवहु
व्रीह्यसिद्धिप्रसंगात् प्रादिभ्य इति प्रादिभ्यःपरंयद्धातुजंतदंतस्यपदांतरेणसहसमासोव्याख्येयःसूत्रसिद्धार्थानुवादोयंवाचेतिइदंतुवाचनिकं पूर्वपदं

नगेतस्योत्तरपदस्यधातुजस्येतियावत् लोपोवाच्यः एतच्चप्रादीनामेववृत्तौविशिष्टार्थवृत्तितामाश्रित्यसमुत्पन्नं स्त्रियाःपुंवत् ऊङोभावइति यदित्वूङोऽन्योऽनूङ्
इतिपर्युदासःस्यात्तर्हिप्रवाच्यत्तमेवगच्छेत्ततः किमितिचेत् इडविडोपसर्जनपदशब्दात् क्षत्रियाद्यञ् ऐडविडः दरदोपसंख्यात् मगधेस्यण् दारदः तयोः
स्त्रियामतश्चेतिलुक् इडविड्दरत् साचासौवृन्दारिकाचऐडविडवृन्दारिका दारद्वृन्दारिकेतिनसिद्ध्येत् नह्यत्रस्त्रीप्रत्ययः कश्चिदस्तीतिभावः निपातना
दिति एतच्चपूर्वत्रापियोज्यं वैयधिकरण्येनस्वरसतोवहुव्रीहेर्दुर्लभत्वात् अलुगिति इहभाषितपुंस्कमततीतिभाषितपुंस्कात् अततेःक्विप् एवंचस
मानाधिकरणएववहुव्रीहिः अलुगर्थेच्चयत्नोमास्त्विति यद्यपिसुवचंतथापिप्राचामनुरोधेनक्लिष्टंव्याख्यातमित्यवधेयं षष्ठ्याश्चेति एवंचसूत्रे।
केषांचित् षष्ठ्यन्तपाठोनाकरणवहरदत्तादिग्रंथविरोधादितिभावः तुल्येइत्यादि अयंभावः भाषितःपुमान् यस्मिन्नर्थेतद्भाषितपुंस्कंप्रवृत्तिनिमित्तंतद्
यस्यास्तीति अर्शआद्यच् तेनतुल्येप्रवृत्तिनिमित्तेउक्तपुंस्कंशब्दरूपंलभ्यतेइति स्त्रीवाचकेति एतेनस्त्रियाइत्यस्यस्त्रीप्रत्ययपरतांवारयति तथाहिसतिइ
त्यंसूत्रार्थःस्यात् अनूङःस्त्रीप्रत्ययस्यपुंसीवपुंवत्निवृत्तिरित्यर्थः यथामरुभूमिवदस्मिन्ग्रामेजलमित्युक्तेअभावएवातिदिश्यतेतद्वत् नन्वयमे
ववाक्यार्थोस्तुयथोक्तंप्राचाउक्तपुंस्कात्परस्यानूङःस्त्रीप्रत्ययस्यपुंसीवपुंवत्स्यात् पुंवद्भावात् स्त्रीप्रत्ययलोपइतिचेत्मैवं अस्यार्थस्याकरएवत्र
नेकधादूषितत्वात् तथाहि अस्मिन्पक्षे पटुभार्य्य इत्यत्रोत्तरपदनिमित्तायाःङीषोनिवृत्तेः अचःपरस्मिन्नितिस्थानिवत्त्वेसतियण् किंच वतंडस्या
पत्यंस्त्रीवतंडीवतंडाचेतियञ् तस्यलुक्स्त्रियामितिस्त्र्यपत्येलुक् शार्ङ्गरवादित्वान्ङीन् वतंडीचासौवृन्दारिकाचवातंड्यवृन्दारिकेतीष्यते अत्रङीनो।
निवृत्तावपि अर्थगतस्यस्त्रीत्वस्यानिवृत्तत्वाल्लुक्स्त्रियामितिप्रवर्त्तेत अपिचैवंऐडविडवृन्दारिकेत्यादिप्रागुक्तंनसिद्ध्येत् किंचगार्ग्यश्चताःवृन्दारि
काश्चगार्गीवृन्दारिकाःङीपिनिवृत्तेपियञञोरितिलुङ्नस्यात् अस्त्रियामितिनिषेधात् तस्माद्यथाकरमेवग्राह्यंलौकिकेत्यस्तुचित्राणांगवामयमिति
मीमांसकैर्विगृहीतंतच्चालौकिकालौकिकवहिर्भूतत्वादुपेक्ष्यमितिभावः एतच्चमासजातइत्यत्रप्रपंचितंचित्राअसिति अंतरंगानपीतिन्यायादिहपूर्वस

वर्णदीर्घेनप्रवर्त्ततेऽन्यथा एकादेशस्य पदादित्वेनसुपोलुकिचित्रगुरित्यत्र अकारोनलभ्येतेतिभावः नेहेतिइष्टसिध्यनुरोधेनपूर्वपदं क्वचिदाक्षिप्य
तेनानुसर्वत्रतथाचौजःसहोंभसइतिसूत्रेइहदत्तेनेत्यमेवोक्तमितिभावः आनङितितथाचसमर्थसूत्रेभाष्येहोतृपोतृनेष्टोद्गातारइत्यत्रचतुर्णांद्वंद्वेतृती
यस्यानङ्दाहृतः पूर्वपदाक्षेपेतुसनसिध्येत् नह्यत्रनेष्टापूर्वपदंनापितद्दंतंहोतुरेवपूर्वपदत्वादितिभावः अतएवेतिपूर्वपदानाक्षेपादेवइत्यर्थः चि
त्राजरदितिनचेहद्वंद्वात्मकस्यपूर्वपदस्यपुंवद्भावोस्तुतथाचटावपिनिवर्त्तेतेतिवाच्यंद्वंद्वांतर्गतयोःस्त्रीप्रत्ययप्रकृत्योःप्रत्येकंभाषितपुंस्कत्वेपिउप
हृतद्वंद्वस्यातथात्वात् तथाचपङ्क्तीमृद्वीभार्यायस्येतिविगृह्यपंक्तिमृदुभार्यइत्युदाहरत्ताभाष्यकारेणसर्वमिदंध्वनितमितिभावः द्वयोरपीतिपूर्वपा
दांतर्गतंउत्तरंपदमाश्रित्यप्रथमस्यापिपुंवद्भावइतिभावःजरच्चित्रेतिपूर्वकालेकेतिसूत्रेजरच्छब्दस्यप्रथमानिर्दिष्टत्वादुपसर्जनत्वेसतिलिंगविशि
ष्टपरिभाषयाजरत्याःपूर्वनिपातःकर्मधारयोत्तरपदेति एतेनादृष्टसदृशप्रजमितिप्रयोगोव्याख्यातः इहप्रघट्टकेबहूनांबहुव्रीहौपूर्वपदंनपुंवदिति
उक्तारूपेविशेषउक्तःअनिष्टविधावपिविशेषांतरंवक्ष्यति यत्तुप्राचानीलोज्ज्वलवपुरित्युदाहृतंतत्रस्वरेविशेषोबोध्यःतथाहिबहुव्रीहिपूर्वपदेनी
लशब्दस्यप्रकृतिस्वरःकर्मधारयपूर्वपदेतुकर्मधारयस्यांतउदात्तइतिमहान्भेदःस्त्रीप्रमाणीयस्येतिकरणार्थेल्युडंतत्वात्प्रमाणशब्दोविशेष्यलिं
गःटित्वान्ङीप् कथंतर्हिप्रमाणायांस्मृतावितिशाबरभाष्यंभावेल्युडंतात्तत्करोतीतिणिचिपचाद्यचिटाप् यद्वाप्रमाणमिवाचरतीतिआचारक्विबंतात्स
चाप्यच् भट्टास्तुप्रमाणमयतेयानिमूलभूतांश्रुतिंयतःक्विबंतादयतेस्तस्मात्प्रमाणास्मृतिरुच्यते १ इत्यादिग्रंथेनअयतेःक्विबंतस्येदंरूपमित्याहुः
तत्रहृस्वस्यपितीतितुग्दुर्वारः आगमशास्त्रमनित्यमितितुअगतिकगतिःइहतुगत्यंतरमुक्तमेव यदप्याहुःज्योर्वलीति — सोपिपीह्वलादिप्रत्ययाश्रयइ
तितदप्यापाततः तत्रप्रत्ययग्रहणेस्यात्प्रकृतत्वात् गौधेरःपचेतेइत्याद्युदाहरणविरोधाच्चत्यास्तांतावत्परिगणितान्तरन्तसादीन्त्रयोदशक्रमेणोदा
हरति वक्ष्योष्विति यद्यपिवड्वादिषुङीष्वैकल्पिकत्वात्तदभावेबहुत्वेत्यादिसिध्यतितथापिपाक्षिकानिष्टवारणायेदंयत्तुप्राचाततस्त्रेत्युदाहृतंतत्र

वेनाम्नोऽवृत्तिमात्रे इत्यनेन गतार्थत्वादुपेक्षितं दर्शनीयतरेति यत्तु प्राचा पटुतरा पटुतमेत्युदाहृतं तत्प्रामादिकमिति ध्वनयन्नाह घरूपेति · बहुथेति मका
रत्वेनेथाल् तत्र हि किंसर्वनामबहुभ्यः इत्यधिकृतं वृकतिरिति वृकज्येष्ठाभ्यां तिल्तातिलौ च छंदसीति तिल् अजथ्येति · अजाविभ्यां थ्यन् शसीति बह्व
ल्पार्थादित्ययमपि शस् तसिलादिषु द्रष्टव्य इत्यर्थः त्वतलोरिति अत्र वदंति जातिसंज्ञाव्यतिरिक्तं धर्ममात्रं गुणः इति एवं च क्रियाशब्दानामप्यनेन पुं
वद्भाव इति भावः अत एव प्राचा नकोपधाया इति सूत्रे पाचिकाता पाचिकात्वमित्युदाहृतं तस्यात्रेण च त्वतलोरिति व्याख्यातं तदेतत्सर्वं भाष्यादिवि
रोधादुपेक्ष्यं तथा हि एकतद्धिते चेति सूत्रे एकता एकत्वमित्युदाहृत्य पुंवद्भावेन सिद्धमित्याशंक्य भगवानाह उक्तमेतत्त्वतलोर्गुणवचनस्येति अत्र कैय
टः एकशब्दस्य संख्यावाचितायां गुणवचनत्वेपि असहायवाचिनो तथात्वादिति भाव इति एवं हि वदता शुक्लादय एवेह गुणा इति ध्वनितं अत एव तत्त्वेवोदा
हरंति शुक्लत्वं शुक्लतेति अत एव च मत्युदाहरंति कर्त्र्योरिति कर्त्रीत्वमिति तथा च स्त्रियामिति सूत्रे व्यापिनीत्वात् प्रवृत्तेरिति कैयटेन प्रयुक्तं तथा पुंयोगादिति
सूत्रे स्त्रियाः संविधात्रीत्वादिति तेनैव प्रयुक्तं प्रगृह्यसंज्ञाप्रकरणेपि विभक्तेरेव संज्ञिनीत्वादित्युक्तं स्यादेतत् निरीक्ष्यमेने शरदः कृतार्थतां क्लीवतामुपगता।।
स्त्वनुवेलं धृष्टतारहसि भर्तृषु ताभिः सा मुमोच रतिदुःखशीलतां इत्यादिप्रयोगाणां का गतिरित्यत आह शरद इति सामान्ये इति तथा च पत्युर्नो यज्ञसंयोग।।
इति सूत्रे पत्न्याः फलप्रतिग्रहीतृत्वादिति वृत्तिग्रंथमुपादाय कर्तृत्वमात्रं विवक्षितं न तु स्त्रीत्वमिति अभिन्नकृत इति हरदत्तो व्याख्यत् परः सन्निकर्षः इति सू
त्रे एकैकवर्णवर्तित्वाद्वाचः इति भाष्ये कैयटोप्येव माह एतेन नेष्टं पुरो द्वारवतीत्वमासीदिति माघोपि व्याख्यातः रौहिणेय इति रोहिणीशब्दाड्ढगादनुदात्ता
दिति ङीप्रकारेण पुंवद्भावे तु सति तयोर्निवृत्तौ रौहितेय इति स्यादिति भावः गृह्यत इति व्याख्यानमेवात्र शरणं शत्रुपर्यायादिति अत्र च व्यन्सपत्ने इति निर्दे
शो लिंगं रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः इत्यमरः विवाहनिबंधनमिति तज्जन्यसंस्कारविशेषे रूढमित्यर्थः क्षापस इति भाषितपुंस्कत्वात् पुंव
द्भावे कृते यस्येति लोपः एतच्च सुवधातुवृत्तौ स्पष्टं यत्तु पारक्षण इति धातौ माधवेनोक्तं भावकर्मणोः पत्वंतलक्षणो यक् किमापत्वं अभाषितपुंस्कत्वात् पुंव।।

द्भावो नेति तत्तु द्वितीयं सपत्नीशब्दमाश्रित्येत्यविरोधः यत्तु नित्यं सपत्न्यादिष्विति सूत्रन्यासकृतोक्तं समुदायोच्चारणं पुंवद्भावबाधनार्थमिति तन्न समानस्य सभावार्थं रू
ढ्यर्थे च निपातनाश्रयणेन समुदायोच्चारणस्य तावतैवोपक्षयात् अन्यथा संबुद्धिह्रस्वादीनामपि बाधापत्तेः किंच तसिलादिष्विति सूत्रे भाष्यकारेण सपत्नीश
ब्दाच्छ्वा घणिभस्याढ इति पुंवद्भावेन सापत इति प्रापय्य शिवादिषु केवलयौगिकस्य ग्रहणेन साशयेन सापत इति प्रयोगो वारितः निपातनस्य पुंवद्भावनि
वृत्त्यर्थत्वे तु तत्सर्वं विरुध्येतेति दिक् भावत्का इति ठावस्थायामेवाभत्वेपि पुंवद्भावो विधीयते अन्यथा हि कृते इकादेशे भत्वात्पुंवद्भावे सन्निपातप
रिभाषया कादेशो न स्यात् मा थितिक इतिवत् भाष्यकारेष्टेति अनेन सूत्रवार्तिकयोरुक्ति संभवोपि ध्वनितः अत्रादृष्टा पूर्वस्याप्रवृत्तत्वात् निष्कर्षं तु वेय ।
थ्यस्पष्टमेवेति भावः इष्टे रूदाहरणान्याह सर्वमय इत्यादिना मयडादीनां परिगणनात् तसिलादिबहिर्भावात् न सूत्रेणगतार्थता अत एव सर्वतः सर्वत्रेत्यादिनो ।
दाहृतं सर्वकभार्य्य इति न च स्त्रियाः पुंवदिति सूत्रेण गतार्थता न कोपधायाः इति निषेधात् न चास्यापि तेन निषेधः शंक्यः स्त्रियाः पुंवदित्यादिप्रकरणोक्तस्य
वतेन निषेधात् अ स्याइष्टे स्तु तस्मिन् प्रकरणेऽसमाविष्टत्वात् सर्वप्रिय इति अपूरणीप्रियादिष्विति पर्युदासाद् प्राप्ते पूर्वस्येति वृत्तिघटकानेकभागमध्ये
किंचिदपेक्षयापूर्वस्येत्यर्थः अत एव तद्भिन्ने स्यादौ परस्य न पुंवद्भावः लिंगादिति अन्यथा एषा ह्यागतयोः कात्पूर्वस्य आपि विधीयमानमित्त्वं निर्विषयं ।
स्यादिति भावः यत्तु प्राचोक्तं सर्वनाम्नो समासे पूर्वे पुंवदिति यच्च व्याचख्युः वार्तिकार्थमनुवदति सर्वनाम्न इत्यादिना सर्वनामशब्देन संज्ञोपसर्जनभिन्ना एव
गसेऽस्मिन्नियता उपलक्ष्यंते तेन सर्वानामिका चित् तस्याः पुत्रः सर्वापुत्रः अति सर्वा पुत्र इत्यत्र नातिप्रसंग इति तदेतत्सर्वमापातरमणीयं तथाहि समासेऽस्य
ना कार्यं वृत्तिमात्र इति भाष्यात् मयडादयस्तेनाप्रपंच तथा च श्रीहर्षः प्रायुंक्त निजां मयोध्यामपि पावनीमयं भवन्मयोध्यापतिना व नीपतिरिति किंच व्राह्म
णीपूर्व इत्यादावतिव्याप्तिः न च स्या[illegible]ति निषेधः सोऽत्र प्राप्तिमात्रविषयकः स इति सिद्धांतात् रूपवती पूर्व इत्यादौ जातिवाचकत्वाभावेनातिव्याप्तिदार्ढ्या
च्च वार्त्तिकार्थमित्यपि स्वयीयः वार्त्तिके[illegible]तदभावात् न चात्र विवदितव्यं ठकच्छसोरित्यस्य निरालंबनतापत्तेः सर्वनामशब्देनेत्याद्यपि न साधु उक्तोदाह

म·सु·
७१

रणयोर्लक्षणं विनापि सुस्थत्वात्तद्ग्रहणप्रयोजनं ये इत्यादावुपसर्जनतयाव्याख्यापत्तेश्चाननुमात्रग्रहणसामर्थ्यात् सर्वनामता उपलक्षणं न तु विशेषणं तेन वृत्तेः
प्राक् सर्वनाम्नः संप्रत्यसर्वनाम्नोऽपि पुंवद्भावो लभ्यते इत्याकरे स्थितं मयापि स्वग्रंथे उक्तमिति चेत् तर्हि उपसर्जनभिन्नालक्ष्यंते इति त्वदुक्तस्य त्वदुक्तैव परा
हतइत्यवधीयतां न चैवमतिसर्वो पुत्रोऽस्येत्यव्याप्तिः अतिसर्वाशब्दस्य कदाप्यसर्वनामत्वे न तत्रातिव्याप्तेः हृक्ति संभवाभावादित्यास्तां तावत् स्वभिन्नामिति व्या
ख्यानमेव दर्शनीयं मन्यते तत्र स्त्रियाः पुंवदित्येव सिद्धे एकस्या एव हूपभेदेन कर्मत्व कर्तृत्वयोः सत्वेपि वास्तवाभेदेन सामानाधिकरण्याविघातादि
तिभावः मद्रिकायत इति मद्रेषु भवा मद्रिका मद्रवृज्योः कन् पाकाभा इति· अर्भकपृथुकपाकाः वयसीति कप्रत्ययांतोऽयं उणादिषु निपातः न त्विह तद्धितः
नापि वुः वयसि प्रथम इति ङीपं बाधित्वाजादित्वाट्टाप् वृद्धिनिमित्तस्य वृद्धिशब्देन किम् तावती भार्यास्य तावद्भार्य्यः आ सर्वनाम्न इत्याकारविधौ वृद्धिशब्दो
नापि वैयाकरणभार्यो न सिद्ध्येदिति भावः अकेमेति सह नञ् विद्यमानपूर्वाच्चेति ङीषभावः
नास्ति फलोपधानेति निमित्तशब्दः फलोपहितपरः स्वरूपयोग्यपरत्वे तु वैयाकरणभार्यो न सिद्ध्येदिति भावः अकेमेति सह नञ् विद्यमानपूर्वाच्चेति ङीषभावः
जातेश्च जातेः परऊङिति जातिवाचकात्परत्वमात्रमिह विवक्षितं न तु जातेरित्येवं विधानपर्यंतमाग्रहः भाष्ये हास्तिकमित्युदाहरणे आपसंख्यानिकस्य नायं।
निषेध इत्युक्तेः तेन हस्तिनीभार्य्य इत्यादौ नांतलक्षणस्यापि निषेधः सिध्यतीति भावः यः प्रत्यय इति टावादिः प्राचा तु विशिष्य ङीषेवोपात्तः तन्निर्मूलं
शूद्राभार्य इत्यादावव्याप्तं चेति भावः ब्राह्मणीति शार्ङ्गरवादित्वान्ङीन् यत्तु प्राचा ङीषन्तपुंवदिति व्याख्याय ब्राह्मणीभार्य इत्युदाहृतं तत्परस्परविरोधादु
पेक्ष्यं सौत्रस्यैवेति व्याख्यानमेवात्र शरणं संख्यया सामानाधिकरण्यस्यान्यपदार्थे वृत्तेश्च विरहात्पूर्वेणाप्राप्तौ वचनं उपदशा इति उपशब्दः समीपे सा।
मीपि निवर्तते आद्येऽव्ययीभावः द्वितीये तु बहुव्रीहिरिति विवेकः सूत्रे तौ तिलुप्तषष्ठीकमित्याह तिशब्दस्येति· अन्येषामपि दृश्यते अत्र प्राचोक्तं दशिग्र।
हणात्कर्मव्यतिहारबहुव्रीहौ पूर्वपदांतस्य दीर्घत्वमात्वं चानचीति तत्राखं चेत्यपाणिनीयं अत एव मुष्टामुष्टिवा हावीहवीति उदाहरणमप्रामाणिकमे।
वभाष्यादिविसंवादात् अत एव दशिग्रहणस्येदृशेर्थे तात्पर्यं न कल्प्यमिति प्रामाणिकः पंथाः अर्वाचीनास्तु आत्वमाहुः तथा च पंचिकायां त्रिलोचनदासेनोक्तं

राम·
७१

नाभ्यंतपूर्वपदस्यात्वं दृश्यत इति एवं च प्राचा केचिदिति वक्तुमुचितं तु पाणिनीयसूत्राशयमध्ये निक्षेपस्त्वनुचित एवेति दिक् ओर्गुणः तद्धिते किं पद्वी गुणोक्तिः।
रिति यद्यपि ओरोदिति सूत्रितेपि भस्य तद्धिते इति संज्ञाद्वयपूर्वकत्वमस्त्येव तथापि विधेयसमर्पकं पदं यत्र संज्ञारूपं स एव संज्ञापूर्वको विधिरिति भावः य
द्यपि ओरोदितित परत्वात्कालस्य संज्ञैव तथापीह तकार उच्चारणार्थः ओरोदित्येव वास्तु स्वरूपं शब्द स्येति तु प्रत्याख्यातमिति भावः तेन सहेति तुल्ययोगे तुल
योगे किं सहैव दशभिः पुत्रैर्भारं वहति गर्दभी विद्यमानतावाची सहशब्दः दशसु पुत्रेषु विद्यमानेष्वित्यर्थः वोपसर्जनस्य उपसर्जनस्येति नसहस्य विशेषणं
अव्यभिचारात् किं तूत्तरपदेन सन्निधापितस्य समासस्य तच्चावयवद्वारकं उपसर्जनस्यैव यवकस्य समासस्य बहुव्रीहेरिति यावत् व्यधिकरणे च षष्ठ्यौ
तदेतदाह बहुव्रीहेरवयवस्येति तेनेह न सहकृत्वा सहयुध्वा प्रायिकमिति सपूर्वायाः प्रथमायाः उदश्वरः सकर्मकादित्यादिनिर्देशादिति भावः स्वरे विशे
ष इति डचि सति चित इत्यंतोदात्तत्वं स्यात् असति तु पूर्वपदप्रकृतिस्वर इत्यर्थः संख्याया इति संख्यातस्य तत्पुरुषस्य अंतावयवो ऽज्वाच्य इत्यर्थः एकविं
शतिरित्यादौ तु न अन्यत्राधिकलोपात् इति वार्त्तिककारोक्तेः स्थूलाक्षेति यत्तु प्राचा प्रत्युदाहृतं स्थूलाक्षिरिक्षुरिति तन्न अक्ष्णोऽदर्शनादित्यस्य च प्रसंगात् यत्तु व्या
चख्युः समासांतविधेरनित्यत्वात् सनकृत इति तदापाततः एवं हि षज्जपित थैव न भविष्यतीति प्रत्युदाहरणस्यासंगतिप्रसंगात् नेतुर्नक्षत्र इति नक्षत्रे।
यो नेतृशब्दस्तदंताद्बहुव्रीहेरित्यर्थः नेता नायकः ननु स्थूलपूर्वादिति स्थूलपूर्वाद्बहुव्रीहेरच् नेत्यर्थः खुरखराभ्यामिति नासिकाया इत्यपेक्षते केवलादेश
वन्नं प्रत्ययनित्यर्थे उपसर्गाच्च उपसर्गग्रहणं प्रादीनामुपलक्षणं नासिकाशब्दस्याक्रियार्थत्वेन तं प्रत्युपसर्गत्वायोगात् तदाह प्रादेरिति तद्व्यक्तेति।
ग्रणो नयप्रतनं वस्योन्न च्छे[illegible]: पूषाद्यादावव्याप्तिव्याप्तिप्रसंगात् शोभनं प्रातरस्येति प्रातःशब्देन प्रातस्तनं कर्म लक्ष्यते अन्यथा प्रातःशब्दस्याधिक
रणशक्तिप्रधानतया सामाना[illegible]धिकरण्यासंभवात् इत्याहुः एणीपदादिषु त्रिषु निपातनात् पुंवद्भावः धर्मादनिच् केवलात् इह बहुव्रीहिणा पूर्वपदमाक्षिप्यते
इत्यनुपदमेव वक्ष्यते तच्च केवल[illegible]विशेष्यते इत्याह केवलादिति यत्तु प्राचा केवला दिसुभयविशेषणतया व्याख्यातं तत्सौत्रेण च केवलादिति धर्मश

द्वस्यपूर्वपदस्यचविशेषणमित्युक्तंपा[illegible]र्यणेचकेवलादितिकेवलस्यधर्मप्राकृपदयोर्मतमित्युक्तंतत्सर्वमापाततः धर्मपदविशेषणेप्रयोजनाभावात् धर्मशब्दं
तंपत्रोत्तरपदंतद्व्यावृत्तिः फलमितिचेत्[illegible]त्रिध[illegible]वहुव्रीह्यवयवीभूतपूर्वपदान्तरत्वस्याभावात् त्रिपदेवहुव्रीहाविति इहसर्वनामसंख्ययोरुपसंख्यानमितिस्वशब्द
स्यपूर्वनिपातोनभवति आहिताग्न्यादेराकृतिगणत्वादितिहरदत्तमाधवौ आपेक्षिकमितिनन्वतएवकेवलग्रहणंव्यर्थं पूर्वपदशब्दस्यसमासप्रथमावयवेरूढत्वेनैव
मध्यमपदव्यावृत्तिसंभवात् इतिचेन्मैवं पूर्वपदाक्षेपेतात्पर्यग्राहकत्वेनैव केवलपदस्यसार्थकत्वात्कर्मधारयेतियत्त्वाहुः साध्योधर्मोस्येतिसाध्यधर्मासंदिग्धश्चासौसच्चे
तिविग्रहः सचसंदेहः साध्यधर्मद्वारकएवपर्यवस्यतीति सोयंवृथाक्लेशः उक्तरीत्यैवसाध्यस्यसाक्षात्संदिग्धत्वलाभात् ननुकर्मधारयपूर्वपदत्वेऽनिचदुर्लभः केवलादित्य
स्यसमासानात्मकादित्यर्थादितिचेन्मैवं त्वदुक्तेक्षितार्थस्याकरग्रंथानारूढत्वात् अस्मदुक्तार्थस्तुभ्वादिगणेधृञ्धारणे इतिधातौमाधवग्रंथेस्पष्टः निवृत्तिध
र्मोहिंस्यानीभवतीतिप्राचांप्रयोगोप्यस्माकमेवानुकूलइतिदिक् कृदंतेचेतितथाचदृश्यते इमंजंभसुतंपिवेति दक्षिणेर्मालुब्धोव्याधः अतएवाह व्याधेनेति कवयस्तु
हिंसामात्रेप्रयुंजते वालोहेम ज्र्मालोगुणनिधिरिषुणानिर्मितोदक्षिणेर्माइतियथाकेशाकेशीतितत्रतेनेतिवहुव्रीहिः तत्रहिग्रहणंप्रहरणंयुद्धानीवकर्मव्यतिहा
रेपिइतिशब्दाल्लभ्यते इच्प्रत्ययस्यतिष्ठद्गुप्रभृतिषुपाठात्तदंतस्याव्ययीभावत्वं नन्वेवंअव्ययीभावसंज्ञयावहुव्रीहिसंज्ञाया वाधात्समासस्वरेणैवांतोदात्तत्वं
सिद्धं तत्किमिचश्चित्त्वेन अत्राहुः विशेषणार्थंतत् तिष्ठद्गुप्रभृतिष्विकारमात्रपाठेहिसुगंधिरित्यादावतिव्याप्तिः स्यात् यद्वा दंडादंडीत्यादौसंज्ञयोःसमावेशएव।
उपजीव्यविरोधस्यान्याय्यत्वात् एवंचस्वरार्थमपिचित्त्वं द्विदंडीतिद्विदंडाशालेत्यत्रतुइच्न समुदायनिपातनस्यविषयविशेषपरिग्रहार्थत्वात् उभाहस्तीतिनि।
पातनादेवायचंविनापिप्रयोगः उभयाहस्तीतिपक्षेऽयच् उभयाहस्त्याभरप्रसंभ्यां जानुशब्दस्यैकत्वेप्यर्थगतमुपपदनिवंधनंवाद्वित्वमाश्रित्यजानुनोरिति
द्विवचननिर्देशः तत्फलंतुस्थानषष्ठीत्वस्फुटीकरणं जानुनइत्युक्ते किंपंचमीपंप्रत्ययाधिकारश्चज्ञुरपिप्रत्ययइतिसंभाव्येत तदेतद्ध्वनयन्नाह ज्ञुरादेशइति छंदसि
तुस्वतंत्रोपिदृश्यते उपज्ञुवाधोनमसास्देम धनुषश्च धनुरंतस्येतिधनुरंतादितिप्राचःप्रमादः अथकथंस्वलावण्याशंसाधृतधनुषमन्हायतृणवदितिपुष्पदंतः स

मासांतविधेरनित्यत्वात् अनित्यत्वे प्रमाणं तु श्वादिगणे राजन्शब्दस्य पाठः स हि प्रतेरंश्वादयस्तत्पुरुषे इत्यंतोदात्ततार्थः राजाहःसखीति टचो नित्यत्वे तु किं तेनेति
दिक् अविभागेनेति एवं च गुणवाचिन एवेह ग्रहणं न तु द्रव्यवाचिन इति फलितोर्थः द्रव्याणीति अस्ति च गंधशब्दो द्रव्यवचनः वहति जलमियं पिनष्टि गंधा
नियमियमुद्धूयते स्रजो विचित्रा इति दर्शनात् गंधस्तु सौरभे नृत्ये गंधके गर्वलेशयोः स एव द्रव्यवचनो बहुत्वे पुंसि च स्मृत इति कोशाच्च एतेन महीभृतः पुष्पसुगंधि
राददे भग्नवालसहकारसुगंधौ इत्यादि व्याख्यातं एतच्च सर्वं हरदत्तग्रंथे स्पष्टं केचित्तु तदेकांतशब्देन स्वाभाविकत्वं विवक्षित्वा आगंतुकस्य नेत्याहुः तथा च भट्टिः
आघ्रायिवान्गंधवहः सुगंध इति व्याख्यातं च जयमंगलायां गंधस्येदुत्पूतिसुसुरभिभ्य इतीकारः समासांतो न गंधस्येत्त्वे तदेकांतग्रहणं इति वचनात् सुगंधमाप
णिक इति यथेति अत एव भग्नवालसहकारसुगंधाविसादीनां प्रामादिकत्वं दुर्घटवृत्तिकृतोक्तं अस्याख्यायां सूपस्येति व्यधिकरणपदो बहुव्रीहिः अत एव ज्ञा
पकात् यद्वा सूपो गंधोस्मिन्निस्येव विग्रहः गंधशब्दस्य विशेषणत्वेपि अस्मादेव ज्ञापकात्परनिपातः इति विश्व इति एतेनाल्पपर्यायोयं गंधशब्द इति प्राचो
ग्रंथो व्याख्यातः अल्पाख्यायामिति सूत्रस्यापीहैव स्वारस्यं यत्तु वदंति गंधशब्दो लक्षणयाल्पत्वं गमयतीति तच्चिंत्यं शक्तिग्राहकस्योक्तत्वात् पादस्य पद्यर्थं लोपः
समासांतो न स्यादादेः परस्य सादेः स्यात् शेषिकः कप् च प्रसज्येत समासांतोस्य शेषस्याश्रयणात् अत आह अयं समासांत इति कथं पुनरभावो भावस्यावय
वः अत्राह स्थानिद्वारेणेति औपचारिकमवयवत्ववचनबलादिति भावः वयसि कथं तर्हि सादस्रोषात्सुदती समसृजेति नह्यत्र वयो गम्यते अतः सुदंतीतिभा
व्यं अत्राहुः शोभनादंताः अस्याः समस्ता जाता न तु न्यूना इति [illegible]थं चिदिहापि वयो गम्यत एवेति उरःप्रभृतिभ्यः कप् लक्ष्मीरिति नद्यृतश्चेति सिद्धं नियम
मार्थमिह पाठः एकवचनात [illegible] स्यात् अन्यत्र [illegible]तिकप् एव तेन अकृशमकृशलक्ष्मीश्चेतसाशंसितं स इति सिद्धं अकृशलक्ष्म्या यस्येति वि
ग्रहः यत्तु प्राचोक्तं नद्यृतश्चेति कप् [illegible] इति तत्सामादि[illegible]ति व्याख्यातारः नियमशास्त्रस्य निषेधमुखेन प्रवृत्तिरिति पक्षमाश्रित्य स वा योज्यं अनर्थके
नापीति कथं तर्हि सुपथी नगरीति प्राचामुदा[illegible]णं स्वयमनुसृत[illegible]त्वात् न च न पूजनादिति निषेधः षच् प्राचीनानामेव स इति वक्ष्यमाणत्वात् सत्यं

समासांतविधिरनित्य इति कथं चित्र[illegible]पथीति युवोरनाकः सूत्रीयभाष्याच्चेत्युक्तं तत्रादिनेति एतच्च प्रकृतसूत्रस्थ इत्यादिग्रंथानां बहुव्रीहिप्रकरणे कव
भावार्थं चेति पुनः भाष्यकारेण ते [illegible] लभ्यते यत्तु वदंति प्रतिपदोक्ताः समासांताः स्वविषये बाधका भवंति तत्किं अनुक्तसमासांतपरेणाशेषग्रहणेनेति
तन्न ऋक्पूरित्यादीनां समासांते चरितार्थतया परेण कपा बाधापत्तेः बहुनाडीति उपसर्जनह्रस्वः सप्तमीविशेषणे कंठेकाल इति यदा कंठे किंचिदस्तीति निर्ज्ञाते का
ल इति विशेषणं तदेदं बोध्यं अन्यदा तु सप्तमीग्रहणं विनापि विशेषणत्वादेव सिद्धं चित्रगुरिति यद्यपीह उपसर्जनं पूर्वमिति सिद्धं तथापि बहुव्रीहौ सप्तमी त्युक्ते तक्र
कौंडिन्यन्यायेन उपसर्जनपूर्वत्वं बाध्येत अतो विशेषणग्रहणं सर्वनामेति कथं तर्हि ततः परो यस्मात्स तत्पर इति कथं च जहत्स्वार्था वृत्तिरिति इह हि जहत् स्वं पदं यं
स जहत्स्वः सोऽर्थो यत्रेति बहुव्रीहिगर्भो बहुव्रीहिः तथा च स्वपरशब्दयोः सर्वनामत्वात् पूर्वनिपातेन भाव्यं सत्यं सूत्रभाष्यादिप्रयोगात् राजदंतादिप्रयोगाद्वा सिद्धं
सारंगजग्धीति अस्वांगपूर्वपदाद्वेति ङीष् कथं चारुस्मितमिति नपुंसके भावे क्तः इत्यस्य न पूर्वनिपातः निष्ठाशब्देन विहितस्यैवेह ग्रहणादित्याहुः इति बहु
व्रीहिः चार्थे द्वंद्वः चार्था इति चशब्दस्यार्था इत्यर्थः असामर्थ्यादिति एकार्थीभावाभावादित्यर्थः तथाहि बहुव्रीहि घटकपदानां कर्मीघंतर्भावेणाबद्धं द्वघटकपदा
नां चार्थांतर्भावेणैकार्थीभाव आवश्यकः समर्थः पदविधिरिति परिभाषितत्वात् चार्थे द्वंद्व इत्युक्ते च न चैकशक्ति विषयाणां समप्रधानानां परस्परं विहाय इ
तरान्वयः संभवति येन समुच्चयान्वाचययोः स्यातां किंतु मिलितानामेवान्वयो वाच्यः मेलनं च समुदायः स च वर्त्तिपदार्थं प्रति विशेषणं विशेष्यं चेति द्वैधं तत्राद्ये इ
तरेतरयोगद्वंद्वः द्वितीये समाहारद्वंद्वः उभयथापि समुदायस्य द्वंद्वेनोक्तत्वाच्च शब्दाप्रयोगः न चैवं नीलोत्पलमित्यादावपि चशब्दांतर्भावेण विग्रहदर्शनादेका
र्थीभावसत्त्वाच्च द्वंद्वो दुर्वार इति वाच्यं सामानाधिकरण्ये विशेषविहिततया विशेषणं विशेष्येणेति तत्पुरुषसंज्ञया द्वंद्वसंज्ञाया बाधात् यत्तु केचित्कर्मधारयसं
ज्ञया बाध इत्याहुस्तत्तुच्छं तस्याः एकसंज्ञाधिकारबहिर्भूतत्वात्संज्ञानां च कृतकृत्यप्रत्ययादिषु समावेशस्य सुप्रसिद्धत्वान्न्याय्यत्वाच्च सामानाधिकरण्यस्याविवक्षा
यां तु द्वंद्व इष्टापत्तिरेवेति दिक् होतृपोत्रिति अनयोरुत्तरपदपरत्वाभावादानङ् अजाद्यदंतं कथं तर्हि सौष्ठवौदार्यविशेषशालिनीं लोचनाधरकर्णाहतरागेति

भारविः अत्राहुः अनित्यमिदं प्रकरणं समुद्राभ्राद्घः इत्यादिनिर्देशात् द्वंद्वश्च प्राणितूर्यसमाहार एवेति विपरीतस्तु नियमो न भवति समाहारे प्राण्यंगादीनामे
वेति तिष्यपुनर्वस्वोरिति सूत्रे बहुवचनग्रहणात्तद्विसमाहारैकवचनस्य माभूदिति कृतं तिष्यपुनर्वसू इति यथा उदगादिति इह यदा कंठेषु कलापेषु उदितेषु प्रतिष्ठि
तेषु चावाभ्यां तत्र गंतव्यमिति संवादं कृत्वा तं च विस्मृत्य कश्चिदास्ते तं प्रतीदमुच्यते कठेन प्रोक्तमधीयते कठाः वैशंपायनांतेवासित्वात् णिनिः कठचरकाल्लुक् ॥
अध्येत्रणस्तु प्रोक्ताल्लुक् कलापिनोऽण् स च ब्रह्मचारी स्यात् उपसंख्यानादित्त्रोपः अध्वर्युशब्दो यजुर्वेदं लक्ष्य पतिं तदाह यजुरिति पदान्यधीते पदकः क्र।
मादिभ्यो वुन् एवं क्रमकः पदान्यधीत्य क्रमोऽध्येतव्य इति स्पष्टा प्रत्यासत्तिः अध्यापनतः किं पितापुत्रौ अविप्रकृष्टेति किंयाज्ञिकवैयाकरणौ जातिरप्राणिनां कथं ता
र्हि रंजितानुविविधास्तरुशैला इति भारविः तरुसहिताः शैला इति व्याख्येयं विशिष्टलिंगो नदी सूत्रे च त्वारोपि शब्दा अवयवधर्मेणावयविनिर्द्दिष्टा वोध्याः नदीभ
ग्रहणामदेशत्वात् जनपदो हि देशः अत एव पर्वतानां न कैलासश्च गंधमादनं च कैलासगंधमादने चकारेण वाध्यते इति चकारः पुनर्विधानार्थ इति भावः पा
त्रादिति ये भुक्ते भस्मना शुध्यते कांस्यमित्यादि स्मृत्युक्तसंस्कारेणापि पात्रं न शुध्यति तेषामित्यर्थः अनिरवसितानामिति निषेधबलादेव शूद्रशब्दोऽत्रैवर्णि
केतरपरः न तु शूद्रत्वजातिपरः गवाश्वमिति इह पशुद्वंद्वे विभाषाप्राप्तादासीदासमिति अत्र पुमान् स्त्रियेत्येकशेषो वाध्यते अत्र वार्त्तिकं गवाश्वप्रभृतिषु
यथोच्चारितं द्वंद्ववृत्तमिति गणपाठे रूपमेषां विवक्षितं ननु पूर्वोत्तरपदनिर्देशमात्रं तात्पर्यमित्यर्थः तेनावड्डदेशाभावपक्षे न भवति अपशवो वा अन्येण।
[illegible]भ्यः पशवो गो अश्वाः सग्रहणमिति विकल्पार्थम [illegible] कत्वार्थमिति अयं भावः पशुद्वंद्व इत्येव सिद्धे अश्ववडवग्रहणं प्रतिपदविधा।
नार्थं तेनाश्ववडवमित्येकवद्भावपक्षे पूर्ववद् अश्ववडवावि [illegible] नपुंसकमित्येतदेव भवति तच्छब्देन हि एकवद्भावभाजं परामृश्य विधीयमानं नपुं
सकत्वं एकवद्भाववदेव प्रतिपदविहितं भव[illegible] अन्यथो [illegible] वडवाविव्यस्य निरवकाशत्वशंक्य एकवद्भावविरहपक्षे सावकाशत्वात् विप्र
तिषिद्धं च भवत्येवेति विप्रतिषिद्धे [illegible] नस्यात [illegible] मेवेति नियमादिति भावः यत्तु वृत्तिकृता कामक्रोधाविति प्रत्युदाहृतं तन्न तत्रापि

शीतोष्णसुखदुःखमित्यादाविव पाक्षिक[illegible]वद्भावस्य दुर्वारत्वात् नियमार्थं हीदं सूत्रमिति स्थितं न चाद्रव्यवाचिनां चेद्भवति तर्हि विप्रतिषिद्धानामेवेति।
न्तदाशयः कल्प्यः शीतोष्णे उदके इत्यत्र पाक्षिकैकवद्भावापत्तेः न चेष्टापत्तिः अनधिकरणवाचीति किम् शीतोष्णे उदके इति स्वोक्त्या सह विरोधापत्तेरिति दिक्। दधिप
यसी इति व्यञ्जनत्वाद्विकल्पः प्राप्तः अधिकरणैतावत्त्वे च समासार्थस्याधिकरणमाश्रयो वर्त्तिपदार्थः तस्य एतावत्त्वे परिमाणनियमः तस्मिन् गम्यमाने इति व्याच
ष्टे द्रव्यसंख्येति अत्र व्याचख्युः समाहारद्वन्द्वस्यैवायं निषेधो न तु नियमस्य तथाहि सति नियमे प्रतिषिद्धेऽपि चार्थे द्वन्द्व इति समाहारे द्वन्द्वः स्यादिति तन्नेति ध्वनय
न्व्याचष्टे नियमो न स्यादिति अयं भावः प्राचां पक्षेद शदंतोष्ठा इति त्वदुदाहृत मेव न सिध्येत् प्राण्यंगानां समाहारद्वन्द्वस्यनेनेतरेतरयोगद्वन्द्वस्य निषिद्धत्वा
त् ननु समाहारद्वन्द्वोऽपि प्रकृतसूत्रेण निषिद्ध इति चेत्तर्हि वाक्यमेव स्यात् द्वन्द्वद्वयस्यापि निषेधात् एवं च पंचखिहासांघ्रिकरेष्वभिख्याभिक्षाधुनामाधुकरी
सहक्षे सादीनामसाधुत्वं स्यात् किंच समाहारद्वन्द्वनिषेधो व्यर्थः न्यायबलेनैव तद्धारणात् तथाहि वर्त्तिपदार्थस्य संख्याविशेषबोधनीये समाहारद्वन्द्वस्य प्रा
प्तिरेव नास्ति सविशेषणानां वृत्तिर्नेति वचनात् सापेक्षत्वेनासामर्थ्याद्वा कथं तर्हि दशपंचमूल्य इति समाहारे द्विगुरिति चेत् प्रधानभूते समाहारे दशत्वसं
स्यान्वयादिति गृहाण न चोक्तन्यायेनेतरेतरयोगद्वन्द्वोऽपि न स्यादिति वाच्यं तत्र प्रधानस्य सापेक्षत्वात् उक्तं हि भाष्ये भवति वै प्रधानस्य सापेक्षस्य वृत्तिरिति।
न्याय्यं चैतत् प्रधानस्यैकदेशत्वाभावात् सामान्याप्रयोगे इति लिंगादिति दिक्। विभाषा समीपे यद्यपीह समाहारद्वन्द्वो वेति व्याख्यानेऽपि न क्षतिस्तथापि प्र
क्रममनुरुध्याह नियमो वा स्यादिति उपदशमिति एकवद्भावपक्षेऽव्ययीभावस्यैवानुप्रयोगः यदि तु बहुव्रीहिस्तदा उपदशस्य पाणिपादस्येति षष्ठी स्यात् उपद
शं पाणिपादस्येत्येव वक्ष्यते इत्याकरः आनङ् ऋतो द्वन्द्वे इहोत्तरपदेन पूर्वपदं नाक्षिप्यते तेन मध्यमस्याप्यानङ् तदा होतृपोतृनेष्टोद्गातार इति एतच्च समर्थ
सूत्रे भाष्यकैयटयोः स्पष्टं ओजः सहोंभस्तमसस्तृतीयाया इति सूत्रे पदमंजर्यां तु स्पष्टतरं यत्तु प्राचोक्तं पूर्वपदस्यानङ् स्यादिति यच्च व्याख्यातृभिर्द्वन्द्वे पूर्वपद
कार्य्यविशेषमाहेत्यवतारितं यच्चाधिकृतेनोत्तरपदेन पूर्वपदमाक्षिप्यत इत्युक्तं तत्सर्वमाकरविरोधादुपेक्ष्यं प्रसिद्धसाहचर्यस्येति द्वन्द्वंरहस्यमर्यादावचन

सुक्रमणायज्ञपात्रप्रयोगाभिव्यक्तिष्विति सूत्रेभिव्यक्तिग्रहणेनासंतसहचरितयुगलेद्वंद्व इति निपातनादिति भावः ईदग्नेः देवताद्वंद्व इति काशिकानुरोधेनानुव
र्तितं आश्वलायनस्तु ज्योतिर्लतयोर्देवताद्वंद्वेपिप्रयुंक्ते अग्नीषोमौप्रणेष्यामीति अग्निष्टुदितिअग्निः स्तूयतेस्मिन् सक्रतुविशेषः संपदादित्वादधिकरणे।
ःक्षेपूरूत्वंमाभूदिति अकारेमतिसकारस्यश्रवणंभवतितेनप्रयोगेविकाराभावोनुमीयतइतिभावः विसर्गमिति तथा चक्कचिद्विकारोने सेवानुमेयं लक्ष्या
नुरोधादितिभावः मातरपितरौ मातृशव्दस्यारङादेशोनिपात्यतेवाकुत्वचमितिवहूनांद्वंद्वेतुवाकुलकुत्वचं द्वंद्वगर्भेद्वंद्वेतुवाकुलजत्वचं इतिद्वंद्वः विरूपा
णामपीति एतच्चसूत्राक्षरैरेवसुलभंरूप्यतेइतिव्युत्पत्त्या सोत्रस्यरूपशव्दस्यार्थपरतयापिव्याख्यानात् वृद्धोयूना अपत्यमंतर्हितंवृद्धमिति पूर्वाचार्यैः
परिभाषितस्येहग्रहणं यूनाकृत्रिमेणासाहचर्यात् तदाह गोत्रंशिष्यतइति भागवित्तीति भागवित्तिशव्दादगोत्रार्थकादि अंतायूनिवृद्धात्ठक् सौवीरे
षुवहुलमितिकुत्सायांठक् इत्कुत्सा सौवीरत्वंचाधिकमपेक्ष्यते नतुयुवत्वमात्रकृतंवैरूप्यं गार्ग्यवात्स्यायनौइति इहप्रकृत्यंशेवैरूप्यंनगोत्रादिकृतंपुंवद्भाव
प्रयुक्तंवैलक्षण्यंस्फुटीकर्तुंद्विवचनांतेनविग्रहमाहगार्ग्यायणाविति पुमान् स्त्रिया ननुहंसश्चवरटाचेत्यत्रप्रसंगः हंसत्वजातिसाम्येपिशव्देवैलक्षण्यस्य
स्त्रीत्वपुंस्त्वमात्रप्रयुक्तत्वादितिचेत्मैवं सरूपग्रहणानुवृत्तेः अनुवृत्तौज्ञापकंतुभ्रातृपुत्राविति सूत्रं नन्वेवमपिगौरियंगौश्चायंतयोः सहोक्तौ एतौगा
वाविति नियमतोनस्यात्तल्लक्षणोविशेषाभावादितिचेत् मैवं तदितरकृतविशेषविरहरूपेविशिष्टाभावेतात्पर्यात् सचेहविशेष्याभावादस्त्येव इंद्रेंद्रा
ण्याविन्द्राणीतुनैकशेषः पुंयोगकृतविशेषात् पितामात्रा श्वशुरः श्वश्र्वा नन्वेतत् सूत्रद्वयंव्यर्थं तथाहि यःशिष्यते स लुप्यमानार्थाभिधायीति न्यायेना
स्मिन्विषयेपितृशव्दएवमातरमपिवक्ति श्वशुरशव्दश्च श्वश्रूं तत्रशक्तिरेवनिरूढलक्षणावेत्यन्यदेतत् तच्चसूत्रविनापिसुलभं नचपूर्वसूत्रसमूहवत्तद
रमपिसूत्रद्वयंद्वंद्वनिवृत्त्यर्थमिति [illegible] पिपक्षेइष्टत्वादितिचेत् मैवंपितृश्वशुरशव्दयोरिवमातृश्वश्रूशव्दयोरुक्तविषयेकेवलयोः प्रयोगं वा
रपितुं सूत्रारंभात् अनभिधानमाश्रित्य [illegible] ानंतुदुर्वलमितिदिक् त्यदादीनिसर्वैः सर्वैः किंमत्वा सत्वा त्यदादिभिरेव सहोक्तावित्यर्थो माभूत् यत्सरमिति

शब्दपरविप्रतिषेधादितिभावः त्यदादितः शेषे आद्यादित्वात्तसिः त्यदादीनां शेषे सह विवक्षितेषु यः पुमान् यच्च नपुंसकं तद्दर्शनेन लिंगप्रतिपादकानि भवंति ॥
अर्थात्त्यदादीन्येव अद्वंद्वे इति द्वंद्वादिविशेषणं ...गुक्तं न किंतु विशेष्यनिघ्नतैवेति भावः तच्चेति पिप्पल्या अर्द्धमित्यर्थः साचेति अर्द्धपिप्पलीत्यर्थः इह।
सर्वत्रेति एतेन कृतद्वंद्वानामेकशेष इति भ्रमं व्यावर्त्तयति ननु तथैवास्तु किं न स्या दिति चेत्तन्न एकशेषस्यांतरंगत्वात् न च द्वंद्वग्रहमात्रे किंतु फलेपि विशे
षः ...स्याह तेनेति पशुद्वंद्वापवादो एकशेष इति केषांचिदुद्घोषस्तत्रापवादशब्दो बाधकमात्रपरतयानेयः इकोगुणवृद्धीति सूत्रे तच्छेषस्तदपवादो वेत्यत्रय
थाइत्येकशेषः प्रसंगादाह पराथेति अभिधानमितिकरणे ल्युट् अनेनैव तद्दर्शयति नकेवलयाक्लृप्तयाप्यवयवशक्त्या सर्वत्र निर्वाहः किंतु विशिष्टा
र्थविषयकं शक्त्यंतरमेवस्वीकर्तव्यं अत एव वृत्तौ विशेषणस्य पदार्थैकदेशत्वान्न विशेषणसंबंधः द्वंद्वे च शब्दस्याप्रयोगः बहुव्रीहो यष्ठ्व्यादेः वा
कोनु सर्वमिदं भवत्येवेति वैलक्षण्यं किंच अवयवशक्त्यैव निर्वाह इत्याग्रहे मीमांसकानां बहुव्रीहेरन्यपदार्थे शक्तिर्न सिद्ध्येत् योगरूढिश्च तत्र द्वादि।
नां दुर्लभा स्यात् क्लृप्तशक्त्यनुसारिण्या निरूढलक्षणयैव निर्वाहात् न चेष्टापत्तिः अपसिद्धांतादितिभावः अविग्रह इति लौकिकविग्रहरहित इत्यर्थः
अस्वपदेति समस्यमानयावत्पदाघटितविग्रह इत्यर्थः कटप्रूः अजस्रमिति इह कृत्स्नस्य यविधौ कटप्रू अजस्र इति समस्तानुवादसामर्थ्यात् धातुना समा
स आक्षिप्यते तत्रैव वा निपात्यते इतीह रदत्तादिग्रंथस्य स्पष्टं तिङंतार्थ कृतेन सहेति योगविभागेनाप्येतत्सुसाधं इति सर्वे समासशेषः आकूपूः तदंतस्येति त
द्वाचकधूः शब्दांतस्येत्यर्थः यदि तु अक्षे समासार्थे सति नेति व्याख्यायेत तर्हि दृढधूरक्ष इत्यत्रैव स्यात् ना क्षधूरित्यत्र यदि चाक्षे पूर्वपदे नेति व्याख्यायेत तन्न
तो क्षधूरित्यत्रैव स्यात् न तु दृढधूरक्ष इत्यत्र तस्मादाप्तिन्यायाच्चोक्तमेव न्यायः कृतसमासांतस्येति येन विधिस्तदंतस्येति सूत्रे प्रयोजनं महदप्यस्वस्थ्न स्व
णां दीर्घविधाविति वार्त्तिके आपत्ति ष्टेतिस्वाप इति भाष्ये चात्र प्रमाणमित्यवधेयं प्रतीपं समीपमिति प्रतिकूलाः संगताश्च आपो अस्मिन्निति विग्र
हः समापो देवयजनमिति देवा इज्यंते अस्मिन्निति व्युत्पत्त्या यज्ञभूमिः समापशब्दस्य पुंस्त्वं लोकादित्याहुः भाष्ये तु क्लीबमुदाहृियते अवर्णांता द्वेति द्वंतरीति

सूत्रे अपर आह ईत्वमनवर्णादिति वक्तव्यं इह मा भूत् प्रापं परापमिति भाष्योक्तेः गतिश्चेति सूत्रे वद्धिधिनस्त्वावावीत्वस्यागादिस्वरणत्वेषु दोष इत्युपक्रम्य अवी
त्वमे पं परेपं इति भाष्योक्तेश्चेति भावः ऊदनोर्देशे दीर्घोच्चारणं अवग्रहार्थमित्याकरः वक्ष्यत्वास्तु अ नूपे गोनानगोभिरित्यादौ अनूपशब्देनावग्रहः कृति अनुग
ता आपो अस्मिन्निति अनूपो देशः जलप्रायमनूपं स्यादित्यमरः प्रतिसाममिति अव्ययीभावः प्रादिसमासः बहुव्रीहिर्वा कृष्णभूम इत्यादयो बहुव्रीहयः पद्मनाभ इ
ति पद्माकारनाभिर्यस्येति गौणेन पद्मशब्देन सामानाधिकरण्याद्बहुव्रीहिः यद्वा गड्वादित्वात्सप्तम्याः परनिपातः एतेनोर्णनाभो व्याख्यातः तत्र ऊर्णा[illegible]
रिति ह्रस्वो विशेषः गवाक्ष इति गावः किरणाः अचतुर निपात्यंत इति निपातफलं तु समासविशेषनियमः टिलोपादिकं च तदाह आद्या इति बहुव्रीहय इति ब
हुव्रीहय एवेत्यर्थः तेन नञ्तत्पुरुषे अचत्वार इत्येवेति भावः त्रिचतुरा इति त्रयश्चत्वारो वेति विग्रहः संख्ययाव्ययेति बहुव्रीहिः बहुव्रीहौ संख्येये इति डचोप
वादो च अस्त्रिश्रुव? तेभाषः प्राण्यंगत्वादेकवत् ऊर्वष्ठीवमिति सक्थिक्लीबे पुमानूरुरित्यमरः जानूरुपर्वाष्ठीवदस्त्रीयामिति च सरजः पंकजमिति क
थं तर्हि सरजसमपहाय केतकीमं प्रसवमिति सरजसमकरंदनिर्भरासु प्रसवविभू तिषु वीरुधां विरक्त इति प्रमाद एवायमित्याहुः गोष्ठश्वेति एतेन सप्तमी
तत्पुरुष इति नियमं दर्शयति षष्ठीतत्पुरुषे तु गोष्ठश्व इत्येव ब्रह्मवर्चसमित्यादि षष्ठीतत्पुरुषो वर्चो दीप्तिः पल्लं मांसमर्हतीति पल्यः मांसभोजी तदीयं वर्चः प
ल्यवर्चसं अवतमसमित्यादि अवहीनं संततं च तम इति विग्रहः अंधमिति गाढमिति फलितोर्थः अत एव ध्वांते गाढे ध्वतमसं क्षीणेवतमसं तमः विष्व
क्संतमसं इत्यमरः श्वसो वसु शब्द इति एतेन अवसशब्दादीयसुनि अवसीय इति व्याचक्षाणा आकरविरोधादुपेक्ष्या इति ध्वनयति वसीय इति तथा च श्रू
यते यः कामयेत वसीयान् स्यामिति वसमात्यतो वसीयान् भूयासमिति श्वसशब्द इति यद्यप्ययमन्यत्र कालविशेषे वर्तते तथापीह समासे उत्तरपदार्थभूतां
प्रशंसामाशिषो विषयमाह आशीर्विषयतया धात्वर्थो यमिति यावत् एतच्च वृत्तिकारोक्तं श्वसशब्दस्येहार्थ एव नास्तीत्यपि सुवचं उत्तरपदार्थमात्रवृत्तित्वं वास्तु
उक्तं च पाणिनीयमतदर्पणे अर्थं परपदस्येह श्वःशब्दः कालवाच्यपि अभिधत्ते स्वभावेन तेनेमौ मंगलार्थकाविति अन्ववरह इत्यप्रकाशमुच्यते अनुगतमव

हीनं चारह इति प्रादिसमासः अनुगतं रहो ऽस्मिन्निति स्यादिबहुव्रीहिर्वा तप्तमिव तप्तं परेणानधिगम्यं हि यद्रहो वह्नितप्तवत् तप्तं च तद्रहश्चेति तत्तप्तरहसं विदुः नपू
जनात् इत्यतः प्रागिति प्राग्बहुव्रीहिग्रहणं कर्त्तव्यम् इति वार्त्तिकोक्तेरिति भावः प्राचा तु बहुव्रीहौ सक्थ्यक्ष्णोरनिषेध इत्युक्तं तन्मूलं इत्याद्यावित्यध्याहारेण वा
योज्यं तेन सध्र्‍यङ्असृध्रीत्यादि सिद्धं नञ्तत्पुरुषात् नञ इति षष्ठी इति सकलसमाससाधारणाः समासांताः स्तोकान्मुक्त इति समासप्रयोजनं तु स्तोकान्मुक्तस्या
पत्यं स्तौकान्मुक्तिः स्तोकान्मुक्तस्याः अपत्यं स्तोकान्मुक्तेयः इह स्तोकांतिकदूरार्थकृच्छ्राणि क्तेनेति समासशास्त्रे पठिता एव स्तोकादयो गृह्यंते इत्याशयेनाह एव
मिति ओजःसहः कथं तर्हि सततनैशतमो वृत्तमन्यं तं इति भारविः अत्र दुर्घटवृत्तिकृत् उत्तरपदाधिकारेन तदंतग्रहणं नास्ति किंतु केवलपदाधिकार एवेति
तन्न भाष्ये पदांगाधिकारे इत्यत्र इष्टकेषीकादेः प्रयोजनत्वेनोदाहरणात् यदपि हरदत्तादय आहुः उत्तरपदाक्षिप्तेन पूर्वपदेनेह ओजःप्रभृतयो विशेष्यंते पूर्व
पदभूतेभ्यः ओजःप्रभृतिभ्य इति न चात्र तमःशब्दः पूर्वपदं किं तर्हि सततनैशतमःशब्दः यत्र तु तदंतविधिरिष्यते तत्रोपात्तेनाक्षिप्तं विशेष्यते यथा इष्टके
षीकादाविति तदपि चिंत्यं भाष्यवार्त्तिकविरोधात् विशेषणविशेष्यभावव्यवस्थार्थमेव पदांगाधिकार इत्यादीनां प्रवृत्तिरिति कैयटवदेव स्वयमपि व्याख्या
तत्वात् भारविप्रयोगस्त्वित्थं समाधेयः वृत्तं वृत्तिः नैशतमोवृत्तमिति षष्ठीतत्पुरुषः नपुंसके भावे क्तस्य योगशेषविवक्षायां षष्ठी ततः सततं नैशतमोवृत्तं यस्मिन्नि
ति बहुव्रीहिः यद्वा वृत्तेरनुवर्त्तने घञर्थे कविधानमिति भावे कः शेषं प्राग्वत् पूरण इति वक्तव्यमिति इह आत्मनश्चेत्यंशोपि वार्त्तिकांतर्गतः ननु सूत्रमिति के
चिद्भ्रमं तितन्नादर्त्तव्यमिति भावः तथा हि सति उत्तरसूत्रे आत्मन इति न लभ्येत परस्य चेति तदुत्तरसूत्रं च व्यर्थमेव स्यादिति स्पष्टमेव विवेकिनां बहुव्रीहि
र्बोध्य इति एकस्यापि वस्तुनो भेदं परिकल्प्य वर्त्तिपदार्थत्वं अन्यपदार्थत्वं च विवक्षणीयमिति भावः वैयाकरणाख्यायां व्याकरणे भवा वैयाकरणी अण्।
गयनादिभ्य इत्यण् सा चासावाख्या चेति कर्मधारयः आत्मनेभाषा इति यद्यपीयमाख्याष्टाध्याय्यां न दृष्टा तथापि वैयाकरणभवस्यैव धातुसूत्रगणोणादिवा
क्यात्मकं पंचप्रस्थानं व्याकरणमिति स्वीकारात् अस्याश्च धातुपाठे दृष्टत्वात् ननु प्रकृतिविकृतिभावविरहात् रंधनाय स्थालीतिवत् समासो न स्यादत आह येन

विभागाद्विति एतच्च वृत्तिन्यासावनुसृत्योक्तं अलुग्विधिसामर्थ्यादिस्यपीह सुवचं हृद्युभ्यां च हृदिस्पृगिति हृदयं दिवं च स्पृशतीति विग्रहः कर्म्मण्यधिकरणे वि
स्यासप्तमी भाष्ये तु कर्मण्येव सप्तमी सुत्कं अलुग्विधिरेव ज्ञापक इति तदाशयः अप्सव्य इति दिगादित्वाद्यत् ओर्गुणः वांतोपि प्राचानुयत् स्थाने जशब्द पठित्वा अ
प्सुज इत्युदाहृतं तदाकरविरोधादुपेक्ष्यं अप्सुज इति तु हलदंतादित्येव सिद्धं अप्सुमंतावितिकारीर्ष्या आज्यभागौ अप्स्व ग्ने इग्धिष्टव अप्सुमे सोमो अब्रवीत्
इत्यनुवाके तत्राप्सुशब्दोस्ति नन्वेवं प्रकृतिवदनुकरणं इत्यतिदेशेन अप्सु इति सोः प्रत्ययत्वात् तदंतात्प्रथमायाः अभावे मतुवेव दुर्लभः अतिदेशाप्रवृत्तौ
तु सोर्लुक्प्राप्तिरेव नास्तीति चेन्न सत्यं अतिदेशस्य वैकल्पिकत्वान्नोक्तदोषः द्व्यमपि वैकल्पिकत्वे प्रमाणं तु यत्तदेतेभ्य इति सौत्रनिर्देशः उक्तः प्रकृतवार्त्तिक
मपि तथैतिवोध्यं यत्तु प्राचामतिष्विति पठित्वा अप्सुमतिरित्युदाहृतं तद्भाष्यादौ न दृष्टं यत्तु वदंति मतिष्विति पाठे सप्तम्यंतान्मतुपः कथं संभव इति चिंत्यमिति
तदेवं चिंत्यं पाठांतरस्यानाकरत्वात् मतुपः संभवस्योक्तत्वाच्च पश्यतो हर इति षष्ठी चानादर इति षष्ठी पश्यंतमनादृत्य हरतीत्यर्थात् देवानामिति मूर्खा
हि देवानां प्रीतिं जनयंति देवपशुत्वात् शुनःशेप इति शुन इव शेपमस्य शुनःशेपः शेपशब्दो अकारांतोप्यस्ति शौंडिनीयादित्वादौणादिकः पप्रत्ययः तथा
च मंत्रः यस्यामुशंतः प्रहराम शेपमिति एवं पुच्छलांगूलाभ्यामपि बहुव्रीहिः ऋषिविशेषाणामेताः संज्ञाः वहृच ब्राह्मणादौ प्रसिद्धाः मातुः पितुभ्यामिति सू
त्रे समास इत्यनुवर्त्तितं तस्य फलमाह असमासेत्विति इह पाक्षिकमपि षत्वं नेत्यर्थः इत्यलुक्समासः घरूपचेलडिति प्चादौ टित्त्वात् ङीवर्थः ब्राह्मणीभ
तरेति तसिलादिष्विति पुंवद्भावः लुनजातेश्चेति निषेधात् एतेन पुंवद्भावं बाधित्वा परत्वाद्ध्रस्व इति व्याचक्षाणाः परास्ताः आमलकीतरेति आमलकीशब्दो
हि वृक्षे नित्यस्त्रीलिंगः एवं कुवलीशब्दः नद्याः पूर्वसूत्रे श्रुतादन्यः शेषः स च ह्रिधेत्याह ऊंग्य तेति निर्मूलमिति यत्तु वृत्तिकृतोक्तं पुंवद्भावोत्र पक्षे वक्तव्यः श्रेयस्त
रा विद्वत्तरा प्रकर्षयोगात् प्राक् स्त्रीत्वस्याविवक्षितत्वात्सिद्धं अत्रेदं वक्तव्यं पुंवद्भाव इत्यादिमुनित्रयानुक्तत्वादप्रामाणिकं सूत्रकृता हि तसिलादिष्विति नियत एव
पुंवद्भाव उक्तः ननु पाक्षिकः भाष्यवार्त्तिकयोरपि न्नाधिकमुक्तं प्रमाणानामभ्युपेत्यापि ब्रूमः कथमिह वचनं व्यज्यते पुंवद्भावोपः प्राप्तः सोत्र पक्षे वक्तव्यः इति अ

हीनं चारु इति प्रादिसमासः अनुगतं रहो यस्मिन्नित्यादिवहुव्रीहिर्वा तत्पुमिवतत्पुं परेणानधिगम्यं हि यदिहावन्हितप्रवत् तत्पुं च तदुरहश्चेति तत्तत्पुरहस्यं विदुः नपृ
जनात् इत्यतः प्रागिति प्राग्बहुव्रीहिग्रहणं कर्त्तव्यं इति वार्त्तिकोक्तेरिति भावः प्राचां तु बहुव्रीहौ सकथ्यक्ष्णोर्निषेध इत्युक्तं तन्मूलं इत्यादावित्यध्याहारेणावा
येप्यंते नरूपध्री अस्पृध्रीत्यादि सिद्धं नञ्तत्पुरुषात् नञ इति षष्ठी इति सकलसमाससाधारणाः समासांताः लोकान्नमुक्ता इति समासप्रयोजनं तु लोकान्नमुक्तस्या
पत्यं लोकान्नमुक्तिः लोकान्नमुक्तेर्याः अपत्यं लोकान्नमुक्तेयः इह लौकांतिकद्वार्थकत्वात्क्षणिकत्वेनेति समासशास्त्रे पठिता एव लोकादयो गृह्यंते इत्याशयेनाह एव
मिति ओजः सहः कथं तर्हि सततं नैशं तमो वृत्तमन्यंत इति भारविः अत्र दुर्घटवृत्तिकृत् उत्तरपदाधिकारेन तदंतग्रहणं नास्ति किंतु केवलपदाधिकार एवेति
तन्न भाष्ये पदांगाधिकारे इत्यत्र इष्टकेषीकादेः प्रयोजनत्वेनोदाहरणात् यदपि हरदत्तादय आहुः उत्तरपदाक्षिप्तेन पूर्वपदेनेह ओजःप्रभृतयो विशेष्यंते पूर्व
पदभृतेभ्यः ओजःप्रभृतिभ्य इति न चात्र तमःशब्दः पूर्वपदं किं तर्हि सततनैशतमःशब्दः यत्र तु तदंतविधिरिष्यते तत्रोपात्तेनाक्षिप्तं विशेष्यते यथा इष्टके
षीकादाविति तदपि चिंत्यं भाष्यवार्त्तिकविरोधात् विशेषणविशेष्यभावव्यवस्थार्थमेव पदांगाधिकार इत्यादीनां प्रवृत्तिरिति कैयटवदेवस्वयमपि व्याख्या
तत्वात् भारविप्रयोगस्त्वित्थं समाधेयः वृत्तं वृत्तिः नैशतमो वृत्तमिति षष्ठी तत्पुरुषः नपुंसके भावे क्तः तस्य योगे शेषविवक्षायां षष्ठी ततः सततं नैशतमो वृत्तं यस्मिन्नि
ति बहुव्रीहिः यद्वा वृत्तेरनुवर्त्तने घञर्थे कविधानमिति भावे कः शेषं प्राग्वत् पूरणाद् इति वक्तव्यमिति इह आत्मनश्चेत्यंशोपि वार्त्तिकांतर्गतः ननु सूत्रमिति के
चिद्भ्रमंति तन्नादर्त्तव्यमिति भावः तथा हि सति उत्तरसूत्रे आत्मन इति न लभ्येत परस्य चेति तदुत्तरसूत्रं च व्यर्थमेव स्यादिति स्पष्टमेव विवेकिनां बहुव्रीहि
र्बोध्य इति एकस्यापि वस्तुनो भेदं परिकल्प्य वर्त्तिपदार्थत्वं अन्यपदार्थत्वं च विवक्षणीयमिति भावः वैयाकरणाख्यायां व्याकरणे भवा वैयाकरणी आख्या ।
गयनादिभ्य इत्यण् सा चासावाख्या चेति कर्मधारयः आत्मने भाषा इति यद्यपीयमाख्याष्टाध्याय्यां न दृष्टा तथापि वैयाकरणभवस्यैव धातुसूत्रगणोणादिवा
क्यात्मकं पंचप्रस्थानं व्याकरणमिति स्वीकारात् अस्याश्च धातुपाठे दृष्टत्वात् ननु प्रकृतिविकृतिभावविरहात् रंधनाय स्थालीतिवत् समासो न स्यात् तत्राह योग

विभागादिति एतच्च वृत्तिन्यासावनुसृत्योक्तं अलुग्विधिसामर्थ्यादिस्यपीह सुवचं हृद्युभ्यां च हृदिस्पृगिति हृदयं दिवं च स्पृशतीति विग्रहः कर्मण्यधिकरणे वि-
षयासप्तमी भाष्ये तु कर्मण्येव सप्तमी सुक्तं अलुग्विधिरेव ज्ञापक इति तदाशयः अप्सव्य इति दिगादित्वाद्यत् औरगुणाः वान्तोपि प्राचा नु यत् स्थाने जशब्दं पठित्वा अ-
प्सुज इत्युदाहृतं तदाकारविरोधादुपेक्ष्यं अप्सुज इति तु हलदन्तादित्येव सिद्धं अप्सुमन्ताविति कारीर्यो आज्यभागौ अप्स्व ग्रे द्यधिष्ठ्व अप्सुमे सोमो अब्रवीत्।
इत्यनुवाके तत्राप्सुशब्दोस्ति नन्वेवं प्रकृतिवदनुकरणमित्यतिदेशेन अप्सु इति सोः प्रत्ययत्वात् तदन्तात् प्रथमाया अभावे मतुवेव दुर्लभः अतिदेशाप्रवृत्तौ
तु सोर्लुक्प्राप्तिरेव नास्तीति चेन्न सत्यं अतिदेशस्य वैकल्पिकत्वान्नोक्तदोषद्वयमपि वैकल्पिकत्वे प्रमाणं तु यत्तदेतेभ्य इति सौत्रनिर्देशः उक्तः प्रकृतवार्त्तिक-
मपि तथेति बोध्यं यत्तु प्राचां मतिष्विति पठित्वा अप्सुमतिरित्युदाहृतं तद्भाष्यादौ न दृष्टं यत्तु वदन्ति मतिष्विति पाठे सप्तम्यन्तान्मतुपः कथं संभव इति चिंत्यमिति
तदेव चिंत्यं पाठान्तरस्यानाकरत्वात् मतुपः संभवस्योक्तत्वाच्च पश्यतो हर इति षष्ठी चानादर इति षष्ठी पश्यन्तमनादृत्य हरतीत्यर्थात् देवानामिति मूर्खा-
हि देवानां प्रीतिं जनयन्ति देवपशुत्वात् शुनःशेप इति शुन इव शेपमस्य शुनःशेपः शेपशब्दोऽकारान्तोऽप्यस्ति शीङ्डिनीयादित्वादौणादिकः पप्रत्ययः तथा
च मंत्रः यस्यामुशन्तः प्रहराम शेपमिति एवं पुच्छलाङ्गूलाभ्यामपि बहुव्रीहिः ऋषिविशेषाणामेताः संज्ञाः बह्वृचब्राह्मणादौ प्रसिद्धाः मातुः पितुर्भ्यामिति सू-
त्रे समास इत्यनुवर्त्तिनं तस्य फलमाह असमासेत्विति इह पाक्षिकमपि षत्वं नेत्यर्थः इत्यलुक्समासः घरूपचेलडिति घ्वादौ टित्सत्वे ङीवर्थः ब्राह्मणि-
तरेति तसिलादिष्विति पुंवद्भावस्तु न जातेश्चेति निषेधात् एतेन पुंवद्भावं बाधित्वा परत्वाद्ध्रस्व इति व्याचक्षाणाः परास्ताः आमलकीतरेति आमलकीशब्दो
हि वृक्षे नित्यस्त्रीलिंगः एवं कुवलीशब्दः नद्याः पूर्वसूत्रे श्रुतादन्यः शेषः स च द्विधेत्याह उंयतेनि निर्मूलमिति यत्तु वृत्तिकृतोक्तं पुंवद्भावोत्र पक्षे वक्तव्यः श्रेयस्त-
रा विदुषीतरा प्रकर्षयोगात् प्राक् स्त्रीत्वस्याविवक्षितत्वात्सिद्धं अत्रेदं वक्तव्यं पुंवद्भाव इत्यादि मुनित्रयानुक्तत्वादप्रामाणिकं सूत्रकृता हि तसिलादिष्विति नियम एव
पुंवद्भाव उक्तः ननु पाक्षिकः भाष्यवार्त्तिकयोरपि न्याधिक्युक्तं प्रमाणानामभ्युपेत्यापि ब्रूमः कथमिह वचनं व्यज्यते पुंवद्भावोयः प्राप्तः सोत्र पक्षे वक्तव्यः इति अ-

म·सु
७७

पुंवद्भावश्च वक्तव्य इति आद्ये पुंवद्भावनिषेधार्थमिदं वचनं स्यात् तथा च हरदत्तः प्रागेवत्वं दुदाहृतानि श्रेयसीतरा श्रेयसीतमा विदुषीतरा विदुषीतमेति दोघेडी ।
विशिष्टानि रूपाणि सिध्यंतु नाम प्रकर्षयोगादित्यादित्वदीयग्रंथस्त्वसंगत एव स्यात् सहि उपसंख्यानं प्रत्याचष्टे इति न्यासकृतावतारितः प्रत्याख्यानं च तस्य
पुंवद्भावफलत्वे सत्येव स्यात् ननु तन्निवृत्तिफलकत्वे वस्तुतस्तु तदपि न रूपग्रहणांतदंतात्तद्धितविधानार्थमित्युक्तत्वात् स्वार्थद्रव्यलिंगाद्यनंतरमेव प्र
यद्रूपस्य न प्रकर्षादिविवक्षेति भाष्ये निर्णीतत्वाच्च द्वितीयस्तु संभवेद्यदि तसिलादिमध्ये तरप्तमपौ न परिगणयेयातां तौ तु सर्वैरेव परिगणितौ दर्शनीयतरा दर्शि
नीयतमेति चोदाहृतं न च वृत्तिग्रंथे विदुषीतमेत्यादिदोघोपिन्यासः स्थितिप्रदर्शनपरत्वेन नतु त्रैरूप्यपर इति वाच्यं प्रकर्षयोगादित्यादिग्रंथशेषविरोधात् त
स्मादसंगत एवायं वृत्तिग्रंथ इति एतच्च सर्वं इति मन्यत इति वदता हरदत्तेन ध्वनितम् । सकारस्य तु इत्वमुपसंख्यानमिति भ्रमः तत्प्रत्याख्यानं युक्तमिति भ्रमश्चा
स्त्यवेति तत्तद्ग्रंथदर्शिनां स्पष्टमेव एवं स्थिते पक्षे पुंवद्भावो वक्तव्य इति प्रक्रियाग्रंथः न्यायसिद्धमिदमित्यादि तद्व्याख्यानग्रंथश्च वृत्तिन्यासोक्तार्थानुवादी मूल
ग्रंथित्वादनादर्त्तव्य इति दिक् पादस्य पदपदेति सौत्रो विभक्तिलुक् कृत्वः शेशे इति शसप्रत्ययस्येदं एकदेशानुकरणं उदमेघ इति सादृश्यात्पुरुषस्येयं संज्ञा उ
दपेषमिति स्नेहने पिष इति णमुल् उदधिर्घट इति उदकं धीयतेऽस्मिन्निति विग्रहः कर्मण्यधिकरणे चेति किप्रत्ययः उदमंथ इति द्रवद्रव्यसंस्कृतास्सक्तवो मं
थः तृतीयेति येति योगविभागात्समासः ष्यङः संप्रसारणं इह तत्पुरुष इत्यनेन पूर्वपदमुत्तरपदं च आक्षिप्यते इत्याशयेनाह पूर्वपदस्येति उत्तरपदयोरिति चडहोत्त
रपदेन पुत्रपतौ विशेष्येते न तु विपरीतं तेन कारीषगंध्यापरमपुत्र इत्यत्र नातिप्रसंगः मालभारीति मालां विभर्तीति ताच्छील्ये णिनिः केचित्तु हारिषिति पठंति कारे
सत्यागदस्य संस्कारः समयकरणं अशपथ्येपि परत्वाड्डाचं बाधित्वा मुम् आगदंकारो वैद्यः अस्तुंकारोऽभ्युपगमः अस्त्विति तिङंतप्रतिरूपकमव्ययं धेनुंभव्ये
ति भव्यगेयेति कर्तरि कृत्यः धेनुश्चासौ भव्या चेति विग्रहः भविष्यंती धेनुरित्यर्थः गौतमस्मृतौ तु स्नातकधर्मेषु अधेनुं धेनुभव्येति ब्रूयादिति प्रयुक्तं तत्रार्षत्वा॥
न्मुमागमो नेति तद्व्याख्यायां मिताक्षरायां हरदत्तः लोकंपृणा इति पृणातिः पूरणकर्मेति हरदत्तः प्रीणन इति तु पक्ष एव अनभ्याशमित्य इति अभ्याशसमीपं

ह्रिहृद्दमनभ्याशं दूरं एतिस्तुशास्वित्यादिना इणः क्यप् भ्राष्ट्रमिंधइतिकर्मण्यण् घञंतेनवाषष्ठीसमासः तिमिंगिलइति मत्स्यविशेषः गिरतेर्मूलवि[illegible]ादि
त्वात्कः गिलिगिलेचेति गिलंगिलतीगिलगिलः तिमीनांगिलगिलइतिविग्रहेइदमारब्धं नित्यमेवेति पूर्वविप्रतिषेधेनेतिभावः सज्योतिरिति समानंज्यो
तिरस्येतिविग्रहः यस्मिन्ज्योतिषिआदित्येनक्षत्रेवाउपनियतितंतदस्तमयपर्यंतमनुवर्तमानमाशौचंसज्योतिरित्युच्यतेछंदोदरादीनियथोपदि[illegible]
क्तादिशास्त्रसिद्धानांअसमासपदानामुणादयोवहुलमितिसिद्धिः अनेनतुसमासपदानामितिविवेकइतिहरदत्तः वस्तुतस्तुसमासविषयकमेवेदमिति
ननियमः हंससिंहशब्दयोरपिप्राचांकारिकायामुदाहृतत्वात् हंतेः पचाद्यच्विसगागमः हिंसेस्तुपचाद्यचिहकारसकारयोःस्थानव्यत्ययः यदितुभवेदि
त्यादिश्लोकस्यापिप्रकृतसूत्रोदाहरणतायांनाग्रहः किंतुनैरुक्तव्युत्पत्तिरनेकधेत्येतावन्मात्रे तदाहरदत्तोक्तविवेकोपिनिर्वाधएवेतिदिक् आ[illegible]तिग
णोयमिति तेनान्यदपिसिध्यतियथा लुंपेदवश्यमः कृत्ये तुंकाममनसोरपि समोवाहिततयोर्मांसस्यपचियुड्घञोः अंतमितिशेषः कृत्यप्रत्ययांतेउत्त
रपदेअवश्यमुशब्दस्यांतमकारंलुंपेत् तथाकामशब्देमनःशब्देचपरेतुमुशब्दस्यांतं तुमितिषष्ठ्यर्थेप्रथमायुड्घञ्प्रत्ययपरोयः पच्धातुःतस्मिन्
परेमांसस्यांतमकारंलुंपेदित्यर्थः अवश्यसेव्यः गंतुकामः गंतुमनाः सहितः संहितः सततः मांसपचनंमांसपाकः इहसंयोगांतलोपाभावोपिनिपातनाद्बो
ध्यः छंदसितुअयस्मयादित्वेनापि[illegible]र्वाहः उक्तः अपरस्पराः क्रियासातत्यइतिसूत्रेसातत्यइतिनिर्देशेनैवैकदेशानुमतिद्वारापूर्वाचार्यपठितोयंश्लोको
ऽनुपितइत्याहुः नहिवृति[illegible]ष्विति उत्तरपदेष्वितिबोध्यं उपनह्यतेइत्युपानत् संपदादित्वात्कर्मणिक्विप् निवर्ततेइतिनीवृत् प्रवर्षतीतिप्रावृट् म
र्माणिविध्यतीतिमर्मावित् रुचदीप्तौनिरोचतेइतिनीरुक् ऋतिंसहतेऋतीषहः सहेः पृतनर्ताभ्यांचेत्यत्रसहेरितियोगविभागादनुक्तसमुच्चयाद्वासस्यषत्व
मितिन्यासकारः पूर्वपदादितिषत्वमितिहरदत्तः परितनोतीतिपरीतत् गमःक्वावित्यत्रगमादीनामितिष्यतइतिवचनात्तनोतेर्नलोपः यजुर्वेदभाष्येऋतेनमि
त्रावरुणावृतावृधावितिमंत्रस्यव्याख्यायांउक्तं ऋतस्यवर्धयितारावित्यर्थेअंतर्भावितण्यर्थाद्वृधेःक्विप् नहिवृतीत्यादिनापूर्वपदस्यदीर्घइतितच्चिंत्यं॥६

म·सु
७८

प्रकृत सूत्रे वृधेरनुपातत्वात् तस्मादन्येषामपीति दीर्घस्तत्र वोध्यः वनं पुरगा व्यस्ययेन षष्ठ्याः स्थाने प्रथमेत्याह वनशब्दस्येति विभक्त्यर्थे इति असंज्ञात्वेन पूर्वपदा।
त्संज्ञापामित्यस्याप्राप्तेरितिभावः अतएवाह निपातनादिति यत्तु व्याचक्षते हलदंतादिति सप्तम्या अलुक् इति तन्नेतिभावः प्रथमेति सप्तम्यर्थे स्यप्रातिपदिकार्थेन
र्भोवादितिभावः निषाद इति निषीदंत्यस्मिन् पापमितिनिषादः पुलिंदो मनुष्यजातिः हलश्चेत्यधिकारो घञ् कथं तर्हि प्रतीहारो दौवारिकः अत्राहुः प्रतीहारो द्वारं त
त्स्थो न त्वाच्छंद्यमिति एकद्वितीकयत् शैषिकः कप् शुनोदन्तेत्यादि अत्र केचिद्दंष्ट्रेति ह्रस्वांतं पठित्वा श्वादंष्ट्र इतिवहुव्रीहावेवायं दीर्घ इत्याहुः अन्ये तु दीर्घान्त।
मेव पठंतस्तत्स्वरूषस्याप्युदाहरणतामाहुः इहषादिति केचित्तु काश्येति तालव्यमध्यं पठंति तत्पामादिकमिति भावः शिरीषवणमिति ननु यस्य फलमेव न पु
ष्पं सवनस्पतिः वानस्पत्यैः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिरित्यमरकोशात् स च उदुंवरादिः शिरीषस्तु न तथा तस्य पुष्पफलोभयसत्वात्तत् कथमि
हणत्वमिति चेत्सत्यं इह वनस्पतिशब्देन वृक्षमात्रमुपलक्ष्यते अत्र च लिंगमलुपियुक्तवदिति सूत्रे व्यक्तिवचने इति किं शिरीषाणामदूरभवो ग्रामः शिरीषाः
तस्य वनं शिरीषवनं वनस्पतित्वमतिदिश्येत तन्न णत्वं स्यादिति भाष्यकारोक्तिः इरिकादिभ्य इति ओषधिस्त्वासाम्पि: क्षीरपाणा उशीनरा इति उशीनरशब्दो
देशवाची न त्वासि स्वौपचारिकः गिरिनद्यादीनामितिवक्तव्यमेतत् संज्ञायां प्राप्ते असंज्ञायामप्राप्ते उभयत्र विभाषेयं माषवापिणाविति वहुलमाभीक्ष्ण्ये इ
तिणिनिः व्रीहिवापाणीति कर्मण्यण् उत्तरपदं यदिति अत्र च व्याख्यानमेव शरणं पांचसुनुमग्रहणमिह ज्ञापकमित्याहुस्तद्दर्शयति अतएवेति ज्ञापा।
कं शिथिलमितिध्वनयति किं चेति परिपक्वानीति अत्र कुमतिचेति नित्यं णत्वं प्राप्तं हरिमाणीति मनेरयं तात्क्विप् प्राक् सुवुत्पत्तेः समासात् नकारांतमुत्तरपदं
नांतत्वान्ङीवृत्वं चतुरंगयोगेनेति चत्वार्यंगान्यस्य तेन योग इति विग्रहः अतद्धित इति व्यवधायकस्य पदस्य तद्धितश्चेत् परो न भवति तदा निषेध इत्यर्थः।
आर्द्रंगोमयेणेति अत्र गोशब्दः पदं पारस्कर इति पारं करोतीति विग्रहे हेतुताच्छील्येति टः किष्किंधेति किः किं दधातीति विग्रहे आतोनुपसर्गेक इत्यकिः।
मोमलोपः सुट् षत्वं च निपात्यते रूढिशब्दाश्चैते कथं चित्त्वसाधाः तद्वृहतोरिति गणसूत्रं तादिति तलोपश्च सूत्रे तिभावः चत्वेने सुपलक्षणं नरान्ननीति

राम
७८

लोपस्यापि सुब्वत्त्वात् दकारतकारावित्ति तदिहद्रष्टव्या यथासंख्यं वोध्यं प्रायस्येति प्रायःपापं विनिर्दिष्टं चित्तं तस्य विशोधनमिति स्मरंति आकृतिगणोयमिति तेन
परःशता इत्यादि सिद्धं अधिश्रयंतीर्जनताः परःशता इति माघः शतात्परा इति विग्रहे पंचमीति योगविभागात्समासः राजदंतादित्वात्परनिपातः सर्वनाम्नो
वृत्तिमात्रे इति पुंवद्भावः लोकाश्रयत्वाल्लिंगस्य विशेष्यनिघ्नता पारस्करादित्वात्सुडिति दिक्   इति समासाश्रयाविधयः   समर्थानां ननु प्रकृतसूत्रे
कार्थीभावरूपं सामर्थ्यं ग्रहीतुं नोचितं समर्थः पदविधिरिति परिभाषया गतार्थत्वात् घकालतनेष्विति अलुग्विधानाद्धि सुवंतात्तद्धितोत्पत्तिः तथा च
पदविधित्वं स्पष्टमेव अत आह सामर्थ्यमिति कृतेत्यादि अस्य फलं तु तस्यापत्यमिति सूत्रे मूल एव स्फुटीभविष्यति इह समर्थात्प्रथमादित्युक्ते वक्तुं महो
त्सर्गो नाह प्राग्दीव्यतोण् अश्वपत्यादिभ्यश्च प्राग्दीव्यतीयेष्विति दीव्यतः प्राक् प्राक्दीव्यत् अपपरिबहिरंचवः पंचम्यर्थे व्ययीभाव इत्याहुः प्राग्दीव्यत
मितितु उचितं भयइतिच्छप्रवृत्तेः ततो भवार्थे ठञाछः त्यप्तु नअमहेत्यादिपरिगणनात् अव्ययीभावस्याव्ययत्वप्रयोजनं लुङ्मुखस्वरोपचारा इति परि
गणनाच्च अचामादेरिति निर्धारणे षष्ठी तेनार्थसिद्धमाह अच इति अचो ञ्णितीति सूत्रादच इत्यस्यानुवृत्तिरपीह सुवचा प्रामादिकमेवेति यद्यपि चा
तुर्वर्ण्यादेराकृतिगणत्वात्ष्यञो ततस्सूपपादं तथापि हरदत्तग्रंथानुरोधादेवमुक्तं दित्यदित्या पूर्वपतिशब्दस्योत्तरपदशब्देन बहुव्रीहिं कृत्वादित्यादिभि
र्द्वंद्वः कार्य इति व्याचष्टे दित्यादि[illegible]मत्युत्तरपदाच्चेति पत्यंतादिति तु नोक्तं बहुच्पूर्वादपि प्रसंगात् दैत्य इति ननु कृते ण्यप्रत्यये देवताद्यर्थे सावकाशः अ
पत्येतु परत्वादितः ष्वानिञ् इति ढक् स्यात् सत्संपत्येत्र पूर्वविप्रतिषेधः ण्यादयोर्थविशेषलक्षणादणपवादात्पूर्वविप्रतिषिद्धमिति अर्थविशेषे किं ।
औद्धृपतं उद्धृपतिर्नाम पत्रं तस्येदं पत्राध्वर्युपरिषदश्चेत्यञ् अथ कथं दैतेय इति अत्राहुः दितिशब्दात्कृदिकारादक्तिन इति ङीषि कृते स्त्रीभ्यो ढक् ।
ण्यप्रत्ययस्तु न लिंगविशिष्टपरिभाषया अनित्यत्वादिति आदित्य इति आदित्यशब्दात् ण्यप्रत्यये यस्येति लोपे हलो यमामिति यलोपः न चाल्लोपस्य स्थानिवद्भा
वः न पदांतेति यलोपे तन्निषेधात् काशिकायामिति हरदत्तमाधवादिग्रंथेष्वेवं तथा च प्रयोगः नाप्नुयामशतशो यास्याप्पुनर्यातना इति भाष्ये तु नैतद्दृष्टं तत्र

ष्प्रत्राप्रयोगोनिर्वाह्यः वहिषइतिटिलोपवचनमव्ययानांभमात्रइत्यस्यानित्यत्वज्ञापनार्थंतेनारातीयइत्यादिसिद्धं एयप्रकृतेयञ्वचनमाद्युदात्तार्थं प्राचोग्रंथे
तुयएचेतिपठ्यतेतदनाकरं अश्वस्यामइत्तु भाष्योदाहरणादेवेहतदंतविधिः अन्यथावलवाचिनः स्यामन्शब्दस्यकेवलस्यापत्येनयोगाभावेपिजातादि
ष्ववविधिःस्यात् अश्वस्येवस्थामयस्येतिवहुव्रीहौपृषोदरादित्वात्सस्यतः गोरिति नकेवलमपत्यएवकिंतुसर्वेषुप्राग्दीव्यतीयेषु गव्यमिति गविभवंगो।
रिदंगौर्देवतास्येत्यादिरर्थः अनेन[illegible]गव्यमितिजैमिनीयसूत्रेविद्यमानंदूषयंतोवार्त्तिककाराःसमाहिताः केचित्तुप्राग्दीव्यतीयेभ्योऽन्यत्राप्यर्थेऽयंयदि
तिव्याचक्षाणाः गवाचरतिगव्य इ[illegible]घ्याहुः गोरूप्यमित्यादिहेतुमनुष्येभ्योन्यतरस्यांरूप्यः मयट्चेति रूप्यमयटौउत्सादिभ्योञ् अणस्तदपवादानामि
ञादीनांचापवादोयं इहपठ्यतेवष्कयासे असेअसमासेपूर्वाचार्यसंज्ञेयंवष्कयस्यापत्यंवाष्कयिः असेकिं गोवष्कयिः असइत्येतदेवेहतदंतविधिंज्ञापयति
तेनअधेनूनांसमूहः आधेनवइतिसिध्यतिधेनुशब्दस्येहपाठात् नचैवंधेनुकं गोधेनुकंचनसिध्येदितिवाच्यं धेनुरनञइकमुत्पादयतीति विशेषवचन।
स्यभाष्येआग्निशालिमतत्वेनोदाहृतत्वात् इकमितिठकमित्यर्थइतिकैयटः अग्निकलिभ्यामिति अयमर्थः सूत्रकृतासाम्य देवतेत्यधिकारे अग्नेर्ढगि
तिसूत्रितंदृष्टंसामेत्यधिकारेकलेर्ढगिति वार्त्तिककृतापूरितं तदिदंद्वयमपनीयश्रीमद्दीक्षितइतिप्रकरणेऽग्निकलिभ्यांढगितिपठ्यतेतेन अग्नेरपत्यंआ।
ग्निनादृष्टंसामअग्नौभवंअग्नेरागतं अग्नेःस्वंवाआग्नेयंकालेयमितिसिद्धं एतेनमीमांसकैर्यदुक्तं कलेर्ढगितिपाणिनीयसूत्रमपार्थकमित्यादित
त्सर्वमवैयाकरणमीमांसकसंतोषार्थमितिप्रपंचितंशब्दकौस्तुभे इत्यपत्यादिविकारांतार्थसाधारणाःप्रत्ययाः स्त्रीपुंसाभ्यांप्रागित्यनुवर्त्तते स्त्रैणइति
स्त्रीषुभवःस्त्रीभिश्चरतिस्त्रीभ्योहितइत्यादिवत्यर्थेतिसामान्यापेक्षंज्ञापकमितिभावः अतएवोदाहरतिस्त्रीवदितिकथंतर्हिस्त्वतलौ स्त्रीत्वंस्त्रीतापुंस्त्वंपुं
स्तेति आचत्वादितिचकारादितिवक्ष्यते द्विगोर्लुगनपत्येद्विगोरितिषष्ठीतदर्थश्चहेतुत्वं तच्चरथंतरसामनस्त्वादेरिवभाविनोपिबुध्याध्यवसायात् तदेत
दाह द्विगोर्निमित्तमिति अजादिरिति एतच्चोत्तरसूत्रादचीत्यस्यापकर्षाल्लभ्यते वाग्रहणमनुवर्त्यव्यवस्थितविभाषाश्रयणेनवागोत्रेलुगचिगोत्रेकि

विकारार्थस्याञोण्यलुङ्माभूत्१

यस्कादिभ्यो गोत्रे इति प्रकरणे नयस्य प्राप्तं तस्यैव लुग्यथा स्यात् नेह कुवलस्येदं कौवलं बादरं यूनि लुक् इह हि गोत्रे लुग न प्रस्येवि यूनि गोत्रे नेत्येव सूत्र्यतां तथा च लुक्
लुग्ग्रहणं शक्यमकर्त्तुं अजादाविति किं ग्लौचुकायनरूप्यं प्राग्दीव्यतीये किं तस्मै हितं ग्लौचुकायनीयं न तु उपगु अ इति स्थिते आगुणबाधित्वात्परत्वाद्वोऽणीति ति
भ्यो ऽवकाशः गौः पाचकः आदिवृद्धेरवकाशः शुश्रुतः सौश्रुतः औपगवः त्वाष्टः जागत इत्यादौ उभयप्रसंगे परत्वाभाव्यं गुणस्य तु पिचव्य इत्यादिरवकाशः किं च कृ
ते गुणेऽवादेशे च अत उपधाया इति वृद्ध्याभाव्यं तत्राह आदिवृद्धिरिति परत्वादिति भावः अस्योपधा त्वादादिवृद्धिरेव भवति न च पुनः प्रसंगविज्ञानं सकृ
द्गतिन्यायाश्रयणात् अत्र च ज्ञापकं अनुशतिकादिषु पुष्करसच्छब्दस्य पाठः अन्यथा उपधावृद्ध्या पौष्करसादेः सिद्धत्वादुत्तरपदवृद्ध्यर्थस्तत्र पाठोऽनर्थकः स्यात्
अकृतेति परिभाषायाश्च समर्थग्रहणमेव ज्ञापकं तद्धि परिनिष्ठितपरमित्युक्तं परिनिष्ठितत्वं च ङ्याप्प्रातिपदिकांश एव ननु सुविशिष्ट इत्यवधेयं तेन औप
गवः दंडिमानित्योऽस्मिन्निदं अष्टिमानरणीति सौत्रप्रयोगश्चेह लिंगं यदि तु नङ्कोडिः करणेनाकृतव्यूहपरिभाषा ज्ञाप्यते पामादिगणे विष्वगित्युत्तरपदलोपश्चा
कृतसंधेरित्यत्राकृतसंधिग्रहणेन परिनिष्ठितात्तद्धितोत्पत्तिस्तर्हि समर्थग्रहणं शक्यमकर्त्तुं ननु समासस्तद्धितेन निसंबाध्येत न च तद्धितस्यैवैकल्पिकत्वा
त्सस्येसोऽपीति वाच्यं यत्रोत्सर्गापवादौ महाविभाषया विकल्प्येते तत्रापवादेन मुक्ते उत्सर्गो न प्रवर्तत इति पारेमध्ये षष्ठ्या वेति वा ग्रहणेन ज्ञापितत्वादित्याशंक्याह दै
व यज्ञी सात्दिजातित्वादिति यद्धुमा चे[illegible] अणंतत्वान्ङीविति यच्च व्याचस्युष्टिद्धाणा त्रिस्यनेनेति तदुभयं प्रामादिकमिति भावः ओत्स इति उत्सः प्रस्रवणं वा
रिप्रवाहो निर्झरो मर इत्यमरः तस्यापत्यं [illegible] गांगेयो भीष्म इतिवत् जीवति तु वंश्ये युवा पितृपितामहादिरुत्पादकप्रवंधो वंशः तत्र भवो वंश्यः दिगादित्वाद्यत
पौत्रप्रभृतीत्यनुवृत्तं षष्ठ्या विपरिणम्यते [illegible]व्याख्यानादित्याह पौत्रादेरिति तुशब्दो भिन्नक्रमः युवेत्यस्मात्परो बोध्यः स च एवकारार्थ इति व्याचष्टे युवसंज्ञमेवेति
एको गोत्रे अपत्यप्रत्यय इति एतच्चाधिकारबलाल्लभ्यते औपगव इत्यादि उपगोरण् गर्गादिभ्यो यञ् नडादिभ्यः फक् तत्रारंभफलं मतभेदेन व्यवस्थापयन्निष्ट्या
अ इति स्वं गोत्रं तदपेक्षया एकोनसंख्यानो तृतीये द्वयोः चतुर्थे त्रयाणामित्यादौ त्वर्थः यद्वेति तृतीये एकस्मादनिष्टोत्पत्तिः चतुर्थे द्वाभ्यामित्यादौ त्वर्थः पितुरेवेति

तथाचामरः आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी आहुर्दुहितरं सर्वे ऽपत्यं तोकं तयोः समे इति ततः प्राचामिति तथा हि नपतंत्सनेनेत्यपत्यमिति व्युत्पत्ति-
पंक्ति विंशतीति सूत्रे भाष्यकृता दर्शिता व्यवहितो ऽपि पितामहादीनामुद्भूतेति प्रसिद्धं जरत्कार्वाद्युपाख्यानेषु सूत्रकारो ऽप्याह अपत्यं पौत्रप्रभृतीति आद्यप
क्षे अपत्यमिवापत्यमिति गौणी वृत्तिर[illegible]पणीया स्यात् औपगवादिर्जिति यस्यापत्यं तद्वाचकादेव प्रत्यय इति भावः एवं सत्यनुपदं वक्ष्यमाणस्य पितामह
ह्रीनामिति मुख्यपक्षस्य विवरणे उ[illegible]रणा इष्टसिद्ध्युक्त्या युक्तिः संगच्छते मूलादिति पंचमी तु अवधिसमर्पणमात्रार्था न तूपगुरूप मूलस्य संख्यातः पाति
त्वार्था अतएव द्वितीयपक्षे मूल[illegible]मनुपादाय शततम इत्येवोक्तत्वान्मूलस्य संख्यातः पातित्वं ज्ञेयं इञपीत्यपि भिन्नक्रमो ऽणं तादित्यस्माग्रे बोध्यः गोत्रा
धूनि गोत्रप्रत्ययांता देवेति न तु युवप्रत्ययांतादिति प्रथमपक्षे ऽर्थः द्वितीयपक्षे तु मूलप्रकृत्यनंतरयुवभ्यो नेत्यर्थः स्त्रियां त्विति अयं भावः अस्त्रियामिति योगे
विभज्यते यूनीति शब्दस्वरूपपरं परिभाषा चेयं यत्र युवसंज्ञा विधीयते तत्रास्त्रियामित्युपतिष्ठत इत्यर्थः सिद्धस्य गतिरियं जीवति तु वंश्ये युवा अस्त्रियामिति तु सूत्र।
पितुमुचित अनश्छ्रे तपस्किं शुभंयः अपसंशौभंयः कथं तर्हि प्रदीयतां दाशरथाय मैथिलीति अपत्यरूपविशेषस्याविवक्षायां शेषिको ऽण् वाहविरिति
यत्तु वाध्वलोडने इति धातोर्माधवेनोक्तं केवलस्य वाहोरपत्येनापो गात्सामर्थ्यात्तदंतविधिः सौवाहविरिति तच्चिंत्यं जानंति वाहवीत्याश्वलायनसूत्राद्युक्तादि
भ्यश्चेति सूत्रे वाहविरिति भाष्यकृतस्याद्युदाहरणाच्च वाहोः संज्ञाशब्दत्वात् औडुलोमिरिति यद्यपि लोमन्शब्दो गणे पठ्यते तथापि सामर्थ्यात्तदंतग्रहणं उ।
डुनीव शराइव लोमानि यस्य तस्यापत्यं औडुलोमिः शारलोमिः बहुत्वे तु इञयवादेः कारः प्रागेवोक्तः उडुलोमाः शारलोमाः इहयाः पुराणादिप्रसिद्धाः संज्ञास्ता।
भ्य एव प्रत्ययो बोध्यः निरूढत्वेन प्रथमोपस्थिताभिरेव विधेर्निराकांक्षत्वात् यस्तु इदानींतनो वाहुस्तस्यापत्यं वाहव इत्येव उक्तं च हरिणा अभिव्यक्तपदार्था
ये स्वतंत्रालोकविश्रुताः शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिष्विति अनर्थकं संदिग्धार्थकमप्रयुक्तं च क्रमेण विशेषणव्यावर्त्यं तदुक्तिषु तत्सदृशेष्वित्य
र्थः अतएव संज्ञा श्वशुरस्यापत्यं श्वाशुरिः स्वत्र राजश्वशुराद्यदिति यन्नमिमीते मातातस्य स्वसा मातृस्वसा मातृपितृभ्यां स्वसेति षत्वं न वाहुङ्किरिति वहुडादेर्य।

जातिविशेषाः इत्यादीति आदिशब्दान्नैषादकिः चांडालकिः वैंबकिः वस्यतइति व्रातच्फञोरिति विहितस्य ञ्यप्रत्ययस्येति शेषः यञिञोश्च गोत्रे यावितिगोत्रे किं द्वीपा
दनुसमुद्रं यञ् द्वैप्यः सुतंगमादिभ्यइञ् सौतंगमिः तदपत्ये माभूत् अनृष्यानंतर्ये अनृषीतिपंचम्यां सौत्रो लुक् सूत्रइति आनंतर्यइत्यत्रेत्यर्थः वैदीत्यत्र [illegible]णामा
शंक्याह वक्तादेरितिप्रवराध्यायेति एतच्च स्त्रीपुंसाभ्यां नञ्स्नञाविति सूत्रे कैयटग्रंथे स्पष्टं कापेयइति इतश्चानिञइति ढक् कपेर्गर्गादित्वात्प्राप्ते आंगिरसइ।
वेतिनियमार्थं सूत्रं गणपाठस्तु लोहितादिकार्यार्थः काप्यायनी बोधिरिति अनृषित्वादिञ् वाह्वादित्वाद्वा वतंडाच्च यञणोः प्राप्तयोः आंगिरसे यञ् वेति नियमार्थं
सूत्रं लुक् स्त्रियां विहितस्येति परिशेषितस्यैवेति बोध्यं एतच्च आंगिरसइत्यनुवृत्त्या लभ्यते अतएवाह अनांगिरसे त्विति वक्ष्यमाणइति अणो[illegible]ति
सूत्रेणेति भावः अश्वादिभ्यः फञ् गोत्रेइति क्वचित्पुस्तके पठ्यते तथाहि अश्वादिगणे गोत्रप्रत्ययांतास्त्रयः पठ्यंते बैल्वः आनडुह्यः आत्रेयइति विलि[illegible]ः ता
तो ह्रदे[illegible] आनडुह्यशब्दो गर्गादियञंतः आत्रेयशब्दो ढगंतः ततः सामर्थ्यात् युनि फञ् नहि युवानं विना अपत्यप्रत्ययद्वयं लभ्यं शक्य[illegible]जा
नइति गणसूत्रं पुंसि विद्यमानो जातशब्दस्तस्मात्फञित्यर्थः जातायाइति लिंगविशिष्टपरिभाषया एकादेशस्य पूर्वांतत्वेन ग्रहणाद्वा प्राप्तः फञ् शिवादिभ्योऽ।
णगोत्रइति निवृत्तमिति इतः प्रभृति अपत्यसामान्ये प्रत्यया इति भावः एतच्च वृत्तौ कैयटादिग्रंथे च स्पष्टं यत्तु यूनि लुक् सूत्रे भाष्ये कैयटपर्यालोचनया गोत्रसंज्ञा।
सूत्रपर्यंतं गोत्राधिकारइति लभ्यते [illegible]मतांतरमिति भावः विपाशशब्दोत्र पठ्यते तस्य कुंजादिष्वपि पाठसत्त्वे च्फुञ् वैपाशः वैपाशायन्यः जारत्कारुशब्दः पठ्य
तेऽतः शुभ्रादित्वाड्ढगपि ढे लोपोऽकद्र्वाः इत्युलोपः जारत्कारवः जारत्कारेयः विश्रवणरवणशब्दे पठ्येते विश्रवःशब्दस्यादेशोऽत्र कृत्यन्तरेणवा वृत्तिविषयेत
त्समानार्थे विश्रवणः रावणः [illegible] अत इञ् अचः किं उदधेरपत्यं औदधिः यत्तु काशिकायां मरीचेर्मारीच इति प्रत्युदाहृतं तन्नचिंत्यं बाह्वादित्वेनेञ्प्रसंगात्
तथा च मिदचोत्यात्परइति सूत्रे भाष्ये मरीचिशब्दो बाह्वादिषु पठ्यतइति शुभ्रादिभ्यश्च मृकंडशब्दोत्र पठ्यते स च अदंतः एतच्च मृगप्वादयश्चेति सूत्रे उज्ज्वलद
त्तग्रंथे स्पष्टं मृकंडस्य मुनेस्तीर्थं तयाभ्यामतिनिर्मलमिति स्कांदे मार्कंडेयः उकारांतपाठे तु ढे लोपो बोध्यः कल्याण्यादीनामिनङ् परस्त्रीशब्दोत्र पठ्यते [illegible]

णेयः अनुशतिकादित्वादुभयपदवृद्धिः परभार्यायामुत्पन्न इत्यर्थः विदादिगणे तु परस्त्री परशुं चेति पठ्यते आपद्यत इति शेषः परस्त्रिया अपत्यं पारशवः नीच
णाच्छूद्रायां तेनैवोढायामुत्पन्नः स चाजातेतरयोगात् परस्त्री तदिह परस्त्रीति कल्याण्यादिषु षष्ठीतत्पुरुषः विदादौ तु कर्मधारय इति विवेकः तथा च याज्ञवल्क्यः
विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायां विशः स्त्रियां अम्बष्ठः शूद्र्यां निषादो जातः पारशवोपि चेति नचैवं पारशवेपि स्यान्निवद्धत्वात् अनुशतिकादिकार्यस्यादि
ति वाच्यं पूर्वोत्तरपदसंभ्रमोहात् मैवं इह एतावान् पूर्वपदस्यादेशः इति विषयविभागो गम्यते सतीभिक्षुकान्नेति अत्र इनङ् द्विधो उक्तं चामरसिंहेन अथवा धिक्
नेयः स्यादुंधुलश्चासतीसुतः कौलटेयः कौलटेयो भिक्षुकी तु सती यदि तदा कौलटिनेयो स्याः कौलटेयोपि चात्मज इति केचित्तु क्षुद्रायामपि इनङं तृतीयं रूप।
माहुः वृत्तौ तु क्षुद्राभ्यः परत्वाद्ढगित्युक्तं तच्चिन्त्यं नस्य वैकल्पिकतया स्वयमपि पक्षे ढकः स्वीकाराच्च इनङः प्राप्तेर्दुर्वारत्वात् तयोरेवेति तत्र टावन्तात् द्धिते
लुप्ते लुक् ङितल्लुकीति टापो लुकि पुनरजादिलक्षणष्टाप् जातिलक्षणस्य ङीषो बाधक इति भावः यत्त्विह न्यासकृतोक्तं चटकादैरगित्येव साम्प्रदायिकः सूत्र
पाठ इति तद्भाष्यवार्त्तिकविरोधादुपेक्ष्यं आरगुदीचां उदीचांग्रहणं पूजार्थं वचनादेव ढकृढगारकोः पर्यायसिद्धेः अन्यत इति अनाकारान्तात् तत्कृतश्चिदित्य
र्थः जडस्येति जलघातने डलयोरभेदाज्जडः पडिगतौ पंडः एतच्च उक्तधात्वोर्माधवीयवृत्तौ स्पष्टं तत्र पण्डस्यापत्यं दत्रिमादिवोध्यं गार्ष्टेय इति ननु गृष्टिः सकृ
त्प्रसूता गौरिति कोशाच्चतुष्पाद्भ्यो ढञ् इत्येव सिद्धं अत्राहुः कोशे गौरिति प्रायोवादः सकृत्प्रसूता सर्वापि गृष्टिः अतोयमारंभ इति वस्तुतस्तु गृष्टिशब्दः शु
भ्रादिः तथा चान्तोदात्तढगन्तं प्रयुज्यते संगार्ष्टेयो वृषभो गोभिरानडिति अतः पाक्षिकाद्युदात्तार्थमिह सूत्रे गृष्टिशब्दग्रहणं ढञिति गृष्ट्यादित्वादिति भावः कैकयमि
त्रयु केकयस्यापत्यं स्त्री कैकेयी जनपदशब्दात्क्षत्रियादञ् मैत्रेयिकयाश्लाघते मित्रयूनां भावेनेत्यर्थः गोत्रचरणाद्वुञ् घा त्याकारेति वुञ् तत्र हि लौकिकं गो
त्रं गृह्यते लोके च ऋषिशब्दो गोत्रमिति प्रसिद्ध इति काशिकायां एतच्च पदामित्रयुशब्दोऽभेदोपचारात् तदपत्ये संताने वर्त्तते तदा बोध्यं यदा तु गृष्ट्यादित्वाद्ढ
ञो यस्कादित्वाद्बहुषु लुक् तदा पारिभाषिकेपि गोत्रे न क्षतिः प्रलयादागतं प्रालेयं इत्यादेशेन वृद्धिर्न बाध्यते विषयभेदात् अचामादेर्वृद्धिः ओदेरियादेशः ॥

अंगं तु उभयोर्विशेषणं न कार्यमिति हरदत्तः दांडिनायन एतानीति दंडिन् हस्तिन् आभ्यां नडादित्वात्फक् यैस्तु नडादिष्वेतौ न पठ्येते तेषाम् अत एव निपातनात्फक्।
कुटिलोपाभावस्तु निपातनादेव अथर्वन्निति वसंतादिषु पठ्यते अथर्वणा प्रोक्तो ग्रंथः अथर्वा उपचारात् तमधीते आथर्वणिकः जिह्माशिन्निति [illegible]
जिह्माशिनोपत्यं जैह्माशिनेयः वाशिनोपत्यं वाशिनायनिः उदीचां वृद्धादिति फिञ् भ्रूणहन् धीवन् एतयोः ष्यञि तकारादेशो निपात्यते भ्रूणघ्नो भावो भ्रौ
णहत्यं धैवत्यं इह हंतेस्तत्वे हनस्तोचिण्णलोरित्येव सिद्धे निपातनं ज्ञापयति धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानमिति तेन वार्त्रघ्नमित्यत्र त[illegible]न सरय्वा
इसस्याणि परे यादेशो निपात्यते सरय्वां भवं सारवमुदकं देविकायां सरय्वां च भवे दाविकसारवावित्यमरः तत्र देविकाशिंशपादित्यवाड्दीर्घस[illegible]यसामा
त् इति सूत्रेणादेविकाशब्दस्याचामादेराकारादेशो बोध्यः ऐक्ष्वाक इति अणंतमञंतं च एकश्रुत्या पाठात् उभयत्राप्युकारलोपः इक्ष्वाकोरपत्यं [illegible]जनपदशब्दा
त् क्षत्रियादञ् ऐक्ष्वाको राजा बहुत्वे लुक् इक्ष्वाकूणां दुरपेथे इक्ष्वाकुषु जनपदेषु भवः कोपधादण् अस्य बहुत्वेपि न लुक् ऐक्ष्वाकेषु च मैथिलेषु च [illegible]न्यस्मा
कैमघाशिष इति मुरारिः हिरण्यशब्दस्य मयटि यादिलोपो निपात्यते हिरण्यस्य विकारो हिरण्मयः यस्कादिभ्यो गोत्रे अपत्याधिकारादन्यत्र लौकिकं गोत्रमित्य
भिप्रेत्याह अपत्यप्रत्ययस्येति राजश्वशुराद्यत् यथाक्रममिञोरपवादः जातावेवेति प्रकृतिप्रत्ययसमुदायेन जातिश्चेद्वाच्येत्यर्थः प्रत्ययस्तु अपत्य एव व्य
न्सपत्ने सपत्नशब्दः शत्रुपर्यायः [illegible]स्त्यन्तं प्रातिपदिकं वस्तुतस्तु सपत्नीशब्दादिवार्थे अलप्रत्ययो निपात्यते सपत्नीव सपत्नः अत एव येनः सपत्ना अपते
भवन्त्वित्यत्र सपत्नाः इत्यविग्रहः [illegible]लित्स्वरेण मध्योदात्तः पाप्मनेति न घत्रभ्रातृपुत्रत्वरूपोऽवयवार्थोस्तीति भावः वृत्तिकारस्तु इहापत्यग्रहणं न संबध्य
ते अनर्थकावेव प्रकृतिप्रत्ययौ समुदायोऽर्थ[illegible] परं सपत्न इत्याह गार्ग्यो अपत्यमिति पितुरसंविज्ञाने मात्रा व्यपदेशात्कुत्सा पुंवद्भावादिति भस्याढे इत्यनेन गा।
र्यशब्दादिति यद्यपीह प्रकृतेर्वृद्धत्वात्तस्याणित्वं नोपयुज्यते तथापि ग्लुचुकायन्याः अपत्यं ग्लौचुकायन इत्यत्र वृद्धार्थं तद्बोध्यं गोत्रे किम् कारिकेयः।
स्त्रियां किम् औपगवस्यापत्यं युवा औपगविः कुत्सने किम् गार्ग्यः कौरव्या ब्राह्मणा इति यस्तु कुरुनादिभ्यो ण्य इति वक्ष्यते तत्र क्षत्रियादित्यनि कृत्र[illegible]

जत्वाद्व्रुक् कुरवः क्षत्रियाः इति विशेषः वावद्रूकं इति वदे र्यङ् ताद्रूकप्रत्ययः स च कुर्व्वादिगणे वावदूक इति पाठसामर्थ्यादेवेति माधवः उलूकादयश्चेत्सुगणादिसूत्रे ते
त्वन्ये सम्राज इति गणसूत्रं हारिषेणय इति एति संज्ञायामगादिति षत्वस्यासिद्धत्वात् सेनान्तोयं नापि स्य इति प्राचां मतेनेदं उदीचां तु परत्वात्फिञिति वक्ष्यते तस्मादिति
उदीचामित्येव इञोपवादः वृत्तिकारस्तु तक्षन् शब्दं शिवादिषु पठित्वा कारिलक्षणमुदीचामिञं अयमण्बाधते ण्यस्य तु बाधो नेष्यते इत्याह सर्वथाण्ण्याभ्यां
सूत्रद्वयं निर्विवादं यत्तु षपूर्वहन्धृतराज्ञामणीति सूत्रे हारदत्तेनोक्तं ताक्ष्णः तस्येदमित्यण् न त्व पत्ये कारिलक्षणेन ण्येन बाधितत्वादिति तदिह स्वभाष्यवृत्तिस्व
ग्रंथविस्मरणमूलकं तैकायनिरिति तिकस्यापत्यं ने तिकादिभ्य इति तिकः इगुपधत्वात्कः वृद्धात्किम् दाक्षिरिति दक्षशब्दोत्र प्रौढपरः नामधेयत्वे तु वा नामधेयस्ये
ति वृद्धत्वात्पक्षेपि फिञ् भवत्येव दाक्षायण्योऽश्विनीत्यादिताण इत्यमरः पंचालानां राजेति इह अवृद्धादपि बहुवचनविषयादिति प्राप्तो वुञ्बाध्यते पूरोरिति पूरुश
ब्दस्य जनपदवाचित्वाभावात् ज्ञोय्यतीयः णिसिद्धे तद्राजसंज्ञार्थं वचनं जनपदवाचित्वे तु द्व्यज्मगधेत्येव सिद्धं पांडोर्ड्यण् ण्यकारो वृद्धिनिमित्तस्येति पुंवद्भाव
प्रतिषेधार्थः पुंसि स्थितिः पितृवाचिनो गुणवाचिनश्च पांडोर्नेह ग्रहणं जनपदशब्दादित्युक्ते हि तदधिपतिवाच्येवोपतिष्ठते कुरुनादिभ्यो ण्यः कुरोर्ण्ये ज्वलक्षणो णि
प्राप्तेन कारादिभ्यस्तु अञि प्राप्ते वचनं तेन तद्राजाः अजादय इति ततः प्राचीनास्तु तच्छब्देन न परामृश्यंते गोत्रयुवसंज्ञाकाण्डेन विच्छेदादिति भावः तद्राजस्य बहुषु तेन
र्थेति तद्राजस्यार्थेन कृत इत्यर्थः रघुयदुशब्दयोरिति एतच्च वल्हच इञ इति सूत्रे पदमंजर्यां स्थितं सिंधुतक्षेति कम्बोजशब्दस्य सिंध्वादिषु पठ्यमानत्वादिति भा
वः अवंतीकुंतीति अयङो लुक् इतो मनुष्यजातेरिति ङीष् कुरुरिति ण्यस्य लुक् ऊङ् तइत्यूङ् अतश्च इह तद्राजेन अकारो विशेष्यते न तु विपरीतं विशेषणेन।
तदंतविधौ त्यङ् रण्यादीनामपि अनेनैव लुक् सिद्धौ अवंतिकुंतिकुरुभ्यो लुग्वचनं वैयर्थ्यापत्तेः तेन कौशल्येति सिद्धं तदेतदाह तद्राजस्याकारस्येति कारूषीति क
जउः करूः तं वष्टि मूलविभुजादित्वात्कः करूशाः एतेन करूषेति मूर्धन्यपाठः प्रास्तुक्तः अणिञोः यद्यपि स्त्रीप्रत्ययाः प्रकृताः ष्यङः प्रत्ययत्वे लक्ष्यति हिरण्यप्रसू
हा तथाप्यादेशत्वमवोचितं पस्तुर्नीयज्ञसंयोगे इति नकारस्य यथा अणिञोरिति षष्ठीस्वारसात् इत्यभिप्रेत्याह ष्यङादेशः स्यादिति नन्वयं ताताङ् न्यायेन सर्वादेशः।

स्यात् ङित्त्वे त्वस्यानंत्यार्थे ङित्त्वेष्वनङादिषु चरितार्थत्वात् ष्यङो ङित्त्वस्य यङश्चाविति विशेषणार्थत्वादित्यत आह निर्दिश्यमानस्येति कौमुदगंध्येति आणःष्यङ् वाराः
ह्येति इञः ष्यङ् अणिञोः किम् आर्त्तभागस्य विदादित्वादञ् इत्यपत्याधिकारः रज्यतेऽनेनेति शुक्लस्य वर्णांतरोपादानमिह रंजेरर्थः कथं हारिद्रो कुक्कुटस्य पादाविति उ
पमानाद्विष्यति लाक्षारोचनात् वृत्तिकृत्तु वार्त्तिकस्थौ शकलकर्दमावपि सूत्रे प्रक्षिप्य आभ्यामिति भाष्यादौ तु नैतदस्ति नील्येति नीली औषधिविशे[illegible]
णान्नक्षत्रवाचकाः शब्दाः वृत्तिविषयेन युक्तं चंद्रमसमभिदधानाः प्रत्ययं लभंते पुष्येणेति पुष्यसमीपस्थेन चंद्रमसेत्यर्थः षष्टिदंडेति अयं च विशेषः पूर्वसूत्रानु
वृत्तिबलाल्लभ्यते तेनाद्येसुत्यानद्योनष्य इति विशेषे गम्यमानेपि लुब्भवत्येवेति भावः इंद्राग्नी विशेषे उदाहरणमाह तिष्यपुनर्वसवीयमहरिति अविशेषे तु
अद्य राधानुराधीयं न च लुब्विशेष इति अणइव लुबपि लुप्स्यादिति वाच्यं पूर्वोपस्थितेन अणैव तस्य निराकांक्षत्वात् एतदेव हि मध्येपवादन्याये[illegible]त लो
अस्मिन्नर्थे इतित थाच श्लोकवार्त्तिकं दृष्टे साम निजाते चाप्यणिड् द्विर्वा विधीयते इति जातर्थे योड्विरण स च वा डिदित्यन्वयः शतभिषजि जातः शात[illegible]ष शा
तभिषजः इह हि प्रोष्ठपद्भ्यत इति प्राप्तेण कालाट्ठञा बाधितः संधिवेलादिसूत्रेण प्रतिप्रसूतः इत्ययं द्विरूक्तेन अतो वा डित्वं एतच्च मूले स्वस्थाने वक्ष्यते नामदे
वात् यस्येति लोपेन सिद्धे अनङ्यापोर्डित्करणं स्वरार्थम् ययतोश्चेति सूत्रेण विधीयमानं नञ उत्तरस्य पदं तस्यांतोदात्तत्वं अवामदेव्य शब्दे मा भूत् किंत्व
व्यय पूर्वपदस्वर एव यथा स्यात् ननु कृतेपि ङित्त्वे ययतोरित्यस्य प्रवृत्तिः कुतो नेति चेत् परिभाषाबलादित्यवेहि तथाहि निरनुबंधकग्रहणे न सानुबंधकस्येति यस्य
हे ड्यग्रहणं न भवति तदनुबंधकग्रहणे नातदनुबंधकस्येति यद्ग्रहणे ड्यद्ग्रहणं न भवति इमे च परिभाषे इहैव ङित्त्वेन ज्ञाप्यते तत्राद्यायाः प्रयोजनं पूरणगुणेति सूत्रे
तथ्यग्रहणे तव्यद्ग्रहणं मा भूत् दिवऔदित्यत्र दीव्यतेर्मा भूत् द्वितीयस्यास्तु अङ्ग्रहणे चङ्ग्रहणं मा भूत् श्वयतेरः अश्वत् नेह अशिश्वियत् परिवृतो रथः त
देकांतग्रहणं कर्त्तव्यं नेह पुत्रैः पौत्रैः परिवृ[illegible]तत्रोद्धृतं शारावइति भुक्तोच्छिष्ट इत्यर्थ इति वृत्तिकाराः अवशिष्ट इति तदर्थः तथा च कल्पसूत्रेषु व्यवहारः उच्छिनष्टि
ने सर्वं जुहोतीति साऽस्मिन्पौर्णमासीति सूत्रात्प्राक् तत्रेत्यनुवर्त्तते तेन सप्तम्यंतात् देवप्रत्ययाः स्थंडिलात् व्रतं शास्त्रेण विहितो नियमः तस्मिन्समुदायेन गम्ये उत्स्वमिति

कर्पूतंर्हि उख्योऽग्निः न ह्यसौभस्त्र इति चेत्सत्यं भवार्थे दिगादित्वाद्यदित्याहुः दभ्रष्ठकृद्भ्रीति संस्कारश्चेह लवणादिना यत्क संस्कृतार्थे प्राग्वहते रिति ढग्वक्ष्यते स
त... ततश्च उदभासंस्कृतोपि दाधिक एव उदकेनश्वयतीति क्विप् तुक् इहैव सूत्रे निपातनात्संप्रसारणाभावः इति शब्दादिति सहितो लौकिकी विवक्षामनुसा
स्यति सूत्रे संज्ञायामिति वृत्तिकृतामश्लिष्टं पौर्णमासीति महाराजप्रोष्ठपदाट्ठञिस्यत्र तदस्मिन्वर्त्तत इत्यर्थे पूर्णमासादण उपसंख्यानादण शतंरुद्रा इति शतश
ब्दांत वचनः सौमीति हलस्तद्धितस्येति यलोपः वायव्यमिति ओर्गुणः वांतो यीत्यवादेशः उषस्यमिति उषस् शब्दस्त्रीलिंगो दिवो दुहितरं देवतावक्ति एतच्च सुपे
शासं सुरवं रूथमित्यादिमंत्रेषु प्रसिद्धम् शुनासीरीयमिति शुनश्च सीरश्चेति द्वंद्वः शुनो वायुः सीर आदित्य इति वृत्तिकाराः अन्ये त्वेकमेव शुनासीरमिंद्रस्य गुण
माहुः तथा चाश्वलायनः इंद्रो वा शुनासीर इति मंत्रवर्णाश्च इंद्रं वयं शुनासीरमस्मिन्यज्ञे हवामह इति मरुत्वतीयम् मरुत्वत्सं अग्नीषोमीयम् अग्नीषोम्यम्
वास्तोष्पत्यं वास्तोष्पतीयं वेश्म भूर्वास्तुरह्नित्रियाम् वास्तोः पतिर्वास्तोष्पतिः इहैव सूत्रे निपातनात्साधुः गृहमेधीयम् गृहमेध्यम् गृहमेधशब्दोऽकारांतः मरु
द्भ्यो गृहमेधेभ्यः इत्याश्वलायनः गृहमेधास आगतेति मंत्रलिंगं च कालेभ्यो भववत् कालाट्ठञ् इति प्रकरणे ये भवे प्रत्यया वक्ष्यंते ते सास्य देवतेत्यस्मिन्विष
येऽनेन सूत्रेणातिदिश्यंते वत्करणं सर्वसादृश्यार्थं तेनान्यस्माद्यो विहितः ततः स एव भवति तथैवोदाहरति मासिकं प्रावृषेण्यमिति सकारेति अ
न्यथा प्रक्रियालाघवाय षकारमेव पठेदिति भावः तस्य समूहः चितवदाद्युदात्त अगोत्रांतं प्रतिपदमनुक्तप्रत्ययमिहोदाहरणं तथाहि अचित्ताट्ठग्वक्ष्यते
अनुदात्तादेरञ् गोत्रांताद्वुञ् केदाराद्भ्यःप्रतिपदं यञादय इत्याशये नोदाहरति काकं वाकमिति एवं बार्कम् काकवकवृकशब्दा आद्युदात्ताः प्राणिनां कुपूर्वा
णामिति फिट्सूत्रात् प्राणिविशेषवाचिनां शब्दानां ये आदिभूताः कवर्गास्तत्पूर्वे तेषामुदात्तः स्यादिति सूत्रार्थः अथादिः प्राक् शकटेरिति ह्यधिकृतं यत्नुच्छ्वीया
सेच शौल्मि सुराहृतं तत्प्रामादिकं खंडिकादिषु शुकशब्दस्य भाष्ये वृत्तौ च पठितत्वेनानंतत्वादित्यवधेयं भिक्षादिभ्योण् भैक्षमिति अचित्तत्वाट्ठक् प्राप्तः
गार्भिणमिति अनुदात्तादेरञ्प्राप्तः सति तस्मिन् आद्युदात्तत्वं टिलोपश्च स्यात् युवतीनामिति वृत्तिकारास्तु भिक्षादिगणे युवतिशब्दं पठित्वा न तत्सामर्थ्यान्नपुं

वदित्याहुः नचानुदात्तादेरञं बाधितुं पाठः भस्याढे तद्धिते पुंवद्भावः सिद्धश्च प्रत्ययविधाविति प्रागेवेति प्रत्ययनिवृत्तौ सत्यां कनि न्युङ्घषीति कनिवृंततया आद्युदात्त
त्वात् तथा च स्त्रीसंघे यौवतमिति रूपं तन्मते स्थितं किंतु नैतद्युक्तं भाष्यवार्त्तिकयोरिह युवतिशब्दपाठस्य प्रत्याख्यानात् तथा चेह औत्सर्गिकेणाणानुभि[illegible]दि
त्वप्रयुक्त इत्यवधेयं शत्रंतादिति एवं च गार्भिणं यौवतं गणेऽद्य समरोक्तिः अदः स्मितं संमुखवीरयौवतं तु टङ्कजाकं बुमृणालहारिणीरिति श्रीहर्षोक्तिश्च भाष्यम
तेऽपि नासंगतेति भावः ब्राह्मणमाणववनुत्रयोप्यमी वृद्धाः तेभ्यः प्रकृत्तो यञेवास्तु नहि वृद्धात् यञि यनिवारूपे विशेषोस्ति न वा स्वरे उभयथाप्याद्युदात्तत्वादु
न्तुनानुवर्त्तिष्यते स्वरितत्वात् सत्यं अन्यतो विधानार्थं यत्वचनं तत् सिद्धार्थकथनपरं वार्त्तिकमाह पृष्ठादिति पृष्ठशब्दः सोत्र विशेषसंज्ञा पृष्ठस्य इति पृष्ठा
नां समूहः कथं तर्हि पृष्ठ्यः षडह इति मत्वर्थलक्षणा येत्यवेहि ग्रामजनबंधुभ्यस्तलित्युक्तं ।। तु वार्त्तिकांतर्गतः सहायशब्दोपि सूत्रे प्रक्षिप्तः अनुदात्तादेरञ् इत्यस्य हि चि
वंत उदाहरणं अचित्तात्वा पूपिकं शाष्कुलिकमित्यादौ परत्वाट्ठगेवेत्याशयेनाह कापोतमिति कपोतमयूरशब्दौ मध्योदात्तौ लघावंते इति फिट्सूत्रात् ।
खंडिकादिभ्यश्च आद्युदात्तार्थं वचनं अचित्ताट्ठको बाधनार्थं च चरणेभ्यो धर्मवत् यस्याः प्रकृतेः यः प्रत्ययो धर्मे वक्ष्यते स ततः समूहेपि स्यादित्यर्थः वुञा
दयो हि चरणेभ्यो वक्ष्यंते चरणाद्धर्माम्नाययोरिति तु तत्र वार्त्तिकं तदप्यनेनातिदेशसूत्रेण ज्ञापितमिति बोध्यं काठकमिति गोत्रचरणाद्वुञ् छांदोग्यमिति छंदो
गौक्थिकेति ञ्यः विषयो देशे तस्येत्यनुवर्त्तत इत्याह षष्ठ्यंतादिति भौरिकिविधमिति क्लीवत्वं लोकात् सोस्यादिरिति अक्षरेयत्तानिबंधने पङ्क्त्यादिछंदः तन्
ह्याचकात्प्रथमांतात् अस्येत्यादिमति प्रत्ययः स्यात् यश्चादिमान् स प्रगाथश्चेत् प्रग्रथ्यत इति प्रगाथः अकर्त्तरि च कारक इति कर्मणि घञ् पृषोदरादित्वाद्रेफ
नकारलोपः रूढश्चायं चतुर्थषष्ठौ पादौ वार्हते प्रगाथे पुनरभ्यसितव्यौ उत्तरयोरवस्येत इत्येवमादिवचनात् यत्र द्वयोर्ऋचोस्त्रित्वं क्रियते स प्रगाथः त्रैष्टुभमि
ति कुटीकुटीर इत्यादिवत् स्वार्थिके कृते लिंगान्यत्वं संग्रामे प्रयोजनयोद्धृभ्यः योद्धृवाचिभ्यश्च प्रथमांतेभ्योऽस्येति षष्ठ्यंतार्थे संग्रामेऽभिधेयेऽण् स्यात् तदस्यां
प्रहरणं किम् मालाभूषणमस्यां क्रीडायां क्रीडायां किम् खड्गः प्रहरणमस्यां सेनायां घञः सास्याम् घञः किम् श्येनपतनमस्यां वर्त्तते क्रिया किं प्राकारोऽस्यां वर्त्तते तद
अन्ये तु प्रगीयत इति प्रगाथः गै शब्दे इत्यत उषिकुषिगार्तिभ्यस्थन्नित्याहुः यत्र द्वे ऋचौ वावर्त्य प्रगीयेते स प्रगाथः ३

म·सु·
८७

स्यामितिप्रकृतेपुनः सास्यामिस्युक्तिः क्रीडायामित्यस्यानुवृत्तिर्माभूदिति अत एवाहदंडपातोस्यांतिथाविति तदधीतेतद्वेद द्वितीयांताद्ध्येतरिवेदितरिचप्रत्ययस्स्या
त् छिलद्ग्रहणमधीयानेविदुषिचपृथग्विधानार्थं अन्यथा उत्तरत्रक्रतुवसंतादिष्वंअशब्दात्मकतयाअध्ययनासंभवेन वेदितर्येवप्रत्ययः स्यात् सिद्धांतेतुद्वितीया
द्ग्रहणसामर्थ्यात्क्रतुवसंतादयः शब्दास्तत्प्रतिपादकग्रंथेगौणाअपिप्रत्ययंलभंते क्रतूक्थादि क्रतुविशेषेतिक्रतुशब्दस्तुनगृह्यतेनत्वाहिसतिक्रतुसक्थादिष्वेव
पठ्येत नापिक्रतुपर्यायाः उक्थादिषु यज्ञशब्दस्यापाठादितिभावः आग्निष्टोमिकइति संस्थाविशेषवचनस्यापि अग्निष्टोमशब्दस्यतत्संस्थापके क्रतौ निरूढः।
प्रयोगः वासवदत्तामितिगद्यरूपोग्रंथविशेषः आख्यायिकेति अधिकृत्यकृतेग्रंथइतिसूत्रेहरदत्तः सर्वादेरितिसादेरित्यत्र अर्थवतः सशब्दस्यग्रहणात्सर्वादे
पृथगुपादानं एतदपि अर्थवत्परिभाषायांज्ञापकंसवार्त्तिकइतिवार्त्तिकांतमधीतइत्यर्थः अंतवचने अव्ययीभावः अव्ययीभावेचाकालइतिसहस्यसः ननोणो
लुक् इकन्निति पदशब्दः उत्तरपदंयस्यतस्मादिकन्स्यात् शतशब्दात्षष्टिशब्दाच्चपरोयः। पथिन्शब्दः तदंतात्षिकन्स्यात् षोडशषष्ठ्यः शतपथिकइति अत्रवृ
त्तिकारोवहुलग्रहणंकृत्वाशातपथइति अणमप्युदाजहार इकन्वहुलंपथोत्तरपदादित्युक्थादिष्वंतर्गणसूत्रमितिन्यासकारः वसंतादिभ्यष्ठक् उक्थादिषु
वसंतादयः पाठ्याः तेवावसंतादिषु तथातुनकृतमित्येव अथर्वाणमिति अथर्वणाप्रोक्तोऽथर्वा उपचारात् यद्वातेनप्रोक्तमितिप्रकृत्य ऋषिभ्योलुग्वक्तव्यः
वसिष्ठः विश्वामित्रोनुवाकः इत्युदाहृत्य अथर्वणोवा अथर्वी अथर्वणइतिशैषिकप्रकरणांतेभाष्योक्तेः साधुः ण्यक्षत्रियार्षञितप्रत्ययांतात्क्षत्रियगोत्रप्रत्ययां
तात् ऋष्यभिधायिनोगोत्रप्रत्ययांतात् ञितश्चपरयोर्युवाभिधायिनोरणिञोर्लुक्स्यात् कुर्वादिभ्योण्यः कौरव्यः पिता कौरव्यः पुत्रः ऋष्यंधकेत्यण् श्वाफल्कः पि
ता ततइञ्लुक् श्वाफल्कः पुत्रः वसिष्ठादृष्यण् वासिष्ठः पितापुत्रश्च तिकादिभ्यः फञ् तैकायनिः ततोऽणो लुक् तैकायनिः पुत्रः ऋष्यण् एवेति पाणिनशा
ब्देतुऔत्सर्गिकएवाण् इतिभावः यद्यपि पाणिनिशब्दोयौगिकोनतुऋषौरूढः लुग्विधौतुरूढस्यैवग्रहणं एतच्चशास्त्रांतेभगवतः पाणिनेः सिद्धमितिवार्ति
कनिर्देशाद्दाक्षीपुत्रस्यपाणिनेः इतिभाष्याच्चनिर्णीतमित्यवधेयं अष्टकमिति संख्यायाः संघसूत्राध्ययनेष्विति संख्यायाअतिशदंतायाः कन्छंदोब्राह्मणानि

म·
४

देवसिद्धेर्ब्राह्मणग्रहणं तद्विशेषप्रतिपत्त्यर्थं तेन पुराणप्रोक्तानामेव तद्विषयता नेह याज्ञवल्क्येन प्रोक्तानि ब्राह्मणानि याज्ञवल्कानि कण्वादिभ्यो गोत्र इत्यण् आप
त्यस्य चेति यलोपः याज्ञवल्क्यादयो नूतना इति सूत्रकारस्य दृष्टा इति वृत्तिकृतां व्यवहारः छंदोब्राह्मणानीति किं पाणिनीयं व्याकरणं अथ चातुरर्थिकाः तदस्मिन् म
नुपोयमपवादः सकललोकनिरूढेयं घ्या स्यात् नत्वाधुनिकसंकेतिते पीत्येतदर्थ इति शब्दः देशे तन्नाम्नीति उत्तरसूत्रचतुष्टयेप्यन्वेति तेन निर्वृत्तम् [illegible]
र्थो हृतेः कर्मणि क्तः चातुरर्थिकत्वमिति चतुर्णामर्थानां समाहारश्चतुरर्थी तत्र भवाश्चातुरर्थिकाः अध्यात्मादित्वाट्ठञ् तद्धितार्थे द्विगौ तु ठञो लुक् स्यात् [illegible]
णाकठसूत्रे कुमुदशब्दस्य द्विः पाठेपि एकशेषो न भवति प्रथमतः कुमुदादीनां चतुरर्थ्यां ठं ठं विधाय द्वितीयेन काशादिकुमुदादित्वेन सह पुनर्ठञ् विधानात् आ
दिशब्दः प्रत्येकमभिसंबध्यते तदाह अरीहणादिभ्य इति जनपदे लुप् तन्नाम्नीत्येव नेह उदुंबराः संत्यस्मिन् देशे औदुंबरो जनपदः नक्षत्रलुवंतं नामधेयं वस्य
मारोनेति अवर्णोपधासत्त्वादिति भावः नच टिलोपस्य स्थानिवत्त्वं पूर्वत्रासिद्धे तन्निषेधात् नन्वेकदेशविकृतन्यायेन पदत्वाद् ढुत्वं स्यादिति चेन्न वहिंगत्वेन नि
लोपस्यासिद्धत्वात् नच षाष्ठीव हिंसापरिभाषा इह तु नपश्येदिति वाच्यं कार्यकालपक्षाश्रयणात् नन्वेवं औत्सीत्यादौ हः घटी आमलकीत्यादौ जश्त्वं च स्यात्।
यस्येति लोपेकृते वशिष्टस्य स्वादिष्विति पदत्वात् नच भत्वं यस्येति लोपस्य स्थानिवद्भावात् नचपदत्वेप्येवं तस्यहि विधिना सह कार्यकालत्तया पूर्वत्रासि
तृ निषेधादिति चेन्न पदसंज्ञायां यथोद्देशाश्रयणात् अत एव रामस्त्रौ इत्यवस्थायां पदत्वे वत्वस्यादेरिव स्थानिवद्भावेन रामौ इत्यादेः पदत्वं अन्यथा उभयत आ
श्रयेः तवद्भावप्रतिषेधात्पदत्वं दुर्लभं स्यादिति दिक् महिषाच्चेति एतच्च सूत्रे गौणवसूचितं तथाहि प्रकृतस्य मतुप एव हि डित्वमिति दिश्यतां प्रक्रियालाघवाय
ड्वतुवेव वाक्रियतां एवं अनुवचनं अन्यतो विधानार्थं शिखाया वलच् दंतशिखात्संज्ञायामिति पंचमेवस्यते तदादेशेपि शिखावल इति रूपस्य सिद्धये इदं तु निर्दे
शार्थं देशे तन्नाम्न्येवावाधनार्थं च कुचैर्भ्यादि नडादयंतर्गणसूत्रद्वयं सौत्रः प्रष्ठ्या लुक् एवं तक्षन्नित्यत्रापि इति चातुरर्थिकाः शेषे लक्षणं चेति स्यादेतत् लक्षणं भ
तावदर्थे चाक्षुषादीनां तस्येदमिति सूत्रेणादार्ष दादीनां तु संस्कृतं भक्षा इत्यनेन सिद्धत्वात् तथा अधिकारोपिव्यर्थः तं विनापि घादीनां घुघुलंतानां अपसादिं च

र्थ्यपर्यंतेषु अप्रवृत्तेर्ज्ञापकत्वेनैव सुसाधत्वात् तथाहि आर्द्रका शालेयादयो वृद्धाः तेषां वृद्धाच्छ इत्येव सिद्धे उत्करादिषु पाठो ज्ञापयति नेतः प्राक् घादयः सुरिति।
गोत्रोक्षेति वुञ्विधिरपीह लिंगं अन्यथाऽस्मूहस्यापि इदमर्थांतर्भूततया गोत्रचरणाद्वुञित्येव सिद्धे किं तेन किंच अपत्याद्यर्थानामनुवृत्त्यात् तस्येदं विशेषतया वा
ऽऽदि तत्र घादयः इष्येरन् तर्हि प्राग्दीव्यतोऽण् इत्येवं राणपादिभिः सह पठ्येरन् अथोच्येत नापत्यादिव्यावृत्तये शेषाधिकारः किंतु अर्थसाकल्यार्थः अन्यथा संनिहिते
ऽऽतार्थ एव घादयः स्युः भवादौ तु प्राग्दीव्यत इति विशिष्टावधिपरिच्छिन्नेष्वर्थेषु विधीयमानाः अणादय एव स्युर्न घादयः शेषशब्दात्तु सर्वेषु घादयः सिध्यन्तीति
मेवं ज्ञाताधिकारेणं तस्मात् षष्टिगित्यादिभिः सह घादिषु वक्तव्येषु ततः प्राक्पाठसामर्थ्यादेवार्थसाकल्यलाभात् तस्माद् व्यर्थमिदमिति चेत् अत्रोच्यते अधि
कारस्तावदावश्यकः शैषिकात् सरूपः शैषिको नेति वक्ष्यमाणस्यार्थस्य विषयलाभो यथा स्यात् शैषिकत्वप्रयुक्तं कार्यं शेषं ध्वनयितुं क्रियमाणः शेषाधिकार
एवं ज्ञापयति शैषिकान्मतुवर्थीयाच्छैषिको मतुवर्थिक इत्यादि एष च श्लोकः सन्निधौ च भाष्ये पठितः इह तु सन्नेते उपन्यस्त इति तत्रैव व्याख्यास्यते एवं स्थि
ते विधायकत्वमपि तस्य सुवचमिति नातीव तत्र निर्भरः कार्यः विगृहीतादपीत्यादि वाचनिकमेवेदं सूत्रे तु संघातस्यैव ग्रहणं अन्यथा वैषम्यात् संख्यातानु
देशो न स्यात् कृत्स्निनात्त्यप् इति इह बहुव्रीहिरपि सुवचः अत एव निपातनात् कोः कद्भावः तेन कद्भावेत्रावुपसंख्यानमिति न कर्तव्यं दक्षिणापश्चात्पुर
स इति कथं तर्हि पश्चात्तनैः कश्चननुद्यमानः इति श्रीहर्षः नच दिग्देशवाचिनि पश्चाच्छब्दे सावकाशं त्यकं कालवाचकात् ट्युट्युलौ बाधेते परत्वादिति वाच्यं।
अग्रादिपश्चाड्डिमजिति डिमचा ट्युट्युलोर्बाधस्य दुर्वारत्वात् सत्यं पश्चात्तन्वं तीति पश्चात्तना इति कथंचिद्योज्यं कापिश्यां ष्फक् कापिशीशब्दात् ष्फक् स्यात् षो
ङीषर्थः तदाह कापिशायनीद्राक्षेति द्युप्रागपागुदक् अपाचीदक्षिणादिक् द्वितीयो वर्णः पकारेण तु दंतोष्ठ्यः यदिंद्रः प्रागपागुदक् इत्यादौ तथादर्शनात् प्रागा
दयो द्विविधाः अव्ययाश्च अनव्ययाश्च अस्तातिसंता अव्ययाः अन्ये तु न उभयेपीह गृह्यंते अविशेषात् अथ कथं सस्काराः प्रातनाइवेति कालवाचिनो व्यया
सरत्वात् ट्युट्युलाविति बोध्यं औत्तराह इति यदि तु उत्तरादाहि प्रत्यये ततोऽण् क्रियते तदा औत्तराहशब्दो नोदात्तः स्त्रियां ङीप् बोध्यः आहञ् तस्य आद्युदात्तः।

...णपूर्वेतिविशेषःवक्ष्यतइतिश्वसक्तः सूत्रेसत्रमद्रेभ्योञ् वहुवचननिर्देशाज्जनपदवाचीगृह्यतेनतुमद्रपर्यायः दिशोमद्राणामिति दिग्वाचककादुत्तरस्य
...पदवाचिनः मद्रभिन्नस्याचामादेरवोवृद्धिः स्यात्ञितिणितिकितिचतद्धितेइत्यर्थः पौर्वमद्रइति मद्रैकदेशेम द्र शब्दस्यवृत्तौदिक्श...नसमान
...नात्तद्धितार्थेतिसमासः उदीच्यग्रामात् दिग्ग्रहणंनिवृत्तं शैवपुरमितिप्रस्य पुरवहांताचेतिवुञ्भवति वृद्धादितिहितत्रानुवर्ततेभवृत्तश्छ कृच्छ सो
जस्त्वमिति सितिचेतिपदत्वादितिभावः एतदर्थमेवहिछसः सकारः अतएवनायंशकारादिः तथाहिसतिसित्वंव्यर्थंस्यात् काश्यादिभ्यष्ठञ्ञिठौ इकार उच्चा
रणार्थइति ञकारएवोभयत्राप्यनुवंधः तस्यविपर्यासकृत्स्त्रीप्रत्ययविशेषार्थइतिभावः आपदादीति अंतर्गणसूत्रमिदं धन्वयोपधाद्वुञ् धन्वेतिनस्वरूप
ग्रहणंवृद्धत्वासंभवात्तदुत्याशयेनाह धन्वविशेषेतिएरावतंधन्वेतियद्यपिसमानौमरु धन्वानौइत्यमरेणपुंस्त्वमुक्तंतथापिनपुंसकोपिधन्वशब्दोस्ति आष्टकं
नामधन्वेतिभाष्येदृष्टत्वात् गहादिभ्यश्चएभ्योदेशवाचिभ्यश्छः स्यात् पूर्वपक्षादिशब्देभ्यस्तुदेशचोदिताभावे पिपाठसामर्थ्याच्छः मुखपार्श्वेति अलो
त्यस्येतिसकारस्यलोपः यस्येतिचेत्सकारस्य अव्ययानांभमात्रेटिलोपस्यानित्यत्वंज्ञापयितुंलोपवचनं मुखतीयइति मुखतोजातादिः आद्यादित्वात्तसीततश्छ
स्वकीयमिति गहादेराकृतिगणत्वाच्छः अदेशवाचित्वेपिपूर्वपक्षादिवत् तथातु व्योगाम्न्यानादित्यत्रनहिस्वकीयस्येवमव्यानमितिन्यासः केवलात्स्वश
ब्दात्तु अणौ मैवं एतच्चहारादीनांचेतिसूत्रेआकरेउदाहृतं स्वीयमितितुप्राकृक्रीताच्छः वोद्धाणुस्यपरजन देवराज्ञोकुक्रेतिसूत्रयंति तत्रराज्ञोनलोपेयत्नः क
तिव्यःपर्वताच्च कथंतर्हितत्रजंन्यंरघोर्घोरंपार्वतीयैर्गणैरभूदितिउच्यते पर्वतीयस्यराज्ञः इमेइत्यर्थेछतादणशेषिकाच्छैषिकोनेतिनिषेधस्तुनास्ति अस
प्रत्वात् युष्मदस्मदोः इहयोगोविभज्यतेतेन यथासंख्यं न तथाहि युष्मदस्मदोरन्यतरस्यां आभ्यांछोवा त्यदादीनिचेतिवृद्धत्वान्नित्यंप्राप्तेविकल्पोयं ततः खञ्
चेच एवमुत्तरसूत्रेपियोगविभागोवोध्यः तेनादेशयोः खञणाभ्यांयथासंख्यं न तस्मिन्युष्माकास्माकौतस्मिन्नणिचेत्यर्थः ततः अणिच अतएवखञणोरिति
णोक्तंतवकममकावेकवचने अत्रापिखञिअणिचेतिवाक्यभेदेनसंवध्यते अतोयथासंख्यंनेतिदिक् असांप्रतिके संप्रतीत्यव्ययंप्रज्ञादेपठ्यतेतत्र्चमा

भ॰
८६

प्यवर्त्तते तथा च प्रयुज्यते अनाशश्च तु रात्रोऽतिरिक्तः षड्रात्रः सवा एष संप्रतियज्ञोयं संवत्सर इति नन्यूनो नातिरिक्तः सम इत्यर्थः इदानीमित्यर्थेपि एतर्हि संप्रतीदानीमित्यमु
र्हत ततो ग्रहणं मतं ततो विनयादेराकृतिगणत्वात् स्वार्थे ठगिति न्यासकारः द्वीपादनुसमुद्रं यञ् समुद्रं समया अनुसमुद्रं अनुर्यत्समयेति अव्ययीभावः सप्तम्यंतं चेदं विध
मानाक्रियाद्वारकं द्वीपविशेषणमित्याह समुद्रसमीपे यो द्वीप इति कच्छाद्यणो मनुष्यवुञश्चापवादोयं अनुसमुद्रं किं द्वैपमन्यत् द्वैपको मनुष्यः कच्छादिभ्यश्च मनु
ष्यतत्स्थयोर्वुञ् इति सूत्राभ्यां यथायथं अणवुञ्चौ कालाट्ठञ् इह कालविशेषवाचिनामेव ग्रहणं न तु स्वरूपस्य पर्यायाणां चेति वृत्तिन्यासपदमंजर्यादिषु स्थितं
तन्मते कालिकी व्याप्तिः कालिकः संबंध इत्यादिप्रयोगा विरुध्यंते किंच विशेषा एव गृह्यंत इति तन्निर्मूलं मुनित्रयानुक्तत्वात् यत्तु वदंति स्वरूपं पर्यायश्चेनेह गृ
ह्यते ज्ञापकात् तथा हि संधिवेलेति सूत्रेण संधिवेलात्रयोदशीप्रभृतिभ्योऽनड्डुभ्योपि अण् विधीयते तच्च ढञ्बाधनार्थं तदेवोक्तार्थज्ञापकमिति तच्चिंत्यं इदं
हि विशेषग्रहणे ज्ञापकं न तु तन्मात्रग्रहणे तथा च नक्षत्रेभ्यो इति सूत्रे सापंप्रातिकः पौनःपुनिकः इति भाष्यं व्याचक्षाणः कैयट आह यथा कथंचित्कालशब्द
ठञिति तथा च नदीभिश्चेति सूत्रे नदीवाचकत्वाविशेषात्स्वरूपस्यापि ग्रहणमुक्तं तथेहाप्युचितं तदेतदाह कालवाचिभ्य इति एतेनाकालिकेभ्य इति जोमिनि
सूत्रेऽकालिकेति ह्रस्वपाठपक्षे कालाट्ठञिति कालिकमिति भट्टवार्त्तिकमपि व्याख्यातं वृत्त्यादिमते तु कालात्कालशब्दाट्ठञिति कालाद्यत्सकृष्टेढञिति पांचमि
कसूत्रेणैवं परत्वात्पाकुकविकृतिरिव मंतव्या व्याख्येयं स्यात् इह गौणमुख्यन्यायो नाश्रीयते तेन कदंबपुष्पसाहचर्यात्कदंबपुष्पः कालः व्रीहिपललसाह
चर्याद्व्रीहिपललः तत्र भवं कादंबपुष्पिकं व्रैहिपललिकमित्याकरः अत्र प्रमाणं तु संधिवेलादिति सूत्रेऽनेन कालग्रहणेन नक्षत्राणां विशेषणमिष्यते नु
पुष्यादिशब्दानां कालो मुख्योऽर्थः लुबविशेष इति लुप्त्याद्नादिति चेत् मैवं पुष्यादिसमयस्थेन चंद्रमसा योगात्तत्रसितलक्षणया हि कालेवृत्तिः सैव लुब्ग्रहणा
अन्वाख्यायते पौषादिनिष्टत्यर्थं न त्वेतावता कालो मुख्योऽर्थः अनन्यलभ्यस्यैव शब्दार्थत्वादिति दिक् एवं स्थिते कालवाचिभ्य इति मूलस्य कालप्रतिपादके
भ्य इत्यर्थो बोध्यः श्राद्धे शरदः श्राद्धमिति कर्मनामधेयम् श्रद्धावान्पुरुषस्तु नेह गृह्यते व्याख्यानात् रूढिर्योगमपहरतीति न्यायाच्च अस्य सू इञ् वात्यादि

रम॰
८६

षमोह्यइत्यादिनास्य चपिविकल्पितःपक्षेणुत्वु लोवोध्यौ चौवत्तिकमिति नन्विहइकादेशो दुर्लभः तुटप्रत्ययभक्तत्पाठस्यादित्वाभावात् कनेठइत्यत्रा द
था नचपरत्वादिकः आगतयात्तस्य वहिरंगत्वात्प्रत्ययसन्नियोगशिष्टत्त यातुटोऽतरंगत्वात् नचसूत्रभंगेनतुक्सुकरः इसुसुक्तांतादितिकादेशप्रसंगात् मे
न्तूणादिसूत्रेवद्धचोमतुष्यनाम्नष्टज्वेतिसूत्रे चठचश्चित्वेनेकादेशोऽतरंगेभ्योवलवानितिज्ञापितत्वात् अन्यथाप्रत्ययाद्युदात्तत्वेकृतेइकादेशः स्यादितिकि
ठ चाश्चित्वेनकृतेत्विकादेशप्रत्ययस्वरंबाधितुं चित्वंपुज्यते संधिवेलातेषमितितिष्याद्भवादौप्रत्ययंजातार्थेतु अविष्टाफल्गुनीतिलुक्स्यात् प्रूर्ये तिष्येत्यत्र
तिष्यपुष्ययोर्नक्षत्राणीत्युक्तेर्यलोपः प्रावृषएण्यः ऋत्वणोपवादः प्रावृषेण्य इति प्रावृषिभावः जातेतुठञेव स्य तिरषाभ्यामितिमिद्धेप्रक्रियालाघवार्थेण्या
कारोच्चारणं किंच प्रावृषेण्यमाचक्षाणः प्रावृषेण्ः अत्रणाकारश्रवणार्थमपितत् एयंत्तात्किपृणिलोपात्त्रोपयलोपाः सर्वत्राणचतल्लोपश्चहेमनमिति न
त्वक्तिइतिटिलोपस्तुनभवतितल्लोपस्यसमुदायलोपत्वपक्षेअन्नितिप्रकृतिभावादवयवलोपत्वपक्षेत्वयस्येतिलोपेतस्याभीयत्वेनासिद्धत्वात् तस्यानिवृत्ता
चाहुः हेमंतमिति आत्वशीतकाले लोपोनतस्यसर्वत्रेतिप्रतिपदोक्तेनाणासन्नियोगशिष्टत्वात् वृत्तिकारास्तु छन्दसिढञवसंताच्च छंदसीत्येव ततः हेमंता
च्च इहसर्वत्रेऽणमपकृष्यते तेनलोकेवेदेचहैमंतिकं ततः अणचतल्लोपश्च एवंचभाषायामपिरूपत्रयमित्याहुः एतच्चभाष्यविरुद्धं भाष्येहीदंसूत्रंप्रत्या
ख्यातमतेः हैमंतपर्यायोहेमनूशब्दोप्यस्ति हेमन्हेमन्तागनीगंतिकरौतस्मादेतौहेमन्नशुष्यत इतिप्रयोगात् तत्रभाषायांहेमनहेमंतशब्दाभ्यामृ
णिहैमनंहैमंतमितिरूपद्वयं छंदसितुठञातृतीयम् नचतत्रठञास्त्रणोवाधः छंदसिसर्वेविधीनांवैकल्पिकत्वादिति तस्मात्त्रोकेरूपद्वयमेवेतितत्वं सा
चिरम् नत्वेतरंगत्वात्प्रथमंतुटि मृत्युरित्यादाविवसुशब्दस्यप्रत्ययतयाअंगसंज्ञानिमित्तयोगुणस्यविधीयमानोऽनादेशोनस्यात् नचतुगेवकार्यः तस्यपूर्वा
ततयाप्रातेर्निमित्तस्यविसर्जनीयाभावप्रसंगात् अतआहतुटआगिति इत्यादीति आदिशब्दार्थक्तघकालतनेष्विति सायंतनमिति स्यतेर्घञिसायशब्दो
द्विग्रावसानेरूढः तस्यप्रत्ययसन्नियोगेनमान्तत्वंनिपात्यते अन्यत्रत्वकारांतएवसायाह्नः आहचसंख्याविसायपूर्वस्येति भारविश्चसायमंडनमभित्वाप्य

भे० ८७

इति एतच्च वार्त्तिकमतम् आह हि सायंचिरयोर्मकारान्तत्वं प्रत्ययसन्नियुक्तमिति भाष्ये तु सायंशब्दस्य पाठ इह सूत्रे प्रत्याख्यातः स्वरादिषु पठितात्सायमिति मं
[illegible]ादव्ययत्वेऽप्येवं प्रत्यये रूपसिद्धेः न चैवं घञन्तात्कालाट्ठञि अनिष्टरूपापत्तिः तस्य कालवाचित्वाभावादित्याहुः यद्यपि कालबोधकत्वमात्रेण लाक्षणिकं साधा
रणं ठञि विधौ गृहीतं तच्च उक्तभारविप्रयोगात् सायशब्देऽप्यस्ति तथाप्यनभिधानाट्ठञ्नेति बोध्यं एदं तत्त्वमिति प्राह्णे सोढो ऽस्य प्राह्णेतनः इत्याद्यर्थं तत्र हि
[illegible] जातो घर्थे तु घकालतनेष्विति सप्तम्या अलुक् सिद्धं चिरत्नमिति चिरशब्दस्य सूत्रे उपादानात् त्नुप् तुट् लाक[illegible]ः अग्रादीति डिमच् वा डित्वं शाक्यमकर्त्तुं तत्र
जातः ननु जातेऽर्थे घ्वणादयः सिद्धा एव चाक्षुषं रूपमित्यादि सिद्धये शेषे इति सूत्रस्य लक्षणत्वोक्तेः अधिकारत्वाच्च घादयः तस्माज्जाताद्यर्थनिर्देशो व्यर्थः।
न च जातादिष्वेवायं नियमः सुवचः चाक्षुषमित्याद्यसिद्धेः तत्रात्तेशे ते इत्यादौ तु अनभिधानादेव न भविष्यति अंगुल्या खनति वृक्षमूलादागत इत्यादौ य
था समर्थविभक्तयस्तु आक्षेपादेव लप्स्यन्ते चाक्षुषमित्यत्र तृतीया यथा तस्मात्तत्र जात इत्यादि सूत्राणि व्यर्थानीति चेत् अत्राहुः प्रावृषष्ठप् इत्यादीनपवा
दांस्तत्र तत्र विशेषे वक्तुं जातादयोऽर्थास्तावदवश्यं वक्तव्याः ते च योगविभागेन विभक्तिविशेषसमभिव्याहारेण चोक्ताः स्पष्टत्वार्थम् यानि तु निरपवादान्य
र्थदिशानीनि कृतलब्धक्रीतकुशला इत्यादीनि तानि स्पष्टत्वार्थान्येवेति पूर्वाह्णक इति विभाषा पूर्वाह्णापराह्णाभ्यामित्यस्यापवादः आर्द्रकः मूलक इति नक्षत्रा
णोपवादः प्रदोषक इति निशाप्रदोषाभ्यां चेत्यस्यापवादः अवस्कारक इति औत्सर्गिकस्याणः केचित्तु संज्ञायां शरदो वुञिति सूत्रस्थं संज्ञाग्रहणं कृतलब्धेत्यत
स्सूर्यन्तं अनुवर्त्तयन्तीति वृत्तिकाराः तेषां मते संज्ञायामेव यथायथं अणादयो घादयश्च बोध्याः अमावास्याया वा संधिवेलाद्यणोपवादः अमावस्यदन्यतरस्यामि
ति सूत्रे णामा पूर्वोऽहसेत्यर्णेति वृद्धौ पक्षे ह्रस्वो निपात्यते एकदेशविकृतस्यानन्यतया ह्रस्वपक्षेऽपि अणवुनौ स्त एव आमावस्यः अमावस्यकः केचित्तु संधिवेला
दिषु इह सूत्रे च ह्रस्वोपधमधीयते तेषां दीर्घपक्षे न स्यात् विकृतस्याप्रकृतेरग्रहणादिति न्यासकारहरदत्तादयः वस्तुतस्तु अकृतव्यूह[illegible]
णमित्याश्रित्य ह्रस्वपाठेऽपि समर्थयितुं शक्यते अच अमावास्याशब्दादकारप्रत्ययः स्यात् अयमपि प्राग्वद् भाष्यं बोध्यः तदिहामावास्यायां जातः ह्रस्वदीर्घाभ्यां म

८७

स्य॥ त्रयेणाषड्पाणिश्रविष्ठाफल्गुनी इहस्तश्वेस्वातिशब्दोह्रस्वांतइतिकैयटहरदत्तादयः माधवस्तुस्वातीतिष्येतिङीषंतंपठति तथाहि अप्यय[illegible]त्स्वावितिसूत्रेशे
[illegible]णोविप्रतिषेधनिरूपणप्रस्तावेसौवातइतिभाष्यमुपादायकैयटेनोक्तं भवार्थेऽणाजातेतुश्रविष्ठेत्यादिनालुक्स्यादितिसंधिवेलादिसूत्रेहरदत्तेनाप्ये[illegible]
[illegible]चन्द्रादिकाणादितिङीषं तात्स्वातीशब्दाज्जातार्थेऽणःश्रवणमस्त्वितिवाच्यं लिंगविशिष्टपरिभाषयालुकोदुर्वारत्वादितिभावः माधवस्तुजातार्थे पि
[illegible]षन्तस्यसौवातइतिरूपमाह लिङ्गविशिष्टग्रहणेकेवलस्याग्रहणात् एतच्चातसातसगमनइत्यत्रधातुवृत्तौस्पष्टम् श्रविष्ठास्विति श्रविष्ठाधनिष्ठा
इत्याद्येति आदिशब्दादनुराधास्वातिःतिष्यःपुनर्वसुःहस्तःविशाखःआषाढःबहुलःकृत्तिकापर्यायस्यबहुलाशब्दस्यसमाहारद्वंद्वेनपुंसकह्रस्वत्वेनसू
त्रेनिर्देशः उपसंख्यानमितिप्रकरणात्लुक्इतिबोध्यंस्थानांतेति गोशालशब्दस्यविभाषासेनेतिनपुंसकस्यैवसूत्रेनिर्देशइतिस्पष्टं तत्साहचर्यात्खरशाले
प्येवमेव नचैवंस्त्रीत्वपक्षेलुङ्नेतिभ्रमितव्यं लिंगविशिष्टपरिभाषयातत्रापिलुक्सिद्धेः प्रत्यपिटावेत्योःपाठेपिनक्षतिःएकदेशविकृतन्यायेनक्लीवापि
लुक्सिद्धेः तथापिलाघवार्थंह्रस्वपाठइतिहरदत्तःवत्सशालइति वत्सशालायामित्यपिबोध्यं इत्यादीति आदिशब्दादभिजित् आभिजितःअश्वयुक्
आश्वयुजः [illegible]तत्स्थयद्यपिकृतक्रीतत्वेजातत्वस्यत्वयोर्व्याप्येतथापिदृष्टगुपादानंकृतत्वक्रीतत्वप्रकारकेपिबोधेउद्देश्यविशेषिकाःमाधवइतियोधपि
तं[illegible]जातेलुक्भाजामपिकृतेलुङ्नेतिबोध्यंप्रायभवःनचतत्रभवइत्यनेनगतार्थताप्रायभवस्यभवस्यचविशिष्टाविशिष्टत्वाभ्यांभेदात् उपजान्वा
दयःसामीप्ये[illegible]अव्ययीभावाःतेषांसमाहारद्वंद्वेसौत्रंपुंस्त्वंसंभूतेइहतंत्राद्युत्त्यादिनाऽवल्कप्रिणाघेयस्याधारस्यपरिमाणानातिरेकश्चैवसंभवेद्द्वयमपिगृह्यते हे
[illegible]इतिलक्ष्मेसंभाव्यतेतत्परिमाणान्नातिरिच्यतेघायःसेनादिःसएवमुच्यतेकोशाड्ढञ्कौशेयमितिह्रेयंकोशेसंभवत्तसत्कार्यवादाश्रयणात् मतांतरेणानु
विकारप्रकरणेऽणापाढञितिसस्थानांतरंकोशाच्चेतिपाठ्यम् तथाचवार्त्तिकम् विकारेकोशाड्ढञ्संभूतेह्यर्थोनुपपत्तिरिति उभेच योगविभागउत्तरार्थः आश्व
[illegible]त्यवुज[illegible]र्थेठञोपवादःञकारःस्वरार्थः उत्तरत्रवृद्धञर्थश्चदेयमृणेऋणेकिंमासेदेयाभिक्षा तत्रभवः कालादितिनिवृत्तम् कालसंबद्धस्यतत्रेत्यस्यनिवृत्तौ

धपुनस्तत्र ग्रहणात् नच पूर्वसूत्रस्थस्य तदित्यस्यानुवृत्तयेतत्र ग्रहणमिति वाच्यम् तदस्येति सूत्रस्थेतउत्तरत्रापिसुपठत्वात् दिगादिभ्योयत् दिशवर्ग पूगपक्ष
धान्य·मिथ्य·मेधा·अंतर·पथिन्·रहस्·अलीक·उखा·साक्षिन्·आदि·अंत·मुख·जघन·मेघ·यूथः·उदकात्संज्ञायां·न्याय·वंश·अनुवंश·वेश·काल·आका
शादिगादिः·मुखजघनशब्दयोरिहपाठःअशरीरावयवार्थःसेनायाःमुखेजघनेचभवंमुख्यंजघन्यंइतिकुक्षिइतिश्चमेदिकारःशरीरावयवविशेषश्चतत्र
भवंदात्तेयम् कुक्षिशब्दोधूमादिः ततोधूमादिभ्यश्चेतिवुञिप्राप्तेऽनेनठञ् कलशिघटइति तथाच दंडाहतंकालशेयमरिष्टमपिगोरसइत्यमरव्याख्यायां
मथनेपात्रेकलशिरित्युक्तंकलशिमुदधिगुर्वींवल्लवालोडयंतिइतिमाघःवस्तिर्नाभेरधोद्वयोरित्यमरःतत्रभवंवास्तेयम् अस्तीतितिङंतप्रतिरूपकोनिपा
तःसचतिङंतेनतुल्यमानार्थोभिन्नार्थश्च आद्योयथाअस्तिक्षीरागौःद्वितीयोयथा अस्तिमान्धनवानित्यर्थः तदिहाविशेषात् द्वयोरपिग्रहणम् आस्तेयमि
तिन्यासकारहरदत्तौत्रिषाहेयंविषास्थ्यादीत्यमरःग्रीवाभ्योण ग्रीवाशब्दोधमनीसंघातेवर्त्तते उद्भूतावयवभेदत्वविवक्षयासूत्रेबहुवचनम् तिरोहितावयव
भेदविवक्षायांतुएकवचनांतादपि अण्ढ्ञौस्तएवगंभीराञ्ञ्यःपंचजनादुपसंख्यानं पांचजन्यःपरिमुखादिभ्यएवेति दिगादिगणानंतरंपरिमुखादिगणः
पठ्यते तत्सामर्थ्यादिहसूत्रेऽव्ययीभावपदंतन्मात्रपरमितिनिर्णीयते नहिपरिमुखादीनांकार्यांतरंविहितमस्तियेनगणपाठश्चरितार्थःस्यात् परिमुखादिभ्य
इत्येवनसूत्रितं बहुव्रीहितत्पुरुषयोरपिप्रसंगात् अव्ययीभाव ग्रहणस्योत्तरत्रोपयोगाच्चेतिभावःपरिमुखादिगणेप्रतिशाखशब्दोपिबोध्यः तथाच
शाखाव्याप्ताविति धातौप्रतिशाखंभवंप्रातिशाख्यम् अव्ययीभावाच्चेतिभावार्थेञ्य इतिमाधवःकर्णललाटात् अलंकारेकिं कर्णललाटम्तस्यव्याख्या इतिश
ब्दोवाक्यार्थपरामर्शाति तत्समीपेश्रूयमाणश्चकारस्तत्रभवइतिवाक्यार्थमाक्षिपतिव्याख्यातव्यग्रंथस्यनामप्रतिपादकम् तच्चशक्त्यालक्षणयावेत्यत्रनाग्र
हःस्मतत्पुरुषेतेत्याख्यानकरणेसप्तम्यंतात्तुभवार्थप्रत्ययाःस्युःयद्यपितस्येदंतत्रभवइतिसूत्राभ्यांगतार्थता तथापिठञादीनपवादानन [illegible] भवार्थे
[illegible]व्यावेवप्रसंगात्तु अणादिकंविधीयतेइतिध्येयम्व्याख्यातव्यनाम्नःकिम् पाटलिपुत्रस्यव्याख्यानासुकोशलापाटलिपुत्रेहितया व्याख्यायते इत्युक्तसं

...शष्टमिति नत्विदं व्याख्यातव्यं नाम ग्रंथेष्वेव व्याख्येयत्वस्य सुप्रसिद्धत्वात् नाम ग्रहणस्य च प्रसिद्ध्युपसंग्रहार्थत्वात् वह्वचोंतोदात्ताट्ठञ् अणोपवादः
...कं ह्यच्ष्टकं वक्ष्यति एकाचु मत्युदाहार्यः सौपम् अंतोदात्तात् किम् संहितायाः सांहितम् गतिस्वरेणाद्युदात्तोयम् पौरोडाश षित्वान्ङीष् पौरो...
...राडाशिकी दाशृ दाने कर्मणि घञ् इहैव निपातनात् दृस्यडत्वं छंदसो यदणौ ह्यञ् लक्षणस्य ठकोपवादः छंदस्यः छान्दसः इह अर्थयोः प्रत्ययाभ्यां यथा...
अस्वरितत्वात् चातुर्होतृक इति चतुर्होतेति पृथिवी होता द्यौरध्वर्युरित्यादि मंत्रस्य नामधेयं आर्चिक इति आदिशब्दात् प्राथमिकः आध्वरिकः पौरश्चरणिक...
नामाख्यातग्रहणं संघातविगृहीतार्थमिति वार्तिकं तत्र विगृहीतग्रहणमाख्यातार्थं नामशब्दात्तु ग्रहणादेव सिद्धं नामिकः आख्यातिकः नामाख्यातिकः अण...
यनादिभ्यः ढञादेरिति आदिशब्दात् ऋक्छयोः आर्गयन इति अयनशब्दो भावसाधनः तेन समासेऽनो भावकर्मवचन इत्यंतोदात्तः अभेदोपचाराद् ग्रंथेवृत्तिः
ठञ् प्राप्तः औपनिषद इत्यत्राप्येवम् वि[illegible]न्यायशिक्षाशब्देभ्यो ह्यच्छक् प्राप्तः व्याकरणशब्दात्तु [illegible] ठगायस्थानः स्वामिग्राह्यो भागः स यस्मिन्नुत्पद्य...
तदायस्थानं वहुवचननिर्देशः स्वरूपग्रहणनिरासार्थः वृद्धाच्छं परत्वादयं वाधते आपणिकः आकरिकः विद्यायोनि विद्यायोनिकृतः संवंधो येषां तेभ्यो वु...
ञ् स्यादणोपवादः छं तु परत्वाद्वाधते आचार्यकः मातामहकः मातुलकः ऋतष्ठञ् विद्यायोनिसंवंधेभ्य इत्येव तदाह वुञोपवाद इति उःकञिति वक्तव्ये
तत्प्रकरणे ठञ् ग्रहणं च किं स प्रयोजनमिति प्राचः अत्रेयं चिंता पैतृकी विधेयस्त्र ङीवर्थं ठञ् न च रिद्धेति स त्रिकञ् ग्रहणेन सिद्धमिति वाच्यं यादृशी स्याद्यसि
द्धः सदनुवंधकग्रहणेऽतदनुवंधकस्याग्रहणात् गोत्रादंकवत् अपत्यप्रत्ययांतादंकवत्प्रत्ययाः स्युः अंके दृष्टस्य सर्वस्यायमतिदेशो ननु साक्षाद्विहि तस्ये
...स्याग्रहः तेन गोत्रचरणाद्वुञिति वुञपि लभ्यते सहितस्येदमिति सामान्येन विधीयमानोऽपि अज्यत्रिजंतादन्यत्राकेपि दृष्टः वैदमित्यादि संघाके सुत्रे रत्रा॥
धंतादिहापि पाणा औपगवकं इति गोत्रचरणादिति वुञ् हेतुमनुष्येभ्यः मनुष्यग्रहणं महेत्वर्थं समरूप्यमिति विभाषा गुणे स्त्रत्रविभाषेति योगविभागाद्गुणाव
चना दपि पंचमी मनुष्येभ्य इति वहुवचनं स्वरूपविधिनिरासार्थं मयट्च योगविभागो यथासंख्यनिरासार्थः रोङीवर्थः हैमवतो गंगेति हिमवतः प्रकाशते तत्र प्रभ...
मेघ्य इति यावत् विदूराञ्ज्यः अणोपवादः वैदूर्य इति दंत्य मध्योपम् शाद्वलवत् ननु नड्वलवन्मूर्द्धन्यमध्यः नन्वर्था संगतिः वालवायाद्धि असौ प्रभवति विदूरे तु सं।

ऽस्तिकृत्ये सत्यम् अत एव समाहितं भाष्ये वालवायो विदूरश्चेति वालवायशब्दः प्रत्ययं लभते विदूरादेशं च सूत्रे पठितेनादेशेनानुरूपः स्थानी आक्षिप्यते यद्वन्निसाद्य॥
द्विवेति। भावे [illegible] तिपथि दूतयोः द्वितीयान्तादन्तरि प्रत्ययः स्यात् सचेत्स्याद्दूतो वेत्यर्थः तत्र साध्वसिश्छिनत्ति काष्ठानि पचंतीत्यादाविव करणस्य स्वातंत्र्य
विवक्षायां [illegible]णः कर्त्ता [illegible] कान्यकुब्जद्वारमिति स्रुघ्नाभिमुखनिष्क्रमणे करणीभूतमिति फलितोऽर्थः पूर्ववत्करणस्य कर्तृत्वे प्रत्ययः तदिस्यैवेति अधिकस्ये
[illegible] पेक्षं [illegible] द्वितीयेयम् शारीरकीयइति कुलक्षणोऽस्य सूत्रसंदर्भः दृष्टान्तः शिष्यकंद अत्र वार्त्तिकं द्वंद्वे देवासुरादिभ्यः प्रतिषेधः देवासुरम् राक्षोऽसुरम् सोऽस्य
निवासः नन्वस्येति [illegible] योगे कर्त्तरि षष्ठी तथाच विशेषणविशेष्यभावव्यत्यासात्तु घ्नाधिकरणकवासकर्तृहवृत्त्यर्थः [illegible] चातत्रभवइत्येव सिद्धमिति चेत्सत्यं वास
स्य देशेन [illegible] कर्तृकत्वेन प्रसिद्धत्वात्स्वकारकतो भेदः वसंति हि प्रेमिणा गुणानवस्तुनीत्यादौ तूपचारो वोध्यः अभिजनश्च अभिजायते एभ्यइति व्युत्पत्त्याभिज
नाः पित्रादयः पूर्वसूत्रादिह निवासइत्यनुवर्त्तते तत्सामानाधिकरण्यादभिजनशब्दस्य तत्संबंधिनि लक्षणा एवं स्थिते फलितमाह यत्रपूर्वैरिति वासुदेवार्जुनाभ्यां
भ्यांवुन् छाणोरपवादः अल्पाच्तरमजाद्यदंतमिति सूत्राभ्यामर्जुनस्य पूर्वनिपाते प्राप्ते तमकुर्वन्ज्ञापयति सर्वतोऽभ्यर्हितं पूर्वमिति स्यादेतत् वसुदेवस्यापत्यं वा
सुदेवः ऋष्यंधकेत्यण् तत्र गोत्रक्षत्रियाख्येभ्यो वहुलं वुञ् इत्युत्तर सूत्रेणावुञेवास्तु किमनेन वुना न ह्यत्र वृद्धौ विशेषः प्रागेव वृद्धत्वात् नच वृद्धिनिमित्तस्येति
पुंवद्भावनिषेधो दोषः वुन्यपि नकोपधायाइति निषेधस्येष्यमाणत्वात् नचाभ्यर्हितं पूर्वमित्येतज्ज्ञापनमेव फलम् तथात्वे हि पूर्वनिपातप्रकरणएवाभ्यर्हितग्रह
णमात्रं लाघवात्कुर्य्यादिति अत्र भाष्यं संज्ञैषा तत्र भगवत इति अयं भावः सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः ततोसौ वासुदेवेति विद्वद्भिः परिगीयतेइति स्मृ
तेः परमात्मेह वासुदेवः सर्वत्रासौ वसत्यंतर्यामित्वात्सर्वमत्र वसति वा सर्वस्य ब्रह्मविवर्त्तत्वात् इति वासुः वाहुलकादुण् कोकः पुराणपुरुषो नलिनेशयश्च वा
सुर्नारायणः पुनर्वसुर्विश्वरूपा इति त्रिकाण्डशेषः वासुश्चासौ देवश्चेति विग्रहः तथा च नेयं गोत्राख्या नापि क्षत्रियाख्या अतो युक्त एव वुन्विधिः तेन प्रोक्तम् [illegible]
क्तं प्रोक्तं अध्यापनेनार्थव्याख्यानेन वा प्रकाशितमित्यर्थः प्रकर्षेणेति वचनान्नेह देवदत्तेनाध्यापितं तित्तिरिवरतंतुखण्डिकोखादण् अणोपवादः कठचरकाल्लुक् [illegible]
शब्दाद्वैशंपायनांतेवासित्वात्स्मिनिः चरकादण् तयोर्लुक् कलापिनोऽण् वैशंपायनांतेवासित्वात्प्राप्तस्य णिनेरपवादः इनण्यनपत्यइति प्रकृतिभावे प्राप्ते [illegible]ह।

[illegible]गस्तिनोढिनुक् कस्ताप्यंते वामित्वाखाप्रसयणेन रपवादः पाराशर्य्यमराडुकस्तुसा णिनिरि ह संवध्यते तद्विषयते हेष्यते तदर्थे शौनकादि[illegible]सीति
[illegible]ग्रहणमनुवर्त्ये सूत्रयो श्छंदस्त्वं तु गौणपावृत्यावोध्यं भिक्षुसूत्रमिति चतुर्लक्षणीरूपं भिक्षुनटसूत्रयोः किं पाराशर्यशैलालम् कर्मंद[illegible]निः
[illegible]ऽनुवृत्त्यादिप्राग्वत् भिक्षुनटसूत्रयोः किं कार्मंदकाशीश्वंते नैकदिक् छंदसीति निवृत्तं पुनस्तेनेत्युक्तेः तस्मिश्च पूर्वोक्तविषये उपज्ञाते [illegible]ना
ज्ञातमुपज्ञातं कृते ग्रंथे तेनेत्यनुवर्त्तते तस्येदं अणादयः पंचमहोत्सर्गाः घादयश्च षष्ठ्यंतात् संबंधिनिः स्तुः अनंतरादिष्वनभिधानान्न वहेरिति तु[illegible]त
न्त्वोः सामान्यग्रहणं ढत्वादीनामसिद्धत्वादलौकिके प्रक्रियावाक्यपूर्वमिट् ततो निमित्ताभावान्न ढत्वादि इडर्थमिदमुपसंख्यानं अण् तु सिद्ध एवानूद्यते
अग्नीध इति णिदयं प्रत्ययः यत्तु पिवाऽग्नीध्रात्तवेत्यादौ आद्युदात्तं प्रयुज्यते तत् स्वार्थेऽञ् पक्षे वो द्धव्यं तथा च वार्त्तिकं आग्नीध्रसाधारणादञ् इति अग्निमिंधे
इति क्विप् आग्नीत् ऋत्विक् विशेषः त्वमग्निहतायत इत्यत्र तु छांदसं ह्रस्वत्वं वोध्यं सामिधेनीति षित्वान्ङीष् हलस्तद्धितस्येति यलोपः यया अग्निः समिध्यते सा
समित् संपदादित्वात् करणे क्विप् ततः कर्मणि षष्ठ्यंतादाधीन करणेन तद्धितोयम् रथाद्यत् अणोपवादः रैथ्याद्धर्यांगे इति वार्त्तिकमभिप्रेत्याह रथ्यं चक्रमिति
अत्रेदमवधेयं द्वयोरथयोरंगमिति विग्रहे द्विरथं रथसीतांहलेभ्यो यद्विधाविति तदंत विधेरुपसंख्यानाद्यत् द्विगोर्लुगनपत्ये इति लुक् यस्तु द्वौ रथौ वहति
स द्विरथ्यः तद्वहतीति यत् तस्य प्राग्दीव्यतीयत्वाभावान्न लुक् अत एव तद्वहतीति सूत्रे रथग्रहणं सार्थकं अन्यथा यदि स्येवरथं गद्गववोढव्यमपीष्यते किंतेने
ति. ननु द्विगोर्लुगनपत्य इत्यत्रावीत्य स्यापकर्षेण पक्षे कथमत्र यतो लुगिति चेत् सत्यं तद्वहतीत्यत्र रथग्रहणमेव ज्ञापकं एतस्य यतो हलादेरपि लुग्भवतीति
अन्यथा तत्र रथग्रहणं व्यर्थमेव स्यात् द्वंद्वाद्वुन् अणोपवादः छं तु परत्वाद्बाधते काकोलूकिकेति काकोलूकस्य वैरमित्यर्थः वुन्नंतं स्त्रियां वैरमैथुनिकादिवु
[illegible]तिस्याधिकारेऽमरः कुत्सेत्यादि कुत्सकुशिकयोर्मैथुनिका विवाहरूपः संवंध इत्यर्थः मिथुने हि दम्पतीत स्य कर्मक्रिया निष्पादनम् मनोज्ञादित्वाद्वुञ् तदं ४ ॥
धं वेदं स्त्रियत्वाभावात् संघाङ्क पूर्वैस्पञ्ञपवादः घोषेति अत एव यथासंख्यमपि न वैषम्यात् प्रकृतयस्त्रिस्रः प्रत्ययार्था विशेषणानि तु चत्वारि पारंपर्येति यथा गवाम्
[illegible]निष्कः स्वामिना गोढारासंवंधः सांकाशीति यथा विदानां विद्या यद्यपि अंकलक्षणयोः पर्यायत्वं प्रसिद्धं कलंकांकौ लांछनं च चिह्नं लक्ष्म च लक्षणमिति कोशप्रसिद्धं

म.सु.

च तथापि पृथग्ग्रहणसामर्थ्याद्विशेषपरतेति भावः णित्वं ङीबर्थम् पुंवद्भावनिषेधार्थं च वैदी विद्याय स्यवेदी विद्यः विदा नाम साधारणी या विद्या तद्रूनि स्यथ्येः छंदो
गोविध्यक सङ्घादयो निवृत्ताः स्यायो ऽयः स्यात्तस्येदमर्थे च रणाशब्देभ्यो वुञोपवादः नयातु औत्सर्गिकस्याणः धर्माम्नाययोरित्युक्ते नेह छांदोगकुलमित्यादि समाप्ताः
षिकाः तस्य विकारः घादिसंबद्धस्य तस्य ग्रहणस्य निवृत्तये पुनस्तस्येत्युक्तम् आणादयस्तु न निवर्त्तन्ते प्राग्दीव्यतः प्राग्भवनादिति विशिष्टावधिपरिच्छेदेनाधिकृत
त्वात् षष्ठ्यं तादिकारेऽणादयः स्युः तत्र प्राणिरजतादिभ्योऽञ् ओरञ् अनुदात्तादेश्च ... तयोः नित्यं वृद्धशरादिभ्यः पिष्टाच्चेत्यादिभिरपवादा वक्ष्यन्ते अतः अम
णिअंनकाणेवं आद्युदात्त ... प्रतिपदमवेक्ष्यमाणप्रत्ययं चेहोदाहरणमित्याशयेन तथैवोदाहरति आश्मइत्यादि अश्मन्भस्मन्शब्दौ मनिन्प्रत्ययान्तौ मृदस्तिकन्।
त्रयोऽपि नित्स्वरेणाद्युदात्ताः प्राचीनस्य तस्येत्यस्य निवृत्तत्वादधिकारोक्ताष्ठगादयोऽपि नेह हालः सैरः मायूर इति प्राणिरजतादिभ्योऽञित्यञ् अनुदात्तादेरञः सिद्ध
त्वादुदात्ताद्यर्थं ...मयड्बाधनार्थं चावश्यकमिदं परत्वादनुदात्तादिष्वपि प्रवर्त्तते मौर्वमिति मूर्वाशब्दस्तृणधान्यानां च द्व्यषामित्याद्युदात्तः पिप्पलशब्दोऽप्ये
वम् लघावन्ते द्वयोश्चेत्युक्तेः प्रयुज्यते च तथा तयोरन्यः पिप्पलंस्याद्धितिमंत्रे त्रपुजतुनोः अणस्यादिति बिल्वादिभ्योऽणित्यतोऽनुवृत्तेः ओरञ् इत्यस्यापवादोऽयं
षित्वान्ङीषिति माधवस्तु टित्वान्ङीबित्याह तस्मादिह शामीलीशब्दस्यादिरंतो वा उदात्त इति कश्चित्तद्देलक्ष्यं दृष्ट्वा प्रत्ययस्य षित्वटित्व पाठयोः साध्वसाधु
विवेको बहुश्रुतैः कार्य्यः आश्मनमिति विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वाच्य इति वचनादश्ममेदशब्दे मेदशब्दस्य लोपेऽश्मन्निति नांतमवशिष्यते तथा
च कल्माषांघ्रेराज्ञो भार्यायां मदयंत्यां वसिष्ठेनोत्पादितः क्षेत्रजः सुतोऽश्मको नाम तत्र संज्ञात्वद्योतकस्य कप्रत्ययस्याभावेऽश्मन्निति नांतं नाम भवति तस्यापत्ये आश्मनं विका
रेऽपि आश्मनमित्येव भवति न चाश्मनो विकार इति टिलोपः स्यादिति वाच्यं प्रसिद्धतरत्वेन पाषाणवाचकस्यैव तत्र गृहीतुमुचितत्वात् वस्तुतस्तु तस्येदमिति सामान्यवि
वक्षायां भविष्यति पैष्टी सुरेतिवत् मौद्ग इति मुद्गशब्दो घृतादित्वादंतोदात्तः कार्पासमिति कृञः पास इति पासप्रत्यये सार्वधातुकार्द्धधातुकयोरिति गुणे रपरे कृते कर्पासीशब्दो
जातिलक्षणङीषंतः ताभ्यामनुदात्तादेश्चेत्यञं बाधित्वा बिल्वादिभ्योऽण् भाषायां किम् त्वादिरोपूप इति वृत्तिकारः यद्यपि मयट् वैकल्पिकत्वादिति ...मिदं तथापि वेदे बह्वृचः
परस्य मयटोऽर्थात् रपरत्वमेवेति तात्पर्यग्रहार्थमेवेदं ननु द्व्यचश्छंदसीति सूत्रे द्व्यच एवेति नियमार्थं सद्धक्तार्थे नात्पर्यमाह भविष्यतीति चेत् सत्यम् विपरीतनियमशंका

एम.

नित्य[illegible] भाषायां ग्रहणमितितत्त्वम् अधिकारादेव सिद्धे एतयोरिति वचनं इतउत्तरेषां प्राणिरजतादिभ्यो ञित्येवमादीनामपि विषयेपक्षे प्रवृत्त्यर्थं कृपा[illegible]
इह विकारेणावयवेनैकैकेन मद्दाभक्षाच्छादनयोरिति संबध्यते समासनिर्देशात् अतोयथासंख्यं न स्यादेतत् उत्तरमीमांसायामानंदमयाधिकरणे भाष्य।
कारैरन्योंतर आत्मानंदमय इतिश्रुतौ आनंदमय इति विकारे मयडित्युक्तम् तत्कथं संगच्छतां भाषायामिति सूत्रयता पाणिनिना सह विरोधात् किंच विकारशब्द
दिति चेन्न प्राचुर्यादिति सूत्रयतो व्यासस्यापि आनंदशब्दस्य वृद्ध[?]तया छंदस्यपि विकारे मयडिति लभ्यत इत्येवाशय उचितः एवं स्थितेऽन्नमयादिप्रायपाठ्यं किं वित्कारः
उभयसंभव एव तस्य निर्णायकत्वात् तथा च प्राचुर्ये मयटं वदतां वृत्तिकृतामेव व्याख्यानं प्रबलं न तु भाष्यकारोक्तमिति चेत् अत्रोच्यते श्रीग्रामण्यां छंदसीतिसूत्रे
अपि छंदसीत्यंश स्तावद्भगवता भाष्यकारेण प्रत्याख्यातः छंदसि सकलविकल्पानां व्यवस्थितत्वात् अत एव उर्क्कृत नित्यं छंदसि वक्त्रादिभ्य एव नित्यं छंदसी।
त्यादयोऽपि वैयाकरणैरित्थमेव प्रत्याख्याताः न्यायसाम्यात् एवं स्थिते तात्पर्यग्रहस्यन्यायानुसंधानेनैव सिद्धेस्तदर्थं पाणिनि सूत्रारंभादर्शनाच्चेह भाषायामिति त्य
ज्यम् तथा च ह्यचश्छंदसि नोत्वद्वर्ध्ये विल्वादिति द्विसूत्र्यपित्याज्या सति हि भाषाग्रहणे शरमयं वर्हिरित्यादेः सिद्ध्यर्थं द्व्यच इत्यारब्धं मौंजं शिक्यम् वार्ध चर्म वै
ल्वोयूप इत्यादौ द्व्यचइति प्राप्तं प्रतिषेद्धुं नोत्वदिति सूत्रमारब्धं उक्तरीत्या तु सर्वमिदं निष्फलं भाष्यकारैरेव प्रत्याख्यातप्रायं च एषैव च वेदांत सूत्रवृत्तिकृतामपि ग
तिः तैरपि आनंदमयादितरेषु विकारे मयटः स्वीकारात् अन्नमयप्राणमयमनोमयेषु द्व्यच्त्वान्मयट्संभवेऽपि विज्ञानमयशब्दे विकारे मयडर्थं उक्तप्रकारस्येवा
नुसर्त्तव्यत्वात् तथा चानंदमयेऽपि विकारार्थत्वेनैवोचिता एकरूप्यात् यद्वा प्राचुर्ये मयटप्रकृत्यर्थविरोधिनो लेशतोऽनुवृत्तिलाभात्प्रकृते विकारार्थः ॥ ० ॥
नुर्ष्य[?]वस्यतीत्याशयः अथवा नित्यं वृद्ध्ये[?]त्यत्र भाषाग्रहणं नानुवर्तते अनुवृत्तावपि भाषायां नित्यं अन्यत्र तु क्वाचित्क इत्याश्रित्य समयट् सुसाधः अत एव शरादिषु
मृत् शब्द पाठोप्यर्थवान् मो षु वरुण मृन्मयं गृहं राजन्नहं गमं इति मंत्रे दर्शनात् न च भाषार्थ एव मृच्छब्दस्य पाठ इति वाच्यं आरंभसामर्थ्यादेव सिद्धे नित्यग्रहणं।
योगविभागेनान्यत्रापि क्वचि[illegible]कार्थे तेनैकाचो नित्यमित्युक्त्वा वाङ्मयं त्वङ्मयमित्यादेराकरे उदाहृतत्वात् एवं च वदतां मृच्छब्दपाठवैयर्थ्यस्य स्पष्टत्वात् यद्वा
हेतुमनुष्येभ्य इत्यनुवर्त्तमाने मयट् इति सूत्रेण आगतार्थे मयट् विकार इति त्वार्थिकार्थकथनमेव सर्वथापि शंकरभगवत्पादोक्तिरनवद्यैवेति दिक् गोष्वपुरीषे।

पुरीषंनविकारोनाप्यवयवः त[illegible]त्तस्येदमित्यर्थेयंप्रत्ययः प्रकरणाल्लिंगस्यंवक्षीयस्त्वात् गोपयसोर्यत् यद्यपिसर्वत्रगोरजादिप्रसंगेयदुक्तंतथापिमयड्वेना।
योरितिपक्षेप्राप्तंमयटंवाधि[illegible]तुं रयंयद्विधिः द्रोश्च ओरञः एकाचोनित्यमितिमयटश्चापवादोयम् द्रुमयमिति द्रोर्विकारभूतंप्रस्थादिपरिमाणमित्यर्थः।
आमलकमिति फलितस्यवृक्षस्यफलमवयवोविकारश्चतेनान्यतरस्मिन्प्रत्ययः कंसीयपरशव्ययोःपरशव्यशब्दस्यानुदात्तादित्वादञिसिद्धेलुगर्थंवचनम्
नचयस्येतिलोपेकृतेहलस्तद्धितस्येतियलोपेनसिद्धमितिवाच्यं इतीत्यनुवृत्ते[illegible]दीव्यतीयाःसमाप्ताः आर्हात्प्रभृतिभ्यइति उपसंख्यानमित्यनुषज्यते।
आर्हेतिप्रदेएकदेशस्यप्रकृतिभागस्यउच्चारणार्थेनइकारेण आर्हावितिनिर्देशःप्रभृतमार्हेतिक्रियाविशेषणादृक्तारिप्रत्ययः अभ्रेति अभ्रिःस्त्रीकाष्ठकु
द्दालइत्यमरः दीव्यतीत्यादौकालपुरुषसंख्याअविवक्षिताः अदेवीत्देविष्यतिवाआक्षिकः एवंदेविष्यसिदेविष्यामिवादीव्यंतिदीव्यथदीव्यामोवाआक्षिकाः कारकंतुविवक्षितमेव अतएव।
जयतिजितमितिकृर्तकर्मणोःपृथगुपादानम् संस्कृतम् योगविभागउत्तरार्थः कुलत्थकोपधादण् कुलत्थैःसंस्कृतंकौलत्थम् वाहृकेतिसूत्रेषकारःसंहि
तिकोनत्वनुबंधइतितेनङीषृतथाचआकर्षात्ष्ठलादेरित्यादिश्लोकवार्त्तिकंप्रकरणांतरेवक्ष्यते निकषोपलइतिसुवर्णपरीक्षार्थःपाठांतरमिति एतच्चभ्वादौकष
स्वषेत्यादिदंडकेमाधवेनोपन्यस्तं किंत्वाकर्षात्ष्ठलादेरितिवार्त्तिकस्याननुगुणंतत्रहिनीरेफपाठेव्यत्तासंगतिःस्यात् येनपीठेनेति पर्यगतौ हलश्चेतिघञ्समेघ
ञ् सपर्येइति एतच्चमाधवीयोक्तं उज्वलदत्तस्तुस्वप्पशिल्पशष्पवाष्परूपतल्पपर्पतल्याइतिसूत्रेतर्पशब्दस्यानेपर्पशब्दंपठित्वापिपर्त्तेःपःपर्पगृहंवालतृणं
चतेनचरन् पर्पिकइत्युदाजहार इहोतगणसूत्रेपादःपच्चेति पादाभ्यांचरतिपदिकः यत्तुवार्त्तिकंपद्भावइकेचरतावुपसंख्यानमितिसोस्यैवप्रपंचः पपेऽग्रचन्त्र।
श्वस्यरथजालस्यायव्यालपादःयत् श्वागणिकइति श्वादेरिञिइत्सवइकारादिग्रहणंकर्त्तव्यमि तिवचनात्ठञिद्वारादिकार्यंनधानुष्कइति वेतनादिगणे
धनुर्दंडेतिपठ्यतेतच्चसंघातविगृहीतार्थमितिसिद्धांतः आयुधाच्छच आयुध्यैस्त्यनेनेत्यायुधम् घञर्थेकविधानमितिकः उत्संगेनहरतीतिउपादत्तेनपत्रिवे।
त्यर्थः भस्त्रयेति भस्त्राचर्मविकारःयेनलोहादिध्मायतेजलादिकंचनीयते शीर्षभारशब्दोत्रपठ्यतेनि पातनाच्छीर्षभावः सप्तमीसमासश्च नत्युरूषे कृ
तेतिवाच्यं लुक् पक्षेशीर्षभारः एकदेशविकृतस्येति वीवधाच्चेतिवक्तव्यमितिवार्त्तिकंतुन्यायसिद्धार्थकथनपरमितिभावः हृतिकुतुवीवधात्सूत्रे

प्रविक्षेपः त्रेमेस्मिसं नित्यग्रहणं स्वातंत्र्येण प्रयोगं वारयितुं अत एव लौकिके विग्रहवाक्ये क्तिन्नादीनां प्रयोगो न तूक्तः तदाह कस्मान्निर्दिष्ट मिति संख्या-
वाचीमिशब्दस्तेनेह गृह्यते व्याख्यानात् प्रत्ययाप्रत्ययोः प्रत्ययस्यैव ग्रहणात् णिजंत्रपाणामित्यादिलिंगाच्च ननु नित्यग्रहणेन निर्दिष्टार्थविषु[illegible]
यो वाक्यस्य वारणोपि तद्विवक्षायां स्वातंत्र्यस्य दुर्वारत्वात् नेदं लिंगमिति चेन्न नित्यमिति योगं विभज्य तत्सामर्थ्याद् अर्थविशेषानादरेणैव स्वातंत्र्यवारणात्
भावप्रत्ययांतादिति एवं च मप् न कर्त्तव्यः तथा हि भावप्रत्ययांतादिमप् ततस्त्रे भीवित्याद्यनुवर्त्तते नियमार्थं चेदं तेन निर्दिष्टे तेनावद्वाक्यं निवर्त्तते ततः नित्य-
म् अनेनान्यत्रापि स्वातंत्र्यं वार्यते त्यवंतमिति उदीचां माङ इति क्त्वाप्रत्यये ऽपेत्य नेन सह गतिसमासात् मपते ऽरिदन्यतरस्यामिति त्वम् तथा च नास्माच्च-
तीयांतात्प्रत्ययः किंतु वचनात्सप्तम्यंतादेवेति भावः प्रतीपं वर्त्तत इति प्रतिगता आपोस्मिन्निति बहुव्रीहिः ऋक्पूरित्यकारः समासांतः द्व्यंतरुपसर्गेभ्यो
ऽप ईदिति ईत्वम् व्युत्पत्तिमात्रं चेदं प्रतिकूलानुकूलपर्यायाहीमे एवं च अपलोमकूलशब्दा अविवक्षितार्थाः ऊदनोर्देशे इत्युत्वं तु न अदेश[illegible] परि
मुखमिति अपपरी वर्जने इति परेः कर्मप्रवचनीयता पंचम्यपाङ्परिभिरिति पंचमी अपपरिबहिरंचवः पंचम्या इत्यव्ययीभावः ततष्ठक् स्वामिनो मुखं वा-
ऽपित्वा यः सेवको वर्त्तते स पारिमुखिकः यदा तु सर्वतोभावे परिशब्दः प्रादिसमासश्च तदा यतो यतः स्वामिनो मुखं ततो यो वर्त्तते सो ऽर्थः एवं पार्श्विकोपि
द्विगुणार्थमिति बहुवृद्ध्युद्देश्यकदानकर्मतया तस्य गर्ह्यत्वं वार्धुषिक इति वृद्ध्यर्थं वृद्धिः तां प्रयच्छतीति विग्रहः अथ कथं वृद्ध्याजीवश्च वार्धुषिरित्यमरः न स्तेनः
स्यान्न वार्धुषिः वार्धुष्यं लवणक्रिया वार्धुषिः समकं पतेत्यादि च स्वच्छंदवाक्यः कुवस इति हरदत्तः गर्ह्यं किं द्विगुणां वृद्धिं च प्रयच्छत्यधमर्णः कुसीदं दशैकादशा
[illegible] ष्ठन्ष्ठचौ निपात्यत इति अत एव वाक्यमप्यकारांतेन भवतीति भावः तदेवं [illegible]पति दशैकादशानिति संख्याया अल्पीयस्या इति पूर्वनिपातः उंछति भू-
मौ पतितस्यैकैकस्योपादानं उंछः शब्दं करोतीति प्रकृतिप्रत्ययादिविभागेन व्युत्पादयतीत्यर्थः अत्रैवार्थे प्रत्ययः अभिधानस्वाभाव्यात् तेनेह न श-
ब्दं करोतीति वर्वरः दार्दुरिक इति कुलालः दर्दुरो मृत्पात्रविशेषः दर्दुरस्तोयदे भेके वाद्यभांडाद्रिभेदयोः दर्दुरं चंडिकापां च ग्रामजाले तु दर्दुरमिति विश्वः मा-
त्स्यिक इति मत्स्यस्य रूपमिति परिगणनात् सूर्यतिष्येति यलोपो न मार्गिक इति आरण्यपचतुष्पात्सु हरिणे च वर्त्तते ऽर्थे मृगशब्दः तत्राद्यस्य विशेषो द्वितीय

पर्य्यनुपर्यायोद्दरिणशब्दः पर्य्यायेण्यदं गृह्णाति पर्यन्तमितितु नोक्तं वहुत्पूर्वान्माभूत् धर्मं चरतीति रिहासेवायाम् नत्वनुष्ठानमात्रेतेनदैववशात् धर्मेप्रवृ
त्तोपिदुष्टेसोधार्मिकइतिनोक्तं नित्याऽऽसेवाहिस्वाभाविकीप्रवृत्तिः एवमग्रेपि समवायान्समवैति समूहवाचिभ्योद्वितीयांतेभ्यष्ठक्स्यात्समवैतीत्यर्थे इहसम
वपूर्वस्यइणोऽर्थः प्रविश्यैकदेशीभवनम् तत्रगुणभूतप्रवेशंप्रतिप्रकृत्यर्थस्यकर्मत्वाबोध्या विशेष्यानुरोधेनतुलोकेसप्तमीप्रायेणप्रयुज्यते कुरुक्षेत्रेसम
वेताइतियथा सैन्याः सैनिकाइति द्वितीयांतात्एण्यठको यत्तुसेनायांसमवेतार्थेसैन्यास्तेसैनिकाश्चतेइतितत्फलितार्थकथनपरं संज्ञायामिति ललाटकुकु
टीशब्दाभ्यां द्वितीयांताभ्यांपश्यतीत्यर्थेठक्स्यात् सम्यक्ज्ञानेसंज्ञातस्याम् प्रसिद्धिविषयीभूतेऽर्थविशेषेइतियावत् लालाटिकइति दूरेस्थित्वाप्रभोर्लला
टंपश्यतिनतुकार्य्येषुप्रवृत्तिरित्यर्थः लालाटिकः प्रभोर्भालदर्शीकार्याक्षमश्चयः इत्यमरः कौक्कुटिकोभिक्षुरिति सन्यासीहिपादविक्षेपपर्य्याप्तदेशपर्य्यन्त
मेवचक्षुःसंयम्यगच्छतीतिभावः मार्दंगिकइति मृदंगवादनेप्रवृत्तेर्लक्षणामुख्यार्थवृत्तेस्त्वनभिधानान्न धानुष्कइतिइणःषइतिषः परश्वधाट्ठञ्च चाद्ठ
क् द्वयोः कुठारःस्वधितिः परशुश्चपरश्वधःआस्तिकइति अस्तिनास्तिशब्दौनिपातौ यद्वावचनसामर्थ्यादस्तीत्याख्यातात् नास्तीतिनिपातात्ख्यातसमुदा
याच्चप्रत्ययः दिष्टमित्यादिदैवंदिष्टंभागधेयमित्यमरः नालंवतेदैष्टिकतान्ननिषीदतिपौरुषेइतिमाघः यत्तुप्रावोक्तम् प्रमाणानुगामतिर्दिष्टाप्रमाऽस्यास्तीतिदैष्टिकइतितन्न।
आकारविरोधात् दिष्टशब्दस्यस्त्रीत्वस्यालेक्षितार्थपरत्वेचमानाभावात् किंच सास्यास्तीतिविग्रहोप्ययुक्तः नह्यस्त्यर्थेऽयंप्रत्ययःस्मर्यते नवाऽऽस्तिकइत्यत्रेवास्त
र्थस्यप्रकृत्यर्थतयापीहप्रवेशइत्याऽस्तांतावत् हितंभक्षाः अस्येतिप्रकृतमपिचतुर्थ्याविपरिणम्यते हितयोगात् यद्वा तदस्माइतीह अपकृष्यम् प्रकृति।
श्वतदीयभक्षणोलाक्षणिकीत्याशयेनाह अपूपभक्षणंहितमस्मैइतिश्राणा इकारउच्चारणार्थः टोडीवर्थः यवागूरुष्णिकाश्राणाविलेपीतरलाचसेत्यमरः आवसथा
त्ष्ठल् वसतीत्यर्थे आवसंत्यस्मिन्नितिआवसथः उपसर्गेवसेरित्यथप्रत्ययःकुसीदसूत्रादिति कुसीदसूत्रेणताभ्यांप्रकृतिभ्यामित्यर्थः इहयेयांषकारः सांहितिकइति
संभाव्यतेतेषामेवगणानेकृतेष्टनादेः षित्वमनार्षमितिभ्रमःस्यात् अतोवार्तिककारः सर्वानेवपर्यंजीगणत् ढकोवधिसमाप्तः युग्यइति युगंरथांगं तद्वहतीत्यर्थः
प्रासंगइति प्रासज्यतेऽसाविति कर्मणिघञ् धुरोयड्ढकौइह धुरोढक्येत्येवोचितम् खः सर्वधुरात् शब्दस्वरूपापेक्षयानपुंसकनिर्देशःवंधुनिवहुव्रीहाविविवत् स

धुरामिति सर्वा धूः सर्वधुरा पूर्वकालैकेति समासः अक्पूरिति समासांतः परवल्लिंगमिति स्त्रीत्वं टाप् एकधुरीणइति चकारेणास्यानुकर्षणात् सामर्थ्यात् स्येच्च ।
णाम् अन्यथाहि चकारं विनैव प्राकरणिकस्य यतो लुग्विधीयते जनीवधूरिति जायतेऽस्यां गर्भ इति जनिघसिभ्यामिण् जनिवध्योश्चेति न वृद्धिः कृदिकारादक्तिन ।
ङीष् जन्येति जामातुर्वयस्येत्याहुः साहि वधूं जामातुः समीपं प्रापयति कालिदासस्तु वध्वाख्यानवाहेष्वपि प्रायुंक्त यातेति जन्यानवदत् कुमारीति पद्यात्स्यप्य
स्तदर्थे इति पड्भावः अधनुषा किम् चौरं विध्यति संभाव्यते हि चौरव्यधने धनुषः करणता यदा तु धनुषेति प्रयुज्यते तदा सापेक्षत्वादेव न भवति वशंगतः वशं
शः इच्छा वशिरण्यो ह्रस्वसंख्यानमिति सप् मूलमस्याबर्हि प्रथमांतात् दर्हीत्युपाधिकान्मूलशब्दात् यत् स्यात् मूल्या मुद्गा इति मूलोत्पाटनं विना संग्रहीतुमशक्याः मध्य
तोत्सवने क्रियमाणे कोशस्था अपि यस्याम् अवस्थायां पतेयुस्तामवस्थां प्राप्ताः सुष्ठु शुष्का इति यावत् पदमस्य पद इति तेन धेनु ष्याशब्दो न तोदात्तः यतिनु नित्स्वरः स्यादिति भा
वः संज्ञायामिति ऋणापसर्पणाय या धेनुर्दोहनार्थमुत्तमर्णाय दीयते तस्याः संज्ञेयम् नौवयोधर्म- अष्टभ्यो यथासंख्यमष्ठ स्वर्थेषु यत् स्यात् इह तार्यादिषोनेष्वथासं
भवं करणे कर्त्तरि हेतौ तुल्यार्थयोगे च तृतीया भवतीति सैवेह समर्थविभक्तिरर्थात् लभ्यते मूलेनानाम्यमिति मूलं नाम पण्यदीनामुत्पत्त्यैव णिम्भिर्विनियुक्तं द्रव्यं तेन स्व
स्मादतिरिक्तो लाभरूपं द्रव्यं आत्मानं प्रतिशेषी क्रियते आङ्पूर्वस्य तु नमतेरभिभवोऽर्थः तस्मात् सोरद्रुपधादिति यति प्राप्ते ण्यदेव निपातनात् ण्यत् आनाम्यं अभि
भवनीयम् आत्मानं प्रतिशेषीकर्त्तव्यं मूलं चलाभरूपो भाग एव लोके तु यावता द्रव्येण पट्टादिकं विक्रीयते तत्र समुदाये मूल्यशब्दः प्रसिद्धः एवं च लाभमात्रे वृत्त्यादि ।
तस्य मूल्यशब्दस्य तद्घटिते संघाते निरूढलक्षणा बोध्या सीतया समं सीता हलाग्रं तेन संमितं संगतं निम्नोन्नतादिरहितं कृतं समीकृतमिति यावत् तुलया सम्मितमिति
सम्मितं परिच्छिन्नं रूढिश्चेयं संज्ञायामित्यधिकारात् अत एव संदृश मात्रे प्रयुज्यते [illegible] तुलायामाग्रहः अत एव च वयसां तुल्यः समानः सुहृत्स्निग्धो वयस्यः सव
याद् इत्यमरः पथ्यमिति श[illegible]यास्य यथोऽनपेतमित्यर्थः संज्ञाधिकारान्नेह पथोऽनपेतमन्यत् मार्गादनपेत इत्यर्थः इच्छया कृतमिति कृदि संवरणे इति चुरादिः इच्छापा
मपि वर्त्तते ततो घञिङ्कापं[illegible]छंद शब्दः स्वच्छंदो च्छलदश्छकछे सादौ अमुनि तु संतः सौत्रप्रकृतिः यद्यपि वेदे त्रिष्टुबादिषु वायमस्ति तथापीह नग्रहस्तेसंज्ञा
ऽधिकारात् तत्र निर्माणे इच्छायाः करणत्वात् सामर्थ्यात् तृतीयांतादिति लभ्यते इति भावः हृदयस्य कृद्योगात् कर्मणि षष्ठी अलौकिके तद्धितप्रकृतिभागे तु वचनसाम ।

र्थ्यादेव एवमन्यत्रापि बोध्यम् जल्पस्य जल्प इति जल्पशब्दो भावसाधनः कर्त्तरि षष्ठी हलस्य कर्ष इति कर्षणं कर्षः कर्मणि षष्ठी करणस्य कर्तृत्वविवक्षायां कर्त्तरि
वा रथसीताहलेभ्य इति तदंतविधेः द्विहल्यः त्रिहल्यः तत्र साधुः साधुरिह प्रवीणो योग्यो वा नोपकर्त्ता तत्र हितं तस्मै हितमित्यनेन भाव्यं अग्र इति यत्तु प्राचा अग्रे
भवः अग्र्यः अग्रियः अग्रीयः इति रूपत्रयमिहोक्तं तन्न अग्रात्यत् घछौ वेति सूत्रद्वयस्य छंदोविषयत्वात् तद्धि भवे छंदसीत्यधिकारे पठ्यते छंदोधिकारश्चापादस
माप्तेः इति सिद्धांतलोके तु भवार्थे अग्रिम इत्येव भवति प्रतिजनमिति जनो जनः [illegible] प्रतिजनं यथार्थे यदव्ययमिति वीप्सायामव्ययीभावः प्रतिजनः इदंयुग संयु
ग परकुल परस्यकुल अमुष्यकुल सर्वजन विश्वजन पंचजन परस्यामुष्येति षष्ठ्योर्निपातनादलुक् गुडादिभ्यष्ठञ् गुड·कुल्माष·सक्तु·अपूप·मांस·ओदन·
इक्षु·वेणु·संघात·प्रवास·निवास·उपवसनं वसतिरिति वसेश्चेत्यतिप्रत्ययः स्वस्य पतिः स्वपतिरात्म्यं तस्मिन् साधुः स्वापतेयं सभायाः यः यत् तु तित्स्वरः स्यात् क्रतुभव
तु कथ्य इतिवत् यतो नाव इति तु न यदुत्पत्तिवेलायां द्व्यच्कस्य पदं तस्य आदिरुदात्तः स्यात् इति व्याख्यानात् एतच्च वेदभाष्ये स्पष्टं यथाश्रुतव्याख्याने तु आद्युदात्तः सा
तनमः शष्प्यापचफेन्माषचेत्यादिवत् रूहपक्षद्वये उवर्ण्यफेन्यादीनां परस्परविसंवादेपि छांदसत्वेन निर्वाहो बोध्यः समानतीर्थे वासी निपातनाण्णिनिः प्रहादेरा छाति ग
णत्वाद्वा सतीर्थ्य इति तीर्थ्ये इति समानस्य सभावः तरंत्यनेनेति तीर्थम् तरतेस्थक् तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमंत्रिषु योनौ जलावतारे चेति विश्वः इह त्व
ध्यापकवाचिन एव ग्रहणं शयितस्थित इति शीधातुर्हि स्थितौ दृष्टः जलाशयं कुशेशयमिति यथा समानोदरमिति पूर्वापरेत्यादिना तत्पुरुषः ततो यत् तित्स्वरस्य
पवाद ओकारस्योदात्तः सोदराद्यः ओ चोदात्त इति नानुवर्त्तते विभाषोदर इति सभावः तत्र तीर्थे ये इत्यतो य इत्यनुवर्त्तते सा च विषयसप्तमी तेन सोदरस्य इत्यस्य सा
य प्रत्ययस्वरः कथं तर्हि अपंथानं तु गच्छंतं सोदरोपि विमुंचतीति मुरारिः उच्यते सह समानं उदरं यस्येति वोपसर्जनस्येति सभावः अत एव यत्र भ्राता सहोदर इ
त्यपि सिद्धं इति प्राग्घितीयाः समाप्ताश्चातुर्थिकाः अथ पांचमिकाः प्राक्क्रीताच्छः इत्यतः प्रागिति अर्थोऽत्रावधित्वेन गृह्यते न तु प्रत्ययः प्रकृतिर्वा तेन प्राक्
क्रीतादेः योऽर्थस्तस्योपस्थानं अवधिसजातीयो ह्यवधिमान् भवति यथा मासात्पूर्व इति कालः प्रतीयते ग्रामात्पूर्व इति देशः एवं च समानेऽर्थे प्रकृतिविशेषाद्धि हि
तोयदादिः छं बाधते अन्यथा यच्छयोः सन्निधानाविशेषात्तव्यत्तव्यानीयरामिव पर्य्यायः स्यात् ननु यदादिविषये छो न भविष्यति विभाषा हविरपूपादिभ्य इति

विभाषाग्रहणाल्लिंगादिति चेत् सत्यम् एवमपि अवधिग्रहणं मास्तु छइत्येवास्तु स्पष्टप्रतिपत्त्यर्थं तदिति चेत् हि अर्थ एवावधित्वेन निर्दिष्टमुचितः अन्य
थाभक्षितेऽपि लशुने न शांतो व्याधिरिति न्यायः आपद्यतेति दिक् गवाद्यंतर्गणसूत्राण्याह नाभिनभं चेति नाभिशब्दो यत्प्रत्ययं लभते नभादेशं चेत्यर्थः नभ्योऽक्षः
ति रथांगं यच्छिद्रं नाभिः तदनुप्रविष्टः काष्ठविशेषोऽक्षः स च तदनुगुणत्वात्तस्मै हितः अंजनं तैलाभ्यंगः तदपि स्नेह..त्वान्नाभये हितं रथ्येति शरीरावयवे तु परत्वा
बाधान्नेति भावः शुन्यमिति चकारस्यानुक्तसमुच्चयार्थत्वान्नस्तद्धित इति टिलोपो न ये चाभावकर्मणोरिति प्रकृतिभावस्तु दुर्लभः संप्रसारणं दीर्घत्वे अनूरूपाभ
वात् दीर्घपक्षे तद्विधानसामर्थ्याट्टिलोपो मा भूत् पक्षांतरे तु मैवगतिः नड् चेति मध्वेतिसुवचं ऊधन्य इति यचि इति प्रकृतिभावः विभाषा हविरपूपादिभ्यः हव
विर्विशेषाणामिह ग्रहणं न तु स्वरूपस्य तस्य गवादिषु पाठात् ननु विपरीतमेव किं न स्यात् गवादिषु विशेषाणां ग्रहणं इह तु स्वरूपस्येति चेत् मैवं असंजातविरोधित्वे
न तत्रैव स्वरूपग्रहणस्य न्याय्यत्वात् अपूप तण्डुल पृथुक मुसल सुवर्ण कटक कर्णवेष्टक इत्यादीनां क्रम्यप रत्ते अन्नविकारेभ्यश्चेति अस्यार्थः अन्नवि
काराः अन्नप्रकाराः ओदनीप विशेषाः तेभ्यो यद्वा स्यात् ओदन्याः ओदनीयाः एवं च अपूपादीनां केषांचित्पाठः प्रपंचार्थः हविरपूपादिभ्यो विभाषायाउ
गवादिभ्यो यस्त्वं विप्रतिषेधेन चरव्यास्तण्डुलाः सक्तव्याः धानाः चरुर्नाम हविरिति काशिका स्थालीवचनस्य चरुशब्दस्यात्र ग्रहे हविषि उपचारादृत्तिरि
ति कैयटहरदत्तादयः कैयटोऽपीदं त्रिवृच्चर्वधिकरणविरूढं तत्रादित्यश्चरुरित्युपक्रम्य अदितिमोदनेनेति वाक्यशेषश्रवणात् चरुशब्द ओदने शक्तः लोके ।
स्थाल्यामौपचारिक इति सिद्धांतितत्वात् तथापि कैयटादीनामयमाशयः लोके स्थाल्यां प्रयोगस्तावत्सर्वसम्मतः तथा च स्थाल्यामेव शक्तिरस्तु तदनुरोधेन
न वेदेऽलाक्षणिकत्वो चिता लोके गृहीतशक्तिकशब्दो वेदेऽपि बोधक इति स्वीकारात् उक्तं च लोकप्रसिद्धार्थसमन्वयेन दृष्टं यत्तेरणप्रतिपादितेऽप्यत्र शक्त्यनन्तरं
तत्र न कल्पनीयं तथा सति लोकानुलक्षणा भवेदिति नाभ्यमिति नाभिनभं चेति नभादेश स्तु न भवति तस्य गवादिषु तासन्नियोगशिष्टत्वेन रथ्यनाभावे व प्रवृ
त्तेः खलयव अत्र वृषशब्दे अकारांतो गृह्यते न तु नकारांतः अन्यथा ह्यसंदेहार्थं नलोपमकृत्वैव निर्दिशेत् आत्मन्विश्वजनेतिवत् वृषाय हितं वृष्यम्
ब्रह्मण्यमिति ब्रह्मन्शब्दो ब्राह्मणपर्य्यायः इह वृषन्शब्दात् ब्राह्मणशब्दाच्च यतः प्राप्तिरेव नास्ति क्वापि अनभिधानान्नेसाकरः रथ्येति रथाय हिता गवादिषु पा

र्णो नांगीकृतः हितार्थे एव यथा स्यात् अर्थान्तरे माभूदिति अजाविभ्यां थ्यन् अजशब्दः पुल्लिंग उपात्तः अत एव द्वंद्वे घ्यंतस्याविशब्दस्य पूर्वनिपातं बाधित्वा अजा-
द्यदंतमिति अजशब्दस्य पूर्वनिपातः कृतः लिंगविशिष्टपरिभाषया स्त्रीलिंगादपि थ्यन् तसिलादिष्विति पुंवद्भावः तत्र थ्यनः परिगणनात् कर्मधारयादेवेति ।
व्याख्यानमत्र शरणं विश्वजनीयमिति विश्वस्य जनः सर्वसाधारणो वेश्यादिः विश्वो जनोऽस्येति विग्रहेऽपि स एवान्यपदार्थः तस्मै हितमित्यर्थः पंचजनादिति
[illegible]कारः पंचमाः चत्वारो वर्णाः पंचजनाः दिक्संख्ये संज्ञायामिति समासः एतत्सूत्रस्थं वार्तिकत्रितयमपि कर्मधारयविषयमेव तेन षष्ठीसमासात् बहुव्रीहेश्च छ
एव पंचजनीयः सर्वजनादिति पूर्वकालैकेति तत्पुरुषः सर्वजानीन इति साध्वर्थे प्रतिजनादिभ्यः खञिति खञि तु सार्वजनीन वैश्वजनीनौ असुसादितो हितार्थे तु ख एव
व ननु खञ् मातृभोगीण इति मातुर्भोगः शरीरं तस्मै हितः यद्यपि अमरेण भोगः सुखे स्त्र्यादिभृता वहेश्च फणकाययोरित्युक्तम् तथापि अहेरिति प्रयोगबाहु-
ल्याभिप्रायम् शक्तिलक्षशरीरमात्रे इत्याकरः मातृपितृशब्दाभ्यां तु औत्सर्गिकश्छ एव मात्रीयः पित्रीयः राजाचार्याभ्यां तु अनभिधानाच्छो न किंतु राज्ञे हितमाचा-
र्याय हितमिति वाक्यमेवेत्याकरः सर्वादिति अनुकरणत्वात्सर्वनामकार्याभावः माणवीनमिति अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः नकारस्य च मूर्धन्य-
स्तेन सिध्यति माणवः इत्यपत्याधिकारे वार्त्तिकम् एतच्च एतत्सूत्रनिर्देशसिद्धार्थकथनपरमिति बोध्यम् चतुर्थ्यंतादिति एतच्च सामर्थ्याल्लभ्यते विकृत्या-
र्थायां हि प्रकृतौ प्रत्यय उच्यते तच्च तस्यास्तादर्थ्ये चतुर्थ्येव गम्यते यद्वा तस्मा इत्यनुवर्तते छादिषेयाणीति यदा तु चर्मविकारश्छदिस्तदा परत्वाच्चर्मणोऽञ् इत्यञ्
प्राप्नोति पूर्वविप्रतिषेधेन ढञेवेष्यते छादिषेयं चर्म आह च यत् अञ्रावञः पूर्वविप्रतिषिद्धं ढञ्चेति एवं च निरवकाशत्वे सत्येव प्रतिपदविधित्वं बलोपस्त्वप्र-
योजकं न तु सावकाशत्वे इति मुनिसम्मतं लक्ष्यते तेन स्वं पितृटाकानीत्येव पुत्रकं परत्वान्नुम्प्रवृत्तेः प्रतिपदोक्तत्वाद्दीर्घमाश्रित्य स्वां पितृटाकानीति मतं तु दुर्बलमिति
दिक् चर्मणोऽञ् चर्मण इति षष्ठी न तु पंचमी तथा हि सति चर्मशब्दात् चर्मार्थायां प्रकृतौ प्रत्ययः स्यात् चर्मणो द्वीपी त्यादौ तदाह चर्मणो या विकृतिरिति वाध्रे
इति वृधिवपिभ्यां रन् इति रन्प्रत्यये वध्रशब्द आद्युदात्तः चर्मवाची तस्य विकार इत्यण् ढिड्ढेति ङीप् वाध्री रज्जुः वध्रीति तु वधेर्गौणादिके ष्ट्रनि नद्धी वध्री वस्त्रास्या-
दिस्यमरः चंचाः पश्यवङ्क्रिकाः पश्येति भाष्यं प्रनुवोचं वाध्र्यश्वस्य नामेति वेदप्रयोगः तत्र अवग्रहकाले ह्रस्वस्त्रेत्र्याय्योरिति बोध्यः तदस्य स्यादिति संभावने लिङ्

इष्टकानां बहुत्वेन संभाव्यत एतत् प्राकारः आमासस्यादिति· देशस्य च गुणेन संभाव्यते प्राकारोऽस्मिन्स्यादिति इह प्रकृतिविकारभावस्तादर्थ्यं च न विवक्षितं किं
नुयोग्यतामात्रम् तेन पूर्वस्यायमविषयः मनुविधाविवक्षत्तद्ग्रहणेन सिद्धे हि तच्छब्दोपादानं स्पष्टार्थम् छपतोः पूर्णोवधिः प्राग्वतेष्ठञ् ठञ् इत्येव वक्तव्ये
प्राग्वतेरिति वचनमध्येयोऽधिकारवान् अपवादः सर्वभूमिपृथिवीभ्यामणञौ शीर्षच्छेदाद्यच्चेत्येवमादिः तेन विच्छेदे पिठञेव यथा स्यादित्येवमर्थं तेन पारस्य
णानुणपणेत्यादौ ठञ् लभ्यते नन्वेवं पारायणादिसूत्र एव ठञ् निर्दिश्यतामिति चेन्न उत्तरसूत्रे येषां पर्युदासः तेभ्यः क्रीतार्थे ठञ् इष्टत्वात् तस्य च प्रकृतसूत्रं विनाऽ
लाभात् तेन गोपुच्छिकः साप्ततिकः इत्यादौ ठञर्थमिदं सूत्रमिति स्थितं यत्तु प्राचा तेन क्रीतं· तृतीयांतात् क्रीतार्थे ठक् स्यात् सप्तत्या क्रीतः साप्ततिकः इत्युक्तम् तन्न अ
गोपुच्छेत्यादिपर्युदासेन ठकोऽसंगतत्वात् तेन क्रीतमिति सूत्रस्य त्रयोदश प्रसङ्गानधिकृत्य कृतस्य ठञ्मात्रपरत्वेन व्याख्याया असंगतत्वाच्च यदपि व्याचक्ष
ते अतः परमार्हाद्गोपुच्छसंख्यापरिमाणाट्ठगित्यधिकृत्यार्हीयान्दर्शयति तेन क्रीतं संतत्वान्नायं कनादेर्विषय इत्युदाहरति सप्तत्येत्यादीति अत्रेदं वक्तव्यं तेन
क्रीतमित्यस्य ठञादित्रयोदशसाधारणतयार्हीयानुदर्शयतीत्यवतारिका तावदसंगता अनन्यार्थस्य प्रथमोपस्थितस्य च प्राग्वतेष्ठञित्येतस्योपेक्षानर्हत्वात् प्रा
ग्वतीयानित्यस्य वक्तुमुचितत्वात् किंच कनादेरित्यादिशब्दोऽनुचितः स्यंतत्वस्य कन्विधावेव पर्युदासप्रयोजकत्वात् आदिशब्दग्राह्यस्य दुर्वचत्वादिति दिक् य
द्यप्यत्र प्रसमयोऽवधित्वेन गृहीतस्तथापि अर्थेष्वेवोपतिष्ठते न प्रतिप्रकृति तेनापवादविषये न भवति अत्र च ज्ञापकं शूर्पादञन्यतरस्यामिति सूत्रेऽन्यतरस्यांग्रहणं
आर्हीयं तदर्हतीति अर्हतीति तिङः तस्य एकदेशः शब्दतोऽत्रानुक्रियते न तु तदर्हमिति सूत्रांतर्गतं अजंतमिति भावः अत्र च व्याख्यानमेव शरणमिति हरदत्तः अ
त्र श्लोकवार्त्तिकम् ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वतः अस्यार्थः द्रव्यांतरपरिच्छिन्नगुरुत्वेन पलादिशब्दवा
च्येन पाषाणादिना तुलादण्डारोपितेन येन सुवर्णादेर्गुरुत्वमुन्मीयते तदूर्ध्वारोपणादूर्ध्वमानमिति शब्देन विवक्षितं तदुन्मानं आरोहपरिणाहाभ्यां स्वगताभ्यां येन
काष्ठादिनिर्मितेन व्रीह्यादि परिमीयते· तत्परिमाणं प्रस्थादि परिः सर्वतोभावे आयामो दैर्घ्यं स येन मीयते तत्प्रमाणं तच्च क्वचित्तिर्यगवस्थितस्यैव स्तनः यथा वुल्ला
देहस्तादिः क्वचिदूर्ध्वाधरदिगवस्थितस्य यथा हस्तिनमुदकं ऊरुद्वयसमुदकमिति संख्या तु उन्मानपरिमाणप्रमाणेभ्यः पलादिप्रस्थादिहस्तादिभ्यः त्रिभ्यो वहिर्भू

म·सु·
९५

ताएकत्वद्वित्वादिवोध्येतिइह संख्यापरिमाणयोरेवप्रकृतत्वेपिउन्मानप्रमाणयो र्विवेचनंप्रसंगात्कृतमितिवोध्यं असमासेनिष्कादिभ्यः निष्क·पण·पाद·मा।
ष·वाह·द्रोण· षष्टि·इति सप्तप्रकृतयः तत्रद्रोणशब्दः परिमाणवाची —— षष्टिशब्द· संख्यावाचीताभ्यां ठञिप्राप्तेवचनं इतरेषांतुपंचानां उन्मानवचनत्वात्पूर्वे
सूत्रेणाप्राप्ते ठकिसमासप्रतिषेधार्थवचनं अन्येत्वाहुः पूर्वसूत्रेपरिच्छेदकमात्रेसंख्याभिन्नंपरिमाणशब्देनगृह्यते तेनसर्वेभ्यष्ठञएवअपवादःपरिमाणांतुसर्वतइ
तिभेदः स्यादनंतुप्रमाणपरिमाणाभ्यांसंख्यायाश्चापिसंशयेइत्यादावुपयोक्ष्यतइति एतच्चपदमंजर्यांस्पष्टंसुगमम्मितिउगवादिभ्योयत् पचापूप्यमिति वि।
भाषाहविरपूपादिभ्यइतियत् न्यासकारस्त्वाह अन्नविकारत्वादेवसिद्धेअपूपादीनांप्रतिपदपाठसामर्थ्यात्तदंतविधिर्नेति तद्वृत्तिविरोधादुपेक्ष्यमितिभावःइ
तरुद्धेमितिसंख्यापूर्वपदानामितिकिं इहमाभूत् परमपारायणंवर्त्तयति द्विशूर्पमिति द्वाभ्यांशूर्पाभ्यांक्रीतमितितद्धितार्थेद्विगुःनतावदेषालुगंतापकृत्ति
रितिसंख्यापूर्वपदादपिशूर्पादञन्यतरस्यामितिअञष्ठञोवाअध्यर्द्धपूर्वेतिलुक् द्विशौर्पिकमितिठञोद्विगुंप्रतिनिमित्तत्वाभावाल्लुगभावः परिमाणांतस्ये
त्युत्तरपदवृद्धिःप्राप्ताचउत्तरसूत्रेणप्राप्तस्यकनोपवादः त्यंतशदंतायाइति त्यंतसहिताशदंतेतिउत्तरपदलोपीसमासःपंचकइति लौकिक्याःसंख्यायाउदाह
रणंवहुकइति पारिभाषिक्याः चात्वारिंशत्कइति इसुसुक्तांतात्क अर्थवत्तिशब्दस्यग्रहणाद्वृत्त्यवयवस्यतिशब्दस्यपर्युदासोन कतिकःवतोरिड् वतोरि
तिपंचमी साचकनितिप्रथमायाःषष्ठीकल्पयतीत्याह वत्वंतात्कनइति अर्द्धिकइति अर्द्धशब्दःकार्षापणस्यार्द्धे रूढइतिभगवदपेक्षयाअसामर्थ्यं नशं
कं यद्वाप्रकरणादिवशेनभागविशेषेविज्ञातेसतिनास्यसामर्थ्येशूर्पात् ठञोपवादः शूर्पशब्दस्यपरिमाणवाचित्वात् शतमानठञठकौनामितिशतमा
नंपरिमाणंततष्ठञप्राप्तः विंशत्याक्रीतंविंशतिकंसंज्ञाशब्दोयंअसंज्ञायांहिविंश —— त्रिंशद्भ्यामितिड्वुन्स्यात् संज्ञाचपदिपरिमाणस्यतदाठञप्राप्तः अथा
र्थांतरस्यतर्हिठक्प्राप्तः वसनशब्दात्तुठगेव सहस्रसंख्या ततःसंख्यायाअतिशदंतायाइतिकन्प्राप्तइतिविवेकः अध्यर्द्धपूर्व अध्याहृतमर्द्धंयस्मिन्तत् अध्यर्द्धंप्रादिभ्यो
धातुजस्येतिसाधुः अध्यर्द्धपूर्वेचद्विगुश्चेतिसमाहारद्वंद्वः सौत्रंपुंस्त्वं अध्यर्द्धपूर्वाद्विगोश्चपरस्येति अनेनसूत्रेद्विगोरितिपंचमीलुक्तंभवति एतच्चवृत्तिका
रीत्याव्याख्यातं अत्रवार्त्तिकम् द्विगोर्लुकितन्निमित्तग्रहणं द्विगोर्निमित्तंयस्तद्धितस्तस्यलुगितिवक्तव्यम् द्वाभ्यांशूर्पाभ्यांक्रीतंद्विशूर्पंद्विशूर्पेणक्रीतंद्वि

राम·
९५

शौर्पिकमित्यत्र पूर्वोदाहृते द्वितीयस्य माभूत् तथा अर्थविशेषासंप्रत्यये अतन्निमित्तादपि यत्र तद्धितार्थे द्विगुना सहार्थो न भिद्यते तत्र सन् तद्धितो यस्य निमित्तं
न भवति तस्मादपि द्विगोः परस्य लुगिति वक्तव्यं द्वयोः शूर्पयोः समाहारो द्विशूर्पी तया क्रीतमिति विग्रहे ऽपि द्विशूर्पमित्येव यथा स्यात् वक्तव्यं तत्सूत्रे द्विगोरिति षष्ठी मा
श्रिसद्द्विगोर्निमित्तं यस्तद्धित इति व्याख्येयं द्विशूर्प्या क्रीतमित्यत्र तु अनभिधानात्प्रत्ययो नेति भाष्याद्रूढः पंथाः पांचकलापिकमिति एवं पांचलोहितिकमपि वा।
ध्यं पंचकलापाः परिमाणमस्य पंचलोहित्यो गुंजाः परिमाणमस्येति विगृह्य तद्धितार्थेति समासः तदस्य परिमाणमिति ठञ् भस्याढे तद्धित इति पुंवद्भावात् लो
हिनी शब्दस्यैकारनकारयोर्निवृत्तिः परिमाणविशेषस्य नामधेये एते असंज्ञाग्रहणं प्रत्ययांतस्य विशेषणं न तु द्विगोः एतच्च वृत्तिकृता वर्णितं सूत्राशयमनु
रुध्योदाहृतं भाष्यवार्त्तिकयोस्तु असंज्ञाग्रहणं प्रत्याख्यातं तथाहि द्विगुविशेषणमसंज्ञाग्रहणं पंचकलापपंचलोहितशब्दौ च द्विगू कृत तद्धितलुकावे
व संज्ञे यस्तु ताभ्यामुत्पद्यते ऽकृसमश्रूयत एवेति स्यादेतत् अध्यर्द्धशब्दः संख्यावाची तथा च लोके गण्यते एको ऽध्यर्द्धो द्वाविति अत एवाध्यर्द्धमिति कन् अध्यर्द्धकंस
मिति तद्धितार्थे द्विगुश्च भवति ततः किमध्यर्द्धग्रहणेनेति चेत् सत्यं ज्ञापनार्थमिदं संख्याकार्यं किंचिदस्य नेति तेन कन् समासोत्तरपदवृद्धिभ्यो ऽन्यत्र भवति तद्यथा
अध्यर्द्धं करोतीति नेह कृत्वसुच् यः सकृत्फलां तां क्रियामभिनिर्वर्त्त्य पुनस्तामेव कुर्वन् मध्ये निवर्त्तते स एवमुच्यते विभाषा अध्यर्द्धसहस्रमिति शतमानविंशति॥
केति विहितस्याणो लुक् तदभावे तु संख्यायाः संवत्सरसंख्यस्य चेत्युत्तरपदवृद्धिः इदानीमेव ह्युक्तम् अध्यर्द्धशब्दः संख्यावाचीति द्वित्रिपूर्वान्निष्कात् अध्यर्द्धपू
र्वग्रहणमुत्तरार्थमनुवृत्तमपि नेह संबध्यते द्विगोरिति तु संबध्यते एव षष्ठीसमासं व्यावर्त्तयितुं अत्र च व्याख्यानमेव शरणम् अन्यथाध्यर्द्धपूर्वात् द्वित्रिपूर्वा
च्च निष्कादिति समुच्चयः स्यात् द्विनैष्किकमिति प्राग्वतेष्ठञ् मतांतरे तु ठक् परिमाणांतस्येत्युत्तरपदवृद्धिः विंशतिकात्खः शतमानविंशतिकेत्यणि प्राप्ते तस्य च लु
कि प्राप्ते खो विधीयते स्वार्थे तदस्य परिमाणमिति ठञि प्राप्ते तस्य लुकि ईकन् विधीयते प्राण्यंगेति पादस्य पदाज्यातिगोपहतेष्विति यत्र तावत्प्राण्यंगस्यैव पाद
स्य ग्रहणं तत्स्यैवाज्यादिभिर्गतिवचनैः संबंधसंभवात् यद्यतीसादावपि तस्यैवानुवृत्तिरिति भावः इह तु पणमाषाभ्यां साहचर्यात् परिमाणवाचिनो ग्रहणम्॥
शाणाद्वा पक्षे ठञिति यद्यपि शाणउन्मानं तथाप्याहीदित्यत्र परिमाणग्रहणेन योगरूढ्या परिच्छेदकमात्रं गृह्यत इति वादिनां मते अस्यापि पर्युदासादिति।

भावः मुख्यमते तु ठगेव बोध्यः शाणाद्वेति सूत्रे शताच्चेति वक्तव्यम् पूर्वेण नित्ये प्राप्ते विकल्पार्थं अध्यर्द्धशत्यम् अध्यर्द्धशतं पंचशत्यं पंचशतं यदभावे संख्यालक्षण
स्यकनो लुक् शताच्च ठन्यतावितितु न भवति तत्रासमासग्रहणस्यानुवर्तितत्वात् द्विन्निपूर्वादण्वार्तिकमिदम् इति कृत्वा सूत्रेषु प्रक्षिप्तम् शाणाद्विति वेति शतग्रह
णं तु नेह संबध्यते व्याख्यानात् अत्र च भाष्यं प्रमाणमिति भावः यत्तु न्यासकृतोक्तं शतशाणाभ्यां वेति सूत्रयितव्ये पणपादेति पूर्वसूत्रे शतग्रहणं क्रियते तस्येदं
फलं अन्नशब्दः स्वरितत्वेनानुवर्तमानोपि शाणाद्वेत्यत्रैव संबध्यते तदुत्तरसूत्रे तु संबध्यते तेनाणेनेति तदेतत्सामर्थ्यवर्णनं अशिवधायके वार्तिके सूत्रत्वभ्रम
प्रयुक्तमित्याहुः तावत् त्रैरूप्यमिति अणि एकं यति द्वितीयं ठञो लुकि तृतीयं तेन क्रीतं तृतीयान्तात् क्रयणात्कर्मणि वाच्ये ठञादयस्त्रयोदश प्रत्यया यथायथं
स्युः ननु देवदत्तेन क्रीतं पाणिना क्रीतम् संतोषेण क्रीतमित्यादावति प्रसंग इति चेत् सत्यम् करणे तृतीयैवेह समर्थविभक्तिः सापि मूल्यद्रव्यसमर्थकाद्वादुत्प
न्नानत्वन्यापि अन्यत्र हि अनभिधानान्न प्रत्ययः एतच्च तद्धिता इति महासंज्ञाकरणाल्लभ्यते तेभ्यः प्रयोगेभ्यो हिता इति व्याख्यानात् पुत्राच्छ च कथं पुत्रीयः क्र
तुरिति न हि क्रतुः संयोगो नाप्युत्पात इति चेत् मैवं संयुज्यतेऽनेनेति व्युत्पत्त्या हि येन यागादिकरणेन पुरुषाः फलेन संयुज्यंते स यागादिरपि संयोगः न केवलं संबं
ध एवेत्याग्रह इति हरदत्तः तस्येश्वरः तत्र विदित इति च योगविभागो यथासंख्यनिरासार्थः उत्तरार्थश्च तस्य वापः तस्येति वापापेक्षया कर्मणि षष्ठी न कर्तरि ते
न देवदत्तस्य वापः क्षेत्रमित्यादौ न तदस्मिन् शुल्कग्रहणं प्रपंचार्थं तस्याप्यायविशेषत्वात् तथा च शौल्कशालिकः इत्यत्र ठगायस्थानेभ्य इति ठग्भवति अर्द्धि
क इति अर्द्धाच्चेति वक्तव्यमिति ठन् आप्रः सति च तस्मिन् ङीप् स्यात् इष्यते तु टाप् रूपकस्येति रूपकं कार्षापणम् रूढ इति तथा च भागवदपेक्षत्वेन सामर्थ्येनोद्भाव भा
नीयमिति भावः व्याख्यांतरमिति अत्र पक्षे भारभूतार्थाभिधायित्वाद् वंशादयो भारशब्देनोच्यंते प्रत्येकसंबंधविवक्षया सूत्रे एकवचनं वस्नद्रव्याभ्यां वस्नो मूल्यसं
भवत्य आधारप्रमाणेनाधेयप्रमाणस्य यदनाधिक्यं तदुपसर्जनधारणं संभवतेरर्थः अतः सकर्मकत्वात्तदित्यनुवृत्त्या लभ्यमानाद्वितीयासमर्थविभक्तिर्नेविह
ज्ञाते तदर्ह स्वस्मिन्नित्यादिसूत्रेऽवहरतीत्यत्र षष्ठ उपसर्गस्तद्व्याचष्टे उपसंहरतीति तत्य चतीति पचतिग्रहणं संभवत्यवहरतिनिवृत्त्यर्थं द्रोणपरिमितेऽत्री हा
दौ द्रोणशब्दः आढकाचित पक्षे ठञिति ननु ठक् आढकादीनां परिमाणत्वात् द्विगोष्ठंश्चेष्टन्निति छेदः तदाहा षित्वादिति अपरिमाणेति तस्मिन्सूत्रे आचितशब्दस्या

स्थादुपादानादितिभावः तदस्य परिमाणं इह परिमाणशब्देन परिच्छेदकमात्रं गृह्यते न तु सर्वतो मानमेव उत्तरसूत्रे संख्यायाः परिमाणेन विशेषणात् षष्टिर्जीवितपरि
माणमस्य षाष्टिकः पंचदशमंत्रा इति साम्ना स्तुवीत एकं साम ऋचे क्रियते इति हि श्रुतिः तत्र ऋचस्य पंचदशत्व आह सा पंचदशमंत्रा इति सप्तदशे स्तोमे अंत्यायाः सप्तकत्वा।
आवृत्तिः एकविंशेऽष्ट च स्यडित्करणमेकविंशेति लोपार्थं त्रयस्त्रिंशादौ टिलोपार्थं च पंक्तिविंशति पञ्चशब्दस्य टिलोपः तिप्रत्ययः चोः कुरिति कुत्वम् रूढिशब्दा इति तथा।
चात्र नावयवार्थोऽभिनिवेष्टव्यम् पंक्तिशब्दो हि नानार्थः अस्ति छंदोविशेषो यस्य पंचाक्षराः पंचपादः अस्ति च क्रमसंनिवेशो ब्राह्मणपंक्तिरिति अस्ति दशसंख्या
यां कृतवान् पंक्तिरथो विलंघ्यपदिति दशार्थ इत्यर्थः द्वयोर्दशतोर्विन्भावः शतिश्च प्रत्ययः अपदत्वं च द्वौ दशतौ परिमाणमस्य विंशतिः त्रयाणां दशतां त्रिन्भावः
शच्च प्रत्ययः चतुर्णां दशतां चत्वारिभावः पंचानां दशतां पंचाभावः एभ्यः त्रिभ्यः शत्प्रत्ययः षसां दशतां षषतिश्च प्रत्ययः अपदत्वं च सप्तानां दशतां सप्तभावः।
अष्टानां दशतामशी नवानां दशतां नवभावः एभ्यस्तिश्च प्रत्ययः दशानां दशतां शभावस्तश्च प्रत्यय इति दिक् पंचदशतौ पस्य इति संख्याया इति कन् त्रिंशच्चत्वारिंशतोरिति पंच
म्यर्थे षष्ठी द्विवचनं चत्वारिंशत इति सूत्रपाठे तु समाहारद्वंद्वात् संचम्येकवचनं अत्र ब्राह्मणे संज्ञायामिति षष्ठीसमासेन निर्दिष्टमुचितं एवं हि ब्राह्मणस्य चेत् संज्ञे
ति स्फुटीभविष्यति अन्यथा तु यस्य कस्य चित् संज्ञायां ब्राह्मणस्य च प्रयोग इति संभाव्येत मंत्रे भाषायां च उएन स्यात् इष्यते तु सः तस्मादिष्टानुरोधेन व्याख्येयं छो।
दादि इहहि निसम्प्रह संभाष्य प्रत्याख्यातं सूत्रमेवमाप्त इति तदाशयः दंडादि पूर्वसूत्राद्यदनुवर्तते तदाह यत्स्यादिति केचित्तु दण्डादिभ्यो य इति सूत्रं पठंति तद्भा
ष्याविरोधादुपेक्ष्यमिति हरदत्तमाधवादयः तथाहि यद्धि धौ हनो वा वधः तद्धितो वेत्युक्तं यदि चेह यद्विधीयते तदैतदुपपद्यते क्वाप्याद्युदात्तत्वं प्रत्ययपित तद्धितेय तोना
व[illegible]दात्तत्वमेवेति यदि त्वत्र यो विधीयेत तदा स्वरोऽभिद्येत यत्तु प्रमाणं तौ पञ्च सनं इभवधमेधशब्दाः दंडादयः तेन छंदसि प्रकृतिस्वरा आद्युदात्ता दृश्यंते इभ्यान्नग
जावनाम्पति तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छंति अपां मेध्यं यज्ञियमित्यादीति तन्न दंडादिभ्यो यविधाने पितस्य भाषायां चरितार्थतया छंदसि चेत्युत्तरसूत्रेण बाध
स्य न्याय्यत्वात् तेन हि प्रातिपदिकमात्रात् छंदस्यर्हतीत्यर्थे यद्विधीयते यत्प्रत्ययं[illegible]रपि छंदसि चेति सूत्रे मंडूकप्लुत्या पतत् एवं विधेयत्वादिति दिक् कडंकरदक्षिणा
च्छ च कडंगरेतिपाठस्तु हरदत्तमाधवादिविरोधादुपेक्ष्यः स्थालीबिलात् छपतावनुवर्तते पाकयोग्या इति त्रिःफलीकृता इति यावत् यज्ञं ऋत्विजमर्हतीति अर्थी स।

मर्थो विद्वान् शास्त्रेणापर्युदस्त इत्यर्थः देशस्यानेवंविधत्वादुपसंख्यानं यज्ञियो देश इति यज्ञानुष्ठानेयोग्य इत्यर्थः आर्हीपाणां ढगादीनां द्वादशानां पूर्णो वधिः
पाणप[illegible]णा आदित आरभ्य आंतादविच्छेदेन वेदस्याध्यपनं पारायणं तच्च गुरुशिष्याभ्यां निर्वर्त्यते अन्यतरास्य विधौ अध्ययनक्रियाया अनुत्पादात् तथा
पि[illegible]मस्य यइष्यते न तु गुण विस्ताकरः तद्दर्शयति पारायणिकश्छात्र इति गौणपणिकोयजमान इति इदमपियजमान एवेष्यते अत्विकृतु यद्यपि पुरोडा
[illegible]निर्वर्त्तयति तथापि तत्र नेष्यते इति भावः विषयीभूतोर्थ इति संदेग्धरि तु प्रत्ययो नेष्यत इति भावः तथा च ज्ञानप्रामाण्यं स्वतो न गृह्यते सांशयिकत्वादिति सं
दिह्यमानमूल वृद्धाः प्रयुंजते यत्तु सांशयिकः संशयापन्नमानसः इत्यमरेणोक्तं तदपि संशयापन्नं मानसं यस्मिन् विषये इति व्याख्येयमिति भावः।
ततोऽभिगमनमिति अत्र पंचम्यंतात् प्रत्ययः पंथो णनित्यं अत्र नित्यग्रहणं भाष्ये प्रत्याख्यातं उत्तरपथेन चकारात् गच्छतीति प्रत्ययार्थ आकृष्यते तदाह उत्तरप
थेन गच्छतीति कालात् स्वरूपग्रहणमिह न भवति तमधीष्टो भृतो भूतो भावी त्यस्य संनुसंयोगे द्वितीया निर्देशात् मासाद्वयसीत्यादौ मासादीनां कालेन विशेषणा
च्चतेन निर्वृत्तं तेनेति करणे तृतीया चतुर्थ्यंतर्गतेन तेन निर्वृत्तं इत्यत्रानुकर्त्तरि तृतीयेति विशेषः उभयत्राप्यंतर्भावितण्यर्थाद्वृत्तेः कर्मणि क्तः मासाद्वयसि स्वन्नोऽग्नि।
त्करणं स्वरार्थं पुंवद्भावप्रतिषेधार्थं च मासीनाभार्यः द्विगोर्यप् यिलादनुदात्तः तेन कालांते द्विगाविति पूर्वपदप्रकृतिस्वरो बाधितष्ठते यवपीति अत्र व्याख्यानं
शरणां द्वैयन्हिक इति नन्वत्र राजाहः सखिभ्य इति पस्त्वादहचाभाव्यं न च महाविभाषयाटचो विकल्पः वृहतीजात्संताः समासांताश्चेति निसेषु परिगणनादत आ
ह समासांतविधेरिति द्विवर्षीणो व्याधिरिति व्याधिशब्देन प्रत्ययार्थस्याचेतनतोक्ता चित्तवति हि निसं लुग्वक्ष्यते परिजप्य इत्यस्य विवरणं जेतुं शक्य इति
महानाम्न्यो नामेति तथा चाभाषितपुंस्कत्वात् पुंवद्भावो नेति भावः हारद्रत स्त्विति यौगिकोयं न तु रूढ इति मन्यते अव्ययसंघातादिति वचनसामर्थ्याद्वाक्यादपि
प्रत्यय इति भावः कल्याघत् काल्यं शीतमिति प्रातःकाले कल्यशब्दस्य वृत्तस्य संततं मृगयं प्रकृष्टे ठञ् प्रकृष्यते यमिति प्रकृष्टः कर्मणि क्तः ठञ्ग्रहणं विस्पष्टार्थं अन्यथा अनंत
रस्य पतेनानुवृत्तिराशंक्येत ठञः पूर्णो वधिः तेन तुल्यं क्रिया चेद्वतिः तुल्यमिति सामान्येन पुंसकं ब्राह्मणेनेति ब्राह्मणशब्दः तत्कर्तृकेऽध्ययने लक्षणया वर्त्तते ब्राह्मण
कर्तृकाध्ययनतुल्यमध्ययनं वा वाक्यार्थः गुणतुल्ये इति अक्रिययातुल्य इत्यर्थः अत एवमहानसवदितिवतेः साधुत्वरक्षणार्थं प्रतिज्ञा वाक्योवत्विमान भवितुमर्हतीत्या।

दिक्रियापदं प्रयुंजते वृद्धाः अर्वाचीनास्तु महानसमदृशपर्वते इति व्याचक्षाणाः सूत्रविरोधादुपेक्ष्याः ननु तद्धीत्याद्युत्पन्नस्य तादृशबोधोप्यनुभवसिद्ध इति चेत् सत्यं
तादृशेऽर्थे साधुत्वमात्रं निराकुर्मो न तु बोधमपि तथाहि मेघमेदकसंबंधोपाधिभेदनियंत्रितं साधुत्वं तदभावेपि बोधो नेह निवार्यते अव्युत्पन्नस्य साधुभ्योप्यबोधा
त् तत्रैव व्युत्पन्नस्यासाधुभ्योपि बोधाच्च कस्मात् किं बुध्यते इति न नियंतुं शक्यं किं तु किं विशेष्यके किंप्रकारके किंसंसर्गके बोधे तु दृश्ये किं साधु किं नेत्येव शा
स्त्रीयविचारविषयः उक्तं हि भगवता समानायामर्थावगतौ शब्दैश्चापशब्दैश्च भक्ष्याभक्ष्यादिवन्नियमः क्रियत इति तत्र तृत्येव द्रव्यगुणादितुल्यार्थ आ
रंभः क्रियाचेदिति नानुवर्त्तते तदर्हं अर्हशब्दः पचाद्यजंतः तद्योगे कर्मणि षष्ठी प्राप्ता सौत्रो विभक्तिव्यत्यय इत्येके अन्ये तु कर्तृकर्मणोरिति षष्ठ्याः अनित्य
त्वलिङ्गमिदं तेन धर्म्येणामोदमुत्तममिति भट्टिप्रयोगः समाहित इत्याहुः विधिमर्हतीति द्वितीयांतादेव प्रत्यय इति स्फुटीकर्त्तुं तिङंतेन विग्रहः कथं तर्हि त
तो यथावद्विहिताध्वरायेति उच्यते यथाशब्दो वृत्तिविषये स्वार्थिकः तथा त्वं यथा त्वमित्यादिषु त्वतलादिदर्शनात् तथा च द्वितीयांतादर्हार्थे वतिः यो
ग्यतामर्हतीति विधानमाख्यानं चेत्यर्थो क्रियायोगोपि सुलभः तस्य भावस्त्वतलौ प्रकृतीति ननु यः कश्चिद्धर्मः घटत्वमित्यत्र द्रव्यत्वादेरभावात् गोर्भाव इति इ
ह गोशब्दोऽर्थपरः शब्दस्वरूपपरो वेति पक्षद्वयं आद्ये धर्मविशेषः प्रत्ययार्थः स च धर्मत्वेनैव भासते प्रकृतिजन्येत्यादि स्वप्रयोगोपाधिः द्वितीये जन्य
बोधप्रकारः प्रत्ययार्थः बोधः प्रकारमात्रं वा जन्यत्वं तु संसर्गः सर्वं चेदं सूक्ष्मदृशां भाष्यकैयटारूढमेव एवं स्थिते कृत्तद्धितसमासेषु एकार्थीभावाभ्यु
पगमात् तदुत्तरं त्वतलादिभिरपि उक्तरीत्यैवार्थबोधनिर्वाहे तत्र नापूर्वं शक्त्यंतरं कल्प्यं किं तु तत्र प्रकृतिप्रत्यययोः पूर्वोत्तरपदार्थयोश्च संसर्गोपि प्रायेण प्र
कासते प्रविशति औपगवो राजपुरुष इत्यादौ लुप्तषष्ठ्यर्थस्य वृत्तौ प्रवेशे विशेषाभावात् पाचक इत्यादावपि कारकाणां प्राधान्यात् कर्तृत्वादेश्च संबंधवि
शेषात्मकत्वात् तदेतदभिप्रेत्य हरिटीकायामुक्तं कृत्तद्धितसमासेभ्यः संबंधाभिधानं भावप्रत्ययेनेति विस्तरः शब्दकौस्तुभे बोध्यः पृथ्वादिभ्य इमनिज्वा अणा
दीति ये इगंता लघुपूर्वाः पृथुमृदुप्रभृतयस्तेष्वणः समावेशः चडरवडादिषु गुणवचनेषु ष्यञः बालवत्सादिषु वयोवचनलक्षणस्याञः इति बोध्यं त्वतलौ तु पूर्वसूत्रे
णैव लभ्यौ वर्णदृढादिभ्यः गुणवचनत्वादेव सिद्धे इमनिजर्थं वचनं औचितीति ब्राह्मणादेराकृतिगणत्वात् ष्यञ् हलस्तद्धितस्येति यलोपः एवं याथा

म·सु·
९८

कामी अत्र गणसूत्रे· वेयातविलाभमतिमनःशारदानां विशब्दादुत्तरे ये यातादयः पंचतदंतानां समासानां अनंतरः ष्यञ् भवतीत्यर्थः वियातत्वं वियातता वियाति
मा वैयात्यं विलाभत्वं· विलाभता विलाभिमा वैलाभ्यं विमतित्वं विमतिता विमतिमा वैमत्यं संज्ञात्वादणपि· वैमतं विमनस्त्वं विमनस्ता विमनिमा· वैमन
स्यं विशारदत्वं विशारदता वैशारद्यं विशारदिमा· समो मतिमनसोः संमतित्वं संमतिता संमतिमा सांमत्यं पूर्ववदण् सामतमित्यादि गुणवचनब्राह्मणादिभ्यः कर्मणि च क्रिया
कार्य्ये च ब्राह्मणादिराकृतिगण इति केषांचित्पाठस्तु काश्यांतरायतथा हि अर्हतो नुम् चेति नुमर्थः पाठः एकभाव त्रिभाव अन्यभाव इति एषां पाठः स्वार्थे
विधानार्थः तथा च वार्त्तिकप्रयोगः अन्यभाव्यं तु कालशब्दव्यवायादिति यत्तु व्याकरणाधिकरणेऽपप्रयोगोयमिति भट्टैरुपन्यस्तं तत्पूर्वपक्षिणः प्रौढि
वादमात्रं प्रायेणांतस्मिन्नघट्टके तादृशानामेवोपन्यासात् तद्यथा अविरविकन्यायेनेत्युदाहृतं तदपि हि वस्तुतो निर्दोषमेव अविः अविकः अनयोर्म
ध्ये विकारादिप्रत्ययः कप्रत्ययांतादेव न तु केवलात् तेन आविकं मांसमिति भवति ननु आवमिति व्युत्पादितं तत्र अविरविक इति सुवंतद्वयसमुदाये चर
मं सुपं विहाय प्राग्भागमनुकृत्य अविरविकन्यायेनेति भगवताव्यवहृतं तत्र को नाम दोषः न हि विभक्तिविशिष्टमेवानुकर्त्तव्यमिति नियमे बीजमस्ति अ
स्य वासीयमित्यादि निरूढव्यवहाराच्च एतेन नासदासीयं त्रस्यसूक्तमिति शांकरभाष्यप्रयोगोपि व्याख्यातः आसीदित्यत्र तकारं विहाय प्राग्भागस्यैवानुक
रणात् प्राग्नीश्वरादित्यादावप्यनर्थकस्यैकदेशस्यानुकरणं प्रसिद्धमेव अस्तु वा आसीदिति तांतस्यानुकरणं ततः अनुकरणं चानितिपरमिति निपातस्या
द्रव्यपत्वे अव्ययानां भमात्रे इति टिलोपः प्रकृतमनुसरामः सर्ववेद इति पूर्वकाले केति समासः चतुर्वेद इति तद्धितार्थे द्विगुः अणो लुक् चतुर्विध इति वि
धाल स्मरणसूत्रांतादिति ठक् तस्य लुक् संघातग्रहणमिति वर्णग्रहणे तु अकारस्य यस्येति लोपे तस्य पूर्वविधौ स्थानिवद्भावाद्यादेशः स्यादिति भावः ननु
संघातग्रहणेपि अलोंत्यस्येति कुतो नेति चेत् आरंभसामर्थ्यात् नानर्थकेऽलोंत्यविधिरिति निषेधाद्वा कपिञ्जलयोः इहक पिञ्जलीशब्दौ द्वौ अर्थावपि द्वौ
तयोः यथासंख्यं नेष्यते एवं पत्संत पुरोहितादिभ्यः हायनांत युवादिभ्यः द्वंद्वमनोज्ञादिभ्य इत्यत्रापि बोध्यं ब्राह्मणादित्वादिति यद्यपि ब्राह्मणादिषु राजशब्दः
केवलः पठ्यते तथाप्ययमेवास्मेद्दति प्रतिषेधो ज्ञापयति अस्त्यत्र राजशब्देन तदंतविधिरिति एवं च ब्राह्मणादिपाठस्य समासे चरितार्थत्वाद समासे विशेषवि

एम·
९८

हितोयगेव भवति अत एव अवेक्ष्यधिकरणेगत्र :कर्मण्यं ब्राह्मणादित्वात्ष्यञिति शावरभाष्यं भट्टपादैर्दूषितं केचित्तु भाष्यं समर्थयमानाः इत्थमाहुः ब्राह्म भ
णादेराकृतिगणत्वादेव तदंतात्ष्यञि सिद्धे राजशब्दस्य तत्र पाठो यका सह समावेशार्थ इति एतच्च हरदत्तमाधवाभ्यामेकीयमतत्वेनोपनिबद्धं प्राणभृज्जाति
प्राणिजातौ सेवसुवचं प्राणभृदिति किं तृणत्वं जानीति किं देवदत्तत्वम् औद्गात्रमिति उद्गात्रादिषु येऽकृत्वि ग्वचनास्तेभ्यो होत्राभ्यश्छ इति छे प्राप्तेऽन्भ
विधीयते सुष्टुदुष्टुशब्दाभ्यां गुणवचनलक्षणेष्यञि वधूशब्दादिगंतलक्षणोऽणि श्रोत्रियस्येति श्रोत्रियंश्छंदोऽधीत इति छंदसः श्रोत्रभावः घश्च प्रत्यय
इति यदाख्याख्यानं तदेह यलोप इति यथाश्रुतं यदानुवाक्यार्थं पदवचनमिति पक्षः तदा घशब्देनेय इति रूपं लक्ष्यते क्वचित्तु यलोपश्चेति पाठः तत्र येति संघा
तग्रहणं द्रष्टव्यं इगंताच्च लघुः पूर्वावयवोपस्येति प्रातिपदिकविशेषणं पूर्वत्वं च संनिधानादिग्वधिकमेव इगंतात्किं घटत्वं लघुपूर्वात्किं पाण्डुत्वं क
र्यं काव्यमिति यद्यपि कुधातोः ओरावश्यके इति ण्यति काव्यमिति सुसाधं तथापि कवेः कर्मेत्यर्थे काव्यमिति स्यादिति प्रश्नः आभिधानीयकमिति अभिधानीय
स्य भावः कर्मवेत्यर्थः महापाठे इति सूत्रेणानित्ये प्राप्ते विकल्पार्थं वचनं गोत्रचरणात् अपत्याधिकारादन्यत्र लौकिकं गोत्रं तेनापत्यप्रत्ययांतेभ्य इत्यर्थः प्रवर
ध्यायेपठितेभ्य इत्यपरे गोत्रं च चरणैः सहेति जातित्वात् प्राणभृज्जातीत्यञि प्राप्ते वचनं श्लाघेत्यादि श्लाघादिषु विषयभूतेष्वित्यर्थः प्राप्त इति इणः प्राप्त्यर्थ
त्वात् अवगतवान्वेति अवपूर्वस्य णो ज्ञाने प्रसिद्धत्वात् गार्गिकयेति आपत्यस्येति यलोपः होत्राभ्यश्छः होत्राशब्द इति जुहोतेस्त्रन् ब्रह्मणस्त्वः नेति वा
व्यवृत्तिं छप्रत्यये प्रतिषिद्धे तस्य भावस्त्वतलावित्येव त्वः सिद्धः विभक्तेरनुवर्त्तनात् लाघवं चेति भावः ब्राह्मणेति अनेन होत्राभ्य इत्यनुवृत्तेः फलं दर्शितं न त्व
[illegible]कारः समाप्तः धान्यानाम् भवनापेक्षया कर्तरि षष्ठीयं भवत्तिरिहोत्पत्तिवचनः व्रीहिशाल्योः निर्देशादेव षष्ठी समर्थविभक्तिः सा च भावनापेक्षया कर्त्तरि
त्युक्तमेव अलौकिकप्रक्रियावाक्ये तु तद्धितविधावनुवादसामर्थ्यादेवेति बोध्यं यवयवक अत्र प्रत्ययार्थसामर्थ्यलभ्या षष्ठी समर्थविभक्तिः विभाषा स्वत्रि
प्राप्ते वचनम् न च उमाभंगयोर्धान्यत्वे विप्रतिपत्तव्यम् शणसप्तदशानि धान्यानीति स्मरणात् तत्र चोमाभंगयोरपि पाठादिति भाष्ये स्थितं सर्वचर्मणः अत्र
तृतीया समर्थविभक्तिः सामर्थ्यात् कृत इति हि प्रत्ययार्थः तत्र चर्मणः कृतत्वमेवोचितं यथा मुखं दृश्यतेऽस्मिन्निति दर्शनं आदर्शादिः अधिकरणे ल्युट् न

म·सु·
९९

नु अ साद्दृश्य इति प्रतिषेधात् कथं समासस्तत्राह । निपातनादिति एतच्च वृत्तिग्रन्थमनुसृत्योक्तं भट्टिकाव्ये तु पदार्थानतिवृत्तौ यथाशब्द आश्रितः तथा च मायामृगं
प्रक्रम्योक्तं यथामुखीनः सीतायाः पुप्लुवे बहु लोभयन्निति यथामुखं दर्शन इति अव्ययीभावस्यापि यथामुख शब्दस्योन्मत्तगंगादिवत् स्वं वचनस्यात् कर्म
शक्तियोगे सप्तमी तत्र योगलक्षणा षष्ठी नाव्ययीभावादित्यम् सर्वस्मिन्संमुखस्येति तु नोक्तं प्रत्ययसन्नियोगेनांत्यलोपे निपातनात् समृशब्दस्त समंशब्द
स्यार्थे प्रयोगेण न दृश्यते संमुखो भवेत्यत्राभिमुखो भवेत्यर्थप्रतीतेः तत्रैवात्मस्य पस्यानिष्टत्वात् कथं तर्हि संयुगे संमुखीनं तमुद्दंष्ट्रसेहे तकः इति भट्टिः अ
भिमुखावस्थानात् साधर्म्यादिति हरदत्तः सर्वपथीन इति पूर्वकालैकेति समासः अकृपूरिति समासांतः तस्य पथ्यंत समासग्रहणे न ग्रहणात् ख अनुपदस
र्वी बद्धाभक्षयति नेयेष्विति निपातनात् तिङ् तस्य ढः अनुगवामइति यस्य चायाम इति पथार्थे यदव्ययमिति वाव्ययीभाव इत्यर्थः स्थलविशेष इति भाति विशे
ष इति —————— व्याख्यांतरं नयतेः प्रधाने कर्मणि यत् अप्रधाने द्वितीया अत्रेयं द्यूतशास्त्रमर्यादा चतस्रो वीथ्यः प्रत्येकं द्वादशकोष्ठा येताः शा
रास्त्रिंशत् ते चएकैकेन कितवेन पंचदश स्ववामपार्श्वस्थ प्रथमकोष्ठपर्यंतं प्रदक्षिणापसव्यगतिभ्यां नेयाः सर्वेष्वपानयीनाः स सहायस्य शारस्य परै
र्नाक्रम्यते पदं असहायस्तु शारेण परकीयेण बाध्यते एष बहुसंमतोऽर्थः यत्तु कैयटेन द्वयोः पर्युदासेन त्रयोदशानामेवायानयीनत्वे साशयेन मतांतरं
केचित्त्वित्यादिनोक्तं तन्मते द्वे एव वीथ्यौ शेषं प्राग्वत् प्रदक्षिणापसव्ये चएकैकं कितवं प्रतिविवक्षिते न तु कं चित्स्मृति किंचित् ते च पंक्ति चरमकोष्ठस्था
भ्यां द्वाभ्यामितरेषामेवेति वोध्यम् शार इति शृणातेर्नेन द्यूतकाराः परस्परमिति शारः द्यूतसाधनविशेषः वाहुलकात् घञ् परोवर अवरस्येति आदेरिति
शेषः उत्वे कृते आद्गुणः अवारपारगामीति गमेरिनिः आङि णिच्चेति बहुलवचनात्केवलादपि णिनिः भविष्यति गम्यादय इति भविष्यत्कालता न्यासम
कारस्तु आवश्यकेणिनिः सोपि भविष्यत्येवेत्याहुः अद्यश्वीन अविभक्तिको निर्देशो न तु स्त्रीलिङ्गनिर्देशोयं अद्यश्वीनो गोसमूहः अद्यश्वीनं गोमंडल
मित्यादावपीष्टत्वात् आसन्नमित्यर्थ इति अवाचालंबनेति सूत्रेणाविदूर्ये स्तंभेः षत्वविधानादवष्टंभ्यशब्दः आसन्नपर इत्यर्थः अद्यवाश्वोवेति वा
[illegible] प्रतिष्ठाने लक्षणया वर्तते इति दर्शयति प्रसर्पणपर्यंतमिति आगवीन इति आङ्मर्यादाभिविध्योरित्यव्ययीभाव उ

राम
९९

पसर्जनह्रस्वत्वे च कृते खप्रत्ययं ओर्गुणः गोः पश्चादिति पश्चादर्थेऽव्ययीभावः अलंपर्याप्तमिति क्रियाविशेषणं अत्र हस्व... द्वितीयांतादिह प्रत्ययः अनु
गिवत्सस्य क्रियाविशेषणत्वात् न चालंगामीत्यस्य सुप्यजातावितिणिनिप्रत्ययांततयाकृद्योगलक्षणा षष्ठी स्यादिति वाच्यं क्रियाविशेषणात्तदप्रवृत्तेः शो
भनं पाचक इत्यादौ तथा दर्शनादित्याहुः कृत्स्नकृत्यर्थं प्रति हि कर्मत्वं तच्च न भावनामात्रं प्रति तत्कर्मणो विक्लित्त्यादेः प्रातिपदिकार्थत्वाभावात् संकोचे
मानाभावाच्च किंतु विक्लित्त्यनुकूलव्यापाररूपं पूर्णं प्रकृत्यर्थं प्रति कर्मणस्तंडुलादेरेव षष्ठीति तस्याशयः अत्रेदं वक्तव्यं पश्चादर्थेऽव्ययीभावोऽयमिति
निर्विवादं पश्चादिति चास्तातसर्थे निपातिते तच्च यद्यपि विभक्तित्रयसाधारणं तथापीह योग्यताबलात् सप्तम्यर्थवृत्ति अतस्तस्य कर्मत्वायोगात् प्रथमांतादे
वेह प्रत्यय उचितः कृद्योगलक्षणा षष्ठी शंकाप्यत एव नेति अभ्यमित्रात् लक्षणेनाभिप्रतीति समासः क्रियाविशेषणत्वात् द्वितीया समर्थविभक्तिः गोष्ठात्
खञ् गावस्तिष्ठंत्यस्मिन्निति गोष्ठः घञर्थे कविधानमित्यधिकरणे कः अम्बाम्बगोभूमीति षत्वं एकाहेनेति नन्विह ग्रहवृदृनिश्चिगमश्चेत्यपं बाधित्वा प
रिमाणाख्यायां सर्वेभ्य इति घञ् प्राप्नोति अस्ति चात्र परिमाणाख्या एकाहेनेति परिच्छेदावगमात् सत्यं अस्मादेव निपातनादप् अश्वस्येति कर्तरि षष्ठी शा
लीनकौपीने रूढिशब्दावेतौ अवयवार्थे तु नातीवाभिनिवेष्टव्यम् शालाप्रवेशमिति अप्रागल्भ्यादन्यत्र गंतुमशक्तः शालामेव प्रवेष्टुमर्हतीत्यर्थः कूपप
तनमिति यदकार्यं तत्प्रच्छादनीयत्वात्कूपावतरणमेवार्हतीत्यर्थः तदाच्छादनमिति वासः खंड इत्यर्थः अपरस्त्वाह अकार्यशब्दे करोतिः क्रियासामान्यव
चनस्तेन लज्जाहेतुत्वेनाद्रष्टव्यत्वात् गुह्यलिंगं कौपीनं अस्पृश्यत्वात्तदाच्छादनमिति व्रातेन जीवति व्रातशब्दो यद्यपि संघातवाची तथाप्यत्र सभाष्या
दिपर्यालोचनया विवक्षितमर्थमाह शरीरायासेनेति भारवाहनादिनेत्यर्थः सप्तभिः पदैरिति तद्धितार्थे द्विगुः आवाप्यत इत्यर्थे खञ् हैयंगवीनं दोहः
क्षीरमिति गोदोह इति षष्ठीसमासः ह्यस्शब्देन सह सुप्सुपेति समासः ततो विकारोऽनुदात्तलक्षणस्याजोपवादः खञ् अत्र ह्यस्शब्देन कालप्रत्यासत्तिर्वि
वक्षिता नवनीतमिति यद्यपि भाष्ये वृत्तौ च घृतमित्युक्तं अमरेणापि तत्तु हैयंगवीनं यत् ह्योगोदोहोद्भवं घृतमित्युक्तं तथापि नवनीतमेव तत्र विवक्षितमिति ह
रदत्तादयः तस्य पाकः पाकः परिणामः मूलमुपक्रमः जाहच् बीजकारस्यानेत्वं प्रयोजनाभावात् पक्षतिरिति प्रतिपत् पक्षिणां पक्षस्य मूलं च तेन वित्तः वित्तः

प्रतीतः वित्तो भोगप्रत्यययोरिति निपातनात्साधुत्वम् विद्याचंचुरिति उकारद्वयगर्भोयंप्रत्ययः विनञ्भ्यांनानाञौनसह नाञो ञकारो वृद्ध्यर्थः स्वार्थश्चसंप्रोदश्च चा
द्वेः क्रियाविशिष्टसाधनवाचकात्स्वार्थेप्रत्ययः रूढशब्दाश्चैते अलाबूतिलेसादिभंगाभ्यइतिपाठः भंगाशब्दष्टावंतः विकारप्रत्ययापवादोयम् रजोविकारत्वा
त् अलाबूकटमिति ओरञ् मयड्वैतयोरितिमयड्वैह प्राप्तः तिलोमाशब्दाभ्यां घृतादित्वादंतोदात्ताभ्यामनुदात्तादेश्चेत्यञ्मपठ्च प्राप्तः उमोर्णयोर्वेति वुञ्च असं
ज्ञेत्यमीलयवाभ्यामितिमयड्वैतिहरदत्तः तत्रतिलशब्दस्य घृतादित्वकथनेवीजंचिंत्यं तृणधान्यानांचद्व्यषामितिफिट्सूत्रेणाद्युदात्तस्यैवन्याय्यत्वात् तथैवतद्धृत्ता
वुदाहृतत्वात् तिलाश्चमेइत्यत्रतथैववेदपाठाच्चेतिदिक् भंगायास्तृणधान्यानांचद्व्यषामित्याद्युदात्तत्वादणमयड्वाप्राप्तः गवांस्थानमिति तस्येदमित्यर्थेसर्वत्रगो
जादिप्रसंगेइतियत्प्राप्तः संघातइति अप्रसृतावयवः समूहः संघातः प्रसृतावयवस्तुविस्तारः कटच्चौद्वावपिसामूहिकानामपवादौ द्वित्वेइतिप्रकृत्यर्थस्या
द्वित्वेद्योत्येइत्यर्थः उष्ट्रगोयुगमिति अवयवसंघातप्राधान्यादेकवचनम् द्वयंयुगमित्यादिवत् एवमग्रेपि अवटीटमिति नासिकासाधनेनमनेचवर्त्तमानात्स्वार्थे
प्रत्ययः क्तिन्नस्य अत्रवदंति अस्येतिनवक्तव्यं क्तिन्नेचस्तुषीचिट्वेपिट्वे पुरुषेतुमत्वर्थेःच अर्शआदिषुस्वांगाद्धीनादितिसूत्रितत्वात् अमरोप्याह सुः
क्तिन्नास्ते चिट्वचुट्वपिट्वाः क्तिन्नेक्षिणचाप्पमोइति वार्तिकमतेतुपुरुषेप्युत्सादित्वान्नांतदवयवेल क्षणयाबोध्या प्रमाणेद्वयसच् प्रमाणेविद्यमानात्प्रथ
मांतादस्येतिनिर्दिष्टेप्रमेयेर्थेत्रयः प्रत्ययाः स्युः प्रमाणमिहपरिच्छेदकमात्रंतत्रमात्रच् द्वयसज्दघ्नचौतुविशेषेस्मर्येते तथाचभाष्यं प्रथमश्चद्वितीयश्चऊ
र्ध्वमानेमतौममेति ऊर्ध्वावस्थितेनयेनमीयतेतदूर्ध्वमानंऊर्ध्वादितेनतिर्य्यङ्मानादौनभवति अतएवद्विकांडाक्षेत्रभक्तिरित्यत्रद्वयसचोलुगितिप्राचोप्र
यः प्रामादिकइत्यवोचाम प्रमाणेलइति लुक्एषापूर्वाचार्यसंज्ञा प्रमाणशब्दत्वेनयेप्रसिद्धादिष्टिहस्तादयः ततः परस्यैवायंलुक्शमोदिष्टिवितस्तिरितिएषु
मात्रचोलुक्इतरयोरसंभवात् शमादीनामनूर्ध्वमानत्वात् द्विगोर्नित्यमिति द्विगोरप्रमाणत्वात्तदंतविध्यभावाच्चपूर्वेणाप्राप्तोलुग्विधीयते ननुनेहविकल्पःप्र
कृतः तत्किंनित्यग्रहणेन अत्राहुः अनुपदंवक्ष्यमाणःसंशयेमात्रच् शममात्रंइत्यादौयथानलुप्यते प्रमाणेलइत्यस्य पूर्वविधिविषयत्वात् एवंद्विगोरपिन
लुप्येत इष्यतेचलुक् द्वौशमौस्यातांनवाद्विशमइति तथाचाधिकसंग्रहार्थेनित्यग्रहणमिति पुरुषहस्तिभ्यामणच इनण्यनपत्येइतिप्रकृतिभावः हास्तिनम्

अत्र काशिका द्विगोर्नित्यं लुक् द्विपुरुषमुदकमित्यादि यद्यपि प्रमाणे लः द्विगोर्नित्यमित्यस्य नायमनुवादः पुरुषहस्तिनोः शमादि वयसप्रमाणत्वेनाप्रसिद्धत्वात् अतएव
वहि पुरुषद्वयसमित्यादौ प्रमाणे लइति लुक् न भवति तथाप्यपूर्वो लुग्विधीयते इति हरदत्तः एतच्चासंगतं मणिवादी नाप्रतिषेधइत्यत्र मुनित्रयानुक्तत्वादप्रामाण्यम्
मुक्तवद्विर्न्यायसाम्याद्धिहापि तथैव वक्तुमुचितत्वात् वस्तुतस्तु विधीयते इत्यस्यानुमीयते इत्यर्थः अयं भावः द्विगोस्तद्धितलुकीत्यनुवर्त्तमाने पुरुषात्प्रमाणेऽन्यतरस्या
मिति ङीब्विकल्प्यते तदेव लुकमनुमापयतीति अनुमीयमानश्च लुक् द्वयसजादीनां न लगाः प्रहणवता प्रातिपदिकेन तदंतविधिप्रतिषेधात् द्विगोर्लुगः प्राप्त
भावात् यत्तदेतेभ्यः यावानिति आसर्वनाम्नः इत्यात्वेन नु प्रमाणे इत्येवानुवर्त्त्यतां किं परिमाणग्रहणेनेति चेत् अत्र वार्त्तिके डावतावर्थवैशेष्यान्निर्देशः पृथगु
च्यते मात्राद्यप्रतिघाताय भावः सिद्धश्च डावतोरिति अस्यार्थः इह शास्त्रे वतुपं विधास्यते तस्मिन्परे आत्वं विहितं पूर्वाचार्यैस्तु डावतुं विदधिरे तद्वैत्यानिर्देशाय डावत
विति विशेष्यते इति विशेषस्तस्य भावो वैशेष्यं तस्मादर्थभेदादित्यर्थः प्रमाणपरिमाणयोर्भेदस्य प्रागेवोक्तत्वादिति भावः स्यादेतत् एवं सति यावान्ध्या यावती रज्जु
रित्यादि न स्यात् आयामस्तु प्रमाणं स्यादित्युक्तेः उपमानाद्भविष्यतीति चेत् तर्हि प्रमाणग्रहणमेवानुवर्त्त्यतां उक्तप्रयोगाश्च मुख्याः संतु ये तु परिमाणप्रयोगाः याव
न्धान्यराशिरित्यादयः त एवोपमानाद्भवंतु तत्राह मात्राद्यीति विशेषविहितो हि वतुप् मात्रजादीन्बाधेत तेन तन्मात्रमित्यादि न स्यात् परिमाणग्रहणे सति तु भिन्नो
पाधिकत्वात् बाध्यबाधकभावो नेति भावः नन्वेवमपि बाधः स्यादेव पूर्वत्र सूत्रे प्रस्थमात्रमित्यादिसिद्धये प्रमाणग्रहणस्य परिच्छेदकमात्रपरतया व्याख्यातत्वेन वतु
यो विशेषविहितत्वानपायात् तस्माद्वतुवित्त्येव सूत्र्यतां मास्तु परिमाणग्रहः अस्तु च प्रमाणे इत्यर्थाधिकारः एवं च यावती रज्जुः यावान्धान्यराशिः यावतीष्टि
रित्यादि त्रिविधप्रयोगा अपि उपचारं विनैव निर्वहंतीत्यपरमनुकूलं अत आह भावः सिद्धश्चेति डावतोरिति पंचम्यंतं अर्थभेदे सति वत्वं तावन्मात्रजादीनामुत्सा
र्तिः सिध्यति तत्परिमाणमस्य तावद्धान्यराशीकृतं तावत्प्रमाणमस्य कुड्यादेस्तावन्मात्रं पादप्राशीकृतस्य धान्यादेर्दैर्घ्यं तादृक्कुड्यादेरपीत्यर्थः एकविषयत्वे तु व
तुपैव विशिष्टप्रमेयस्योक्तत्वात्तदंतान्मात्रजादयो न स्युः यस्य हि तावत्प्रमाणं तस्य तदपि एवं च तावच्छब्द एव प्रयुज्येत अन्यथा मात्रजादिप्रत्ययमालाप्रसंगात्
किमिदंभ्यां कियानिति इदं किमोरीश्की यस्येति लोपः इयानिति प्रत्ययमात्रमिहावशिष्यते पठंति च उदित्वत्वात् परस्मिन्प्रत्यये शास्त्रे योनौ गतवतीति विलयं समाक

तेपि प्रपंचे सपदि पदमुदीतं केवलः प्रत्ययो यत्तदियादिति मिमीते कोहृद्यापंडितोपि वैयाकरणानामौपनिषदानां च प्रक्रियामाश्रित्य समहत्तौ ह्यर्थोपपत्तौ कः कि
मः संख्यायाः परिमाणस्य परिच्छेदः तस्मिन्कर्त्तव्ये यः प्रश्नः तत्र वर्त्तमानात् किमः अस्येति षष्ठ्यर्थे इतिः स्यात् संख्यापरिमाणे किं स्वेपेमाभूत् केषमेषां दशानां सं।
ख्या अव्रतानाममंत्राणां जातिमात्रोपजीविनाम् सहस्रशः समेतानां परिषत्त्वं न विद्यते इत्येवं संख्येयद्वारेण हसंख्यागाः कुत्सा बोध्या संख्याया अवयवे
यं 2 ... प्रदत्त्वं सोऽवयवी प्रत्ययार्थः अस्येत्यधिकारात् यथा द्वयसजादिषु प्रमाणं प्रकृत्यर्थः प्रमेयं प्रत्ययार्थस्तद्वत् उभादुदात्तो नित्यं इहांतोदात्त
त्वं विधिस्वरेणैव सिद्धं सर्वोदात्तत्वं तु बाधितं अनुदात्तं पदमेकवर्जमिति वचनात् न चेह उभये सत्रामंत्रिताद्युदात्तत्वं बाधितुं वचनं पुरस्तादपवादन्यायेन।
चित्स्वरस्यैव बाध्यत्वात् तस्मादुदात्तवचनसामर्थ्यादादेरेवायम् तथाप्यप्रयुज्यते उभयं श्रावववच्चन इति तदेतदाह सचेति शदंत विंशतेश्च प्रत्ययग्रहण
परिभाषया तदंतविधौ सति तदादिनियमः स्यात् तं वारयितुमंतग्रहणं तेन एकत्रिंशं शतं एकचत्वारिंशमित्यादि न चैवं गोत्रिंशदधिका अस्मिन्गोशत
इत्यादावतिव्याप्तिः संख्याया अवयवे तयपित्यत्र संख्याग्रहणानुवृत्तेः अंतग्रहणाच्च विंशतिशब्दानंतरं बोध्याशा द्विशत्यंताच्चेति तेन एकविंशं शतमि
ति सिध्यति अन्यथा ग्रहणवता तदंतविधिप्रतिषेधादिह न स्यात् तस्य पूरणे डट् तस्येत्येकत्वमविवक्षितं पूर्यतेऽनेनेति पूरणं णपंतात्करणे ल्युट् एका
दशानामिति उद्भूतावयवभेदः समुदायः प्रकृत्यर्थः अवयवः प्रत्ययार्थः इह यस्मात्संख्यावाचिनः प्रत्ययविधिस्तदीयप्रवृत्तिनिमित्तस्य एकादशत्वादेः
पूरणे प्रत्ययः यथातिशापने कुत्सिते इत्यादिषु प्रवृत्तिनिमित्तस्यैवातिशयादिकं गृह्यते अंतरंगत्वात्तथेहापि यथा च तत्र याप्यो वैयाकरण इति विग्रहे तनुयाप्यं
वैयाकरणत्वमिति तथेहापीति भावः एवं च वुञ्क्रमेणाध्यायेषु गणमानेषु समर्थः पदविधिरित्यध्यायोपदाचरमं गणयते तेन दासोप्यष्टमो भवत्येव नान्ता
दसंख्यादेर्मट् डटइति डडिति प्रथमांतस्यानुवृत्तस्य नांतादिति पंचम्या षष्ठी कल्प्यत इति भावः यद्यपीह मटः प्रत्ययत्वेपि नक्षतिः तथाप्युत्तरत्र तमट् आगमत्वमेव
एष्टव्यं अनुदात्ततायै ह्यस्यात् प्रत्ययत्वे हि आद्युदात्तः स्यात् तथा चैकरूप्येणैव संदर्भव्याख्यानमुचितं षष्कति इह षष्ठीनिर्देशबलात् षडादीनामागमित्वं ए
वं चानुवृत्तो डट् अर्थात् सप्तम्या विपरिणम्यते तदाह डटीति डट् एव थुट् तु न कृतः षष्ठे जश्त्वापत्तेः चतुर्थे रेफस्य विसर्गापत्तेश्च नैवं पूर्वसूत्रेपि मुगेवास्त्विति वा

यं पंचमः सप्तमइत्यादौ नलोपाभावापत्तेः आद्यस्येति अच्सहितं व्यंजनमक्षरं अच्सहितस्य आदेर्व्यंजनस्येत्यर्थः व्यंजनसहितस्य आदेरच इति व्याख्याने तु र
काच् द्विर्वचनन्यायेन तकारस्यापि लोपः स्यादिति हरदत्तः विशेषणविशेष्यभावव्यत्यासेन व्याख्याने प्रमाणं तु द्वितीयतृतीयचतुर्थेति सूत्रे तुर्यगोणेति निर्देशो भ
वो ध्यः ढेलोपः ङ्योपवाद इति ड्यो द्विशब्दस्य वा देशः न भवति हितीयेति निर्देशात् तृतीय इति रेफसकारः संप्रसारणम् हलइति दीर्घः क्तन आगाद्यसनुत्व
त्तेः त्रेस्त्वचेति नोक्तम् प्रत्ययोमाविज्ञायीति विंशत्यादिभ्यः इह प्रत्यासत्त्यापंक्त्यादिसूत्रे निपातिता विंशत्यादयो गृह्यंते न लोकप्रसिद्धाः विप्रकृष्टत्वात् इति भाष्यम
तं लौकिकानां ग्रहणं तु वृत्तिमतं एकविंशतितम इति यद्यपि भाष्यमते ग्रहणवता प्रातिपदिकेन तदंतविधिर्नास्तीति तदंतविधिर्दुर्लभस्तथापि षष्ठ्या
देश्चासंख्यादेरिति सूत्रे संख्यादिपर्युदासो ज्ञापयति इह प्रकरणे तदंतानामपि ग्रहणमिति एवं स्थिते एकान्नविंशतेः पूरणः एकान्नविंशतितम इत्यपि
सिध्यति लौकिकानां ग्रहणमिति वृत्तिमते तु नैतत्सिध्येत् विंशतेः प्राग्भावित्वादस्याः संख्यायाः स्पष्टं चेदं कैयटहरदत्तादिग्रंथयोः यत्तु प्राचीनप्रक्रियाव्या
ख्यातॄणोक्तं विंशत्यादयोऽत्र लौकिका गृह्यंते न पंक्त्यादिसूत्रनिर्दिष्टाः तथा सत्येकविंशत्यादेर्न स्यात् ग्रहणवतेति तदंतविधिनिषेधात् एकोनविंश।
त्यादेरतिप्रसंगाच्चेति अत्रेदं वक्तव्यं मूलग्रंथो भाष्यमतसाधारणः तस्य बलाद्वृत्तिमतपरतयानयनं तावदयुक्तमनुचितं च किंच तदंतविधिप्रतिषेधाद
तिप्रसंगाच्चेति स्वोक्तिः परस्परविरुद्धा यदि हि तदंतविधिर्न कुत्र स्यात्तर्हि अतिप्रसंगः अथ ज्ञापकात्तदंतविधौ त्वितस्य ध्याहृतस्य कथंचित् स्वोक्तिरपि व्याख्येयसभि
मतं तदपि न एकोनविंशतितम इत्यस्येष्टतया तत्रातिव्याप्तेर्दुर्वचत्वात् [illegible]स्वपक्षे तत्राव्याप्तिरेव दोष इत्यास्तां तावत् इदं त्ववधेयं आनारंभो वा प्रातिप।
दिकविज्ञानाद्यथा सहस्रादिष्विति वदता कात्यायनेन यद्यपि पंक्त्यादिसूत्रं प्रत्याख्यातं तथापि इहार्थमावश्यकं तत् अत एव तत्र भाष्यकृतोक्तं नासूयाकर्त।
व्यासपत्र[illegible]मः क्रियत इति निस्त्रिंशतादिनत्रुषष्ठ्यादेश्चेत्युत्तरसूत्रेण सिद्धे किं शतादिग्रहणेनेति चेत् मैवं असंख्यादेरिति वक्ष्यति एतत्तु संख्याद्यर्थं तद्धु
नमन्तुदाहरति एकशततम इति मासादेरिति संख्यावाचित्वाभावेपीति भावः संख्यादेस्त्विति एतच्च प्राकृशताद्बोध्यं निस्त्रिंशतादिसुक्तत्वात् मतोऽब्रः मत्व
र्थ इति मतोर्विषय इत्यर्थः तेन समर्थविभक्तिः प्रकृत्यर्थे विशेषणं प्रत्ययार्थश्चेति सर्वं गृह्यते तत्र कुशलः गोषदादिभ्यो वुन्नित्यतो वुन्ननुवर्तते आकर्षादि।

भ्यः कन् वुना सिद्धे कन्ग्रहणमिदं दन्तार्थं अशनिकः शकुनिकः सरकः मुख्य इति हरदत्तस्वारस्यादिति भावः उदराट्ठगाद्यूने अविजिगीषाविति दिवोऽविजिगीषाया
मिति तत्रैव निष्ठानत्वविधानात् सस्येन कर्त्तरि तृतीयेयं परितो जातः परिजातः परिगत इत्यर्थः अत एवेति अकेनोरिति निषेधादिति भावः तंत्राद तंत्रं तंतुवायशा
लायाः कृते तेतंतवोऽस्मिन्निति व्युत्पत्तेः अचिरः कालो पहृतस्येति कालः परिमाणिनेति समासः ब्राह्मणकोष्मिके संज्ञायां ब्राह्मणशब्दादायुधजीवित्वोपाधि
कात् स्वार्थे मांतात्सप्तम्यर्थे कप्रत्ययः अन्नशब्दात्तु अल्पत्वोपाधिकात् तेऽस्रह आयुधेत्यादि शीतोष्णाभ्यां शीतमिव शीतं मंदमित्यर्थः शीतं हि मंदतायुक्तं स
ति शीघ्रकार्यकरणोपाटवाभावात् उष्णमिवोष्णं शीघ्रमित्यर्थः क्रियाविशेषणाभ्यां द्वितीयांताभ्यां प्रत्ययः कृद्योगलक्षणषष्ठी तु क्रियाविशेषणत्वे सुक्तं
अधिकं अध्यारूढशब्दादिति गत्यर्थाकर्मकेत्यादिना रुहेः कर्त्तरि कर्मणि च क्तो विहितः आद्ये कर्मणोऽनभिहितत्वादध्यारूढशब्दयोगे द्वितीया अध्या
रूढो द्रोणः खारीमिति ग्रामं गत इतिवत् तथाधिकशब्देनापि योगे द्वितीयायां प्राप्तायां यस्मादधिकं तदस्मिन्नधिकमिति च निर्देशद्वयात् पंचमीसप्त
म्यौ भवतः द्वितीये तु कर्मणोऽभिहितत्वात्प्रथमा अधिका खारी द्रोणेन अनुका सूत्रे समाहारद्वंद्वे लिंगव्यत्ययः अन्वभिभ्यामिति साधनक्रियावाचि
भ्यामित्याकरः क्रियाविशिष्टसाधनवाचिभ्यामिति तत्स्वार्थः कन्निति स्वार्थे अनृजुरिति तिर्यगवस्थानात्पार्श्वं अनृजुस्तत्साधर्म्यादुपायोपि एवमग्रेपि।
अयः स्थूल अयः स्थूलदंडाजिनशब्दो गौणौ इह शीतोष्णपार्श्वायःस्थूलदंडाजिनशब्देभ्यः मुख्यार्थेभ्यः प्रत्ययो नेष्यते तावतिथं ग्रहणमिति लुग्वा यथा तस्या
पत्यमित्यत्र तस्येति षष्ठ्यंतानां सामान्यनिर्देशस्तथाऽत्र तावतिथमिति पूरणप्रत्ययांतानां सामान्यनिर्देशः कन् स्यादिति अनंतरावपि ठक्ठञौ नानुवर्तेते अ
स्वरितत्वादिति भावः पूरणप्रत्ययस्येति ननु कनः लुग्वा ग्रहणमनर्थकं प्रसंगात् पंचमं पंच कमिति रूपद्वयं हि तेन साध्यं तच्च महाविभाषाधिकाराद्विकल्पे
न कन उत्पत्त्या सिद्धमेव तस्माल्लुग्वा ग्रहणं कुर्वतः सूत्रकारस्य पूरणप्रत्ययलुगेवाभिमतः वृत्तिकृता च तथैव व्याख्यातमिति तदनुरोधेनेहापि व्याख्यातमु
दाहृतं च वार्त्तिककारस्तु कन एव लुगिति व्याख्यानमभिप्रेत्याह तावतिथं ग्रहणमिति लुग्वा वचनानर्थक्यम् विभाषाग्रहणादिति तन्मते द्वितीयकं द्वितीय
मित्येव रूपं बोध्यम् श्रोत्रियंश्छंदोऽधीते छंदःशब्दस्य श्रोत्रभावः घन्प्रत्ययश्च छंदोध्यायिनि निपात्यते श्राद्धमनेन श्राद्धशब्दः कर्मनामधेयम् तत्साधने द्र

ऽपलक्षणायावर्तते आढ्यो आढ्यिकइति अद्यतन एवेष्यते अद्यभुक्तेश्वः आढ्यिकइति माभूत् पूर्वादिनिः पूर्वमिति क्रियाविशेषणाद्द्वितीयांतात्स्वपः छंदसिपर्य
वस्थातृशब्दस्य शत्रुपर्यायात्स्वार्थे इनिप्रत्ययः अवस्थातृशब्दस्य च परिपंथ इत्येतावादेशौ निपात्येते अपसंपरिपंथिनं मात्वापरिपरी विदन् उभयत्रापि परिश
ब्दोऽवग्रहः लोके त्विति अनुपस्थितपारिपंथिभिः पार्थिवैरित्यादौ अनुपदमिति पदस्य पश्चात् पश्चादर्थेऽव्ययीभावः अनुपदीगवामिति पदापेक्षया ष
ष्ठीगोपदात्पश्चादन्वेषणं च गवामेव तेन हिरण्यादावन्वेष्येन भवतीति हरदत्तः साक्षाद्द्रष्टरि साक्षाच्छब्दोऽव्ययं प्रकृतिवदनुकरणमिति सूत्रे पंचम्या लुक्
साक्षीति अव्ययानां भमात्रे टिलोपः क्षेत्रियच् परक्षेत्रशब्दात्सप्तम्यंतात् घच् परशब्दस्य लोपश्च निपात्यते क्षेत्रियो व्याधिरिति किंच क्षेत्रियं विषं यत् पर
शरीरे संक्रमय्य चिकित्स्यते अपि च क्षेत्रियाणि तृणानि पानि सस्यार्थे क्षेत्रे जातानि तानि चिकित्स्यानि विनाशयितव्यानि किंच क्षेत्रियः पारदारिकः परदाराः पर
क्षेत्रं तत्र चिकित्स्यो निग्रहीतव्यः सर्वं चैत दाकरेऽस्थितम् इंद्रियमिंद्र इंद्रशब्दाद्घच् इंद्रेण दृष्टं ज्ञातं मम चक्षुर्मम श्रोत्रमित्यादिक्रमेण सृष्टमिंद्रदृष्टद्वारा।
जुष्टं प्रीणितं सेवितं वा दत्तं यथायथं विषयेभ्यः तदस्यास्त्यस्मिन्निति मतुप् अस्तीति पुरुषवचने विवक्षिते कालस्तु विवक्षित एव इति शब्दो विषय।
विशेषलाभार्थः तथा हि भूमनिंदाप्रशंसासु नित्ययोगेऽतिशायने संसर्गेऽस्ति विवक्षायां भवंति मतुवादयः अस्ति विवक्षायां ये मतुवादयो विधीयंते ते भूमा
दिषु विषयेषु भवंतीति वार्त्तिकार्थः भूमा बहुत्वं तच्च आपेक्षिकं यस्य हि यावदुचितं तावदेव स्वशब्देनापि प्रतीयते यथा पंचषाभिरपि गोभिर्देवदत्तस्य
बह्व्यो गाव इति व्यवहारः राज्ञस्तु सहस्रगोभिरपि गावोऽस्यात् इति गोमान्यवमान् इह यवमतीभिरद्भिर्यूपं प्रोक्षतीत्यादौ जातिमात्रसंबंधस्य विवक्षित
त्वाद्भूमाभावेपि मतुप् भूमादिग्रहणं हि प्रायेण भूमादयोपि प्रतीयंत इत्येवं परं निंदायां ककुदावर्त्तिनी कन्या प्रशंसायां रूपवान् नित्ययोगे क्षीरिणो
वृक्षाः अतिशायने उदरिणी कन्या संसर्गे दण्डी संसर्गः संयोगः तेन संयुक्त एवोच्यते ननु गृहावस्थिते दंडेपि गुणाग्रहणमिति तेन शृंगाररसिक इति
सिद्धं रसशब्दस्यात्र इच्छावाचित्वात् गुणवचनेभ्य इति गुणेन तद्वति च प्रसिद्धाः शुक्लादय एव गृह्यंते तेन तु रूपादयोपि मादुपधायाः मवश्चम समा
हारेद्वंद्वः तेन मतुवाक्षिप्तं प्रातिपदिकं विशिष्यते तदाह मवर्णावर्णांतादिति उपधायाश्चेति वाक्यांतरं उपधाभूतात् मात्परस्य मतोरित्यर्थः येन नाव्यवधा

नञ्पाठेनांसाल्या वहितेपि भवति एवमक्षरार्थे स्थिते फलितमाह मवर्णावर्णोपधादिति अपः इदमप्याक्षिप्तस्य प्रातिपदिकस्य विशेषणं तदाह झयंतादि यत्तु केचित् व
न्हिमद्वानित्यादि प्रयुंजते तत्प्रामादिकमेव मत्वंतात् मतुपो निषेधात् अपदांतत्वे जश्त्वायोगाच्च प्राणिस्थात् शिखावान्दीप इति प्रत्युदाहरणादिगियं दर्शिता
शिखाशब्दस्य ब्रीह्यादिषु पाठेन लचोऽप्रसंगात् चूडावानृक्ष इति तु प्रत्युदाहार्यं प्राण्यंगादेवेति एतच्चेतिकरणानुवृत्तेर्लभ्यते सिध्मादिभ्यश्च अत्र वार्त्तिके
लजन्यतरस्यामिति समुच्चय इति अस्यार्थः प्राणिस्थादिति सूत्रे णालच्विकल्पिते पक्षे मतुविति चूडालः चूडावानिति ह्रस्वस्य यद्यपि सिध्यति तथापि सि
ध्मादिषु दोषः तत्र हि सिध्मानि पावमासेत्यादयो येऽदंतास्तेभ्य इनिठनौ स्यातां तस्मादन्यतरस्यां ग्रहणं समुच्चयार्थं निपातानामनेकार्थत्वात् तेन मतुप् समु
च्चीयते तस्यैव प्रकृतत्वात् अस्ति चेह लिंगं केशाद्व इत्यत्रा न्यतरस्यांग्रहणं तद्धि इनिठनोः प्राप्त्यर्थं क्रियते प्रकृतस्यान्यतरस्यांग्रहणस्य विकल्पार्थत्वे तु
तदनुवृत्त्यैव सिद्धौ किं तेन क्रियमाणं तु पूर्वस्यान्यतरस्यांग्रहणस्य समुच्चयार्थतां ज्ञापयतीति स्थितमाकरे लज्वेति वाशब्दः समुच्चये वा स्याद्विकल्पोपमयोरे
वार्थेपि समुच्चय इति कोशात् वातेत्यादि सिध्मादिगणसूत्रं ऊङ्इति ङित्वादंतादेशः वातूल इति अंतोदात्तः यत्तु प्राचा वलात्तूलवातश्च इत्युक्तं तदुपेक्ष्यं
प्रत्ययस्वरेण मध्योदात्तप्रसंगात् गणसूत्रबलेनांतोदात्तस्येष्टत्वात् पार्ष्णिधमन्योर्दीर्घश्च पार्ष्णीलः धमनीलः क्षुद्रजंतूपतापाच्च यूकालः मक्षिकालः उप
तापो रोगः विपादिकालः इत्यादि वत्साभ्यां कामबलेति कामबलशब्दौ सूत्रे मत्वर्थीयाच्प्रत्ययांतावितिभावः वत्सल इति स्नेहवानित्यर्थः वृत्तिविषये
वत्सांसशब्दौ स्नेहबलयोर्वर्तेते यद्यपीह प्रकरणे सर्वत्र मतुप् समुच्चीयते तथापीह नेष्यते मतुवंतेन तु अर्थांतरमेव प्रतीयते वत्सवती गौः अंसवान्दुर्बलः
लोमादि इह लोम पामपिच्छादिभ्य इति सुवचम् नेदिग्रहिपचादिभ्य इतिवत् अंगकल्याण इति गणसूत्रमर्थतः पठंति अंगादिति शाकीपलालीदद्र्वा ह्रस्वत्वं
च मह च्छा कंशाकी तद्वत् शाकिनं महत्पलालं पलालीनं दद्रुलालिनं दारिद्र्यं तेर्या लोपश्च चाद्रूः दद्रूः त्वक्रोगविशेषः तद्वान्दद्रुणः विषुणा इति विषुना
नां अंचतीति विष्वं वितान्यस्य संतीति विषुणाः विषुवदाख्यं कालः तस्य हि नानागतानि दिनानि संति दिनांतराणां न्यूनाधिकभावस्य तन्मूलकत्वात् तथा मृत्युः
वायुः अनवस्थितचित्तश्च विषुणः [illegible]र्थः इह यदि कृते यणादेशे उत्तरपदलोपः स्यात्तर्हि वलि लोपेपि विष्वु इति स्यात् अत उक्तमकृतसंधेरिति समर्थ्या॥

नामिसस्यापवादोयं प्रज्ञाश्रद्धार्चाभ्यो ण इति प्राज्ञो व्याकरणमिति गुणभूतया क्रियया कर्मत्वेन संबंधः कृद्ग्रहणात्तद्धितप्रयोगे षष्ठी न कृतपूर्वी कटमितिवत् प्राज्ञेति प्रज्ञा।
दिभ्यश्चेत्यणि ङीप् भवति इह तु अपुं [illegible] विह प्रज्ञाग्रहणस्य फलमिति भावः वृत्तेश्चेति वार्तिकं काशिकाकृतानुवृत्तिशब्दः सूत्रे प्रक्षिप्तः विच्छिन्नस्य प्रतिवि।
धानं वृत्तिः तपस्वीति अस्मंतत्वाद्विनि अणा बाधो माभूदिति वचनं सहस्रीति अत्र इनिनाठनपि बाध्यते ज्योत्स्ना इति शुक्लपक्षः तामिस्रः कृष्णपक्षः नरक
विशेषश्च तमः समूहस्तमिस्रं मत्वर्थीयो रः तत्रावयवभूतानि तमांसि विद्यंते तद्दस्मीन्नस्तीति रात्रिदशा स्त्रियां तु तामिस्री यत्तु अमरेणोक्तं तमिस्रा तामसी।
रात्रिर्ज्योत्स्नी चंद्रिकयान्वितेति तत्र रात्रेनत्वसंतमिति न विरोधः सिकता देशविशेषस्य वस्त्वमारामत्वादाह घट इति अत्र सूत्रद्वयस्योदाहरणममरः संजग्रा
ह स्त्रीशर्करा शर्करिलः शार्करः शर्करावती देश एवादिमावेवमुन्नेयाः सिकतावति इति दंत उन्नत करसंज्ञणादं तुरांतो इत्यादय कृ प्रयोगालाक्षणिकाः ऊ
षसुषि समाहारद्वंद्वे सौत्रे पुंस्त्वं ऊषाद्रिलापांसवः सुषिरं च्छिद्रं स्वर इति महत्कंठविवरं चंतद्वानित्यर्थः गर्दभेक कृष्णोयं नगरमिति नगाः वृक्षाः पर्वताश्च जातिशब्दो
यं तथा च नगरीस्यत्र जातिलक्षणो ङीष् भवति पांसुर इति पांडुः शुक्लो वर्णः तद्वान् अव्युत्पन्न एवेति गुणमात्रे गुणिनि च वर्तते हरिणः पांडुरः पांडुरित्य
मरः गुणोप्युक्तादयः पुंसि गुणिलिंगास्तु तद्वतीति इति च कच्छुः कच्छू रोगविशेषः सुदुभ्यामः क्षुम इति द्यौरस्यास्ति दिव उदित्युत्वं केचित्तु घुशब्दं अव्यु
त्पन्नं प्रातिपदिकमुकारांतं अहो नामधेयमाहुः दुर्दृक्षः सोस्यास्ति जनकतयेति सोपि वृक्ष एव पलाशी द्रुद्रुमागमा इत्यमरः इह रूढिशब्देषु मतुमन्तविकल्प
ते· नरपिसंयमतु पाभिधातुमशक्यत्वात् दृश्यत इति वप्रत्ययोनुवर्तते अर्णव बनमि इति अर्णोजलं अर्णैरसुनुद्रयणोति सूत्रेसांहितिको यण ननुस्थस्यादिति।
वत ङीतय सादेशस्यानुकरणं लक्ष्ययणोभावादित्यर्थः प्रयुज्यते चोभयथा अधिरोहति गांडिवं महेष्वाविति गांडीवांकनकशिलानिभं भुजाभ्यामिति च आसु
तीवल इति षुञ् अभिषवे क्तिन् आसुतिरभिषवः परिषद्वल इति परितः सीदंतीति परिषत् सत्सू द्विषेति क्विप् सदिरप्रतेरिति षत्वं पाठांतरमिति शृद्रभसोरि
ति सदिप्रत्ययोबाहुलकात्त एकेरपि भवति तथा च माघ्य पार्षदकृतिरेषा तत्र भवतां सर्ववेदपार्षदं हीदं शास्त्रमिति च प्रयुंजते च पर्षदेषा दशावरेति पर्षद्वलान्
महाब्रह्मैराढ्यै नैकौटिकाश्रमानिति भट्टिः समज्यापरिषत्पर्षदिति चंद्रकोशः भ्रातृवल इति वले इति सूत्रेः णादित्यनुवृत्तेर्न हदीर्घः पुत्रवलादौ तु स्यात् तत्राह संज्ञा

स्यामित्यनुवृत्तेरितिवनगिर्योरितिसूत्रादिति भावः ज्योत्स्ना चंद्रप्रभा तत्रावयवीभूतं ज्योतिरस्तीति मत्वर्थीयोपपत्तिः एतेन तमः समूहे तमिस्राशब्दो व्याख्यातः
कथं तर्हि तमिस्रं तिमिरं तम इत्यमरः समूहसमूहिनोरभेदोपचारात् स्त्रीत्वमतंत्रमिति व्याख्यानमत्र शरणं ऊर्जस्विन्गोमिन्नित्यत्र नांतत्वाभिव्यक्तये न
लोपो न कृतः तुंदादिभ्य इलच्च मतुप्चेति अन्यतरस्यामित्यनुवृत्तेः अत्र स्वांगाद्विवृद्धाविति पठ्यते विवृद्ध्युपाधिकोत्स्वांगवाचिनः इलजादयः स्युः विवृद्धौ क
र्णावस्यकर्णिलः कर्णी कर्णिकः कर्णवान् एकगोपूर्वात् ऐकशतिक इति एकं च तच्छतं चेति पूर्वकालेत्यादिना कर्मधारयः षष्ठीतत्पुरुषाद्बहुव्रीहेर्द्वंद्वाच्च
न अनभिधानात् अत इत्येव नेह एकविंशतिरस्यास्तीति यत्त्वर्थे वत्स[illegible]गोमदिदं नगरमिति मत्वं नान्मत्वर्थीयो लुप्यमं इति भाष्यमुपादाय कैयटो व्याख्यत्
एकगोपूर्वादिति ठञ् भाष्यकारवचनात्लोपः अत इति च तत्र निवृत्तं गोत्रिकादिसिध्यर्थं गवां समूहो गोत्रा सास्मिन्नस्तीति गोत्रिकमिति तत्तु भाष्याभि
प्रायवर्णनमात्रं न तु तात्त्विकं अन्यथा एकविंशतिः एकचत्वारिंशद्वास्यास्तीत्यत्रातिप्रसंगात् अनेनैवापरितोषेणापक्षांतरमाह अथवेति अस्मिंश्च प
क्षे गोत्रिकमित्यनभिमतं लप्स्यते अभिमतत्वे तु प्रमाणं स्यादातइत्यतो मंडूकप्लुत्या आत इत्यनुवर्त्य समाधेयं नित्यग्रहणं मतुपो बाधनार्थं कथमेकद्रव्य
वानिति असाधुरेवायम् एकेन द्रव्यवानिति वा विग्रहीतव्यं कथमेकदण्डीति एकदेशिनैकाधिकरणोइति निर्देशो ज्ञापयति इनिरपि क्वचिद्भवतीति रू
पादाहत आहतप्रशंसाविशिष्टेऽर्थे वर्तमानाद्रूपशब्दान्मत्वर्थे यप् स्यात् आहतमिति आहननमाहतं ताडनमित्यर्थः ततो निष्पन्नं यत्सुरूपादिरूपं तदपि
कार्यकारणोपचारात् आहतमित्युच्यत इति न्यासकारः हिम्या इति भूम्नि यप् गुण्या इति ——— दृशिग्रहणादिनिरपि तथा च माघः गुणप गुण्य इति न व्य
जीगणत् अस्मायायशस्वीति तसौ मत्वर्थे इति भत्वाद्रुत्वं न यशस्वामिति पूर्वेणानित्यग्रहणे न तत्रासंबद्धमप्यन्यतरस्यां ग्रहणं मतुप्समुच्चयार्थमिह सं
बध्यत एव तसौ मत्वर्थे इति सूत्रे यशस्वी यशस्वानिति भाष्योदाहरणादिति भावः किन्त्वेतत्वादिति यत्तु प्राचोक्तं चोः कुरिति तन्न तदपवादत्वात् व्रश्चेति ष
त्वापत्तेरिति भावः यदि तु व्रश्चेति षत्वं स्तुजियज्योः पदान्ते किन्त्वस्य पस्येति कुत्व स्यापवाद इति निष्कर्षो गृह्यते तदा ऋत्विगादिसूत्रेण पदान्तविषये कु
त्वं निपातनादिति बोध्यं हृदयाच्चालुरन्यतरस्यां अन्यतरस्यांग्रहणं इनिठनोः प्राप्त्यर्थं चकारस्य चुटू इतीत्संज्ञा एवमन्यत्रापीति हरदत्तः तेन हृदयालुश

द्वोः तोदात्तः शीतोह्मेतिइहचालुरनुवर्त्तते यत्तुप्राचोक्तं तत्साम्यइति आलुजितिच तदुभयमप्यनाकरत्वादुपेक्ष्यं पुरोडाशइति नतृप्ना उरुव्यचसंइतिमंत्रभाष्ये उ
णादिष्वनिषु वतथाव्याख्यातत्वादितिभावः माधवइतिसुध्वातुवृत्तौस्थितमिदम् हिमाच्चेतिएकारादिरयंप्रत्ययः वलादिति सिध्मादिषुमत्वर्थेतूलवल्लूला
च्चैमकारांतेरणाव्युत्पादितोतः पर्वपित्वमनुदात्तार्थं हरदत्तस्तुतन्निति पठित्वा आद्युदात्तार्थत्वार्थो नकारइत्याह त १ १ १ १ १ १ १ १ ३
च्चिंसंमरुत्तशब्दस्यमध्योदात्तत्वात् तथाहिमरुच्छब्दोमृग्रोरुतिरिसुतिप्रत्ययांतत्वादन्तोदात्तः तस्मात्तपिमध्योदात्तत्वंस्पष्टं तनितु नित्स्वरेणाद्युदात्तः स्या
न चेष्टापत्तिः अपसिद्धांतात् स्यादेतत् मरुतः परिवेष्टारो मरुत्तस्यावसन्गृहइत्यैतरेयब्राह्मणप्रयोगस्तावत्स्वरांशेउदासीनः एकश्रुत्यापाठात् ततकथमभि
मतस्वरावधारणमितिचेत् प्रथमाध्यायस्याकरग्रंथेष्वएवेत्सवेहि उपसर्गसंज्ञायांहिमरुच्छब्दस्योपसंख्यानंपठ्यते तत्रयद्यप्यधिकारबलान्निपातसंज्ञाप्रा
प्तातथापिसानेष्यतेसत्यांहितस्यांनिपाताआद्युदात्ताइतिफिट्स्वरःस्यात् सचमरुच्छब्देपिश्रूयेत तृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरात् किंचनिपात।
[illegible]म[illegible]व्यवगन्त्वेस्यात् ननूपसर्गत्वेप्यड्विधीकृतोनेतिचेत् अनभिधानात् बाहुलकाद्वेत्युत्तरम् संज्ञाप्रयोजनंतुतत्सामर्थ्यादज्ञंतत्वाभावेपिअचउपस
[illegible]प्रवृत्तिः नन्वेवंमरुन्नयतीसत्रतकारव्यवायेपिणत्वंस्यादितिचेत्सत्यं तत्वविधावेवोपसर्गसंज्ञेतिवक्तव्यम् एवंचाड्विधीअपिनेत्यपरमनु
[illegible]सर्वंकैयटहरदत्ताभ्यांस्पष्टमुक्तं तदनंतरंतप्रस्पष्टं ततयापिमरुत्तशब्दस्यव्युत्पादनंकरिष्यतइतिवदन् [illegible]यटः [illegible]मेवपित्वमाह यत्तुमत्वर्थो।
पप्रकरणे हरदत्तआह मरुत्तएनंदेयासुर्मरुत्तइतिव्युत्पत्तावपितृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरोभवन्नाद्युदात्त[illegible]भवति उपसर्गाश्चाभिवर्जमितिफिट्
सत्रादीत् नदतिरभसात् यतःप्रथमशेषेस्वयमेवाहननूपसर्गसंज्ञायामपिउपसर्गाश्चाभिवर्जमित्युदात्तत्वंस्यात्[illegible]आद्युदात्तत्वंविधीयते किंतर्हि
निपाताइत्येवसिद्धे अभेःप्रतिषेधार्थमेतदिति तस्मात्तनोनित्वंस्वीकृत्यप्रवृत्तः पांचमिकोहरदत्तग्रंथः प्राचीनग्रंथास्तु[illegible]पसिद्धांतग्रस्तश्चेतिस्थितं एतेनत
नोनकार[illegible]द्युदात्तार्थइतिप्राचोग्रंथं व्याचक्षाणानांउक्तिरपिप्रत्युक्ता इदंत्ववधेयं उक्तरीत्याउपसर्गाश्चाभिवर्जमितिफिट्सूत्रेसुत्यजं नाभिरित्यिवसुवचं ।
अतिनिष्कर्षंतुनोभिरित्यपिमास्तुएवादिष्वभेःसुपठत्वात् एवादीनामंतइतिहिफिट्सूत्रं एवमादीनामितिपाठांतरं तदेतत्सर्वंमाधवेनऋग्भाष्येध्वनितंतथा
हि आत्वेतानिषीदतेति मंत्रेउपसर्गाश्चाभिवर्जमितिवचनात्प्रातिपदिकत्वोदात्तत्वमित्युक्त्वामानोमर्ता अभिद्रुहन्नितिमंत्रेएवमादीनामंतइत्युपन्यास्यत।

अलंप्रसक्तानुप्रसक्तेनप्रकृतमनुसरामः स्वामिन्नैश्वर्ये ऐश्वर्य्यवाचकादिति स्वशब्दस्यऐश्वर्य्यवाचित्वं एतद्वृत्तिविषयकमेववोध्यं कंशंभ्यां अत्रप्रथमम
स्ययोर्दंतौष्ठ्यादिः नतुपवर्गीयः तदाह अनुनासिकौवयाविति तुंडिवलिवटेर्भः मूर्धन्योपधइतितथाचतुडितोडनेइतिधातौमाधवेनोक्तं तुंडिः इन् वृद्धनाभिः
सास्यास्तीतितुंडिलः तुंदादिभ्यइलच्चेत्यत्रस्वांगात् वृद्धाविति गणसूत्रेणइलच् तुंडिलएवतुंडिभः तुंडिवलिवटेर्भइतिमत्वर्थीयोभइति वटिभइतिवटवेष्टनेइन्
इतिमत्वर्थीयः एतदेन् भाष्यारूढोयंपाठः वृत्तिकारस्तु एतदोश इतिपठित्वाशकारः सर्वादेशार्थइत्याह द्वाभ्यामितिसर्वनाम्न्सप्ताप्रोपितसिल् अद्यादिभ्य
इतिपर्युदासान्न एतेननूनमतः परंवक्ष्यइत्य त्रतसिलभ्रमेणपुष्पदन्तदोर्न्नादिशइत्यात्त माशंक्यसावेविभक्तिकस्ताविभितिपरिहृत्यतसेश्चेतितस्यतसिलादेशे
पुनःप्रेवलेःप्रमाशंकामुक्त्वविभक्तावेवमद्भप्यतइतिसोत्रसयेवसमाधानांतरं कुर्वन्कश्चिन्दुर्घटवृत्तिकारः परास्तः पर्युदासविषयतयाइहतसिलप्रत्ययस्य त
सिलादेशस्यचोक्तिसंभवाभावात् सप्तम्यास्त्रल् इहत्रल्तसिलौस्वतंत्रौप्रत्ययौननुसप्तमीपंचम्योरादेशौ तेनकुत्रवहुत्रकुतः वहुतः इत्यादौअच्चघेःघेर्ङितौ
स्यादिकेनेतिदिक् ननुतसिलोवकाशः कुतोऽवहीयतेकुतोवरोहति तसेस्तु ग्रामतआगतइत्यादिरवकाशः कुतआगच्छतीत्यादौउभयप्रसंगेप रत्वात्तसिःतस्या
विभक्तित्वाभावात्विभक्तिकार्योणिनस्युरितिचेत् मैवं तसेश्चेतिसूत्रेणअद्यादिभ्यः किमादिभ्यःपरस्यतसेस्तसिलादेशविधानात्तंसचविभक्तित्वात् किं
मोत् नविभक्तौतुस्माइतिनेहप्रवर्त्तते घमोहकारेणमकारपरित्राणार्थेनानित्यताज्ञापनात् वाग्रहणमितिकिमोऽद्वेतिसूत्रंपठितव्यंततः ह्वचछंदसीतियद्य
पिभागवृत्तिकारोभाषायांत्रलंनेच्छति वामनस्याप्यत्रैवस्वरसः तथापिवामनोक्तमेकदेशिमतमेवेहपुरस्कृतम् वहुप्रयोगदर्शनात् तथाचामरः साहचर्य्या
च्चकुत्रचित् श्रीहर्षोपिनान्यत्रकुत्रापिचसाभिलाषमिति वाह्वचछंदसिपूर्वोक्तस्यवाग्रहणापकर्षस्यस्फुटीकरणार्थमिदमुपन्यस्तम् अधुनाप्रत्ययइति
निपातनान्मध्योदात्तोयम् भाष्यमतेचेदं वृत्तिकारस्त्वाह इदमोऽशभावःधुनाचप्रत्ययइति सद्यःपरुत् अहनीतिसप्तम्यंतस्याहन्शब्दस्यार्थइत्यर्थः तद्द
र्शयतिसमानेन्हिसद्यइति प्रकारवचनेथाल् सामान्यस्यभेदकोविशेषः प्रकारः यद्यपिप्रकारोगुणवचनस्येत्यत्रसादृश्यंप्रकारः तथापिनेहसादृश्यंगृह्यते अ
नभिधानात् तेनप्रकारेणतथेतिप्रथमांतात्तुनभवतिसप्रकारस्तथेति अनभिधानादितिभावः किंसर्वनामवहुभ्योविशेषविहितेनापिथालाजातीयरनवाध्यते

र्थभेदात् प्रकारे हि थाल् जातीयर् तु न इति स्वभावात् अत एव भाष्ये प्रयुक्तं तथाजातीयोऽन्यथाजातीय इति इदमस्थमुः अनेन एतेन वेति द्वितीयांतादपि थमुर्भवत्येव
इममेतं वा प्रकारमापन्न इत्थंभूतः तथा च सौत्रो व्यवहारः लक्षणेत्थंभूताख्यानेत्यादि एतेन कथंभूतो व्याख्यातः प्राग्दिशीयानां पूर्णावधिः पुरः पुरस्तादिति अथ क
थं पश्यामि तामितः पुरतश्च पश्चादिति भवभूतिः नोऽस्त तस्ली हि विलसति पुरत इति कश्चित् स्यात्पुरः पुरतोऽग्रत इत्यमरः पुरतः प्रथमे चाग्रे इति विश्वश्च चिंत्यमेत
दिति भाषावृत्तिः कश्चित्तु विभाषा परावराभ्यामिति विभाषाग्रहणं योगाद्विभज्यते तेन पूर्वशब्दादतसुच् अस्तातीति चेति सूत्रे चकारस्यानुक्तसमुच्चयार्थत्वाद्गुणादे
शः इत्युत्प्रेक्षितवान् तन्निर्मूलं पुरत इति तु समानकालीनं पूर्वकालीनमित्यादिवत् प्रामादिकमेवेति प्रामाणिकाः संख्याया विधार्थे धा विधाशब्दस्यार्थो विधार्थः
यद्यप्योदनपिंडोऽपि विधाशब्देनोच्यते तथापीह न गृह्यते तेनैकधा गौ विधेत्यादौ न भवति इह हि विधायामिति वक्तव्ये अर्थग्रहणस्येदं प्रयोजनं विधाशब्दस्य यत्रा
र्थप्रसिद्धतरः तत्रैव यथा स्यात् तादृशश्चार्थः प्रकार एव स च क्रियाविषय क एव गृह्यते अभिधानस्वभावात् तदाह क्रियाप्रकारे वर्तमानादिति कथं तर्हि
नवधा द्रव्यं त्रेधा गुणा इत्यादि अत्रापि उपदिश्यत इति वा भवतीति वा क्रियाबोध्येत्याहुः याप्ये पाशप् कुत्सित इत्यत्रैव नायं विहितः तिङंतादपि प्रसंगात् पू
रणाद्भागे पूरणार्थं त्वातीयप्रत्ययः पूरणशब्देनोक्तः पूरणग्रहणं चोत्तरार्थं मुखतीयः पार्श्वतीय इत्यत्र तु अनर्थकत्वादेव न भविष्यति भाग इति पुंस्त्वं विव
क्षितं तेन समानेष्वर्थविभक्तौ विवक्षायां चतुर्थीपंचम्योरेव भवति अनित्यत्वात्तु टापि चतुर्थीपंचमे इति प्रसज्येत भूतपूर्वे चरट् गोष्ठात् खञ् इत्यत्रैव नोक्तं विशे
[illegible]विहितो न खञा चरटो बाधो माभूत् सन्निधौ हि सामान्यविशेषभावः स्फुटीभवति यद्यपि दूरस्थस्यापि बाधो न्याय्य एव तथापीह [illegible] स्वीकृत्य दूरे पाठसाम
र्थ्याद्बाधो नेति भावः षष्ठ्या रूप्य च भूतपूर्वे इत्यनुवर्तते तच्च यद्यपि पूर्वत्र ङ्याप्प्रातिपदिकस्य विशेषणं तथापीह न [illegible] तार्थस्य विशेषणत्वात् त
दास्तिप्रत्ययस्य संबंधिनः प्राधान्यात् प्रधानेतरसन्निधौ च प्रधाने कार्यसंप्रत्ययस्य न्याय्यत्वात् तदाह भूतपूर्वे थे रूप्यः [illegible] अतिशायने तमबिष्ठनौ अति
पूर्वाच्छेतेर्ल्युट् अतिशयनमेवातिशायनं अस्मादेव निर्देशात् दीर्घः ननु सौत्रः तेन लोकेपि दीर्घः साधुः अबाधकान्यपि निपातनानि तेन ह्रस्वोपि साधुः यद्यपि
केवलः शेतिः स्वप्ने वर्तते तथाप्यतिपूर्वः प्रकर्षे प्रकर्षश्चात्र नाधिक्यं किं त्वभिभवः सकर्मकोऽप्ययं पूर्वान्महाभागतयातिशेते इति दर्शनात् अतिशयश्च न प्रत्यय

र्थः तथाहि सति लघोरतिशायनं लघुत्तममिति स्यात् प्रत्ययार्थस्य प्राधान्यात् तत्रापि प्रकृत्यर्थः तथाहि सति प्रकर्षातिशयादिः प्रत्ययस्यान्नत्तुपद्वादेः किंतु प्रकृत्यर्थ
विशेषणं प्रत्ययस्तु द्योतकः तदेतदाह अतिशयविशिष्टेत्यादि अवपवसमुदाये यदा एकस्यातिशयो विवक्ष्यते तदा तरबीयसुनावपवादौ वक्ष्यते परिशेषाद्दृष्ट्व
नीमध्ये यदा एकदेशस्य निर्धारणं सोस्य विषयः तदाह अयमेषामिति आढ्यतम इति सुबंतात्तमप् सुपो धातुप्रातिपदिकयोरिति लुक् यद्यपि प्रातिपदिकात्तद्धित इतीह वृत्ति
कारस्य स्वरसः प्रतीयते तथापि तदीयग्रंथः सुबंतपरतया भंक्त्वा नीतः अन्यथा हि पूर्वाह्णेतरां पूर्वाह्णेतमामित्यादौ घकालतनेषु कालनाम्न इति सप्तम्या अलु
ग्विधानं बाध्येत उक्तंच भाष्ये प्रियकुत्सनादिषु ततः प्रवर्तते सौ विभक्त्यंतस्य इति तिङश्चतमप्स्यादिति इष्टन्तु नोक्तः अजादी गुणवचनादेवेति नियमात् तर
प्तमपौ घः आतिशायनिकप्रकरण एव तादौ घे इति पित्तौ घ इति वा वाच्ये प्रकरणांतरे गुरुसूत्रकरणं अत्यंतस्वार्थिकस्यापि तरपो ज्ञापकम् तेनाल्पाच्तरं
लोपं च्चवलवत्तरः इत्यादि सिद्धं केचित्तु योगापेक्षं ज्ञापकमित्याश्रित्य इयसुनः प्रत्ययस्यापि क्वचिदत्यंतस्वार्थिकत्वेत्याहुः किमेतत् आमोरुकारेणयदित्स ज्ये
तत्तर्हि पचतितरामित्यादौ ह्रस्वनद्याप इति नुट् स्यात् यस्येति लोपस्य परेणानुदात्तबाधात् सिद्धं तेत्त्वनुबंधपरिभाषयानुड्धिवौनास्य ग्रहणं द्विवचनविभज्यो
पपदे द्वयोरर्थयोर्वचनं द्विवचनम् करणे ल्युट् कर्मणि षष्ठ्या समासः येन पदेन द्वावर्थौ उच्येते तत् द्विवचनम् विभक्तव्यं विभज्यं ऋहलोर्ण्यदिति प्राप्ते तदप
वादो यन्निपात्यते तेन विभाग्यमिति न भवति विभाज्यशब्दस्य तु स्मृतिषु प्रयुक्तस्य साधुत्वं चिंत्यमिति हरदत्तः अत्रेयं चिंता यद्यप्येतद्दुर्लभः निपातने
न बाधात् न च निपातनान्यबाधकानीति पक्षमाश्रित्य निर्वाहः शंक्यः एवं तिसतिकुत्वस्य दुर्वारत्वात् तथापि एवं तादृचोयति विभाज्य इति सिद्धं न्यार्थभेदः
निवृत्तप्रेषणात् प्राकृतेर्थे णिजिति णेरणाविति सूत्रे व्युत्पादनादिति दिक् द्विवचनं च विभज्यं चेति द्वंद्वः तस्योपपदेन कर्मधारयः तेनार्थवाचके विभजनीये
चोपपदे सतीत्यक्षरार्थः अन्वर्थं चोपपदं उपोच्चारितं पदमिति न तु कृत्रिमं तद्धितविधौ तस्यासंभवात् तच्च विग्रहवाक्य एव प्रयुज्यते वृत्तौ तु गतार्थत्वान्नावश्य
कं एवं स्थिते उपपदग्रहणं स्पष्टार्थं इहद्वे उपपदे द्वे च प्रकृती सुप्तिङ् तेप्रत्ययौ च द्वौ तथापि यथासंख्यं नेष्यते द्विवचनोपपदमुदाहरति अनयोरिति विभज्योप
पदमुदाहरति प्राच्येभ्य इति पंचमी विभक्त इति पंचमी कथं तर्हि पटुरुद्वान् पटुरासीत् ऐषमस्तु पटुतर इति अत्राहुः एकस्यापि धर्मिणो गुणभेदेन भेदाध्यारोपा

त् प्रतियोग्यपेक्षः प्रकर्षः तदा श्रयश्च प्रत्यय इति व्यपदिशंति च अन्य एवासि संवृत्तः कश्चित् स एवासि धनंजय त्वमिति अजादी गुणवचनादेवेष्टतोऽवधारणा
र्थ एवकारः तुश्छंदसि पूर्वेण नियमेन व्यावर्त्तितयोः प्रतिप्रसवोऽयं नत्वपूर्वो विधिः तेनोपाधिसंकरेण दोहीयसीति इयमनयोरतिशयेन दोग्ध्री भस्याढे तद्धिते पुंवद्भावः
इष्ठप्रत्ययविधाविति वचनात् ङीपि निवृत्ते दोग्धृशब्दात् प्रत्ययः ततस्तृचि निवृत्ते घत्वजश्त्वयोरपि निवृत्तिः अलौकिके वाक्ये प्रागेव तयोः प्रवृत्तिरिति तत्वं
गुणस्तु प्रवर्त्तते लुप्तेऽपि तृचि प्रत्ययलक्षणं ध्रौव्यात् छांदसमपि तुरिति सूत्रेण विष्ठवदित्यतिदेशेन लोकेऽप्युपयोक्ष्यमाणत्वादित्युपन्यस्तं प्रशस्य श्रः ।
अजादी इत्यनुवृत्तं सप्तम्या विपरिणम्यते इत्याह अजाद्योरिति ज्यादात् ज्यादुत्तरस्य ईयसुन आकारादेशः स्यात् वृद्धस्य च स्वरूपस्येह ग्रहणं न तु वृद्धिर्यस्या
चामादिरिति परिभाषितस्य व्याख्यानात् अस्य प्रियस्थिरेति वर्षादेशोऽपि पक्षे भवति न च तस्येमनिचि सावकाशता वृद्धशब्दादिमनिचोऽभावात् एवं च इहैव
ष्ठग्रहणं वर्षिष्ठश्चेति सूत्र इत्यपि तु मुचितम् एवं हि द्विः ष्ठग्रहणं न कर्त्तव्यमिति लाघवं स्थूलदूर परग्रहणमपविष्ठो हसिष्ठ इत्यत्र पूर्वयणादेर्लोपो माभूदिति पूर्वग्र
हणं तु स्पष्टार्थं परस्मिन् लुप्ते सामर्थ्यात् पूर्वस्यैव गुणलाभात् स्थविष्ठ इति नन्वत्र ओर्गुण इत्येव सिद्धं तत् किं गुणवचनेनेति चेत् मैवं परयणादिलोपस्याभीय
त्वेनासिद्धत्वात् क्षिप्रेऽभावात् क्षुद्रेऽनंत्यत्वाच्च इष्ठस्यापि इद्ध पूर्वसूत्रं सम्पूर्णमनुवर्त्तते तदाह बहोरित्यादि भूरादेश श्चेत्यपि द्रष्टव्यं अत्र आदिलोपे कृतेऽपि
[illegible] यष्ठालोपापवादो यकार आगमः इकारस्तूच्चारणार्थः पक्षद्वयमपीदं भाष्ये स्थितं युवाल्पयोः युवेति स्वरूपग्रहणं न तु युवापत्यस्य विन्मतोर्लुक्
[illegible] इति विनो लुकि कृते भत्वात् सदकार्याभावः अस्मादेव ज्ञापकाद्विन्मतोरजादी प्रशंसायां रूपप् प्रकृत्यर्थस्य परिपूर्ण[illegible] प्रशंसा न तु स्तुतिः तेनेहापि भव
ति [illegible] यस्सदक्षाणोंजनं हरति गुप्तवस्त्वपहरणे न चौर्यं परिपूर्यते पचतिरूपमिति क्रियाप्रधानमाख्यातं क्रियायाश्च [illegible] एकवचनं भवति औत्सर्गि
कत्वात् तेन पचतोरूपं पचंतिरूपमित्यादि इह प्रथमैव विभक्तिं तरणमप्राप्तेरित्याहुः पश्येत्यादियोगे कर्मणि द्वितीयाप्यसौ नितत्वं क्रीत[illegible] त्वेलोकात् एवं प
चति कल्पं मित्यादावपि बोध्यं विभाषा सुपः सूत्रे सुप इति षष्ठ्यंतं षष्ठ्यन्तसमर्थप्रत्ययेन सुक्तेः सुबंतादिति प्रागिस्य पकृष्यते तत्र च यद्यपि [illegible] सपुरस्तात् [illegible]वदस्य
विवरणं तत्समानार्थं तथापि तद्योगे षष्ठीन प्रवर्त्तते अन्याराददिति सूत्रे अं चूत्तरपदस्य दिक्शब्दत्वेऽपि षष्ठ्यातमर्थप्रत्ययेनेत्येतद [illegible] नार्थं टथग्रहणमिति ।

स्थिडंतपित्वाप्राक्प्रत्ययत्वाग्रामादिषूदाहृतत्वात् काशिकायांतुवृत्तावपिपुरस्ताच्छब्दः प्रयुक्तः अतएवसुवंतादितितदुक्तिर्हरदत्तेनभङ्क्त्वाव्याख्याता त्य
थ्रोपएषापिचर्चा एवंभूतंसुवंतंप्रकृतित्वेनाश्रित्येत्यर्थइति यत्तुप्राचोग्रंथंव्याचक्षाणोहृतंसुवातादितिल्यव्लोपेपंचमीति तद्भ्रमसात् नहिहरदत्तेनकाशिकाभ
ङ्क्त्वानीतिएवंसर्वतथानेयंवैषम्यस्यस्फुटत्वात् प्रागेवेति सौत्रस्तुशब्दोऽवधारणोवर्त्ततइतिभावः तेनवहुजेवविकल्प्यतेनतुपूर्वत्वं अन्यथाप्राकृत्वंविक
ल्प्येत् तथाचपक्षेवहुच्परःस्यात् भाष्यकारस्त्वाहतुशब्दस्यनेदंफलंतथाहि उदश्वितोऽन्यतरस्यामित्यादौप्रत्ययएवविकल्प्यते प्रधानत्वात् ननुपरत्वंगु
णत्वात् गुणानांचपरार्थत्वादितिन्यायात् तद्वदिहापिविभाषाग्रहणेनवहुजेवसंभंत्स्यतेनपुरस्तादित्येतत् किंत्ववधारणार्थस्तुशब्दस्येहान्यदेवप्र
योजनं पुरस्तादेवसर्वंयथास्यात् तेनलिङ्गसंख्येऽपिप्राक्प्रत्ययोसत्तेःप्रकृ —त्यवस्थायांयेदृष्टेतेएवस्तःप्रयोगश्चप्राक्प्रकृतेरिति तेनवहुगुडोद्राक्षालघु
वीहुतृणंनरइत्यादौनविशेष्यनिघ्नता ननुस्वार्थिकाःप्रकृतितोलिंगवचनानिलभ्यंतइत्येवसिद्धमितिचेत् सत्यं एतदेवज्ञापयतिईषदसमाप्तौयेस्वार्थिकाः
तेष्वभिधेयवदेवलिंगवचनेस्तइति तेनगुडकल्पाद्राक्षाशर्कराकल्पागुडइत्यादिसिद्धं यत्तुकाशिकायांवहुगुणोतिस्त्रीलिंगंपठ्यते तस्यामादिकंभाष्य
विरोधादितिहस्वस्तुः प्रागिवात्कःसुपइत्यनुवर्त्तते तेनतिङंतात्कोन अव्ययसर्वनाम्नां तिङश्चेतिमंडूकप्लुत्येतिभावः ङ्याप्प्रातिप दिकात्सुपइति चानुवर्त्तते
एवकस्यचदः कांताव्ययस्येति सर्वनामग्रहणंतिङ्ग्रहणंचनेहसंवध्यते तयोःकांतत्वासंभवात् अधोक् अधेगित्यादौहि असिद्धकत्वं यद्यपिशक्यंते
ष्टंतुकिलङितिपिअशाशगितिसं भवति तथापियङ्कोऽसार्वत्रिकत्वान्नेदृशंलक्ष्यमस्तीतिभावः ओकारसकारेति अकज्विधौसुपोप्यनुवृत्त्यासर्वना
म्नासुपाचटेर्विशेषणेकामचारात्अव्यवस्थाप्रसंगेभाष्यकारवचनाद्व्यवस्थाश्रीयते ओकारसकारेत्यादिसंकोचश्चयुष्मदस्मन्मात्रविषयः तथैवभाष्येउदाहृ
तत्वात् अन्येषांतुअविशेषेणप्रातिपदिकस्यैवटेःप्रागकच् ननुसुवंतस्य तेनसर्वकेणइमकेनभवकंतइत्यादिसिध्यति शीलेकइति शीलंस्वभावोनियमश्च
नृह्मीकइति केणइतिह्रस्वस्तुनभाष्यकृतादीर्घस्योदाहृतत्वात् संज्ञापूर्वकस्यानित्यत्वाद्वा दुर्घटवृत्तिकारस्तु नकपीत्यत्रनेतियोगविभागात्इत्याह नीतौच
तद्युक्तात् हंतनेधानकाइति धानाशब्दःस्त्रीलिंगःततःकःकेणइतिह्रस्वःकप्रत्ययांताट्टाप् अत्रप्रत्ययस्थादितीत्वेनभवितव्यंप्रायेणतुधानकाइतिपठ्यते

तत्रलिंगातिवृत्तिर्दृष्टव्येतिहरदत्तः णचः स्त्रियामञिति सूत्रे स्त्रीग्रहणेन ज्ञापितं स्वार्थिकाः प्रकृतिलिंगं क्वचिदतिवर्त्तन्तेपीति नेनेह पुंस्त्वमिति भावः घनिलचौच चकारएव
थाप्राप्तमिति काशिका इह पूर्वसूत्रे णेवढञ्विहितः वावचनात् कोपिच कारेण कस्याभ्यनुज्ञेति चिंत्यं योगविभागफलमपि चिंत्यमिति हरदत्तः ठाजादौ समाहारद्वंद्वे सौ
त्रं पुंस्त्वं आदिग्रहणं चिंत्यप्रयोजनं यस्मिन्विधिस्तदादावित्येव सिद्धं अस्मिन्प्रकरणे इति प्रत्यासत्त्या तयोरेवार्थयोर्बुद्धौ सन्निधानादिति भावः सर्वेलुप्यत इति एतच्च
ऊर्द्ध्वग्रहणसामर्थ्याल्लभ्यते अन्यथा आदेः परस्येति द्वितीयादचोपः परत्वस्यादेरेव लोपः स्यात् ननु ठग्रहणं व्यर्थं इकादेशे कृते ऽजादावित्येव सिद्धत्वादिति चेन्
न्न उको द्वितीयत्वे ततः परस्यठावस्थायामेव लोपे ठस्यकादेशार्थं ठग्रहणात् इदं ध्वनयन्नुदाहरति वायुक इति किंच यदा चित्रगुप्रभृतिभ्य ष्ठच् तदा प्रथमभिक्षा
[illegible] णस्यासंभवेनाजादित्वस्य णो लोपो न स्यादिति तदर्थमपि ठग्रहणं बोध्यं प्राचामुपादेः उपेंद्रदत्त इति स्यादेतत् कृतसंधेरूपेंद्रशब्दादेकादेशस्य पूर्वांत तया ग्र
णात् उपादेरीति विधीयमानौ प्रत्ययौ स्तान्नामलोपश्च न कारादेरेव स्यात् ततश्च उपड उपडक इति रूपेण स्यातां एवं घनिलचवुढ्वत्स्वपि दोष एव तस्मादिहैव द्वितीयं सं
ध्यक्षरं चेदिति वार्त्तिकं वक्तुमुचितमिति चेत् सत्यं प्रकारांतरेणैव निर्वाहसंभवान्नोक्तं तथाहि अकृतव्यूहपरिभाषया [illegible] पूर्वमेव प्रत्ययः नच परिनिष्ठित
[illegible] पूर्वेणास्समर्थग्रहणे न स्थित्यिति वैक्ष्यमाणे रित्यत्रैव परिभाषा बाधः शंक्यः प्राग्दिश इति सूत्रे समर्थग्रहणनिवृत्तमित्युक्त्वा त्यागुक्तज्ञापकबलेन समर्थग्रहण
[illegible] पक्षेपि ज्ञापकस्य विशेषपरत्वादिति दिक् उपेंद्रः उपगुहपकत्तेत्यादिषु उपगवादीनां पंचानां रूपाणां साम्येऽपि प्रकरणादिना विशेषो ध्यवसेयः जाभ
[illegible] राजात्यंतरे प्रसिद्धा मनुष्येषु नामत्वेन विनियुक्ताः तइहोदाहरणं द्वितीयमिति एचः संध्यक्षरमिति प्राचां [illegible] वागाशीरिति वाचि आशीर्यस्येति।
[illegible] वाकिक इति यद्यत्र द्वितीयादच ऊर्ध्वस्य लोपः स्यात् तदा अकृतव्यूहपरिभाषया वाच् आइक इति स्थिते यस्येति [illegible] पातस्य स्थानिवत्त्वादाकारांतस्य भ
[illegible] विभक्तिमाश्रित्य चकारांतस्य पदत्वेन कुत्वजश्त्वयोः कृतयोः वागिक इति स्यात् उत्तरपदलोपे त्वच्कलादेशत्वेन स्थानिवत्त्वाभावात् तुल्यावधिकया भसं।
ज्ञया पदसंज्ञा बाध्यते तत्रापि तद्धिताश्रयाया अपवादत्वादेव बाधः विभक्त्याश्रयातु एकसंज्ञाधिकारात् परत्वाद्बाध्यत इति विवेकः कथमिति अत्राप्युत्तरप
दलोपे जश्त्वं न स्यादिति प्रश्नः षषइति अत्र सोऽत्र एव लोप इष्यते न त्वोपसंख्यानिक इत्यर्थः वत्सोक्षा तनुत्वं न्यूनता [illegible] इति निमित्तः [illegible] तः क्वचित्तु।

पं सु
१०८

तत्सहचारितधर्मकरणं तत्रवत्सः प्रथमवयाः वंयसश्च प्रथमस्यन्यूनत्वं नाम वयोंतरप्राप्तिः तदाह द्वितीयमिति तरुणाउक्षा तारुण्यस्यचतनुत्वं तृतीयवयःप्रा
प्तिः अश्विनाऽश्वायामुत्पन्नोऽश्वः अश्वत्वंचजातिः तत्सहचरितस्योक्तधर्मस्यन्यूनत्वं अन्यपितृकत्वात् तथाचगर्दभेनाश्वायामुत्पादितोऽश्वतरः ऋषभोभारम
स्यवोढा मंदशक्तिस्तु ऋषभतरः किंयत्तदः निर्धार्यमाणवाचिभ्यः प्रत्ययोयम् अभिधानस्वभावात् नेह कयोरन्यतरोदेवदत्तः पयोस्तयोरिति एकस्येतिकिं इ
योरितिकर्मणिषष्ठीमाभूत् तथाहिसतिअस्मिन्ग्रामेकौदेवदत्तयज्ञदत्ताविस्यत्रापिस्यात् वावहूनां जातिश्चपरिप्रश्नेनिष्प्रत्याहारद्वंद्वः तत्रजाताविति
सर्वेषांविशेषणं परिप्रश्नग्रहणंतुयोग्यतावलात्किम एवविशेषणं तच्च क्षेपनिवृत्त्यर्थं। तत्रजातिग्रहणंप्रायोभिप्रायं क्रियागुणसंज्ञाभिरपिनिर्द्धार
णोडतमच्चइष्टत्वात् तथापूर्वसूत्रेद्वयोरिति प्रायोऽभिप्रायम् वहूनांनिर्द्धारणेपिडतरच्चइष्टत्वात् तथाचवार्त्तिकं किमादीनांद्विवहृर्थेप्रत्ययविधानादुपा
ध्यानर्थकमिति अत्रकैयटः द्वयोरितिजातिपरिप्रश्नइतिचनकर्त्तव्यमितिभावइति तदेतदाह प्रत्याख्यातमाकरइति तथाचकतमोभवतामध्यापकःसू
रोदेवदत्तोवेतिसिद्धं महाविभाषयेति समर्थप्रथमग्रहणयोः प्राग्दिशइति सूत्रेनिवृत्तत्वेपिवाग्रहणानुवृत्तेरुक्तत्वादितिभावः एतेनवाग्रहणस्यापिनि
वृत्तिरितिप्राचांग्रंथंव्याचक्षाणानां उपेक्षणीयतांध्वनयति किमोस्मिन्नितिद्वयोरित्यस्यप्रत्याख्यातत्वादितिभावः प्रागिवीयानांपूर्णोऽवधिः अश्वकइति
नायंस्वार्थिकः अश्वशब्दो ह्यश्वएववर्त्तते कन्प्रत्ययस्तुप्रतिकृतिरूपेसदृशेइत्येके अन्येतुगौर्वाहीकइतिवत् अश्वशब्दः सादृश्यनिवंधनादभेदोपचारात्प्र
तिकृतौवर्त्तते कन्प्रत्ययस्तु औपचारिकत्वद्योतकइत्याहुः प्रतिकृतौकिं गौरिवगवयः तृणचर्मकाष्ठादिनिर्मितंप्रतिमापरपर्यायंवस्तुप्रतिकृतिः गवयस्तुनैवं
मित्यनेनतएवभिक्षवोभिप्रेताः यत्स्वापतनेषुप्रतिष्ठाप्यंतेपूज्यंतेच तासुसूत्रांतरेणलुक् तदुक्तं अर्चासुपूजनार्थासुचित्रकर्मध्वजेषुच इवेप्रतिकृतौलो
पः कनोदेवपथादिष्विति अर्चासु शिवः विष्णुः चित्रकर्मणि अर्जुनः दुर्योधनः ध्वजेषु कपिः गरुडः सिंहः हस्तिकानिति ददृशमेवविषयमभिप्रेत्यपठंति ग
मंसीतांलक्ष्मणंजीविकार्थेविक्रीणीतेयोनरस्तंचधिकुधिक् अस्मिन्पद्येपोपशब्दान्नवेत्तिव्यर्थमज्ञंपंडितंतंचधिकुधिगिति द्रव्यंचभव्ये द्रुशब्दादिवार्थेयत्

एम
१०८

समासाच्च तद्विषयात् छः स्यादिति इवार्थ इति वोढव्यं पूगाञ्ञ्य इत्यतः प्राक् इवे इत्यधिकारात् शस्त्रीश्यामेत्यादौ तु एक एव इवार्थः स च समासान्तर्भूत इति छो न भवति
काकतालीय इति प्रकृतसूत्रादेव ज्ञापकादिवार्थे समासः सुप्सुपेति वा उभयथापि विशेषसंज्ञाविनिर्मुक्तः स च छप्रत्ययविषय एव तेन स्यात् तत्र उपाध्यन्तरयो।
गोविग्रहश्च नेत्याकरः पूगाञ्ञ्यः अग्रामणीपूर्वादिति किं देवदत्तो ग्रामणीर्येषां ते देवदत्तकाः स एषां ग्रामणीरिति कन् अत्र समुदायः पूगवचनः व्रातच्फञोः
उत्सेधजीवित्वं व्रातस्य पूगाद्विशेषः उत्सेधः शरीरायासः पार्शव इति पर्शुरिति जनपदशब्दः ततोऽपत्ये ह्यन्मगधेत्यण् बहुत्वे तद्राजत्वाल्लुक् पुनः संघावि
वक्षायामनेनाण् यौधेय इति युध्यते सौ युधा युधेः इगुपधलक्षणः कः युधाया अपत्यं द्व्यचश्चेति ढक् तदेतात् संघरूपविवक्षायामनेनाञ् आद्युदात्तत्वं किंच
यौधेयस्यांको लक्षणं वा यौधेयः संघांकलक्षणेष्वण् एवं यौधेयादिषु ये ढगन्ताः तेषु सर्वेषु प्रयोजनद्वयमूह्यं यौधेया इति अञो लुक् अन्तोदात्तत्वं पादशत।
स्य तद्धितार्थ इति समास इति यद्यपि प्रकृत्युपाधिर्वीप्सा तथापि वुना द्योत्यत इति तद्धितार्थो भवत्येवेति भावः द्वौ द्वौ पादौ ददातीति समर्पणमात्रमिह ददातेरर्थः
ननु परस्य त्वापादनं पर्यन्तं तथात्वे हि उत्तरसूत्रविषयत्वं स्यात् केचित्तु व्यवसृजते धातोः प्रयोगे सत्येव उत्तरसूत्रस्य प्रवृत्तिमाहुः दंडव्यवसर्गयोश्च अत्रा
प्युत्तर[illegible]तद्धितार्थ इति समासः स्त्रीलिंगं च तद्धितार्थः यद्वा प्रकृत्यर्थ एव तद्धितार्थः स्वार्थिकत्वाद्वुनः स्थूलादिभ्यः प्रकारो भेदः सादृश्यं च उभयत्रापि य
थासंभवं[illegible] चंचत्क इति चंचति श्चलनकर्मा चंचन्नेव कश्चिच्चंचत्कः एवं बृहद्विशेषो बृहत्कः यद्वा अचंचन्[illegible]न्नपि प्रभाविशेषाच्चंचन्निव बृह।
[illegible]न्नमरि विशेषो लक्ष्यते सोऽर्थः सुरक इति केऽण इति ह्रस्वः छिन्नकमिति ईषत् छिन्नमित्यर्थः प्रकृतिवा [illegible] वाच्यस्य साधनस्य व्याप्ति
[illegible]तगतिः स्नेहनास्ति न सामिवचने अप्रकृतस्यैवेति सामिवचनेनेत्यर्थः अषडक्षीणादिति अविद्यमानानि षडक्षीण्य[illegible]तिव बहुव्रीहिः अक्षिशब्दोत्र
श्रोत्रेन्द्रियेर्वर्तते बहुव्रीहौ सक्थ्यक्ष्णोरिति षच् मंत्रो मंत्रणं आशितंगवीनमिति अश्नातेराङ्पूर्वादाशितः कर्तरि ज्ञापक[illegible]तः यं तात्कर्मणि वा उ
भयथापि प्रकृत्यर्थमिति फलितोऽर्थः अलं पुरुषीणः प्रतिमल्लादिः ईश्वराधीन इति अधिशब्दः शौंडादिरित्युक्तं प्राक्क्रीतादिति अवक्षेपणे कन्निति विहि
तात् प्राग्वन इति पदशनेति विहितात् आमात्ये इति किमेत्तिङव्ययघादामित्यादयः बृहतीजात्यंता इति बृहतीशब्देन बृहत्या आच्छादन इति विहितः कन्नु

मनस्युते आस्येत शब्देन जासंताछेतिछः बहुवचननिर्देशात्साशवादीनां ग्रहणं पोहि वैयाकरणापाशादिशब्देरर्थः प्रतीयते नासौ प्रकृतिमात्रेण अतस्तेपित
मवादिवेनिःस्त्र एवेतिस्थितमाकरे मूलेऽवाचकप्रयोगस्तु आर्षग्रंथानुवादत्वान्नदोषाय विभाषांचेरदिक्‌दिक्‌चासौ स्त्रीचेतिकर्मधारयः प्राचीनाच्च
ह्मणीति क्रियानिमित्तो देशकालनिमित्तो वायं शब्दः प्राचीनमिति प्राच्यां दिशि इत्यर्थे दिक्‌शब्देभ्य इत्यस्तातिः अंचेर्लुगिति लुक्‌ लुक्तद्धितलुकीति ङीपो
लुक्‌ तद्धितश्चासर्वविभक्तिरित्यव्ययत्वात्स्त्रीत्वाभावः स्वेतु कृतेस्वभावान्नपुंसकत्वं ब्राह्मणजातीय इति भावप्रधानो ब्राह्मणशब्दः ब्राह्मणत्वजात्या
धारीभूतः पिंड इत्यर्थः ब्राह्मणजातिरितिषष्ठीतत्पुरुषः भावप्रधानेन सह कर्मधारयो वा जातेरिति अयं भावः वंधुशब्दो द्विविधः रूढो यौगिकश्च तत्राद्यो
जात्यादिष्वप्रसिद्धः आप्तपर्यायः पुल्लिंग एव स नेह गृह्यते वंधुनीति नपुंसकनिर्देशात्‌ किंतु क्रियाशब्दोयम् वध्यते स्मिन्‌ जातिरिति विग्रहः स्त्रस्त्रि
हीत्यादिनाऽधिकरणे उप्रत्ययः पितृस्थानीय इति स्थानं संवंधविशेषः पदमिति यस्य प्रसिद्धिः पितुरिवस्थानमस्येति वहुव्रीहिः गोस्थानमितिस्थानं दे।
शः इतिकरणो विवक्षार्थः तेन तुल्यस्थानशब्दाच्छो न अनुगादि अस्मादेव निपातनाण्णिनिरिति इह उत्तरसूत्रे च हरदत्तः वस्तुतस्तु सुप्यजाताविति।
सूत्रेणैवात्र णिनिरिति तत्रैव वक्ष्यामः संख्यायाः अभ्यावृत्तिशब्देन द्वितीयादिप्रवृत्तिग्रहणे षट्कृत्वः प्रवृत्तौ पंचकृत्व इतिस्यात्‌ अतो विवक्षितमर्थमाह
अभ्यावृत्तिर्जन्मेति भूरिवारानिति भूरिशब्दस्य लौकिकसंख्यावाचित्वेपि नेह ग्रहणं वहुगणेति सूत्रे वहुग्रहणस्य नियमार्थत्वात्‌ अनियतसंख्यावाचिनां
चेद्भवति तर्हि वहोरेवेति नियमशरीरं रूपेविशेषाभावेपि वस्तुगतिमनुरुध्याह संयोगांतस्येति प्राचो ग्रंथं निरस्यति नत्विति यदिसोरुकार उच्चारणार्थो
न तर्हि निरनुवंधकत्वात्स एव ग्राह्यो न तु सुच्‌ यदि तु उकार इत्‌ तथापि सुज्ग्रहो दुर्लभः सुच उकारस्योच्चारणार्थत्वात्‌ अथायमपि इत्संज्ञक इति द्विग्रहः
तथापि तदनुवंधकग्रहणपरिभाषया दोष एव किंच सुतिसीतिसाहचर्य्यात्‌ विभक्त एव तत्र गृह्यते तदाह सिच इवेति वहुधा दिवसस्य भुंक्त इति कृत्वो
र्थप्रयोगे कालेऽधिकरण इति षष्ठीति हरदत्तः एतच्च प्रामादिकं शेषाधिकारवलेनाष्टसूत्र्याः समासनिवृत्तिफलकत्वपातिङं तनोदाहरणमिति प्रागुक्तं।
निष्कर्षविरोधात्‌ तत्सहकृतवचनेमयट्‌ प्राचुर्येणेति यद्यपि प्रकृतशब्दः प्रस्तुतमात्रे रूढः तथापीह वचनग्रहणादयं विशेषो लभ्यते तद्धियास्त्रशास्य प्रकृ

तस्य लोके प्रयय वचनं प्रत्यापनं तत्र यथास्यादित्येवमर्थं आद्ये इति प्रथमांतात्प्रकृते योऽयं प्रत्ययः स्वार्थिकत्वात्प्रकृतितो लिंगं अस्मिन्पक्षे तद्ग्रहणं व्यर्थं द्वितीयेति।
अस्मिन्पक्षे उच्यमानता प्रकृततात्च प्रकृत्यर्थविशेषणं ल्युटोक्तमधिकरणात्वनुमयडर्थः अतएव विशेष्यनिघ्नतात् तदाह अन्नमयो यज्ञ इति यच्च व्याचख्युः प्राचुर्येण त्वादि
प्रत्ययार्थविशेषणमिति तत्रेदं वक्तव्यं व्यर्थस्यागान्मूनता अधिकरणस्य क्रियासाकांक्षत्वेन तदध्याहारेण गौरवं चेति मूले दोषः टीकायां तु प्रकृत्यर्थेति वक्तव्ये प्रत्य
यार्थे सुतरां प्रमत्तता आकारविरुद्धत्वेत्यास्तां तावत् निपातसमुदाय इति उपदेशपारंपर्ये वर्त्तते वचनाच्च प्रातिपदिकादपि प्रत्ययः भेषजमिति भिषज्यतेः कंड्वादि
यगंतात् क्विप् भिषक् भिषजामिदं भेषजं अस्मादेव निपातनादेकारः पितृदेवत्यमिति पितर एव देवतेति कर्मधारयः ततो यत् अर्घ्यमिति मूल्ये पूजाविधावर्घ
इत्यमरः आग्नीध्रमिति अग्नीधः शरणे रण् भं चेति अतोदात्त शेषिकेषु व्युत्पादितं तस्मादत्र आद्युदात्तत्वं फलं फलांतरमाह स्त्रियामिति समानं धारणमस्याः
साधारणी अनेकप्रत्ययविशिष्टसंबंधा पृषोदरादित्वात्समानस्य सभावः ततोऽन् ङीप् अत्र भावे टाप् वर्णोच्चानित्ये अनित्यत्वमिह स्वसमानाधिकरणध्वंसप्र
तियोगित्वं अतएव रक्ते इत्युत्तरसूत्रं सार्थकं लाक्षादिना रक्ते लोहित्यस्य यावदाश्रयमवस्थानेन नित्यतया पूर्वेण सिद्धेः लिंगबाधनं वेति प्रातिपदिकात्तद्धित इ
ति पक्षं प्रतिपदविधानमात्रेणापवादत्वमिति पक्षं वाश्रित्येदं वार्त्तिकं अत्र च वेत्येव विधेयं शिष्टोऽनुवादः प्रतिपद[illegible]तेन कना लिंगनिमित्तस्य प्रत्ययस्य नि
[illegible] इत्यर्थः न चऊञावुग्रहणसामर्थ्यादिष्टसिद्धिः एतं श्येतशब्दाभ्यामसंत स्वार्थिके कनि प्राप्ते [illegible] चरितार्थत्वात् वस्तुतस्तु उं।
[illegible] निरवकाशत्वेनैवापवादत्वं तथा चेदं वार्त्तिकं वक्तव्यं अतुएव ऊञावुग्रहणं व्यर्थमिति स्वपीति रूपं प्रव[illegible] च्चाम उपायेति उपायशब्द[illegible]।
[illegible] त्वं चेत्यर्थः अकस्मादिति हपरत्वेते तद्यत्ननुतांते तेनकादेशो न अव्ययत्वादिलोपः आकस्मिकं वाचिकमिति [illegible] वर्त्तंते पि स्वार्थिकाः क्वचिल्लिंग
[illegible] पुं[illegible]कत्वं मृदस्तिकन् प्रत्ययस्यादित्येव सिद्धे इकारोच्चारणं प्रक्रियालाघवार्थं टापो तु कापि अवर्णार्थे च पंचभि[illegible]त्तिकाभिः क्रीतः पंचमृत्तिकः पटः सस्नौ इ।
[illegible] इत्यस्यानंतरं कज्येष्ठाभ्यां तिलतातिलौ च छंदसि मृदः सस्नौ तिकश्चेति वक्तुमुचितं तथा तु नकृतमित्येव वह्वल्पार्थात् कारकान्किं वहूनां स्वा
मी अर्थे [illegible] सर्वायेभ्यो विशेषेभ्यश्च भूरिशो ददाति त्रिशः मंगलेति प्रायिकं चैतत् अन्यत्रापि हि दृश्यते अपेतापोढमुक्तपतितापत्रस्तैरल्पश इति कारकत्वं

मु.

वृत्समसनाऽऽत्कीयं प्रति पंचम्याः कर्मत्वात् तदभिधायित्वाच्चाल्पशब्दस्य तथा चव्याचष्टे अल्पापंचमी समस्यत इति परिमाणशब्दा इति तथा च एकवचनग्रहणं।
न तु तावदेव [illegible] नियताः परिमाणशब्दा एवगृह्यंते इति भावः अतएव प्रत्युदाहरति घटंघटमिति घटादयो हि जातिशब्दा नैकार्था भवंति जातियोगस्य एकानेक
साधारणत्वात् किंत्वभेदैकत्वसंख्यामुपाददते एतच्च सर्वे जयादित्यमतेनोक्तं वामनस्तु मन्यते जातिशब्देभ्यो पि भवत्येवेति तथा च जश्शसोः शिरिति सूत्रे जसा सा-
[illegible]सूत्रितस्य शसो ग्रहणादिह न भवति कुंडशो ददाति वनशः प्रविशतीति अथ कथं एकैकशः पितृसंयुक्तानि इति द्विर्वचन शसा सहप्रयोग इति चेत् छंदोवदृषयः
[illegible]नीतिहरदत्तः अतएव सुप इति सूत्रे एकैकश इति प्राचां ग्रंथः प्रामादिक इत्यवोचाम ह्योर्द्वयोरिति कथं तर्हि अत्र ता[illegible]म संत्रा[illegible] जातिमात्रोपजीविनां सह
[illegible]ताः समेतानां परिषत्त्वं न विद्यते न ह्यत्र वीप्सास्ति नापि कारकत्वमिति चेत् अत्राहुः सहत्वं ये समेताः तेषामपि परिषत्त्वं [illegible]ः तथा च समवाय क्रियां प्रति कर्तृ-
[illegible]षी प्साचाप्येवेति एतेन एकश एकवचनादि संज्ञानिस्सुरिति व्याख्यातं एकशब्दार्थस्य अस्ति क्रियां प्रति कर्तृत्वात् [illegible]तः प्रतीतिप्रति निधिप्रतिदाने च य-
स्मादिति पंचमी आद्यादिभ्य इति तस्यादित उदात्तमर्धह्रस्वमित्येतदत्र लिंगं वक्तव्यमिति वृत्तिकारस्तु अभूततद्भाव इति सूत्रमध्ये प्रक्षिप्ते प अरुर्मनः चक्षु।
ति पूर्वेणासिद्धस्यापि च्वेरनुवादोयम् लोपस्य तत्संनियोगशिष्टत्वार्थे विभाषासातीति विभाष्यते विकल्प्यते इति विभाषा गुरोश्च हल इत्यकारः ततष्टाप् नत्विद
मव्ययं द्वयोर्विभाषयोर्मध्ये पयसस्तु विभाषये सादौ विभक्तेर्दर्शनात् डाचि विवक्षित इति परसप्तम्यां तु अन्योन्याश्रयः स्यात् डाचि कृते हि द्वित्वे सति अजवर्जई
नातस्यां च सत्यां डाजिति भावः खरट खरटा करोतीति खरटदित्यस्य द्वित्वादि पूर्ववत् अजर्द्धादित्युक्ते अत्र न स्यात् न ह्यस्याई अच् किंतु अच् यत्तु प्राचोक्तम् टिलो-
पसति ह्यचो अवरं यत तदई पस्येति तन्न सत्यं तस्य निर्मूलत्वात् खरट् खरटा करोतीत्यादौ अव्याप्तेश्च यदपि व्याचख्युः परमापकर्षे क्रियमाणे अचो ऽवश्यं
भाव्यपकर्षो विवक्षित इत्याह टिलोपे सतीत्यादि तदपि उक्तदोषादाकरविरोधाच्चोपेक्ष्यम् बीजेन सहेति वृत्तिविषये बीजशब्दो बीजावापसहिते विलेखनेव-
र्तते समयाच्च कालं यापयतीत्यर्थ इति हरदत्तस्त्वाह समयो नियमः अद्य कर्तव्यत्वेन निर्णीतमर्थं विघटयितुं अद्य मे पारवश्यम् श्वो ऽस्य समयः इत्येवं यो व-
हुषु दिवसे याहस एवमुच्यत इति सपत्रनिष्पत्रात् पतत्यनेनेति पत्रम् शराणां पुंखगतो वर्हः सपत्रं निष्पत्रं वा करोति भूतलमिति पत्राणि पर्णानि सूलासाके

पाके किम् [illegible]करोति कदन्नम् शूलमुदररोगः सत्यादश पथ्ये भांडशालादिद्रव्यजातं क्रेतव्यमिति मयैतद्ग्राह्यमिति बुध्या परीक्षादिना संस्कारद्रव्यप्रदानेन।
च दृढं करोतीत्यर्थः तथैव तथ्यं पादार्घाभ्यां चेति चकारस्यानुक्तसमुच्चयार्थत्वात् सार्थेयत् परिवापणमिति कर्मव्यापारमात्रवाचिनो वपेर्हेतुमण्णिचि ल्यु
ट् मंगस्यमुंडनेनेति चौलदीक्षायै भद्राच्चेति भद्रादिस्यर्थग्रहणमिति तु नोक्तं मंगलादिभ्योपि प्रसंगात् इति तद्धितप्रक्रिया सर्वस्य द्वे नित्यवीप्सयोरित्येव
मादीनां विधेयकार्यिणोरनिर्देशेन साकांक्षत्वात् स्वरितत्वाच्चाधिकारोयं तदाह इत्यधिकृत्येति एतदर्थं रूपमधिकृत्येत्यर्थः स्वरूपग्रहणं तु न भवति नाम्रे
डित स्यांसस्यनुवेति लिंगात् सर्वशब्दोऽत्र यवकार्त्स्न्ये सर्वावयवोपेतस्य द्वित्वं न तु कश्चिदप्यवयवोव ज्यत इत्यर्थः इह द्वे इत्यस्य संख्येयापेक्षायां शब्दस्वरू
पेग्रहेते शब्दानुशासनप्रस्तावात् सर्वस्येति स्थानषष्ठी सोयं स्थाने द्विर्वचनपक्षः पदं तु उच्चारणमेव संख्येयं तदा स्थान्यादेशभावो नास्ति निवृत्तिधर्मा।
हि स्थानी सर्वे वा निवृत्तं किमुच्चार्येत अतः सर्वस्येति अध्याहृतोच्चारणशब्दापेक्षया कर्तृकर्मणोः कृतीति कर्मणि षष्ठी सर्वं द्विरुच्चारयेदिति फलितोऽ
र्थः सोयं द्विः प्रयोगो द्विर्वचनमिति पक्षः नन्वाद्यपक्षे स्थानिवद्भावेन समुदायस्येव पदत्वं स्यात् नावयवयोः ततश्च पदकार्याणि न स्युः तद्यथा अपचन्न।
पचन्निति ङमुट् प्रक्षान्प्रक्षानिति पदांतस्येति णत्वनिषेधः अग्रे अग्रे एङः पदांतादिति पूर्वरूपत्वमित्यादीनि किं[illegible]पदांतत्वमयुक्तानि कार्याणि च स्युः।
त[illegible] अतो गुणे इति पररूपं स्यादिति चेत् अत्राहुः यस्मिन्पक्षे मितावयवभेदः समुदाय एक एव आदेशः स्यात्तदा द्वे इति द्विवचनमनु
पपन्नं स्यात् अतो द्वे इति वचनादेकस्य पदस्य स्थाने द्वे पदे समुदिते युगपदादेशत्वेन विधीयेते तत्र स्थानिवद्भावेन समुदायस्यैव पदत्वं स्वत एव चावयवयो
[illegible]गक[illegible]द्दोषः द्विः प्रयोगपक्षे तु प्रत्येकं पदसंज्ञा स्पष्टैव समुदायस्य त्वित्थं पचसि पचसीत्यादौ हि स एव धातुः प्रत्ययश्च द्विः पठ्यते ततश्च यस्मात्स।
र[illegible]वस्थितः तदादि तदंतमिति विधीयमाना पदसंज्ञा समुदायस्यापि प्रवर्तते तेनावग्रहादि सिध्यति यद्यपीह समुदायस्यैव पदत्वं नावयवानामिति भाष्य
स्वरसम[illegible]भाष्यं भङ्क्त्वा नेयम् अवयवे पदकार्याणां प्रागुक्तानां निर्वाह्यत्वात् इत्यन्यत्र विस्तरः सर्वस्येति किं स्वादिष्विति पदसंज्ञामादाय वृक्षाभ्यामित्या
दौ प्रकृतिभाग[illegible]मात्रस्य माभूत् नित्यवीप्सयोः द्योत्ये इति नपुंसकमनपुंसकेनेत्येकशेषः एकवद्भावश्च वोध्यः पदस्येति वक्ष्यमाणमिहापकृष्टव्यमिति भावः तेन नि

स्यतां पां [illegible] धीयुमानि द्विर्वचनं धातुमात्रस्य न भवति किंच परस्योच्यमानं द्विर्वचनं वहिरंगं अंतरंगं धातोर्यङं न बाधते अन्यथा हि भृशार्थे सावकाशो यङ् पौनःपुन्ये परत्वाद्द्वि
र्वचनेन [illegible] नुवदंति परिगृहीत साधना क्रियाव्यवहारोपयोगिनीत दनभिधानाच्च धातुमात्रस्य द्वित्वेनेति तत्त्विं स्यउक्तरीत्या नानाकारकविशिष्टक्रियासमर्प
कस्य वाक्यस्यैव द्वित्वापत्तेः किंच भावार्थकलकाराणां तानां अव्ययकृतां च त्वदुक्तरीत्या द्वित्वं न स्यात् ननु तत्र नित्यत्वीवमस्यनंतरं पदांतरैः साधनाकांक्षा परिपूर्य
त इति चेत् तर्हि तत्रैव धातुमात्रस्य द्वित्वं केन वार्यतां किंच तद्वदेव कर्तृकर्मसकारस्य लेपि धातुमात्रस्य द्वित्वं दुर्वारमित्यास्तां तावत् नन्वेवं पदाधिकारस्याप्र
[illegible]गतिकस्य द्विर्वचनं न स्यादिति चेत् न कार्तिककारवचनादेव तत्सिद्धेः लत्वापि ह्येषैवमभ्रुतिः पत्तुषदति प्रपचति प्रपचतीत्यादौ धातूपसर्गसमुदायः क्रियाविशेषवा
ची अडादिव्यवस्थार्थं परं धातूपसर्गयोः पृथक्कल्पनं ततश्च क्रियाधर्मो नित्यता समुदायस्येति तस्यैव द्विर्वचनमित्यादि अत्रेदं वक्तव्यं कल्पितेनैव पृथ
य स्केन यथा डागमः षाष्ठद्वित्वं च व्यवतिष्ठते एवमाष्टमिकद्वित्वस्यापि प्रवृत्तिकोवाग्यतां क्रियाधर्मो नित्यत्वमि[illegible] व्यर्थेउपन्यासः लकारार्थयोः कर्तृ
कर्मणोरपि क्रियानिरूप्यतया विशिष्टादेव लकारापत्तेः तस्य धातुत्वं नास्तीति चेत् तर्हि न स्युरेव लादयः तद्विधीनां हि रूपसर्गं चारितार्थत्वात् इदं त्ववधेयं समग
तिकस्य द्वित्वे एकपदं नास्त्येवस्यानिनः पदत्वाभावेन आदेशोपि तस्य दोर्लभ्यात् द्विः प्रयोगपक्षे तु प्रथमगतिं विहाय [illegible] विशिष्टस्य समुदायस्य पदत्वं प्राप्तं तस्मिन्न
स्यपि निघातिः वस्तुतस्त्विह द्विःप्रयोगपक्षो दुर्वलः पौनःपुन्यं पौनःपुनिक इति समुदायात् ष्यञ्ठञोरनुत्पत्तिप्रसंगात् तत्र हि अंतरंगत्वाद्व्यपात्सुपो लुकि द्वि
त्वं प्रवर्तते किंच तत्रैकपदाभावे पुनःपुनर्जायमाना पुराणीत्यादावव ग्रहोपि न सिध्येदित्यन्यत्र विस्तरः आभीक्ष्ण्यमिति तद्धि क्रियाविशेषणं तेन न तद्द्योत
नार्थं द्वित्वं क्रियाप्रधाना नामेव न्याय्यं क्रियाप्राधान्यं चाख्याते लिङ्कृद्विशेषे च अव्ययकृतो भावे इति वक्ष्यमाणत्वादिति भावः वीप्सायामिति व्याप्तुमिच्छा वी
प्सा व्याप्तिप्रतिपिपादयिषेति यावत् सा च प्रयोक्तृधर्मः आवाधवत् गतगत इत्युक्ते प्रियस्य विरगमनादिना पीडितो वाक्यं प्रयुक्ते इति यथा प्रतीयते तथा वृक्षं वृ
क्षं सिंचतीत्यादावपि व्याप्तिं बुबोधयिषोरिदं वाक्यमित्यवगमात् शाब्दबोधविषयस्तु व्याप्तिरेव सा च कार्त्स्न्यं तच्च आधिकारिकं सर्वे ब्राह्मणाः आमंत्रिता इत्या
दौ यथा न हि साक्षात्सर्वादिप्रयोगेपि असंकुचद्वृत्तितां [illegible] यन्तु शक्या उपपदादिमहिम्ना संकोचस्यावश्यकत्वात् यत्र तु संकोचकं नास्ति तत्रासंकोच इष्ट एव

जातोजातो निधनमुपेतीतिवत् नचैवंवृक्षमित्यादौ बहुवचनप्रसंगः बहूनां भानेपि बहुत्वसंख्यायास्तत्राभानात् प्रत्येकनिष्ठमेकत्वमेव हि तत्र तत्र भासते अतएव
प्रत्येकं विधेयसंबंधो लभ्यते तथाहि ब्राह्मणाय ब्राह्मणाय शतं देयमित्युक्ते प्रत्येकं शतं दीयते एकशेषे तु नैवं ब्राह्म णेभ्यः शतं देयमित्युक्ते नियमेन प्रत्येकं शतं दे
यमित्यर्थस्यालाभात् अतएवैकशेषे एकवचनेन यदा तु परिगृहीतद्वित्वानां वीप्सा तदा ब्राह्मणाभ्यां ब्राह्मणाभ्यां शतं देयमिति भवत्येव एवं त्रिभ्यस्त्रिभ्य इ
त्याद्यप्यूह्यं तदयं निर्गलितोऽर्थः द्विवचनैकशेषयोरनेकप्रतीतिर्नियता किंतु आद्ये एकत्वं द्वित्वं बहुत्वं वाव्यवस्थितमेव प्रतीयते पदार्थकात्स्न्ये च द्वितीये तु
द्वित्वबहुत्वे एव प्रतीयेते कात्स्न्यं तु नेति स्यादेतत् परिगृहीतैकत्वानामपि बहुत्वमभिधातुं द्विर्वचनादुत्तरकालं बहुवचनोत्पत्तिरस्तु तथाहि एकशेषे यथा
न्येषामर्थः शिष्टेन गम्यते तद्वदत्र द्विशेषेपि शिष्टाभ्यामितरार्थधीः पचतु वदंति अप्रातिपदिकत्वान्न भविष्यतीति तद्व्यापकं सरित्सरिद्योषायोषेत्यादौ उक्तदो
षानिस्तारादिति चेन्न अत्रोच्यते अंतरंगैकत्वसंख्यावरुद्धो द्विरुक्तोर्थः संख्यांतरे निराकांक्ष एव नहि वस्तुगत्या बहुत्वमस्तीत्येतावतैव तत्र शाब्दबोध आपाद
यितुं शक्यते असत्त्वार्थकेष्वपि तदापत्तेः अयोग्यं तदिति चेत् समं प्रकृतेपि अत्र च लिंगं एकैकस्य प्राचामिति निर्देश इति दिक् परेर्वर्जने अत्र वार्त्तिकं परेरसमा
सेनहूपरि त्रिगर्त्तेभ्यो वृष्टो देवः वेति चकककृत्यं तथा च कारके पूदाहृतं अपहरेः परिहरेः संसार इति उपर्यध्यधसः सामीप्ये कथं त[illegible] शिरसो घटं धारयतीति अत्राहुः
औत्तराधर्यमात्र[illegible]विवक्षितं न तु सामीप्यं अतो वस्तुतस्तत्सत्त्वेपि न द्वित्वं विवक्षा हि शब्दव्युत्पत्तेः प्रधानकारणं अत्र [illegible]ज्ञापकं मंतदाघाविरव्या सायामि
ति[illegible]योगो ज्ञापक इति वा वाक्यादेः सुंदरसुंदरेत्यादिस्वरितमाम्रेडिते सूत्रसंमतिकोपकुत्सनेषु आम्रेडितं भर्त्सने इति[illegible]र्यथायथं प्राप्नः स्तुतौ वैकल्पि
[illegible]उक्तं हि माकु सर्वः स्तुतौ वैकल्पिक इति एकं बहुव्रीहिवत् द्वे इत्यनुवर्त्तते तत्र चानुवाद्यसमर्पकं तदाह द्विरुक्त इति तेनेति यद्यप्येतौ बहुव्रीहौ विशि
ष्य[illegible]तथापि तत्र दृष्टा विधेयता वक्तैवाति दिश्यते इति भावः समुदायास्तु विनित्त चैकवचनमेव यथा चैतत्तथा प्राग्वोक्तं पूर्वभाग इति न तु [illegible] तथा
हि द्वे धा त्व[illegible]ः सर्वनाम्नो वृत्तिमात्रे इति वा स्त्रियाः पुंवदिति वा तत्राद्यः पूर्वभागस्यैव भस्त्रैषेति ज्ञापकादित्युक्तं द्वितीयस्तु समानाधिक[illegible]परत्वे [illegible]दतेन
[illegible]तिभावः एतेनेह सूत्रे द्वे इत्यस्यानुवृत्तौ एकैकस्य त्र पुंवद्भावापादनं हरदत्तादिभिः कृतं प्रत्युक्तं एकैकपेत्यत्र पूर्वभागे टापोनिवृ[illegible]ति स्व ग्रंथ

विरोधाच्च ५१२ कुमार्यानुवृत्तिस्तुस्पष्टार्था उत्तरार्थाचेत्यन्यदेतत् आबाधेच इहेतिवहुव्रीहिवद्भावादिस्त्यनुषज्यते तथाचस्त्रियाः पुंवदितिप्रवर्त्ततेनचेदमुत्तरपदंनेतिवा
च्यं आतिरूपस्यैवउत्तरपदत्वस्यापिलाभात् स्यादेतत् ननेस्यत्रनलोपोनञइत्यपितर्हिस्यादितिचेत् मैवंतत्रहिउत्तरपदाधिकारविशेषेपिनञः साक्षाच्छिष्टे
नकार्यित्वेननैमित्तभावोबाध्यते तथाचमद्रह्रदोभद्रह्रदइत्यत्रअचोरहाभ्यामितिरेफस्यद्वित्वप्रसङ्गे आकारेउक्तंनेमौरहौकार्यिणौकिंतुनिमित्तमेतौद्विर्वचन
स्येति नन्वेवं धूर्धूः पंथाःपंथाइत्यादौसमासांताःस्यादितिचेन्नसमासाच्चतद्विषयादित्यतः समासादित्यनुवर्त्तमानेसमासांताइतिपुनः समासग्रहणंहिसमासा
धिकारविहितोयः समासः तत्परिग्रहार्थंतेनातिदेशिकेसमासांतानामप्रवृत्तिरितिदिक् प्रकारेगुणवचनस्य यद्यपिभेदप्रकारइत्युच्यतेवहुभिःप्रकारै
र्भुक्तेवहुभिर्विशेषैरित्यवगमात् तथापीहविवक्षितमर्थमाहसादृश्येइतिअत्रचव्याख्यानंशरणं अस्तिचसादृश्येप्रकारशब्दःब्राह्मणप्रकारोमाणवकःब्रा
ह्मणसदृशइत्यवगमात् पुंवद्भावइति पुंवत्कर्मधारयेत्यादिसूत्रात् तच्चकोपधादिष्वपिप्रवर्त्तते तेनवहुव्रीहिवत्प्रकृतेकर्मधारयवद्भावोक्तिर्नव्या
र्थेतिवोध्यं पटुपटुरितिइहद्वित्वेनजातीयरोबाधोनेष्यतेइतिवामनः अन्यथाब्राह्मणजातीयइत्यादावगुणवचनेगुणवचनेपिभेदरूपेर्थेसावकाशोजा
तीयर्गुणवचनेषुसादृश्येपरेणद्वित्वेनवाध्येतइतिभावः जयादित्यस्तुजातीयर्विधौविशेषएवप्रकारशब्दार्थइत्याहगुणवचनस्येतिकिंसिंहोमाण
वकः अग्निर्माणवकः यद्यपीहअपिसिंहशब्दाभ्यांजघन्यवृत्त्यागुणोगम्यतेतथापिगुणवचनग्रहणसामर्थ्यात् मुख्यवृत्त्यागुणपराणामेवद्वित्वंनत्व
न्येषामित्याकरः नवंनवंप्रीतिरहोकरोतीत्यत्रवीप्सायांद्वित्वं अनेनतुद्वित्वेसुबलुक्स्यात् यथानवनवावनवायुभिराददेइतिपुंवद्भावः कथंभीतभीतइवशीतम
यूखइतिभारविः इवशब्देनसादृश्यस्योक्ततयेहप्रकारेद्वित्वायोगात् सत्यंभीतिभ्योभीतइतिकथंचिद्व्याख्येयंतेनातिभीतइतिफलितंयत्तुआधिक्येद्वेइतिवा
र्त्तिकेनभीतभीतादौद्वित्वमितिदुर्घटादिभिरुक्तंतदतिरभसोक्तिमात्रं अथकथंखिन्नःखिन्नःशिखरिषुपदंन्यस्यगंतासिपत्रक्षीणःक्षीणःपरिलघुपयःस्रोतसां
चोपभुज्येतिमेघदूतः एकस्यापिखेदावस्थासुक्षयावस्थासुचभेदंपरिकल्प्यवीप्सावोध्या अथकथंमंदंमंदंनुदतिपवनश्चानुकूलोयथात्वामितिमेघदूतः मंद
मंदमुदितःप्रययौखंइतिवतलुक्प्राप्तेवीप्सार्थस्यचासंभवादितिचेत् सत्यं स्वतोमंदगामिनंत्वांपवनोमंदंनुदतीतिकथंचिद्व्याख्येयंसिद्धस्यगतेश्चिंतनीयत्वात्

आनुपूर्व्ये इति वीप्साभावादारंभः न्यायसिद्ध इति यावद्भिः शब्दैः संबोध्यार्थमवगच्छति तावतां प्रयोक्तव्यत्वादिति भावः कर्मव्यतिहार इति क्रियाविनिमये इत्यर्थः
द्वे इति नित्यमेवेदं द्वित्वं बाहुलकं तु समासवद्भावस्यैव सुपः सुर्वक्तव्य इति अत्र केचित् द्वितीयादीनामेवेदं स्वादेशविधानं अत एवोत्तरस्य लेपि द्वितीय इत्यप्र
वनं तु प्रथमा तत्राप्येकवचनमेव न तु वचनांतरं एतच्च दुर्गपरिशिष्टकंठाभरणादिष्ववीचीनग्रंथेषु स्पष्टं तदेतदुक्तं प्राचा द्वितीयैकवचनांतत्वं परपदस्ये
ति एतच्च सर्वमपाणिनीयं भाष्यादावनुक्तत्वात् तदेतद्ध्वनयन्नुदाहरति अन्योन्याविस्यादि माघ इति स च भाष्यानुगुण एवेति भावः त।
था चार्वाचीनमतं कवयोपि नानुरुध्यंत इत्युक्तं तथा च भारविः क्षितिनभःसुरलोकनिवासिभिः कृतनिकेतमदृष्टपरस्परैरिति प्रायुंक्त अत्र हि अदृष्टः पर
स्परो यैरिति विग्रहे प्रथमांतता स्पष्टैवेति दिक् तृतीयादिषु पुंवदिति प्राचो ग्रंथं परिष्कुर्वन्नाह अत्र केचिदिति वस्तुस्थितिमाह अन्ये त्विति अतिप्रसंगा।
दिति तथा च समासशेषप्रतिबंधात् द्विर्वचनस्यापि प्रवृत्तिमाश्रित्य तद्बलेन पुंवद्भावो न शंक्यः लक्ष्यविरोधात् कारकं त्विह जानीयात् पायां मन्येत साभवेत् इत्य
कथितसूत्रस्य भाष्यविरोधाच्चेति भावः यत्तु प्राचो ग्रंथं व्याचक्षाणेन उक्तं अन्योन्यमित्यादावन्यामन्यामिति द्विर्वच[illegible]सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव इ।
ति पु[illegible]पोद्ययास्य पुंवद्भाव इत्यादि तत्सर्वं रभसात् एतच्च मूल एव ध्वनितं यदपि तृतीयादिषु पुंवदिति प्राचो ग्रंथ व्याचक्षाणेन आदः तृतीयादि
[illegible]विशेषः तेन टाप् न अत्र तृतीयादिष्विति अविवक्षितं द्वितीयायामपि पुंवत्त्वस्येष्टत्वादिति तच्चिंत्यम् पुंवत्त्वं विशेष इति विशेषाभिधानमविव
क्षितमिति [illegible]वोक्तेः परस्परव्याघातात् मूलकृता पुंवद्भावस्यास्पष्टत्वात् तदूह्य स्यां जस्येनैव व्याख्यातत्वाच्चेति दिक् यथायथमिति न लोकेति षष्ठीनि
षेधः [illegible]स्य तन्नंतत्वात् सिद्धांतकौमुदीव्याख्यासेयं प्रौढमनोरमा समाप्ता तत्र पूर्वार्द्धे तेन तुष्यतु शंकरः ॥ इति श्रीभट्टोजिदीक्षितविरचितायां सि
द्धांत[illegible]व्याख्यायां प्रौढमनोरमासमाख्यायां सुवंतं समाप्तं ॥ संवत् १९ २९ मी॰ श्रावण शुक्ल तृतीयायाम् ३ ॥

॥ इतिमनोरमासुवंतसमाप्तं ॥